येन क्रमेण गतेषु तेषु प्राचीनेषु दिनेषु वैदिकी सरस्वती भगवती विस्तरभरमुत्तरोत्तरं संबभार, तमेव नितरामुपचितप्रामाण्यनिर्भरेण वचःप्रवेकेण स्वकेन यास्कः किलोल्लिलेख। तथाहि '**साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च** (१,२०)' इति। एवं तेषु लक्षिताऽलक्ष्याऽऽर्षदृग्व्यापारेषु प्राप्तश्रुतिशेमुषीजुट्परिचितसंच्छिन्नप्रचारेषु षाट्संख्यसमन्वयेन सिद्धलोकप्रसिद्धिषु वेदाङ्गेषु तावच् **शिक्षायाश्च** स्थान-प्रयत्न-स्वर-मात्राऽऽद्यानुगुण्यतस् तत्तद्वर्णसदुच्चारणस्य, **कल्पस्य** च श्रौत-गृह्य-धर्म-भेदतस्तत्तद्विधिसंगतविविधसत्कर्मणः, **छन्दसश्च** प्रतिप्रस्तारविशेषं यति-पादाऽर्धविभागतस्तत्तद्गायत्र्यादिमितिमानस्य, **ज्योतिषस्य** च दिव्यज्योतिःसंचारतस्तत्तत्क्षत्रयोगसमयप्रतीतेः, **व्याकरणस्य** च प्रकृति-प्रत्यया़ऽऽगमाऽऽदेश-लोप-परिभाषातस्तत्तद्वाक्यस्थशब्दप्रातिस्विकवृत्तिस्थस्वरूपपरिचायकसूत्रस्य, **निरुक्तस्य** च वर्ण-लोपाऽऽगम-विपर्यय-विकार-सहकृताऽर्थवैशिष्ट्याऽऽत्मकपाञ्चविध्यप्रमाणतः परोक्षाऽतिपरोक्षवृत्तिद्वयप्रत्यक्षतासंप्रयोगतश्च तत्तच्छन्दीयप्रकृतिसिद्धसदर्थभानस्य प्रवर्तनेन यथायथं चारितार्थ्ययोगः संपेदे। यथा यथा च कालेन वाचिकमूलविप्रकर्षप्रकर्षतो वैदिकानां शब्दानां परोक्षाऽतिपरोक्षता वृद्धिमुपजगाम, तथा तथा खलु **निरुक्त-वेदाङ्गोपयोगा**ऽपेक्षाऽप्यधिकाधिकमनुबभूवे। तत्र **सौकर्यार्थमेव** च तैस्तैराचार्यैस्तत्तच्छाखीया बहवो **निघण्टुसमाम्नायाः** समामनिरे (या ७, १३)। तेषामेवाऽयमन्यतमो भवति, य एको यास्ककृतसंस्कारतः (तु. या. गपू.) मुद्रितकायः संस्तदीयेन तदाप्रभृतिस्वायत्तीकृत**निरुक्त**संज्ञाधिकारेण भाष्येण संगुप्तिमिवोपगतोऽधुनापि शाखात्रयेण (शौप १, ३०५) हस्तगतो भवति। एतन्निदर्शनत इदं विदितं भवति, यथा **निघण्टुग्रन्था नैघण्टुक-नैगम-दैवत**-प्रभेदतः काण्डत्रय्या क्रियन्ते स्म। तत्राऽपि **नैघण्टुके** काण्डे यथार्थविभागत एकार्थाऽनेकाऽभिधानानाम्, **दैवते** काण्डे च यथालोकत्रयविभागतः प्राधान्यस्तोतव्यदेवतानाम्नां सरलः संग्रह इति च, **नैगमे** काण्डे त्वनेकाऽर्थैकाऽभिधानानां चाऽनवगतार्थानां च व्यतिकरितः संग्रह इति चाऽपरः सुवेचो विशेष आधीयते स्म। यतश्च चैते समाम्नाया अप्रत्यक्षसंस्कारदुरूहाणां च संप्राप्तकिंचिद्वैशिष्ट्याऽन्तरवतां च सतां कतिपयानामेव शब्दानां संस्मारकमात्रत्वेन प्रवृत्तिमुपागमन्, तत एव प्रकृतकोषीयप्रकारकः पारायणिकः पदसंग्रह एषामविषय इति कैमुतिकायते। तदेतदत्र निदर्शनं स्याद् यत् सांप्रतिकोपलब्धिविषये **निघण्टुग्रन्थे** प्रकृतकोषीयेषु प्रथमेषु ५०० शब्देषु केवलं २४ शब्दाः समाम्नायिषतेति।

(ख) प्राक्-प्रतिष्ठाः कोषाः

अथोत्तरस्मिन्ननेहसि बहवः परिसाधितपुरातननैघण्टवविधानकनैपुणीका निघण्टुकारमतज्ञिका **अमरसिंहप्रमुखा** यांस्तांस्तान् पद्यात्मकान् कोषोत्तमानकुर्वन्, तेषां किलैष प्रविभागो भवति यथैक एकार्थाऽनेकाऽभिधानस्वरूपा एके चाऽनेकार्थैकाऽभिधानस्वरूपा इति। किन्तूभयविधानामप्येषां प्राधान्येनाऽर्वाक्काव्यीयसंस्कृतैकदृष्टीनां सतां

निगमाऽवबोधे न कश्चिदुपयोग इव संभवेत् । तथाहि । संकेत्यमानैतत्कोषग्रन्थराशिप्राथम्यभाज्यमरकोषे प्रकृतकोषीयेषु प्रथमेषु ५०० शब्देषु केवलं २५ शब्दाः समावेशमलप्सत । न त्वेष्वत्यल्पसंख्याकेष्वपि सत्सु शब्देष्वेकोऽपि वेदमात्रविषय इति खलु सुस्मरं स्यात् । यदप्येषां कोषाणां सुदुश्छदं नैगमं नैयून्यं संपूरयितुकाम इव भास्कररायो मध्येवैक्रमोनविंशाऽब्दशतकं वैदिककोषाऽऽख्यं निबन्धमकरोत्, तदप्यकिञ्चित्करमिव स्यात् । ग्रन्थो ह्यसौ स्वरूपत उक्तपूर्ववैदिकनिघण्टुपद्यीकरणमात्रत्वादनतिरिच्यमानः सन्नेव काम‌पि वस्तुनिकाये नवर्द्धिमादधीत ।

(ग) अर्वाञ्चः कोषाः

यावत् प्राचीनां पद्धतिमनु शिक्षणविधौ श्रवणस्य च कण्ठाग्रकरणस्य चाऽप्रतिहतं प्रभुत्वमभवत्, तावत् संस्कृतविद्याप्रचारौपयिकत्वेनोक्तपूर्वाश्छन्दोबद्धाः कोषा अपि महान्तमुपकारं खल्वकुर्वन् । परं यतःप्रभृति मुद्रणयन्त्रोपयोगः समारम्भि, तत एवाऽऽरभ्य नूत्नं विधानकमन्वकारादिक्रमेणोपनिबद्धानां कोषाणां साऽवसरत्वस्य प्रतीतिरप्युत्तरोत्तरं वृद्धिमगात् । सर्वप्रथमश्चाऽत्र विषये प्रयत्नः कलिकाता-पत्तनीयानां पण्डितानां स्मर्यते । तदाधारेण विलसनेन विदुषा विरचितः कोषः (१८७४) प्रकाशं प्रपेदे । तदुपरिवितताानां कृतिततीनां च मध्ये रोथ-बोह्टलिङ्काभ्यां विरचितः सैंटपीटर्ज़्बर्ग-पत्तनीयः कोषः (१९०९-३२) मुकुटमणीयते । यत् प्रकृतकोषीयेषु प्रथमेषु ५०० शब्देष्विह ४५० अपाठिषत, तदस्य वेदाध्ययनौपयिकंभावस्य निदर्शनं स्यात् । आप्टेमहाशयस्य बाह्वृचः कोषोऽपि तस्य विधानकपाटवस्य च कृतिपारम्यस्य च प्रमापको भवति । मोनियरविलिअम्जस्य कोषश्च प्राधान्येन कोषान्तरीयविषयस्य संग्राहुकत्वेन च क्वचित् क्वचित् स्वोपज्ञवस्तुनः समर्पुकत्वेन च विशेषतः सुग्रहैकपुस्तकस्वरूपत्वेन चोपकारको भवति । तारानाथीयो वाचस्पत्याऽऽख्य-कोषः (१९३०-४१) आकारत एतद्वर्गीयभारतीयकृतीनां मध्ये प्राधान्यं भजते । वेदाध्ययनौपयिकत्वेन त्वस्य न कश्चिदप्युपयोगसंकेतः सुकरः । तथाहि । प्रकृतकोषीयैः प्रथमैः ५०० शब्दैः साऽवधिकेष्वेतदीयेषु प्रथमेषु ८०० शब्देषु केवलं ४० शब्दा एव वेदगोचरत्वेनोदाह्रियन्ते ।

(घ) वैदिक्योऽनुक्रमण्यः

पुरातने कालेऽध्ययनार्थप्रयोजिताश्च कर्माऽर्थप्रयोजिताश्च सत्यस् तत्तच्छाखीयपाठानुक्रमेण मन्त्रप्रतीकानां चर्षिनाम्नां च देवतानां च छन्दसां च कण्ठाग्रकरणे साचिव्यं दधाना गद्यपद्याऽन्यतराऽऽत्मिका अनुक्रमण्यो ग्रन्थनं संप्रापुः । आदौ तावत् प्रतिशाखं मन्त्रप्रतीकादीनि चत्वारि वस्तुजातानि पृथक्त्वेन, कालेन च क्वचित् क्वचित् सर्वाण्येतानि वस्तूनि समुह्य सार्वसाधारण्येनाऽनुचक्रमिरे इत्येवमेतदीयो विकासक्रमः संभाव्येत । न त्वेतासामनुक्रमणीनां व्यूढानां वा समूढानां वापि सतीनां पदपाठीयतया विविक्ते सति नैगमपदाऽनुक्रमणे किमपि तात्पर्यमिति कृत्वा तदपेक्षयाऽपि प्रकृतकोषस्य विषयविवेकः स्पष्टो भवति ।

(ङ) एकग्रन्थीयाः पदानुक्रमाः

साकल्येन वैकांऽशेन वा वर्णमात्राऽनुक्रमेण समूढानि सन्ति तत्तद्ग्रन्थीयानि पदजातानि खलूक्तपूर्वाणामर्वाक्कोषाणां संपादन औपयिकतामभजन्तेति सहजं प्रतीयेत । एवं तावत् प्रवृत्तिकालतस् तत्तद्ग्रन्थीयपदानुक्रमसूचीनामुक्तपूर्वकोषानपेक्ष्य किञ्चिदिव पूर्वत्वमभूत् । तासां सूचीनां मध्ये कासांचिदेव पृथक् प्रकाशः समजनि । एतासां मध्ये याः प्रकृतकोषप्रस्तुतविभागीयाऽभिसंबन्धास्तासामिह संकेतः क्रियते । तद् यथा—

१. मोक्षमूलरीया बाहृची पद-सूची (१९२९-३१, १९४९-५१), यस्यां योगतोऽसमूढमेव सत् पदपाठमात्रं वर्णमात्रानुक्रमेण भृतं भवति । मन्त्राऽऽवृत्तीयानां च पदानामत्र समावेशो न भवति ।

२. इयमेव सूची स्वामिभ्यां विश्वेश्वरानन्द-नित्यानन्दाभ्यामप्यभिनवं प्रकाशमनीयत (१९६५) ।

३. आसमञ्जीये बाह्वृचे कोषे (१६३०) यथाऽऽवृत्तिपुनरुक्तभागीयपदवर्जं पदान्तरसर्वस्वस्य यथायोगं च यथास्थलं च समावेशो भवति, तथाऽनेन पदसूच्यर्थोऽपि सुसाधो भवति । इहाऽऽख्याताऽनाख्यातयोर्विभागो यथा स्फुटो भवति, न तथाऽनाख्याताऽवान्तरभेदानां सतां कृत्तद्धितसमासानां पारस्परिको विवेकः । एतदीयमन्त्यान्तरीयं परिशिष्टं प्रत्ययीययोगान्वीक्षणस्य बहूपकरोति ।

४. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर्यजुर्वेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां (१६६५) माध्यन्दिन-यजुर्वेदीयानि पदानि योगतोऽसमूढान्येव सन्ति पदपाठमनु वर्णमात्रयाऽनुक्रान्तानि भवन्ति ।

५. महा. परशुरामीयाऽजादिपदखण्डमात्री तैत्तिरीय-संहितायाः पदानुक्रमणी (१९८७) वर्णमातृकं व्यवस्थापनं विहायाऽणुमात्रेणाप्यनुकृतेतिकृतिद्विरुक्तिपर्यन्तात् सतः पदपाठाद् न भिद्यते । स्थलसंकेतोऽप्येतदीयोऽन्यतः शब्दसंख्याविमिश्रणादन्यतश्च रोमकसंख्यासंमिश्रणात् प्रेक्षकाणामप्रीतिकरः ।

६. सायमनीये काठक(चरक)यजुर्वेदीये पदानुक्रमे (१९६९) योगसमूहनमर्धजरतीयते । तथाहि । यथाधात्वाख्यातसमूहने च यथाप्रातिपदिकं नामिकसमूहने चेष्यमाणेऽपि सर्वेषामपि सकृच्छ्रुतीनां पदानां विषये धातुप्रातिपदिकाऽन्यतरप्रदर्शने च यथायोगं प्रातिपदिकाऽनुक्रमणे चाऽनादर एव प्रादर्शि ।

७. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोः सामवेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां (१९६५) कौथुम-सामवेदीयानि पदानि स्वरतः प्रतिपदसमुचितपरिवर्तनेनाऽसनाथितानि यथासंहितापाठमेव धृतानि सन्ति बुधां क्लेशैककराणि भवन्ति । तथाहि । 'अग्निः' इति वस्तुतोऽभिन्नस्वरोऽपि सन्नन्यायमेव सप्तधोल्लिखितो भवति । एवम् 'अभि' इत्यस्य दशधा-कृत्या न कोऽप्यर्थः । अन्यच्च । उपसृष्टस्याऽऽख्यातस्य विषयेऽनियमो भवति । तद्धि क्वचिदेकपदतया क्वचिच्च द्विपदतयाऽकारणमेव भिद्यते । अतः शोधकार्यस्याऽनुपकुर्वाणेयमनुक्रमणिकाऽकिंचित्करी स्यात् ।

८. द्विवि इत्यस्य शौनकाऽथर्वपदानुक्रमः (१९३८) ग्रन्थनविधानके आसमञ्जीयां बाह्वृचीं कृतिमनुविदधानस्तत्रत्येनैव संकेतेन गतार्थः सन् नितरामुपकुर्याच् शोधपराणाम् । एतदीया बाह्वृच-संमेलनविमेलनप्रक्रिया तु बाह्वृचस्थलसंकेताऽभावेऽपर्याप्ता स्यात् ।

९. शङ्करपाण्डुरङ्गपण्डितीयः शौनकाऽथर्वपदानुक्रमः (१९५५) योगतोऽसमूढः सन् पदपाठस्य यथावर्णमात्रं प्रणयनमात्रं भवति । यत्त्वनुपलभ्यमानपदपाठेषु स्थलेषु यथासंहितापाठं स्वरसंकेतोऽकारि तन्नितान्तमन्याय्यं च व्यामोहकं च स्यात् (तय. तु. अश्वस्य, मंहिष्ठः इत्येतत्स्थानीयस्तत्संकेतभारः) ।

१०. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर् अथर्ववेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणी (१९६५) नान्तरीयपूर्वस्यैव मुद्रणाऽभ्यासमात्रम्[१] ।

---

[१] उक्तपूर्वैस्तैस्तैर्वैधानिकैर्दोषैश्चाऽपर्याप्तभावैश्च साकमेतेषु पदानुक्रमेष्वन्येऽपि सर्वे एतद्वर्गीयग्रन्थनस्वरूपसहजा दोषाः सामान्येनैव सुलभा भवन्ति । त एवेह प्रविभज्य निदर्शनमात्रार्थं संकेत्यन्ते । आवसानिक्यः कोष्ठबद्धाः संख्या उक्तपूर्वाणां दशानां पदानुक्रमणीनां वर्णनक्रमाऽनुप्राप्ताः संख्या एव संवादुका भवन्ति–

१. स्थलाऽसंकेतः, तय. अश्वाः ऋ ५, ६१, २ (३); अश्वासः ऋ ५, ६२, ४ (१, २); अ-सपत्नम् शौ १९, २७, १४, अ-सतः शौ ५, ६, १ (८); असि ऋ १, ९४, ७; ५, ९, ४; ८, ९२, २८; ९३, ३३; ९५, ३; ९७, ५; ९८, ५; ६ (३); असितम् शौ १०, ४, ५; १३, असु-तृपः शौ १०, ५, ४९; अस्ताम् शौ १२, ४, ५२ (८); अस्तु ऋ १, १६२, ११; ८, १७, १० (३); अस्मत् शौ ७,

(च) बहुग्रन्थीया अनुक्रमकोषाः

अथ यथा यथा नवजागरितसंस्कृताऽभिरुचौ पश्चापथे यथोपलभ्यग्रन्थराशिपारायणिकस्य वेदाऽध्ययनस्य वेदार्थोपदर्शनप्रयोजकत्वेन च प्रभारतीविकासैतिह्यक्रमप्रतिसंदर्भकत्वेन चोपयोगस्य प्रतिभानमभूत्, तथा तथा

२४, १; १८, ४, ६९; अस्मि शौ ६, ५८, ३, अस्मे शौ १८, ४, ४६, अहानि शौ १८, १, २७; २८ (८); आ ऋ ८, ८१, ६; ९, ८१, ४ (१, २); आह शौ १८, २, ३७, स्याम शौ ९, १५, २०; १८, ३, १७; ४, ६९ (८)।

२. अप-मुद्रणम्, तय., अ॑ॅशर्म् < अ॑ॅशम्, अ॑ॅशार्य < अ॑ॅशाय, अकृष्टपच्या° < °च्या° (५); अववपति < अप° (६); अभि-शार्चः < °सार्चः (१०); उपलान् < °लान्, चकृम < चकृम मा १९, ५५, चर्य्यम् < चर्ग्यम् (४); जजायथाः < अजायथाः (५); तवसा < तुवसा (४); ततृपाणा <°पाणा (१, २); शवसानम्<°नम् (२); प्रविदम्<°द्म (४); सुप्रशस्तिम्<सु-प्रशस्तम् (९, १०), पचेत < पचते (२)।

३. मिथ्या-पदत्वम्, तय., अनुवासि < अनुवा । असि, अनुव्रताः < °ता, अनुवृद्धिम् < मनुः । ऋद्धिम् (६); अभिसंचरेण्यम् < अभि । संचरेण्यम् (३); अर्वाकः < अर्वा । अकः (६); अवसः < अवसे (४); अवान्तरा < अव । अन्तरा (६); अश्मन्वतीः < अश्मन्वती (४); अश्विना < अश्विनौ ऋ १, ११६, ५; १८२, ७; ७, ७२, ४; ७३, २, अश्विना (सं.) < अश्विना ऋ ४, ४५, ५ (३); अह्नीतमुख्यस्या < अह्नीतमुखी । अस्याः (६); आदित्याः < आदित्या ऋ २, ४१, ६ (.१, २); आसन् । इषून् < आसन्नि(न्[न्]-इ)षून् काठ ४५, २१, का < एका काठ २२, ८[३], गायत्र्यविभक्ता < गायत्री । अविभक्ता (६); ततऽअपसे < तत्ऽअपसे (२); तरत् < प्रतरत मा ३५, १० (४); परिवृताः < परिवृता ऋ ३, १७, १ (१, २); बहिष्कनीनिके < बहिः । कनीनिके, मत्सपत्नाः < मत् । सपत्नाः (६); मा (< अस्मद्-) < मा शौ ८, १, ८ (८); वाजिनः < वाजि । नः ऋ ६, १३, ६, सूनृता < सूनृताः ऋ ८, १३, ८ (१, २)।

४. मिथ्याऽवग्रहः, तय. २नि-शित- < १निशित- अ-निशित- इत्यत्र (१, २); ?अनु-दु- < *आ-नुदु- अनानुदु-, इत्यत्र अनु-भूति- < *आऽनु-भूति- अनानुभूति- इत्यत्र (१,२,३)।

५. मिथ्या-प्रातिपदिकत्वम्, तय., अहि-हन्->अहिघ्ने<१अहि-घ्न-(६); अ-निमिष्->अनिमिषम् < °मिष-, अनेन- > अनेनः < अनेनस्- (३); ऋतु- > ऋत्वा < √ऋ, √१अस् > आसन् < आसन्- (६)।

६. मिथ्या-स्थलत्वम्, तय., अप मा ५, ८६ < ५, ८[६] (४); एति ऋ ४, ७, ४; ५ < ४, ६, ४; ५ (२); सर्ववासिनीम् शौ ११, ११, ७, १६ < ११, ११, १६ (१०); प्र शौ २०, ७६, ७[२] < २०, ७७, ७[२] (९, १०); प्रवेन शौ १०, ११५, २ < २०, ११५, २, मदन् शौ २, २८, ४ < २०, २८, ४ (१०); युक्तः ऋ १, १५९, ३ < १, १५८, ३ यूथे ऋ ९, ११०, ७ < ९, ११०, ९, रुक्ष ऋ ७, १५, ३ < ७, १५, १३ (२); रोचनानाम् ऋ ७, ५, १० < ३, ५, १०, वितुर्ये ऋ १०, ३, ३ < १०, ६८, ३, विश्वध ऋ ४, १९, ६ < ४, १६, १८ (१, २); विष्ये ऋ ९, २२, २ < ४, २२, २ (२); अवस्ताम् ६०२, ८ < ८४४(= ऋ १०, १८), १२ (३).

अधिपञ्चाशेभ्योऽब्देभ्य एदमन्वभावि, यथैतदर्थं बहूनपि वैदिकान् ग्रन्थान् संमेल्य तदीयं साधारण्यं समर्पुकाश्च वस्तुवैविध्यं संग्राहुकाश्च तुलनाऽऽत्मकपरामर्शौपयिकंभावुका **अनुक्रमकोषाः** संकलनीया इति । अथ ये चैवमभिप्रायुका ग्रन्था अद्याऽवधि व्यरचिषत, ते संकेततः परिचाप्येरन् । तद् यथा—

१. **जैकबीयेऽनुक्रमकोषे** (१९४८) भगवद्गीतासहकृतानाम् उपनिषदां **वाक्यानां** प्रातिपदिकीभावित-यथावर्णमात्राऽनुक्रान्त-तदीयमुख्यपदाऽनुपातित्वेनाऽयौगिकश्चापूर्णस्थलीयश्च सन्नप्युपादेय एव संग्रहो भवति ।

२. **ब्लूमफील्डीयेऽनुक्रमकोषे** (१९६३) ऋग्वेदादीनां ११९ ग्रन्थानां यथावर्णमात्राऽनुक्रान्तानां मन्त्रपाद**प्रतीकानां** संग्रहो भवति । एषां ग्रन्थानां मध्ये ५६ एव मौलिका ग्रन्थाः साकल्येन संगृहीता भवन्ति । अन्येषां तु यथाऽपेक्षमंशत एव संकलनं व्यधायि । यत्त्विहाऽन्यथा सर्वथा बहूपकारके सति संग्रह उपलभ्यमानस्वराङ्कना अपि पाठाः स्वरराहित्येनैव प्रादर्शिषत, तदस्य गुरुदोषतामावहेत ।

३. **कीथसहकृतमैकडानलीये वैदिकाऽनुक्रमकोषे** (१९६९) वैदिककालिकसांस्कृतिकविकासं वा प्राचीनेतिहासविज्ञानप्रभृतिविषयान्तरसामान्यं वाऽधिकृत्य संकेतनिर्भरांश्च सतो यथावर्णमात्रमनुक्रान्तांस्तांस्तान् शब्दान् शीर्षकीकृत्य विरचितानां स्वपरोभयोपज्ञमतवैविध्यसारं समर्पुकाणां च **निबन्धानां** संग्रहो भवति ।

४. **हंसराजीये वैदिककोषे** (१९८३) १५ ब्राह्मणग्रन्थानधिकृत्य प्राचीननिर्वचनप्रमुखकतिपयविषयप्रदर्शनपरकाणि यथावर्णमात्रमनुक्रान्तानि संकेतितविशिष्टस्थलीयपरामृश्य**वाक्यावलि**सनाथितानि सन्ति कतिपयान्येव **पदानि** संगृहीतानि भवन्ति ।

२. सामान्येन लक्ष्यं क्षेत्रं व्यवस्था च

(क) लक्ष्यम्

१. तत्तत्प्रकारान्तरतश्चरितार्थानामपि सतां नान्तरीयपूर्वाध्यायवृत्तोपवर्णनानामनुक्रमग्रन्थानां मध्ये न केनचिदपि यावदुपलब्धनिःशेषवैदिकवाङ्मयीयपदसर्वस्वाऽनुक्रमकोषीया चिरादनुभूयमानाऽपि सती शोधाऽभियुक्ताऽपेक्षा सुपूरा भवति । तस्याः सदपेक्षायाः पूर्तिरेव तावत् प्रकृतस्य ग्रन्थस्य मुख्यं लक्ष्यं भवति ।

२. **अन्यच्च** । एकान्तरीयोत्तराध्यायसमर्पितया प्रक्रिययेह प्रतिशब्दं विशेषेण योगचिन्ताप्रयोजकं सद् विविधं वस्तुजातं तथा संगृह्यते, यथैतदाधारेण पुरा प्रक्रियमाणे **वैदिकशब्दार्थकोषे** साक्षाच्छ्रुत्यर्थपर्यालोचनमप्रतिहतवेगं प्रवर्त्तेतेति ।

(ख) क्षेत्रम्

१. अत्र तावद् अद्य यावत् ४०७ आधार-ग्रन्था वृत्तसंग्रहाः समपत्सत । आऽन्त्यखण्डीयप्रकाशं चैषा संख्या ४२५ भावुकेति संभावनीयम् ।

२. अस्यां तावत् संख्यायां मुख्यात् सतो वैदिकात् साहित्याद् बाह्यानां सतां स्वरूपतो विषयतश्च तस्य संनिकर्षविशेषमादधानानां च तत्तदङ्गोपाङ्गसामस्त्याऽभिसंबद्धानां चाऽपरेषामपि बहूनां ग्रन्थानां समावेशो भवति ।

३. अथाऽऽधारग्रन्थाः स्वरूपविभागतः संकेत्यन्ते । तद् यथा—

(क) **संहिताः**, (ख) **खिलसूक्तानि**, (ग) **ब्राह्मणानि**, (घ) **आरण्यकानि**, (ङ) **उपनिषदः**, (च) **श्रौतसूत्राणि**, (छ) **गृह्यसूत्राणि**, (ज) **मन्त्रपाठाः**, (झ) **धर्मसूत्राणि**, (ञ) **पितृमेधसूत्राणि**, (ट) **शुल्बसूत्राणि**, (ठ) **परिशिष्टानि** (ड) **अनुक्रमण्यः**, (ढ) **शिक्षाः**, (ण) **प्रातिशाख्यानि**, (त) **पाणिनीये सूत्रपाठः**, **उणादिपाठः**, **धातुपाठः**, **गणपाठः**, **फिट्सूत्राणि**, **वार्त्तिकानि**, **इष्टयः**,

गतपूर्वतत्तद्विभागीयलक्ष्यसर्वस्वं च, (थ) निघण्टवः, (द) निरुक्तम्, (ध) छन्दः, (न) ज्यौतिषम्, (प) पूर्व-मीमांसा, (फ) उत्तर-मीमांसा, (ब) सांख्यम्, (भ) योगः, (म) भगवद्गीता च।

(ग) व्यवस्था

१. प्रकृते ग्रन्थ उपयुज्यमाना एते विभागा यथा समूह्यन्ते तथाऽधुना संकेतो भवति। तद् यथा—

१. संहिताः खिल-सूक्तानि च, २. ब्राह्मणान्यारण्यकानि च, ३. उपनिषद उत्तर-मीमांसा सांख्यं योगो भगवद्गीता च, ४. अवशिष्टाः षोडश विभागाश्च।

२. यथैतेषां विभागानां सामान्येन संहिता-ब्राह्मणोपनिषत्-सूत्राऽऽत्मतया चतुर्व्यूढानां सतामन्योन्यविवेक-प्रयोजिततत्तद्व्यूहीयवैशेष्यनिर्भरः स्वाध्यायाऽभ्यास उत्तरोत्तरं संप्रवर्तेत, तथा प्रतिव्यूहं पार्थक्येन प्रवर्तमानाः प्रकृतग्रन्थीयाश्चत्वारो विभागा अक्लृप्सत। तद् यथा। **प्रथमो** विभागः सांहितिकः, **द्वितीयो विभागो** ब्राह्मणा-ऽऽरण्यकीयः, **तृतीयो** विभाग औपनिषदः, **तुरीयो** विभागः सौत्रश्च। अपर आवसानिकः **पञ्चमो विभागो**-ऽपि क्लृप्तो भवति, यस्मिन् प्रथमेषु चतुर्ष्वपि **विभागेषु** संगृहीतानां सतां शब्दानामाद्याऽन्त्योभयवर्णाऽनुक्रमेण सकलपाठश्च संस्मरणीयपरामर्शीयैतत्क्षेत्रीयग्रन्थराशिपरिचयीयोपयोगवन्ति कानिचिद् विषयान्तराणि च समा-वेशायाऽभिप्रेयन्ते। एते पञ्च विभागाश्च यथाप्रकृतखण्डं प्रविभज्य प्रकाश्यन्ते।

३. आधार-ग्रन्थाः

(क) अथ प्रकृते विभागे येषां संहिता-ग्रन्थानां समावेशो भवति[1], त इम इह नामोद्देशमात्रतः कीर्त्यन्ते। तद् यथा—

१. **ऋग्वेद-संहिता** (संक्षे. ऋ.)
२. **ऋग्वेद-खिलसूक्तानि** (संक्षे. खि.)
३. **वाजसनेय** (माध्यन्दिन)-**शुक्ल-यजुर्वेद-संहिता** (संक्षे. मा.)
४. **वाजसनेय** (काण्व)-**शुक्ल-यजुर्वेद-संहिता** (संक्षे. का.)
५. **तैत्तिरीय-कृष्ण-यजुर्वेद-संहिता** (संक्षे. तै.)
६. **मैत्रायणीय-कृष्ण-यजुर्वेद-संहिता** (संक्षे. मै.)
७. **काठक** (चरक)-**कृष्ण-यजुर्वेद-संहिता** (संक्षे. काठ.)
८. **कपिष्ठल** (कठ)-**कृष्ण-यजुर्वेद-संहिता** (संक्षे. क.)
९. **कौथुम-सामवेद-संहिता** (संक्षे. कौ.)
१०. **जैमिनीय-सामवेद-संहिता** (संक्षे. जै.)
११. **शौनकीयाऽथर्ववेद-संहिता** (संक्षे. शौ.)
१२. **पैप्पलादाऽथर्ववेद-संहिता** (संक्षे. पै.)[2]

(ख) कस्याः कस्याः संहितायाः प्राक्प्रोक्ताः पदपाठा इदानीमुपलब्धिविषया भवन्ति, किंलक्षणश्च तदीयः प्रकृतग्रन्थीयाऽभिसंबन्ध इत्येतद्विस्तर उपरि उपादीयमानः द्रष्टव्यः (तु. भू. ४, क, ७)।

---

[1] एतद्ग्रन्थीया विचित्रपदाः पुष्पिका अप्यत्र द्वितीयखण्डात् प्रभृति समाविष्टा द्रष्टव्याः।

[2] एतदीयदेवनागरमुद्रणसापेक्षः सन्नस्या आ षोडशकाण्डान्तादिह समावेशः समभावि। चरम-काण्डचतुष्कं तु विभागाऽन्ते परिशेष्यमाणं द्रष्टव्यम्।

(ग) आधारग्रन्थीयपरिशोधपरिज्ञानयोर्विषये तत्र तत्रोपयुक्तचरीणां चोपयोक्ष्यमाणानां च प्रागर्वाग्भाष्यटीकाटिप्पणनिबन्धादिप्रकारककृतीनां तन्नामतश्च तत्कर्तृनामतश्च संक्षेपेणूल्लेखो भवतीतीहापि तत्पुनर्वचनेऽभिरुचिर्न भवति ।

४. विधानक-सारसंग्रहः

१. सामान्य-प्रकरणम्

(क) सामग्र्याः संपूर्णत्वम्

एतद्ग्रन्थीये प्रकृते विभाग आधारभूतेषु श्रुतिग्रन्थेषु यावन्मात्रप्रयुक्तस्य सत एकैकस्य शब्दस्यैकैकस्य रूपस्य स्थल-नैःशेष्येण समावेशोऽकारीत्येतदीयं विशिष्टं लक्षणं भवति । एषाऽनतिशयितपूर्वकायविस्तरा सती शब्दसामग्रीहैव तावत् सर्वप्रथमं सर्वाङ्गीणया यौगिक्या प्रक्रियया व्यवस्थाप्य यथावद् निर्दिश्यते । अथ विश्वप्रागर्वाग्विबुधीयतत्तद्वैदिकविषयीयतत्तन्मतसामस्त्योल्लेखाऽऽलोचनोभयनिर्भरैश्च तस्य तस्य पाठस्य स्वरूपं च तस्य तस्य शब्दस्य व्युत्पत्तिं च तत्र तत्र विचारणीयतयोपतिष्ठमानास्तास्ताः सांहितिकीर्वा वैयाकरणीर्वा वाक्यान्वयीया वा सौवरीर्वा छान्दसीर्वाऽर्थमीमांसीया वा सांशयिकीः स्थितीश्चाधिकृत्य प्रवर्तमानैश्च प्रतिपृष्ठीयैष्टिप्पणैः समग्रोऽयं ग्रन्थो मूलार्थविशदीकृतिप्रयोजनिकया वृत्त्येव सनाथ्यते ।

(ख) आधिश्रुतिकौ संवाद-विसंवादौ

१. यदा बाह्वृचे श्रावितपूर्वः सन् पाठः पुनः श्राव्यते, तदा तस्य तत्तच्छब्दविशेषीयपुनःपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

२. यदा बाह्वृचः श्रुतिविशेषो ग्रन्थान्तरीयतया श्रुतिगोचरतामुपैति, तदा तस्य तत्तच्छब्दविशेषीयतद्गतपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

३. यदोक्तपूर्वस् तत्तच्छब्दविशेषीयः पाठभेदः स्वर-प्रत्ययान्यतरमात्रीयस्वरूपो भवति, तदा बाह्वृचमूलपाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. ३४८[c] ।

४. यदोक्तपूर्वस्तत्तच्छब्दविशेषीयः पाठभेदस्तत्पर्यायाऽपर्यायान्यतरभूतशब्दान्तराऽऽत्मको भवति, तदापि बाह्वृचमूलः पाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. १५[k] ।

५. यदा तूक्तपूर्वस्तत्तच्छ्रुतिविशेषीयः पाठभेदस्तच्छब्दविशेषीयप्रातिस्विकस्थानाऽऽपन्नशब्दान्तरतया व्यवस्थापयितुं दुःशको भवति, तदा बाह्वृचं मूलं स्थलाङ्कनमात्रेण विज्ञापितं भवति[१], तय. पृ. ३९[c] ।

६. बाह्वृचभिन्न-ग्रन्थान्तरीया अन्योन्याऽपेक्षया वर्तमानाः पाठभेदा अप्येवं यथायथं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ३४[e], ६५[i], ८०[c], ३७३[k] ।

७. तत्तद्ग्रन्थीयमूलकोषीया विशिष्टपाठभेदीयाः संकेता अपि यथासंभवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ४७[b], ६१[k], ३५४[a], ३६७[a] ।

८. प्रागर्वाग्भाष्योपलभ्या दुरूहपाठविमर्शीया विशिष्टसंकेता अप्येवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ६८[f], ७८[f], ४२६[a] ।

---

[१] उपरितनात् खण्डात् प्रभृति बाह्वृचाऽपेक्षयाऽपि तुलनात्मकाध्ययनस्य सौकर्यसंपादनार्थं ग्रन्थान्तरीयास्तत्पाठभेदा अपि समानमेव टिप्पणेषु प्रदर्शयिष्यमाणा द्रष्टव्याः ।

९. कृष्णयजुर्वेदीयब्राह्मणभागीया शब्दावलिश्च श्रुत्यन्तरविवेकतोऽध्ययनसौकर्यार्थं संकेतपार्थक्येन निर्दिष्टा भवति ।

(ग) पाठ-प्रतिष्ठापनम्

१. इहत्यादेकैकस्माद् निर्देशाच्च प्राक् तद्विषये वर्णतः स्वरतो योगतोऽन्वयतश्चाऽसकृच्च निःशेषं च स्थितिसमीक्षणं व्यधायि । येषां ग्रन्थानां प्राचीनाः पदपाठा उपालप्सत, तदीयानां निर्देशानां समये तेषामुपयोगोऽकारि । येषां तु ग्रन्थानां प्राचीनाः पदपाठा नोपालप्सत, तदीयनिर्देशसौकर्य्यार्थं तेषां प्राग्विधयैव नवीनाः पदपाठा अकृषत । एवं यावन्मात्रं प्रागर्वाग्भाष्यीय उपयोगः समभूत्, तावन्मात्रमसौ सम्यगकारि । दीर्घप्रततस्य नितरां परिश्रमसाध्यस्य चाऽस्य पर्यालोचनाऽऽत्मकस्य वैदिकग्रन्थाऽध्ययनकार्यस्य संपादनात्तावदयमनुभवः प्रापि यथा पाठपरिशुद्धिमुद्दिश्य सर्वे एवैते ग्रन्थाः पुनःसंस्करणविशेषाऽपेक्षा भवन्तीति ।

२. अस्याश्चाऽऽधारग्रन्थीयाया अपेक्षाया विषये खलु स्थले स्थले तां तां विकटां स्थितिमुद्देशतश्च यथासंभवं समाधानतश्चोदाहरन्ति टिप्पणानां शतानि साक्षीणि स्युः । एषां टिप्पणानां तावदेते मुख्याः प्रकारविशेषा भवन्ति—

(अ) यत्राऽदर्शितसमाधानं दुरूहतामात्रं संकेतितं भवति, तय. पृ. ७[k] ।

(आ) यत्र समाधानप्रयत्नसहकृता दुरूहता संकेतिता भवति, तय. पृपृ. १९९[c], ३७३[b] ।

(इ) यत्र शुद्धतया प्रसिद्धपूर्वाणां पाठानां विषये सांशयिकत्वं प्रदर्शितं भवति, तय. पृपृ. ६,[g] ६६[c] ।

(ई) यत्र शुद्धतयोरीकृतपूर्वाणां पाठानां प्रत्याख्यानमिष्टं भवति, तय. पृपृ. ७[j], ४०[f], ७७[p], १४६[f] ।

(उ) यत्र यथाऽभिप्रेतं शोधविशेषः समर्थितो भवति, तय. पृपृ. ७[m], १०१[d], १७०[e], २३०[b], ३०९[r] ।

(ऊ) यत्र ग्रन्थविशेषीयमूनमिव सद् यथोपलम्भ-संस्करणं पूर्तिमिव नीतं भवति, तय. पृपृ. ७[o], १७[p] ।

(ऋ) यत्र प्राचीनाः कृतयोऽर्घत आलोचिता भवन्ति, तय. पृपृ. १०[g], ३६[c], १७६[h], २०६[j] ।

(ॠ) यत्राऽर्वाक्तन्यः कृतयोऽर्घत आलोचिता भवन्ति, तय. पृपृ. ११[d], १८[h], २२६[b], २३४[h] ।

(घ) पाठानामर्थतोऽनुसंधानम्

यद्यपि श्रौतपदजातीयवैयाकरणव्यवस्थितिसहकृतनिर्देशमात्रोद्देशस्य सतोऽस्य ग्रन्थस्य श्रुतिपरंपरीयमर्थाऽनुसंधानं विषयो न भवति, तथाऽप्युक्तपूर्वपाठप्रतिष्ठापनशोधनप्रसङ्गाऽनुरोधतस्तत्र तत्र तदपि प्रसक्तं भवति, तय. पृपृ. १०[g], १४[h], १८[i], ३८[b], ४२[f], ५८[i], ५९[g] २५८[b], २५१[b], २८१[b] ।

(ङ) श्रौतश्छन्दोविमर्शः

तत्तत्पाठपर्यालोचनप्रतिष्ठापनीयप्रयत्नप्रयोजितश्चेह तस्य तस्य मन्त्रस्य यथातत्तत्स्थितिविशेषविचारं छन्दोविमर्शोऽप्यानुषङ्गिकधर्मभाक् सन् समावेशं लभते । यच्चाऽस्मिन् विषये छन्दोऽनुलक्षणीकरणतत्त्वानुप्रापणोभयप्रयोजनकं विधानकं प्रवर्तितं चाऽनुसृतं च भवति (तय. पृपृ. ४५८[i], ४९४[k], ५००[j]) तस्याऽपराङ्गभावेन च पूर्णभावेन च क्रियमाणोऽभ्यासक्रमो भूयिष्ठानां पाठानां यथायथं प्रातिष्ठापुकः स्यादिति प्रतीयते ।

(च) सांहितिकं दीर्घत्वम्

संहितापाठीयं दीर्घत्वं स्वरूपभेदतस्त्रेधाविशिष्टाया निर्देशिकायाः प्रयोजकं भवति । त इमे तावत् त्रयोऽपि विशेषा भवन्ति—

१. यत्र (यथा मै.) उदात्ताद्यच्के पदे परतः पदान्त्याऽऽकारात्मिका श्रुतिर् अस्, ए इत्येतयोर्मध्येऽन्यतरेण समूला भवति, तदाऽसौ यथास्वमूलविवेकतो व्यवस्थाप्य प्रत्यापन्नतन्मूलस्वरूपतया निर्दिष्टा भवति, टिप्पणगतश्च तद्विस्तरो भवति, तय. पृ. ५६१[a] ।

२. कानिचित् तिङ्रूपाणि चाऽव्ययानि च ह्रस्वदीर्घोभयविधान्ततया श्रूयन्ते । तानीमानि प्राक्तनेषु पदपाठेषु नित्यं ह्रस्वान्ततयैव प्रदर्शितानि भवन्ति । इह तावत्तदीयस्याऽस्यौभयविध्यस्य सूचनार्थं समूढस्य सतस्तदीयस्य स्थलाङ्कनस्य मूर्धन्यः संस्तदुभयप्रकारसाधारणभूत एव तदीयो निर्देशो भवति (तु. भू. ४, ४, ग), तय. अ॒ध > धा, अभि॒ > भी॒, अभि√रक्ष् > अभि॒···र॒क्षथ > था, √ अव् > अ॒व > वा ।

अथ यदा कश्चिदुपसर्गः पूर्वपदतां गतोऽनयैव द्विविधतया श्रूयते, तदाऽसावपि तदुभयप्रकारसाधारणभूतमेव निर्देशं भजते, तय. १अनु, >नू-राध॒- ।

३. यङि परतोऽभ्यासांशः प्रायेण दीर्घान्ततया श्रूयते, क्वचिदेव त्वपि ह्रस्वान्ततया वा ह्रस्वान्तमात्रतया वा । इहैतत् त्रैविध्यं यथायोगं संहितापाठमनु निर्दिष्टं भवति, तय. वावृध॒ध्यै, ततृषाण॒- इति तातृषाण॒- इति च, ततृदान॒-(वैतु. पदपाठानां प्रायिकी ह्रस्वान्तता-मात्रीया क्वाचित्क्येव च दीर्घान्तततामात्रीया प्रवृत्तिः, तय. ववसान॒-ववृषाण॒-, चाकनत्, चाकशीति) ।

(छ) प्राक्तनाः पदपाठाः

१. ऋग्वेदस्य च माध्यन्दिनतैत्तिरीययोर्यजुर्वेदयोश्च कौथुमस्य सामवेदस्य च शौनकीयस्याऽथर्ववेदस्य च प्राक्तनाः पदपाठा मुद्रिताः सन्त उपलभ्यन्ते । मैत्रायणीयः पदपाठोऽप्यंशतस्तत्संस्करणीयेषु टिप्पणेषु समाविष्टो भवति[1] ।

२. अस्मिन् कोष एतेषां पुराणानां पदपाठानामुपयोगप्रकारमधिकृत्य तावदिमे केचिद् विशेषा भवन्ति—

(अ) यदाऽत्रत्यो निर्देशः पदपाठादविशिष्टो भवति, तदा पदपाठविषया परामर्शिका नैव क्रियते ।

(आ) यदाऽत्रत्यो निर्देशः पदपाठाद् विशिष्टो भवति, तदा पदपाठो नित्यं टिप्पणगोचरीक्रियते प्रायेण तत्त्वत आलोच्यते च, तय. पृपृ. ८५[b], २१९[c], २४२[d], २९५[c], ३४६[c], ५८७[a] ।

(इ) यदाऽत्रत्यो निर्देशः सांशयिको भवति, तदा पदपाठष्टिप्पणे दीयते, तत्तत्पक्षोपवर्णनं चाऽपि तत्रैव क्रियते, तय. पृपृ. ६[a], १४७[b], १५४[d] ।

(ई) नञ्समासेषु नञ उत्तरमवग्रहो न क्रियत इति पदपाठीया सामान्या प्रवृत्तिर्भवति । इह तावद् यथापेक्षं नञ उत्तरमप्यवग्रहः क्रियते । ततः खल्व् अ॒-पतिघ्नी- इत्येवंप्रकारकाणां समासोत्तरपदानां सतां नञ्-समासानां स्वरः सुस्पष्टतरः स्यात् (वैतु. अ॒पति-घ्नी- इति पदपाठीयो निर्देशः, यत इह पृथग्भूतेन पति-शब्देन नञः समासोऽनभिप्रेतो भवति, पति-घ्नी॒- इत्येतेन समासेन चाऽभिप्रेतो भवतीति दुर्वचमिव स्यात्) ।

(उ) यत्राऽप्यन्यत्र संदिग्धस्वरूपेषु समासेषु पदपाठीयाऽवग्रहाऽप्रवृत्तिर्भवति, तत्र सर्वत्रेहाऽवग्रहः क्रियते च टिप्पणीयेनाऽऽलोचनेन सनाथ्यते च, तय. पृ. ६१[a] ।

---

[1] एतदीयः समग्रो मूलकोषोऽप्येकः पञ्चापविश्वविद्यालयपुस्तकालयीयतयाऽस्मत्पार्श्ववर्तितां भजते । यस्तु रावणकर्तृकत्वप्रसिद्धिबाह्वृचपदपाठीयसप्तमाष्टकमात्रीयोऽप्येको मूलकोष उक्तपूर्वे पुस्तकालये विद्यते, तस्य शाकल्यप्रसिद्धेः पदपाठान्नितरामभेदाद् रावण इत्यत्र प्रतिलेखक एव कश्चित् स्यान्नतु स्वतन्त्रपदपाठकारः कश्चिदिति स्पष्टम् ।

(ऊ) यदाऽन्त्यनिर्देशाऽवग्रहीया स्थितिः पदपाठाऽवग्रहीयायाः स्थितेर्भिन्ना भवति, तदाऽयं स्थितिभेदष्टिप्पणे सम्यगालोचितो भवति, तय. पृपृ. ६१[d], १५६[l], १६३[m]।

(ऋ) श्रौता उपसर्गा उपसर्ज्यतिङपेक्षया व्यवहिताश्च भवन्त्यव्यवहिताश्च । ये तावद् व्यवहिता भवन्ति ते नित्यं सस्वरा भवन्ति, ये त्वव्यवहिता भवन्ति त उभयथा भवन्ति सस्वराश्च निःस्वराश्च । तद् ये निःस्वरा भवन्ति त एव पदपाठेषु पूर्वपदतया निर्दिश्यन्ते नेतरे । इह तु व्यवहिता अप्यव्यवहिता अप्यथ निःस्वरा अपि सस्वरा अपि येऽपि तिङ्-सापेक्षा भवन्ति, ते सर्वेऽपि पूर्वपदतया निर्दिष्टा भवन्तीत्येवमयं सहस्रशो निर्दिष्टिभेदकरः सुमहान् विशेषो द्रष्टव्यः।

(ॠ) संहितापाठीयस्य दीर्घत्वस्य निर्देशस्य विषये च यथाऽस्य कोषस्य पदपाठेभ्यो विसंवादाऽतिरेको भवति तथोपवर्णितचरमेव भवति (तु. भू. ४, १, च)।

(ज) वर्गिता-निर्देशिका

१. इह तावदाधारग्रन्थीयानि पदानि तिङन्तानि सुबन्तान्यव्ययानि चेति त्रेधा वर्गीकृत्य च यथासंभवं यौगिकीभाव्य च सामान्येन सतैकेन वर्णमात्राऽनुक्रमेण निर्दिष्टानि भवन्ति।

२. यावत् प्रतिवर्गीया नैर्देशिका विशेषा उपरितनानां यथास्वप्रकरणानामेव विषयतां भजेरन्, सामान्यायाः सत्या निर्देशव्यवस्थाया विषये केचिद् विशेषास्तावदिहाऽप्युल्लिख्येरन् —

(अ) तिङन्तीये वर्ग उपसृष्टाऽनुपसृष्टोभयविधानां सतां मूलधातूनां नामधातूनां च यथोपलम्भं सर्वलकारीयाणि रूपाणि समाविष्टानि भवन्ति ।

(आ) शुद्धक्रियाख्यानि रूपाणि च णिच्प्रभृत्यर्थविशिष्टक्रियाख्यानि प्राक्रियिकाणि रूपाणि च पृथगुपवर्गकल्पनेनाऽन्योन्यतो विभज्यन्ते । एवं सार्वधातुकनिष्पन्नानि रूपाण्यार्धधातुकनिष्पन्नेभ्यो रूपेभ्यो निर्देशक्रमपार्थक्येन विविच्यन्ते ।

(इ) सुबन्तानि रूपाणि यथास्वधातु-साक्षात्परंपरिताऽन्यतराऽभिसंबद्धप्रातिपदिकशिरस्कतया निर्दिश्यन्ते । अस्पष्टयोगत्वाद् धातवीयवंशपरंपराबाह्यनिर्देशानां सतां प्रातिपदिकानां च योगपरीष्टिष्टिप्पणगता भवति ।

(ई) तद्धिता यथास्वप्रकृतिभूतेभ्यः कृद्भ्यः श्रेणि-भेदेन निर्दिश्यन्ते ।

(उ) कृतां च तद्धितानां च पूर्वपदतश्चोत्तरपदतश्च सकलं सामासिकं वृत्तं यथायथं निर्दिश्यते च तुलनात्मकाऽध्ययनविशेषप्रयोजनकेन प्रतिपरामर्शिकासुभिन्नेण सनाथ्यते च ।

(ऊ) कार्तं वा ताद्धितं वा सामासिकं वा स्त्रीवृत्तं यथायोगप्रतिविविक्तेन सता श्रेणिबन्धेन पृथङ् निर्दिश्यते ।

(ऋ) यथायोगं निर्दिष्टानां सतां सुब्योगिनां प्रातिपदिकानां वैयक्तिकसंज्ञात्वेन वा सामान्यसंज्ञात्वेन वा भावपदत्वेन वा सर्वनामत्वेन वा विशेषणपदत्वेन वा क्रियाविशेषणत्वेन वा कथंचिदन्यथात्वेन वा यथाश्रुति श्रुतिवैशिष्ट्यं यावदपेक्षं टिप्पणेषु निर्दिश्यते ।

(ॠ) विलक्षणानि सन्ति तिङ्-रूपाणि वा सुब्-रूपाणि वा द्विर्निर्दिश्यन्ते, यौगिकेनाऽनुक्रमेण च प्रतिपरामर्शिकासनाथितेन सता यथाप्रातिस्विकेनाऽनुक्रमेण च ।

(ऌ) यौगिकत्वेन चाऽयौगिकत्वेन चोभयथाऽपि निर्देशभाञ्जि सन्त्यव्ययानि सौपतैङाभ्यां वर्गान्तराभ्यां सुवेचानि भवन्ति ।

(ए) अव्ययीया पृथक्-कृतिस्त्वेषा यथाप्राक्प्रसिद्धिप्रेक्षणसौकर्यमात्रप्रयोजना भवति। व्याकृतिसीमान्तदृशा हि तत्तदव्ययं तत्तत्प्रातिपदिकीयतत्तद्विभक्तीयं रूपं क्रियाविशेषणत्वेन वोपसर्गत्वेन वा समुच्चयपदत्वेन वा तत्तद्वृत्तिवैशिष्ट्ययुतं सद् भूयो भूयोऽभिन्नतयैव श्रूयमाणत्वात् कालेनाऽऽसौपमिल्यस्याः प्रतीतेर्विषयोऽभूत् । एवं च तावदास्थायेहाऽनेकानि प्राक्प्रसिद्धितोऽव्ययाख्यानि सन्त्यपि पदानि सुबन्ताऽन्तरसन्यायतया प्रातिपदिकशिरस्कीकृत्य निर्दिष्टानि भवन्ति । अन्यानि चापि बहून्येवमनिर्दिष्टान्यपि सन्ति टिप्पणेषु तथात्वेन व्याख्यातानि भवन्ति ।

(ऐ) कर्मप्रवचनीयानामन्यत उपसर्गगतीनां चाऽन्यतो विवेक इह सम्यक् प्रदर्शितो भवति ।

(ओ) प्राक्प्रसिद्धित उपसर्गेतिसामान्यसंज्ञावतामव्ययविशेषाणामिह यथाश्रुतिलक्षणतः क्रियाविशेषणाऽऽत्मकान्यव्ययानि, औपसर्गिकाण्यव्ययानि, उपसर्गात्मकान्यव्ययानि चेति त्रेधा विषयविभागः कृतो भवति, तय. पृपृ. ३१९^{k}, ३२३^{v} ।

(औ) प्रतिसमासं यथाश्रुत्यर्थालोचनमिह तत्पुरुषादिभेदनिर्देशः कृतो भवति यथायोगमवग्रहश्च । अनया विधया खलु तत्तत्समासवच्छ्रुतिभागीया वृत्तिरिव विरचिता भवति ।

(अं) यद्यपि सवर्णानां सतां भिन्नवर्गीयाणां शब्दानां संकेतविशेषप्रयोजितो वर्गविवेक एव पर्याप्त इति कृत्वा सामान्येन तदीयः सांख्यो विवेकोऽन्यथासिद्धत्वादुपेक्षितो भवति, तथापि यत्र यत्र स्वरतो वाऽर्थतो वा वैशद्याऽर्थं सांख्यो विवेकोऽपेक्षितो भवति, तत्र तत्र सोऽपि कृतो भवति ।

(झ) स्वरः

यद्यप्युपरिष्टात् सौवरं प्रकरणं पृथग् विरचयिष्यमाणं भवति, तथाऽपि तद्विषयीयं यत् किंचित् सामान्यलक्षणं भवति, तत्तावदिदं सूच्यते—

१. एकैकः सौवरो निर्देशष्टिप्पण उपपादितो भवति ।

२. यथाश्रुतिशाखाभेदमुपलभ्यमानः स्वरभेदष्टिप्पणे सूचितश्च व्यवस्थापितश्च भवति, तय. पृ. ३७०^{a} ।

३. यथाऽपेक्षाविशेषं स्वर-शोधः कृतश्च यथायथं सूचितश्च भवति, तय. पृपृ. ७^{m}, ३७^{c}, १४५^{g}, २२१^{f} ।

४. अनङ्कितस्वरग्रन्थीयः स्वरः क्वचिदेवेहाऽङ्कितो भवति, तय. पृपृ. ६०^{f}, ६५^{e} ।

५. यद्यप्युदात्तश्च जात्यः स्वरितश्च यथाश्रुति सर्वत्राऽङ्कितौ भवतस्तथाऽप्युदात्त एव मौलिकः स्वर इत्यास्थाय जात्यस्य स्वरितस्य तन्मूलकतया प्रतिपादनेन तदीयः क्षैप्रस्वरितेनाऽभेदाऽन्वय इष्टो भवति, तय. पृपृ. ५३७^{l}, ५६६^{d} ।

६. यद्यप्येकपदाऽवच्छेदेन द्विस्वरत्वमपि यथाश्रुतीहाङ्कितं भवति, तथाऽप्यस्मिन् विषय एवमास्थितं भवति, यथा मौलिकस्थित्यनुदृष्ट्या सर्वत्राऽपि द्विस्वरवदेकपदताया विषय एकैकस्वरवतोर्द्वयोर्द्वयोः पदयोर्यथारूपयोश्च यथास्वरयोरेव च सतोः प्रारम्भिकसमासस्वरूपभूतं पारस्परिकसंनियोगमात्रं भवतीति च तस्मिंश्च संनियोगे सति नैरुक्तिकवर्णलोप-विकाराभ्यां च तयोः पदयोर्द्वयोः सतोरप्येकतेवाऽखण्डरूपा संपन्ना भवतीति च (तु. यथोत्तरखण्डम् एतवै, वायु, बृहस्पति- इह च पृपृ. १७८^{i}, १८४^{f}, १८५^{p}, ३१७^{i}, ३१९^{c}) ।

७. अत्रत्य उदात्तस्य चोदात्तभूमिस्वरितस्य च यथायोगमङ्कनप्रकारो नूतन इव प्रतीयमानोऽपि सन् पुराणाऽऽधारसुप्रतिष्ठो भवति। अस्य प्रकारस्य प्रकामं सारल्याच्च साक्षादिव प्रतीतिकरत्वाच्चेत ऊर्ध्वं करिष्यमाणेषु वैदिकग्रन्थीयेषु संस्करणेष्वपि तत्स्वराङ्कनसाम्यकरी सती महती खलूपादेयता स्यात् ।

(अ) व्युत्पत्ति-योगः

१. यास्क-पाणिनिमूर्धन्यानां प्राचां निरुक्तव्याकरणप्रधान-शब्दमीमांसायाः प्रवर्त्तकानामाचार्याणां मतेन प्रत्येकमाख्यातं च नाम च योगजं भवति। तत्र तावदाद्यः प्रकृत्यात्मको भागो धातुरित्युच्यतेऽन्यश्च तिङ्सुबन्यतर-विभक्त्याऽऽत्मकश्चाऽन्यतः कृत्तद्धिताऽन्यतरनामकरणाऽऽत्मकश्चाऽन्यतः प्रत्यय इति। केवलौ सन्तौ धातुश्च प्रत्ययश्च न प्रयुज्येते। तदीय-योगसिद्धानि सन्ति शब्दरूपाण्येव तु वाग्व्यवहारं लभन्ते। प्रत्येकं चेदृक्-स्वरूपं शब्दरूपं तत्तत्प्रत्य-यीयेन काल-संख्या-कारकाऽऽदिभेदकोपाध्यात्मकेनाऽर्थेन युक्तं सन्तं क्रियामात्रस्वरूपं धात्वर्थमाह। तथाहि। **'अत्ता'**, **'अदनम्'**, **'अन्नम्'** इत्येतेषु त्रिष्वपि शब्दरूपेषु समानधात्वंशीयभक्षणाऽऽत्मकाऽर्थवाचकत्वसामान्ये सत्यपि यत्तदीयं यथाक्रमं कर्तृपरत्वं च भावपरत्वं च कर्मपरत्वं च परिणतं भवति, तत्तद्गत-तृच्-ल्युट्-क्त-प्रत्ययीययथायोगोपाधिसंभवं भवति। एवं तावद् धातूनां तत्तत्प्रातिस्विकाऽर्थवत्त्वं भवति प्रत्ययानां तु प्रातिस्विकाऽर्थवत्त्वाऽभावे सति धातवीय-तत्तत्प्रातिस्विकार्थोपाधायकमात्रत्वमिति विवेकः स्पष्टो भवति।

२. यद्यप्यस्याः प्रकृति-प्रत्ययविभागीयायाः प्रक्रियाया निरुक्त-व्याकरणोभयवेदाङ्गीयं प्रामाण्यं प्रसिद्धं भवति, तथापि व्याकरणस्यैवाऽनया प्राधान्येन स-विषयता संपद्यत आनुषङ्गिकमात्रत्वेनैव तु निरुक्तस्य। तस्य हि तावत् प्राधान्येन तत्तत्प्रकृतिकत्वेन तत्तच्छब्दार्थपरीक्षणनित्यत्वेन प्रवृत्तिर्भवति। एवमपि तदतिपरोक्षवृत्तीनां च परोक्षवृत्तीनां च सतां शब्दानां वर्णविकाराऽऽगम-लोप-विपर्ययाऽनुसंधानतः प्रत्यक्षवृत्तित्वस्य प्रत्यापादनेन तदीयप्रकृति-प्रत्ययविभागीयं सौकर्यविशेषमातन्वद् व्याकरणस्य कार्त्स्न्यमेव प्रयोजयति।

३. अस्ति तावद् निरुक्त-व्याकरणीययोः प्रक्रिययोरन्योऽप्येको विशेषः। तथाहि। ये पदे पदे वर्णाऽऽगम-लोप-विकार-विपर्यया भवन्ति, ते वैयाकरण्यां प्रक्रियायां तत्तत्कार्यसूचकतत्तदनुबन्धवत्तत्तत्प्रत्ययसंनियोगेनाऽनुशिष्टा भवन्ति। त एव तु नैरुक्त्यां प्रक्रियायां तत्तत्प्रकृतिप्रत्ययप्रतिनियतसंनियोगनिरपेक्षं वाग्व्यवहारमात्रसिद्धेन सता तत्तद्विशेषधर्मकेण प्रातिस्वाभाव्येनोद्दिश्यन्ते।

४. अथ शाब्दिकीं निष्पत्तिमधिकृत्य या प्रक्रियाऽस्मिन् कोषे चरितार्था भवति, तस्या अयं संक्षेपो भवति—

(अ) या नामोक्तपूर्वा पाणिनीयेति प्रसिद्धा सती प्रकृतिप्रत्यययोगनिर्भरा वैयाकरणी प्रक्रिया भवति, तन्मात्राऽनुसारीहत्यं निर्देशसर्वस्वं भवति।

(आ) विस्पष्टव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरीयत्वेन निर्दिष्टानां सतां शब्दानां विषये धातवीयां-ऽशस्य निगदसिद्धत्वात् प्रत्ययीयांश एव टिप्पणीयस्य विचारस्य प्राधान्येन विषयतां भजते।

(इ) ये शब्दास्तावद् दुरूहव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरातो बाह्यत्वेन निर्दिष्टा भवन्ति, तेषां व्युत्पत्तेर्विषये यत् किंचित् पुरातनं वा नूतनं वा कल्पनारूपं समभूत्, तत् सकलमपि यावच्छक्येन स्वीयेनोहापोहेन साकं टिप्पणेषु दीयते।

(ई) बहुष्वपि शब्देषु लक्ष्यमाणानां वर्णविकारादीनां विषये व्याकरणाऽनुसारं च निरुक्ताऽनुसारं चो-भयथाऽप्युपपत्तिः प्रदर्शिता भवति। एवं खलु द्वयोरपि तयोः प्रक्रिययोराधारभूतयोर्यथास्व-संज्ञापरिभाषयोरितरेतरीयतयाऽनुवाद इव कृतो भवति।

५. यद्यपि पाणिनीयायाः प्रक्रियायाः प्रातिस्विकगुणप्रकर्षाच्च सुप्रतिष्ठितचतुर्दिक्प्रामाण्याच्च तद्वित्तिक-विधानकत्वेनैवाऽयं कोषः प्रवर्तितो भवति, तथाऽपीहोपसप्तशतेषु टिप्पणेष्वार्य्यभाषीयां मौलिकीं स्थितिमुद्दिश्य स्वो-प्रज्ञतयोपकल्पितताया नितरां स्वतन्त्रायाश्च सत्या अपरस्या नवीनाया वैयुत्पत्तिक्याः प्रक्रियाया अप्युपयोगः कृतो भवति। तद्विषयीयास्तावदिमे कतिपये वादाः संग्रहेण सूच्यन्ते—

(अ) मूलभूताऽऽर्यभाषा सार्थक-सस्वरैकाचक-ध्वनीनामाधारेण प्रथमां प्रवृत्तिं लेभे ।

(आ) त आधारभूता ध्वनयः स्वगताऽनेकखण्डा इव सन्त आदितो महाप्राणव्यञ्जनाऽऽत्मका अन्ततश्चाऽनुनासिकंभावुक-विलोलस्वराऽऽत्मकाश्च बभूवुः ।

(इ) संख्यातस्तावत्ते ध्वनयः पञ्चाऽनतिरिक्ततया संभाव्यमानाः सन्तो *घ्, *म्, *ध्, *भ्, *ऋ इत्येवं निर्दिश्येरन्[१] ।

(ई) उच्चारणविषये प्रतिवक्तृभेदप्रातिस्वाभाव्यादेव त एत आधारभूता ध्वनयो व्यञ्जनखण्डतश्च स्वरखण्डतश्च प्रत्येकं बहुविधस्योच्चारणस्य विषयतां व्रजन्तः कालेन पश्चात्परिनिष्ठित-प्रतिविविक्तस्वरूप-तत्तत्स्वरव्यञ्जनाऽऽत्मतया परिणता बभूवुः[२] ।

(उ) त एते बहुविधमुच्चार्यमाणाः सन्त आधारभूता ध्वनयः प्रत्ययप्रकारकध्वन्यन्तरसंयोगनिरपेक्षाऽव्ययप्रकारकतयैवाऽऽदिमं प्रयोगं लेभिरे ।

(ऊ) आधारभूता ध्वनयो मूलतो नामतयैवोपकल्प्यमानाः सन्तस्तस्य तस्येतरेतरार्थसापेक्षतया संबद्धस्य सतोऽर्थस्य बोधनार्थमादिमवाक्यभूततत्तत्स्वीयपरंपरारूपतां चाऽन्यतस्तत्तद्वृत्तिवैशिष्ट्यतश्च समासतश्च व्यक्तिसामान्य-भाव-त्रितयपरकसंज्ञाऽन्यतमतया च विशेषण-सर्वनामाऽन्यतरतया च कर्मप्रवचनीयतया च संसर्गा[३]ऽन्तर्गा[४]न्यतरतया चाऽऽख्याततया च क्रियाविशेषणतया

---

[१] दीर्घताऽतन्त्रा भवति । अस्या ऋ> अर्, इर्, उर् इत्यस्य त्रैविध्येनाविर्भवतः परिणामस्य पाणिनीयायां प्रक्रियायामेवमेव संभवात् तत्संवादनैकदृष्टिकत्वेनोपकल्पितमात्रत्वात् ।

[२] अस्योच्चारणीयस्य परिणामस्य प्रवृत्तिप्रकारसामान्यमुपरिष्टान्निदर्शयिष्यमाणं भवति (तु. आचि.४)। इहापि तावदाधारध्वनीयाऽऽद्यव्यञ्जनांशनिवृत्त्याऽवशिष्टाच्च *ऋ इत्यवं निर्दिष्टव्याच्च सतो मौलिकात् स्वरात् स्वरान्तरीयो निवृत्तिपर्यवसानः परिणामक्रमोऽयं निदर्श्यते—

१. *ऋ > { अर् > आ > अ > ....
इर् > ई > इ > ....
उर् > ऊ > उ > .... }

२. अय् > { आय् > आइ > ऐ > ए > ऍ > इ > ....
अय् > अइ > ए > ऍ > इ > ... }

३. अव् > { आव् > आउ > औ > ओ > ऑ > उ > ....
अव् > अउ > ओ > ऑ > उ > ... }

[**विशेषः**—ऍ, ऑ इत्येतयोः सांध्यत्वविलयाऽनुपाती द्विमात्रत्वस्यैकमात्रत्वेन परिणामो द्रष्टव्यः ।]

[३] संसृज्यते वाक्यीयो वा वाक्यप्रदेशीयो वाऽर्थोऽनेनेति कृत्वोपसर्ग-कर्मप्रवचनीयोभयभिन्नानां सतां समुच्चयापादकानां निपातानामेषा संज्ञा द्रष्टव्या (= conjunction) ।

[४] अन्तर्गच्छन्तीति कृत्वा वाक्यीयपदैरन्वयाऽभावेऽपि वाक्यीयाऽर्थसामान्यस्य तदन्तःप्रवेशेनैव प्रातिस्विकेनाऽऽश्चर्यादि-मानसभावपरेणाऽर्थेनोपाधायुकानां निपातानामेषा संज्ञा द्रष्टव्या (= interjection) ।

चोपसर्गतया चाऽऽर्थपरिणामवैविध्यं चाऽन्यतो भेजिरे[१]।

(ऋ) तस्य तस्य संबद्धस्य सतोऽर्थस्य वाचकभूताभ्यस्ताभ्यस्ताभ्य आधारध्वनीयपरंपराभ्यो भूयो-नियतप्रयोगाभ्यः सतीभ्य आदौ यथावस्थिताऽवयवीयस्वरपार्थक्यं चाऽपरिनिष्ठितसमासधर्मं च सत्[२] कालनैकस्वरतामापन्नं सकलं द्वन्द्वादिकं सामासिकं वृत्तं प्रादुर्बभूव। द्वन्द्व-तत्पुरुषावन्तोदात्तौ प्रादि-बहुव्रीही चाऽऽद्युदात्तौ बभूवतुरित्येतया मौलिकसामान्यविवेकदृष्ट्या येऽप्यन्तोदात्ताः समासा बहुव्रीहित्वेन च मध्योदात्ताः समासास्तत्पुरुषत्वेन च पाणिनीयेऽनुशिष्टा भवन्ति[३], तेऽवग्रहस्थितिपरिवर्तनेन यथायोगं तत्पुरुषत्वेन च बहुव्रीहित्वेन चोद्देश्याः स्युः।

(ॠ) अनेकाच्काः सन्तः कृतश्च तद्धिताश्च तत्परकप्रसिद्धिकप्रत्ययाऽऽख्यानामभावाद् मौलिकस्थित्य-नुरोधेनाऽऽधारध्वनीयाः समासविशेषा एव भवन्ति।

(ऌ) स्त्रीप्रत्ययान्ततया प्रसिद्धानि शब्दरूपाण्यपि तत्परकप्रत्ययाऽभावसामान्याद् मूलतः समास-सवृत्त-कान्येव भवन्ति (तु. पृ. ३९१[a])।

(ऍ) सुप्तिङन्यतरप्रत्ययान्ततया प्रसिद्धानि चाऽपि शब्दरूपाणि तत्तत्प्रत्ययाऽभावसामान्यात् समास-सवृत्तकान्येव भवन्ति[४]।

(ए) बहवः पाणिनीया धातवोऽप्यनेकाऽवयवत्वात् समास-सधर्माणो भवन्ति (तु. पृ. ४७९[a])।

(ऐ) ये चाऽनेकार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, ते स्वीयतत्तदर्थपरस्परवैशिष्ट्यात्मकत्वाऽभावे सति मूलतस्तत्तदर्थवाचकत्वेन भिन्ना एव सन्तः कालेन वर्णविकाराऽऽदितः परिणतायाः सवर्णताया वशादेकत्वमिवाऽऽपन्ना भवन्ति (तु. पृपृ. ४१६[d], ४३७[j], ४७९[a])।

(ऑ) ये चाऽप्यभिन्नार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, तेषामपि बहवो मूलतोऽन्योन्यमभिन्ना एव सन्तः कालेन विवर्णतया परिणता भूत्वा परस्परं भेदतो व्यवहारमापन्ना भवन्ति (तु. पुनस्-*, भूयस्-)।

---

[१] प्रथममसमस्तानां च कालेन समस्तानां च सतामाधारध्वनीनामयं तत्तद्वृत्तिवैशिष्ट्यक्रमस्तावदनया तालिकया भूय इव स्पष्टः स्यात्—

- वैयक्तिकानि नामानि
  - साधारणानि नामानि
    - विशेषणानि
      - सर्वनामानि
      - भावाः
        - क्रियाविशेषणानि
          - उपसर्गाः
          - संसर्गाः
          - अन्तर्गाः
        - आख्यातानि
        - कर्मप्रवचनीयाः
    - आख्यातानि
      - आख्यातानि
      - क्रियाविशेषणानि
        - उपसर्गाः
        - संसर्गाः
        - अन्तर्गाः

[२] यतु. वाव इति *भद्र-भद्र- इत्येतदादिस्वरूपतयोपपाद्यमानम्।

[३] तु. पा ६, २, २ उउ; १६२ उउ।

[४] 'तवै' इत्यन्तानि द्विस्वराणि पदानि चान्यतोऽलुक्समासाश्चान्यतोऽत्र ज्ञापकतां यान्ति (तु. एतवै, बृहस्पति-)।

(ओ) उदात्त एव मौलिकः स्वरः सन् कालेन सामासिके वृत्त आविर्भूते सत्यनुदात्तं चान्यत उदात्ताऽनुदात्ताऽन्यतरभूमिं स्वरितं चान्यतः प्रयोजयामास ।

(औ) एवं तावत् समस्ताऽसमस्ताऽऽधारध्वनिमात्राऽऽधारेण प्रथमतो नामिके वाग्व्यवहारे परिनिष्ठिते सत्येव सकल आख्यातिको वाग्व्यवहारस्तन्मूलकतयाऽऽविर्बभूवेति च तत्तन्नाम्रा पश्चादेव तन्त्रमात्रतः प्रसिद्धिं गताः सत्यः सुप्तिङ्कृत्तद्धितवृत्तयश्चाऽपि स्वरूपतः प्रातिस्विकार्थहीनतत्तत्प्रत्ययाऽऽख्यशब्दरूपाऽन्तत्वाऽभावे सत्याधारध्वनीयसमासाऽऽत्मकतां न व्यभिचेरुरिति चाऽत्र संग्रहो भवति ।

(ट) प्रक्रिया-संवादनम्

मौलिकाऽऽर्य्यभाषीयतत्त्वाऽनुसंधानतो वैयुत्पत्तिकस्य प्रकृतिप्रत्ययीयस्य विभागस्याऽनभ्युपेयत्वे (तु. पृपृ. ४३९[1],४४३[e]) सिध्यत्यपि कथमेतत्कोषोपनिबन्धो यथापाणिनि प्राचीनयौगिकसंज्ञा-परिभाषानुसारित्वेनैव प्रवृत्तिमान् भवतीत्युपदर्शितपूर्वम् । यया रीत्या त्वेवं सति नूतना मौलिकस्थितीया नाम प्रक्रिया पाणिनीयया प्रक्रियया संवाद्यमाना सती टिप्पणविषयतां भजते, सा खल्विदानीमत्र संक्षेपेणोच्यते—

१. अर्, इर्, उर् इत्येतेषां मौलिकाऽच्कानां त्रयाणामादेशानाम् ऋकार एव साधारणभूतः स्थानी स्यादिति कृत्वाऽऽधारध्वनयस्तदन्ततया निर्दिष्टा भवन्ति[१] ।

२. यदा कश्चिदाधारध्वनिराख्यातिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ पाणिनीयधातुसामान्येन धातवीयसंकेतपुरस्कारतो निर्दिष्टो भवति (तु. भू. ४, २, क, १), तय. पृ. ५८५[1] ।

३. यदा कश्चिदाधारध्वनिर्नामिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ क्विबन्तीकृत्येव निर्दिष्टः सन् सुब्योगीयप्रतिपदिकाऽन्तरसामान्येनाऽऽवसानिकेन विच्छेदकाऽऽख्येन संकेतेन सनाथ्यते (तु. भू. ४, ३, क, १), तय. पृ. ५८७[b] ।

४. परःसहस्राः पाणिनीया धातवः साऽवयवा भवन्तीति सूचितचरं वादमनुसृत्य ते धातवो यथाऽपेक्षमवयवप्रदर्शनपूर्वं टिप्पणेषूपयुज्यन्ते, तय. पृ. ४७९[g] ।

५. एकः शब्दो वृत्तिवैशिष्ट्यभिन्नस्वरूपाऽनेकार्थवाचको न भवतीत्युक्तपूर्ववादेन पाणिनीयायाः प्रक्रियायाः संवादनार्थं धातूनां बहुप्रस्थानत्वमुपकल्प्य तज्जानां कृतामेकवृन्तगताऽनेकफलन्यायतोऽनेकार्थवाचकत्वमुपपाद्यते, तय. पृपृ. ४१६[d], ४३७[b], ४७९[g] ।

६. पाणिनीयायां प्रक्रियायां ये स्वतन्त्रप्रयोगाऽनर्हाश्च प्रातिस्विकाऽर्थरहिताश्च सन्तः प्रत्यया भवन्ति, ते मौलिकस्थित्यपेक्षया स्वतन्त्रप्रयोगाऽर्हप्रातिस्विकाऽर्थवदाधारध्वनिपरिणतशब्दीयवर्णविशेषाः सन्तः पृथग्-निर्देश्याऽवयवधर्माणो भवन्तीत्युपवर्णितपूर्वं वादमनुसृत्य यत्र तत्र पाणिनीयानां प्रत्ययानां वास्तविकाऽऽधारभूतास्ते ते मौलिकाः शब्दा अपि निर्दिश्यन्ते, तय. पृपृ. १६३[b], ३४१[k], ३८१[o], ४०३[a], ४२५[c], ४२६[m], ४३०[a], ४८६[b], ४९०[n], ४६४[b], ५०२[b], ५०४[n] ।

७. सर्वनामान्यव्ययानि च प्रातिपदिकानि सन्ति नामाऽऽत्मकप्रातिपदिकाऽन्तरसामान्येन तत्र तत्र यौगिकवंशपरंपरितेन सनाथ्यन्ते, तय. तु. २अनु, अस्मद्- ।

(ठ) अधिपाणिनीयमनुसंधानम्

यथाऽयं कोषः पाणिनीयमनुशासनं साक्षादिवाऽधिकृत्य सर्वाङ्गीणं च तुलनात्मकं चानुसंधानं प्रयोजयेत्, तथेदानीं संग्रहेणोच्यते—

---

[१] पाणिनीयायाः प्रक्रियाया बहिरस्य दीर्घत्वस्यान्यथासिद्धत्वमित्यभिसंधिर्भवति ।

१. नामाख्यातोपसर्गनिपातात्मकतया चत्वारि पदजातानीति यास्कः (१, १) आह । उपसर्गान् निपातेष्वन्तर्भाव्य (पा १, ४, ५८) च निपातान् स्वरादिगणसामान्येनाऽव्ययीभाव्य (पा १, १, ३७) चाऽव्ययानि लुप्तसुप्कतामात्रेण (पा २, ४, ८२) प्रातिपदिकान्तरेभ्यो भिन्नानि सन्त्यपि प्रातिपदिकान्येवेति कृत्वा च पाणिनिस्तु धातवः प्रातिपदिकानि प्रत्ययाश्चेत्येतत् तत्तत्पदस्वरूपापादकं सद् लाक्षणिकमात्रस्वरूपकपदार्थत्रितयमित्याह । एवं तावत् प्रत्ययानां साक्षान्निर्देशानर्हत्वाद् धातवश्च प्रातिपदिकानि चेत्येतद् वर्गद्वयमेव निर्देश्यत्वमापद्यते । एवं स्थितेऽपि त्वस्मिन् कोषे लुप्तसुप्कान्यव्ययानि संगृहीतार्थवैस्पष्ट्यार्थं सुब्योगीयेभ्यः प्रातिपदिकान्तरेभ्यो विशेष्य पृथगेव निर्दिश्यन्ते ।

२. अत्रत्यानां निर्देशानां पाणिनीयाऽनुशासनीयसमन्वयस्य तावदयं प्रकारो भवति—

(अ) यदा कश्चिद् निर्देशः साक्षादिवाऽष्टाध्यायी-गणोणादि-फिट्सूत्र-वार्तिकेष्टि-सव्याप्तिकस्य सतः पाणिनीयाऽनुशासनस्य विषयो भवति, तदाऽसावनुशासनविशेषो नियमेन सूच्यते, तय. पृ. १[a] ।

(आ) यदा कस्यचिद् निर्देशीयस्य दुरूहस्य शब्दस्वरूपैकदेशस्य विषये पाणिनीयमनुशासनं न भवति, तदा तदनुसारं तस्योपपादनार्थं तदीयस्य विधानकस्य परिष्कारविशेषनिर्भर उपयोगोऽस्मदीयस्य प्रयत्नविशेषस्य विषयो भवति, तय, पृपृ. ६[a], ४१[i], ४२[k], ७६[l], ९०[f], ९१[l] ।

(इ) येषां निर्देशानां विषये पाणिनीयाऽनुशासनस्य नितान्तमभावः स्यात्, तानधिकृत्य तत्र तत्र धातवीय-परस्मैपदात्मनेपदविकरणेडागमान्यतमीये वा प्रत्ययीये वाऽनुबन्धीये वा तैङे वा सौपे वा कार्ते वा ताद्धिते वा सामासिके वा सौवरे वा सांहितिके वोच्चारणीये वा पाणिनीये प्रकरणे वार्तिकरीत्योपसंख्यानं (संक्षे. उसं.) क्रियते, तय. पृपृ. ४३[b], २२७[e], २४१[k], ४७२[d] ।

(ई) यदा कश्चिद् निर्देशो नैरुक्तिकया तत्तद्वर्णलोपाऽऽगम-विकार-विपर्ययाऽऽदिस्वरूपया प्रक्रिययोपपादितो भवति, तदा पाणिनीयया प्रक्रिययाऽपि तदनुवादः क्रियते, तय. पृपृ. १[c], ४७२[d] ।

(उ) यदा कस्यचिद् निर्देशस्य पाणिनीयेनाऽनुशासनेन विस्पष्टो विरोधो भवति, तदा तद्विषया स्पष्टैव सूचना क्रियते, तय. पृपृ. ११[i], ४१[k], ९०[h], २२३[h], ४४९[a] ।

(ङ) पूर्वाऽभ्यर्हितीयं निदर्शनम्

टिप्पणगतेषु तेषु तेषु नानाविषयेषु नानास्वरूपेषु चोहापोहेषु प्रवर्तमानेषु तत्तत्पक्षबलाबलपर्यालोचनसौकर्यार्थं सर्वत्र तु.इतिशिरस्कतया पक्षतः, वैतु. इतिशिरस्कतया विपक्षतश्च पूर्वेषामभ्यर्हितानां मतानि यथावद् निदर्श्यन्ते, तय. पृपृ. १६८[a], १६६[e,g], १७३[m], १७४[n], २२६[b], ३१६[g] ।

२. तिङन्त-प्रकरणम्

(क) धातवः

१. सर्वे धातवः प्रातिस्विकतां गतेन √इत्येतेन संकेतेन पुरस्क्रियन्ते, तय. √१अंह्, √२अंह् ।

२. मा गाद् व्यर्थं धातवीयवस्त्वंश-वर्णक्रमो वैयाकुली-प्रासतामिति सर्वे धातवो निरनुबन्धा एव निर्दिश्यन्ते, तय. √अञ्ज्, √कृ (=यक. अञ्जू, डुकृञ्) ।

३. पाणिनीय इदितः सन्तो धातव इह कृतनुमागमत्वेन निर्दिश्यन्ते, तय.√१अंह् <√अहि ।

४. पाणिनीय इदित्तयाऽनिदित्तया चोभयथा निर्दिष्टिं भजमाना धातवः पार्थक्येन संख्यायन्ते । इह तु तदनुविधायि धातवीयं नुंभावाऽभावत्वं युगपदेव निर्दिश्यते, तय. **अभि√दभ्, दम्भ्** ।

५. पाणिनीये केचिद् धातवस्तदादेशा वाऽदन्तत्वेनाऽनुशिष्टा भवन्ति । त इह धात्वन्तरसामान्येन हलन्ततयैव निर्दिश्यन्ते, तय. **√कथ्, √गण्, √धाव्, √यच्छ्** ।

६. सश्रुतयः सन्तो भिन्नार्था धातवः (तु. संद्वे. **बधा.**) तत्स्पष्टविवेचनाऽपेक्षितस्वशक्तिसमुचितमात्रासद्भावाऽभावविचारतः क्वचिदेव पृथक् संख्यायन्ते, प्रायेण तु तेन तेनाऽभिप्रेतेनाऽर्थेनैव सनाथ्यन्ते, तय. तु. टिटि. **√अँर्, √अर्च्** > **अर्कु-, √१अश्, √२अश्, √१अस्, √२अस्**; वैतु. **√सन्** *सरणे (पृ. ५२८[1]) ।

७. उपसृष्टा धातवो धात्वन्तरसाकक्ष्यमारोप्यमाणा यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यन्ते, तय. **अति√पद्, अनु√पद्, अभि√पद्** । एवं स्थितेऽपि कस्को धातुः केन केनोपसर्गेणोपसृज्यत इत्यस्य समुदितपरिचयार्थमनुपसृष्टधातुनिर्देशाऽन्ते यथाश्रुति तदीया उपसर्गा अपि कोष्ठेऽन्तर्बध्यन्ते, तय. √अज्···[अनु॰,···] । अनयैव किल द्वैधप्रक्रिययोपसृष्टमात्रतया वर्तमानानां धातूनामपि यथातद्वर्णमात्रं परामृश्यत्वेन निर्देशः संभवति, तय. **√अक्ष्** । ये चाऽप्यन्ये विशेषा इह वैशेष्येणाऽवधेयास्त इमे सूच्यन्ते—

(क) यत्रोपसर्गधात्वंशयोः संधिर्न भवति, तत्र तन्मध्यगो धातवीयः संकेत एव तद्व्यवच्छेदायाऽलम्, तय. **अति√पत्** ।

(ख) यत्रोपसर्गधात्वंशयोः संधिर्भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठेऽन्तर्मध्यगेन सता धातवीयेन संकेतेन व्यवच्छिद्यमानौ विसंहितौ वर्णौ निर्दिश्येते, तय. **अवा**(व√२अ)**स्, अवे**(व√इ), **अभ्य**(भि√अ)**ञ्ज्** ।

(ग) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च न भवति, तत्र सकृद्वा भूयो वा यथापेक्षं मध्यगेन विच्छेदकाऽऽख्येन संकेतेनोपसर्गीयो व्यवच्छेदः प्रयोज्यते, तय. **अति-प्र√कित्, अनु-प्र√युज्, अनु-सं-प्र√या** ।

(घ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठे विसंहितयोर्वर्णयोर्मध्ये विच्छेदकाऽऽख्यः संकेतो ध्रियते, तय. **अत्यु**(ति-उ)**द्√ग्रह्, अन्वा**(नु-आ)**√भू, अनु-पर्या** (रि-आ)**√वृत्** ।

(ङ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयश्चोपसर्गधातवीयश्च संधी भवतः, तत्र प्रथमं संहितस्वरूपो निर्देशो भवति, तदन्ते च वर्तुलकोष्ठे यथापेक्षमुक्तपूर्वयोः संकेतयोरुपयोगेन समुचितोऽन्योन्यं व्यवच्छेदः प्रदर्शितो भवति, तय. **अभ्युदे**(अभि-उद्-आ√इ) ।

(च) यत्राऽनेकधोपसृष्टिर्भवति, तत्रोपसर्गक्रमनिर्देशस्याऽर्थक्रमनित्यस्य सतः क्वचिच् श्रुतिक्रमेण विसंवादोऽपि प्रतीयेत, तय. **उपा**(प-आ)**√गम्** > **आ···उपगन्तन** ।

८. यत्र किंचिद् अनैपातिकं क्रियाविशेषणं (=सुबन्तविशेषात्मकं) गतीयते, तत्र तद्युक्तो धातुरप्युपसृष्टधातुनिर्विशेषतया निर्दिश्यते, तय. **अन्तर्-आ√धा, अन्तरि** (इ√इ), **अस्तमि** (मृ√इ), **अरण्येऽनु√वस्**[1] ।

९. नामधातवो यथास्वनामिकप्रकृतिमनु यथावर्णमात्रं निर्दिश्यन्ते । तद्विषय एते विशेषाः सूचनीया भवन्ति—

---

[1] तु.पृ. ४०१[1] यदनु कृद्वृत्त्यापादनप्रयोजनकोऽयं निर्देशो भवति ।

(क) येऽदन्तप्रकृतिकाः सन्तः क्विपि निष्पन्ना भवन्ति, ते स्वराङ्कनं विनैव निर्दिश्यन्ते, तय. √अव् > ओम- > √*ओम् ।

(ख) ये णिचि निष्पन्ना भवन्ति, ते चौरादिक-हेतुमदन्यतर-णिजन्तधात्वन्तरवत् स्वराङ्कनमभजमानाः सन्त इकारान्ततया निर्दिश्यन्ते, तय. अन्त- > √*अन्ति, २अन्ध- > √*१अन्धि ।

(ग) उक्तपूर्वद्वैविध्यविभिन्ननिष्पत्तीनि नामधात्वन्तराणि प्रायेण पाणिनीयप्रक्रिययाऽनभिमततत्क्लेश-नाऽतिरेकव्यतिरेकतो[1]ऽनुवादयितुमशक्यानीति कृत्वाऽङ्गरूपता[2]मापाद्य सस्वराणि निर्दिश्यन्ते, तय. अंहस्- > √अंहोयु, अघ- > √अघायु, अभ्र- > √अभ्रिय ।

१० पाणिनीये येषां धातूनामन्योऽन्यमादेशादेशिभावो विधीयते, तदीय इहत्ये निर्देश एते विशेषा भवन्ति—

(क) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्या[3] भाषाशास्त्रीयया दृष्टया पार्थक्यमेव प्रतीयते, तदा तयोरसंबद्धधात्वन्तरद्वयसामान्येन पृथङ् निर्देशो भवति, तय. √१अस्, √भू च, √दा, √यच्छ् च, √ब्रू, √आह् च, √सृ, √धाव् च, √दृश्, √पश् च, √इ, √गा च ।

(ख) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्याऽपि भाषाशास्त्रीयया दृष्टया साजात्यसंनिकर्षः प्रतीयते, तदा तयोर्मध्ये यस्य भूयसी रूपसंपत्तिः स्यात्तदनुगततया चाऽवान्तरपार्थक्येन चाऽल्पीयोरूपसंप-त्तेर्धातोर्निर्देशो भवति । एवं स्थितेऽपि परामर्शसौकर्यौपयिकतया तस्य यथातद्वर्णमात्रं पृथगपि धातुमात्रीयो निर्देशो भवति, तय. √इच्छ् > √इष्, √ऋच्छ् > √ऋ, √गच्छ् > √गम्, √यच्छ > √यम् ।

११. यदा कस्यचिद् धातोस्तदीयाया रूपसंपत्तेरादिवर्णतो बहुविधत्वाद् विशदवैयुत्पत्तिकप्रतीत्यर्थं तदानुगुण्येनाऽऽदिवर्णभेदतो बहुधा निर्देशः कृतो भवति, तदा प्रतिनिर्देशविशेषं निर्देशान्तरीयः परामर्शो वर्तुल-कोष्ठेऽन्तर्बध्यते, तय. √अर्च् (= √ऋच्), √अर्ह् (= √*ऋंह्) ।

१२. नवोपकल्पिता धातवः प्रायेणा[4]ऽधितारकिता भवन्ति । अथ यैरपेक्षाविशेषैस्तदीयोपकल्पना प्रयोजिता भवति, त इमे स्मर्यन्ते—

(क) यदा तन्मूलानि कृत्तिङ्रूपाण्युपलभ्यन्ते, तय. अंहस्- > √*अंहोयु, अंहुर्- > √*अंहूरि, √*अघ्, √*अङ्कूयु, √*अप्, √*ऋंह् ।

(ख) यदा तदीयेन यथावर्णमात्रेण व्यवस्थापनेन परामर्शे सौकर्यविशेषः संजायते, तय. √*अर्, √*अर्ध्, √*अर्ष् ।

(ग) यदा तद्द्वारा विशेषतो मौलिकीमार्य्यभाषामपेक्ष्य योग-संपत्तिर्भवति, तय. √*ऋ (पृ. ३९७^p^), √*अस्कृ (पृ. ४०४^f^), √*मृ (पृ. ४०८^g^), √*धृ, √*क्षृ (पृ. ४९९^c^) ।

---

[1] अनभिमतस्तस्याः (=पाणिनीयायाः प्रक्रियायाः) क्लेशनाऽतिरेकस्तद्व्यतिरेकतस्तामतितरामिवा-ऽक्लेशयित्वेत्यर्थः ।

[2] तिङि परतः सति नामधातवीयं यदङ्गं तद्रूपतामिति भावः ।

[3] मौलिय. अपेक्षया तत्संबन्धसंभवविच्छेदो मा भूदित्यर्थमेतद् विशेषणं दीयते ।

[4] क्वचिदनवधानात् तारकेयं नापि प्रत्ता भवतीत्येतत्सूचकमिदं विशेषणं द्रष्टव्यम् ।

१३. पाणिनीये विकरणभेदेन पृथक् संख्यायमाना धातव उपरिवक्ष्यमाणेन प्रकारेण तदीयेषु रूपेषु गणभेदतः पार्थक्येन संघटितेषु सत्स्वप्येकत्रैव निर्दिश्यन्ते, तय. √इ, √कृ ।

(ख) तैङ्कान्यङ्गानि

१. तिङि परतोऽङ्गीभविष्यति धातौ लक्ष्यमाणमवान्तरप्रत्यय-तत्प्रकारकोपजनाऽन्यतरप्रयोजितं द्विर्वचनं वाऽन्यत् किंचित् कार्यं वाऽवान्तराऽङ्गस्य प्रयोजकमिव सत् तेन साकं निर्दिश्यते, तय. **अति√ष्ठा(<स्था)>तिष्ठ (=°ष्ठ्), अभि√हन्>जिघांस(=°स्), अभि-सं√पद्>पादि** ।

२. यदैवमभिनिर्वर्तुकान्यवान्तराङ्गाणि भूयांसीव भवन्ति, तदा तेषां यथास्वं रूपखण्डानामादौ निर्देशो भवति, तय. **अति√तॄ >अति√तर्, अति√ततॄ, अति√तुर्, अति√तारि** ।

(ग) तैङ्कानि रूपाणि

१. यथाश्रुतसंगृहीतानां सतां तैङ्कानां रूपाणां मध्ये प्रथमं सार्वधातुकलकारीयाणि शुद्धवृत्तीयानि[1] रूपाणि लट्-लेट्-लोट्-लङ्-विधिलिङानुपूर्व्या निर्दिश्यन्ते, तय. **अनु√भू, √१अस्** ।

२. यदैतानि रूपाणि गणतो भिद्यन्ते, तदा तानि प्रतिगणभेदं खण्डपार्थक्येन निर्दिश्यन्ते, तय. **अति√तॄ, अनु√भू** ।

३. तत्पश्चादवशिष्टलकारीयाणि शुद्धवृत्तीयानि रूपाणि लिट्-लुडाशीर्लिङ्-लुङ्-लृङामनुक्रमेण निर्दिश्यन्ते, तय. **अनु√वृत्, अनु√ष्ठा** (<√स्था), **√१अस्, √२अस्** ।

४. आर्धधातुकायमानस्य लेटो रूपाणि सार्वधातुकलेड्रूपेभ्योऽवच्छिद्य लुङ्रूपैः साऽङ्गानि सन्ति तैः सहैव निर्दिश्यन्ते, तय. **अति√तॄ >ऽअतितरः, अति···तारिषत्** ।

५. अनयैव दिशा लोड्रूपाणि विधिलिङ्रूपाणि चाङ्गभेदवन्ति सन्त्यन्तरतमलकारान्तरीयरूपाण्यनु विविच्य विविच्य निर्दिश्यन्ते, तय. अप√भू > अप····भवतु, अपभूतु, अपि····भूतु, अपि···जगम्युः ।'

६. वेदे लुङ्दुर्भिन्नमिव भवति । तृच एवौत्तरकालिकी तदर्थताऽऽविरभूदित्यभिसंधायोपलभ्यमानेव सत्येकैतदीया श्रुतिः कृत्तयैव निरदेशि, तु. **अन्वा√गम् > अन्वा-गन्तृ-** ।

७. उभयपदीयानां रूपाणां मध्य आत्मनेपदीयानां पूर्वभावः परस्मैपदीयानां चोत्तरभावो भवति, तय. **अभि√मृश्, अभि√रक्ष्** ।

८. रूपाणां पुरुषतः प्रथममध्यमोत्तमक्रमेण वचनतश्चैकद्विबहुक्रमेण व्यवस्थापनं भवति, तय. **अभि√रक्ष्, √१,२अस्** ।

९. सस्वर-निःस्वररूपाणां मध्ये सस्वराणां पूर्वभावो निःस्वराणां चोत्तरभावो भवति, तय. **√भू > भवति, भवति, √१अस् >अस्ति, अस्ति** ।

१०. शुद्धवृत्तीयानि रूपाण्यनु तद्वदेव व्यवस्थापितानि सन्ति प्राक्रियिकाणि **यङ्-णिच्-सन्-यङन्तजातीयानि** रूपाणि निर्दिश्यन्ते, तय. **√अञ्ज्, अति√तॄ, √अद्, अनु√शक्** ।

११. यत्र तत्रोपलभ्यमानस् तिङ्रूपान्तीयः सांहितिको दीर्घभावः साकं निर्दिश्यते (तु. भू. ४,१,च,२), तय. **अप√हन्>अप...हत>ता, अपि√भू>अपिभूम>मा, √भू > भव>वा** ।

---

[1] णिजाद्यभिव्यञ्जितहेतुत्वाद्यर्थविशेषानुपहितं सदप्राक्रियिकं यद् वृत्तं भवति तदेवेह शुद्धमिति विशिष्योच्यते ।

१२. तिङ्-रूपाणि परिसमाप्य तेन तेन प्रकृतेन धातुना योगमाप्नुवानानामुपसर्गाणां संग्रहो वर्गकोष्ठेऽन्तर्बध्यते, तय. √अद्…[अपि°, आ°, वि°]।

१३. विलक्षणानि रूपाणि यथास्ववर्णमात्रमप्यनुक्रम्यन्ते च ततो यथास्वधातु प्रतिपरामर्श्यन्ते च, तय. अप्सन्त < √*अप्, अश्नन् < √२अश्।

१४. अथोपसृष्टधातवीयरूपनिर्देशीयाः केचिद् विशेषा उल्लिख्येरन्—

(क) व्यवहिताऽव्यवहितोभयथाप्रयुक्तानामुपसर्गाणां विषये प्रतिस्थलं वाक्यान्वयीयायाः सौवर्याश् छान्दस्याः सांहितिक्याश् च स्थित्या भूयोभूय आलोच्यत्वाद् नितान्तं दुष्करोऽपि सन्नेष निर्णयो दुर्वारो भवति यथोपसर्गत्वेन निर्दिश्यमानं पदं वस्तुतोऽतिक्रियाविशेषणभावं सदेव संसिद्धोपसर्गभावं भवतीति (तु. भू. ४, १, अ, ५, अ उउ)।

(ख) अव्यवहितोपसृष्टानां धातूनां रूपाणि यथाश्रुतमेव निर्दिश्यन्ते, तय. अति√कृ > अतिकरोति।

(ग) व्यवहितोपसृष्टानां धातूनां रूपाणि तु कतिभिश्चिद् माध्यमिकैर्बिन्दुभिः सह निर्दिश्यन्ते, तय. अति√तॄ>अति…तरामसि।

(घ) यदोपसर्गमात्रस्य पुनःश्रुतेः आवितचरस्य तिङ्-रूपस्याऽध्याहारः साऽवसरो भवति, तदोपसर्गे भूयः पृथग् निर्दिष्टे सत्यध्याहर्तव्यं तिङ्-रूपं विभिन्नं मुद्रितं सद् वर्तुलकोष्ठेऽन्तर्बध्यते, तय. अप√नुद् >अप[1](नुदस्व)[1]।

(ङ) प्रतीकगताश्चोपसर्गमात्रश्रुतयस्तत्तन्मूलत आहारितैस्तद्युक्तपूर्वैस्तिङ्-रूपैर्विमुद्रितैश्च कोष्ठबद्धैश्च सद्भिः सनाथीकृत्य निर्दिश्यन्ते, तय. अभी (भि√ई)>अभि (ईमहे)।

(च) यदोपसर्गमात्रश्रुतिः कल्पयितव्याऽऽक्षेप्ययोग्यतिङ्-रूपा भवति, तदा तदव्यवधानेन दक्षिणतो विच्छेदिकासनाथितं सद् धातवीयसंकेतमात्रं प्रदाय तदीये टिप्पणे तिङंशो निर्दिश्यते, तय. अति√-। परं प्रायेण यदा साक्षाद् निर्दिष्टस्यैव सतः कस्यचिद् धातोः किंचिद् रूपमुक्तपूर्वविधया प्राकरणिकीं योग्यतामपेक्ष्याऽध्याहार्य्यं स्यात्, तदा तद् रूपमपि कोष्ठेऽन्तर्बद्धं सत् तद्धातुरूपान्तरसंपत्त्या सह निर्दिष्टमेव भवति, तय. अप√गम् > अप (गमयन्तु)।

(छ) रूपनिर्देशाऽवसर उपसर्गगतो वोपसर्ग-धातुगतो वा संधिः कोष्ठकान्तर्बध्यमानयथास्वविच्छिन्नरूपः सन् यथाश्रुतं निर्दिश्यते, तय. अभ्यु (भि-उ)पा(प-अ) व√हृ > अभ्युपावहरामि।

३. सुबन्त-प्रकरणम्

(क) वैशेषिकाः संकेताः

१. सर्वेषां सुबर्हाणां प्रातिपदिकानामन्ते तत्प्रातिस्विकसंकेततया दीयमानो विच्छेदकसंकेतस्तेषामन्यतो धातुभ्योऽन्यतश्चाऽव्ययेभ्यः पृथक्करणः सन् प्रयोगे तदीयस्य सुप्प्रत्यययोगस्याऽवश्यंभाविकत्वं सूचयेत्, तय. अंश-, अंशु-, अग्नि-, अग्नायी-, आग्नेय-, अग्नि-दग्ध-।

२. यदा किंचित् सुबर्हतयाऽप्रसिद्धचरं प्रातिपदिकं तथात्वेन निर्दिश्यते, तदा तदन्त्यो विच्छेदकस्तारकया सनाथ्यते, तय. अन्तर्-* २अवस्-*।

[1] अत्र मूर्धन्या संख्याऽऽवृत्तित्रिकं सूचयति।

३. अलुक्-समासीयं पूर्वपदं पृथग्गणान्तरप्रातिपदिकीकृत्य स्वरेण च विच्छेदकेन च विना निर्दिश्यते, तय. अग्र- > अग्रे ।

४. व्यवहितपदश्रुति सामासिकं प्रातिपदिकं ϕ इत्येतेन संकेतेन पुरस्क्रियते (तु. भू. ४, २, ग, १४, ग), तय. ϕअति-रोहत्-, ϕअप-घ्नत्-, ϕअप-दुहत्- ।

(ख) कृद्-व्यवस्थापनम्

१. धातोश्च तज्जस्य कृत्-प्रातिपदिकस्य च मध्ये सति तद्भावे तद्धातवीयतिङ्-रूपाणि विहाय नान्यत् किमपि व्यवधायकं भवति, तय. अंहोयु-, अक्रूयत्-, अभि-श्वसत्-, अपि-हीन- ।

२. मुख्यधात्वनुगताऽवान्तरीकृतधातुजं प्रातिपदिकं मुख्याऽवान्तरोभयप्रकारकधातवीयरूपसर्वस्वं परिसमाप्य तदुपरि निर्दिश्यते, तय. अनु√ गम् > गच्छ् > अनु-गच्छन्ती-, अति√तॄ > अति√तर् > अति-तर- ।

३. बहुत्वे सति धातुविशेषजानि कृत्-प्रातिपदिकानि यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. √अव् > अव्-, अव, ऊति-, ऊम- ।

४. गणभावेन निर्दिष्टानां सतां प्रातिपदिकानामवान्तरीकृताः प्रभेदा मुख्यैः प्रभेदैः साकं वा यथास्ववर्णमात्रं च यथाप्रातिस्विकरूपखण्डशीर्षण्यतया च वा निर्दिश्यन्ते[1], तय. अदस्- > अदस्-, अमी-, अमु-···; अस्मद्- > अस्म-, अस्मद्-, अहम्, आव····; अहन्- > २अह-, अहन्-, अहर्-, अहस्- ।

५. यथावर्णमात्रमनुक्रमस्य कृन्मात्रसामान्यात् सुबर्हाणां प्रातिपदिकानां सतां कृतां पार्श्वत एवाऽसुबर्हाणामव्ययानां सतां कृतामपि निर्देशो भवति, तय. अनु-दृश्य, अभि-दुह्य, अभि-द्रुह्य ।

(ग) तद्धित-व्यवस्थापनम्

१. ताद्धितानि प्रातिपदिकानि यथास्वं नामिकप्रकृतीनामुपरिष्टादव्यवधानेन यथावर्णमात्रं निर्दिश्यन्ते, तय. अग्नि- > अग्नि-मत्-, आग्नेय-; २अ-दिति- > अदिति-त्व-, आदितेय-, आदित्य- ।

२. येषां तद्धितानां स्वनामिकप्रकृतिभिराद्यक्षरसामान्यं भवति, ते तत्पूर्वपदैः समासैः सस्थितयः सन्तस् तदीयस्तम्भाऽपेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. २अग्नीषोम- > अग्नीषोमीय-; अग्र- > १अग्रिय-, २अग्रिय-, अग्र्य- ।

३. येषां तद्धितानां स्वकृत्प्रकृतिभिराद्यक्षरेण वैषम्यं भवति, ते तत्प्रकृतिकेभ्यः समासेभ्यः प्रागेव तदीयस्तम्भाऽपेक्षया मात्राद्वयेन व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. अतिथि- > आतिथ्य- ।

४. यदा तु विषमाऽऽद्यक्षरस्याऽपि सतस्तद्धितस्य नामिकी प्रकृतिः सामासिकीं पूर्वपदतां नोपेयात्, तदा तन्निर्देश एकया मात्रया व्यवहिते स्तम्भ एव क्रियेत, तय. अग्रायण- > आग्रयण- ।

५. ताद्धितानां तद्धितानां विषयेऽयं सामान्यो नियमो भवति, यथा यस्य या प्रकृतिस्तस्य तदपेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्देशः स्यादिति, तय. २अ-दिति- > आदित्य- > आदित्य-वत्- ।

(घ) समास-व्यवस्थापनम्

१. माध्यमिकविच्छेदकान्तरसमन्वितानि सन्ति सामासिकानि प्रातिपदिकान्यन्तमात्रविच्छेदकितसुबर्हप्रातिपदिकान्तरमात्रात् सुवेचानि स्युः, तय. अघ-रुद्-, अघ-शंस-, अघ-हार्- ।

---

[1] उपरितनात् खण्डात् प्रभृति णत्व-तदभावाभ्यां च षत्व-तदभावाभ्यां च लक्षितानि प्रातिपदिकान्यप्यनयैव दिशा मुख्याऽवान्तरीकृत्य निर्देक्ष्यन्ते, तय. धनुर्, ष्, स्,ः-, पूषण्,न्- (वैतु. इह अर्यमन्-)।

२. समासेऽसमस्तप्रातिपदिकान्तरेण समस्य समासान्तराऽवयवतामुपेयुषि माध्यमिकविच्छेदकस्तदीय-पूर्वोत्तरान्यतरपदताया अनुरोधात् तदन्त्यो वा तदाद्यो वा यथायोगं संजायते, तय. **अघशंस-हन्-**, ***अधि-कृष्णाजिन-**।

३. समासद्वयेन समासान्तरे जन्यमाने तत्समासान्तरमात्राऽपेक्षया मध्ये विच्छेदको दीयते, तय. **अघशंस-दुःशंस-**, **अजात-पुत्रपक्षा-** ।

४. स्वपूर्वपदीयेष्वाद्यक्षरेण वैषम्यभाक्षु तद्धितेषु यथायथं निर्दिष्टेषु सत्सु समासा यथावर्णमात्रं निर्दिश्यन्ते, तय. **अतिथि-** > **अतिथि-त्व-**, **अतिथि-पति-** ।

५. प्राथमिकः समासः स्वपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **१असुर-**> **असुर-क्षयण-** ।

६. समासजः समासः स्वसमस्तपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **अग्निष्टोम-प्रायण-** ।

७. यदा समस्यमानयोः पूर्वोत्तरपदयोरन्त्याऽऽद्यवर्णयोस्तयोरन्यतरस्मिन् वा सांहितिको विकारो भवति, तदाऽसौ तन्मध्यप्रवेशिते वर्तुलकोष्ठे यथायथं निर्दिश्यते, तय. **अग्न्यु**(ग्नि-उ)**पस्थान-**, **अक्षितो**(त-ऊ)**ति-**, **अन्तः**(<र्-) **कोश-**, **अती**(ति-इ)**त्वरी-**, **अनु-ष**(<स)**स्य-** ।

८. यदा पूर्वपदाऽन्त्यो दीर्घः स्वरः पौर्वकालिकह्रस्वमूलो भवति (तु. भू. ४, १, च, २ उउ.), तदाऽसौ ह्रस्वो यथापरिचितपरिभाषं सुगमत्य निर्दिश्यते[1], तय. **अ**(क्ष>)**क्षा-नह्-**, **अ**(जि>) **जी-गर्त-**, **अ**(ति>)**ती-काश-**, **अ**(नु >) **नू-वृत्-** ।

(ङ) स्त्रीलिङ्गक-व्यवस्थापनम्

१. पाणिनीयायां प्रक्रियायां स्त्रीलिङ्गकमात्रतया सिषाधयिष्यमाणानि सन्ति दीर्घान्तानि प्रातिपदिकानि तथैव निर्दिश्यन्ते, तय. **अर्हणा-** ।

२. यानि प्रातिपदिकानि पाणिनीये संभवल्लिङ्गान्तरतया शिष्यमाणानि सन्त्यप्युपलब्धस्त्रीलिङ्गकमात्र-श्रुतीनि भवन्ति, तानि वर्तुलकोष्ठित-कोणपुङ्खान्यतरसरूपसंकेतसहकृताऽस्त्रीपरकपूर्वरूपोपकल्पनानि कृत्वा निर्दिश्यन्ते, तय. **अनपरोधु** (क >) **का-**, **अश्युमा**(न >) **ना-**, **अति-चर**(त् >)**न्ती-**, **अश्व-पर**(शु>)**शूँ-** ।

३. स्वराऽभेदेन लिङ्गपर्यायतोऽकाराऽऽकारान्यतराऽन्ततयोपलब्धश्रुतीनि प्रातिपदिकानि प्रार्धविराम-विविक्तोभयप्रकारसाधारणाऽन्त्यविच्छेदकतया समुह्य निर्दिश्यन्ते, तय. **अघ,घा-**, **१अज,जा-**, **अज्ञान,ना-** ।

४. इवर्णोवर्णान्यतराऽन्तानि प्रातिपदिकान्यपि नान्तरीयोक्तपूर्वयाऽवर्णान्तपरया दिशैव निर्दिश्यन्ते, तय. **अराति, ती***-, **अभि-दिप्सु,प्सू-**, **अवस्यु,स्यू-** ।

५. उक्तपूर्वव्यतिरिक्तानि सर्वाण्यपराणि स्त्रीलिङ्गकानि प्रातिपदिकानि यथास्वाऽनुगताऽस्त्रीपरकपूर्वरूपीय-स्तम्भापेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे तत्तद्रूपसुवारसंभेदनिवृत्त्यर्थं पृथग् निर्दिश्यन्ते । एतानि तावत् प्रविभज्य किंचित् सूच्येरन्—

(अ) यान्याकारान्तानि सन्त्यर्थतश्च योगतश्च विशिष्टानि स्युः, तय. **अघा-**, **अपाला-** ।

---

[1] मूऋा. परिभाषया त्वेतद् दीर्घत्वं यथायोगम् **अर्**, **इर्**, **उर्** इत्येतदन्यतममूलकं भवति (**तु. भू. ४, १, अ, ५, अ उउ.**) ।

(आ) यानि दीर्घैकारान्तानि सन्त्यकार-हलन्यतरान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. अ-देव- > अ-देवी-, अ-सत्- > अ-सती-, अर्किन्- > अर्किणी- ।

(इ) यानि दीर्घैकारान्तानि सन्ति भिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि स्युः, तय. अक्षि- > अक्षी-, अङ्गुलि- > अङ्गुली-, अर्षणि- > अर्षणी- ।

(ई) यानि दीर्घैकारान्तान्यभिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि सन्त्यन्यथा कथंचित् सुवेद्यानि स्युः, तय. अरुणि- > १अरुणी- ।

(उ) यानि दीर्घैकारान्तानि सन्त्यृकारान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. अवितृ- > अवित्री-, अनु-ष्ठातृ- > अनुष्ठात्री- ।

(च) कालिकलकारार्थक-सुबर्हकृद्-निर्देशिका

क्त-क्वसु-कानच्-शतृ-शानच्-स्यतृ-स्यमानाऽन्यतमाऽन्ताः सुबर्हाः कृतः सांप्रतिकेषु कोषेष्वाख्यातिकप्रकरणे लकाररूपाऽनुपदं निर्दिश्यमानाः सन्त इह तावत् सुबर्हकृदन्तरसामान्येन यथावर्णमात्रं निर्दिश्यन्ते, तय. अप√रुध् > अप-रुद्ध-, अप-रुध्यमान- ।

(छ) क्रियाविशेषणभावुक-सुबर्हप्रातिपदिक-निर्देशिका

येषां सुबर्हाणां रूपविशेषाः क्रियाविशेषणभावुका भवन्ति, तेषां सुबर्हान्तरनिर्विशेषं निर्देशो भवति, प्रस्तुतवैशिष्ट्यं च तदीयं यथावद् टिप्पण्यते, तय. अ-विद्वेष- > -षम्, अनु-काम- > -मम् ।

(ज) अयौगिक-सुबर्हप्रातिपदिक-निर्देशिका

यानि निमित्तान्यादाय कानिचित् सुबर्हाणि प्रातिपदिकानि कृद्बाह्यीकृत्य स्वतन्त्रशब्दतया यथावर्णमात्रं निर्दिश्यन्ते, तानीमानि सूच्येरन् –

१. यदा कृज्जातीयस्य सुबर्हस्य प्रातिपदिकस्य व्युत्पत्तिरज्ञाता वा दुरूहा वा संदिग्धा वा मूलाऽऽर्यभाषीया सत्यप्रसिद्धा वा स्यात्, तय. अनस्-, २अन्यु- ।

२. यदा कृत्तद्धितसमासाऽन्यतमजातीयं सुबर्हं प्रातिपदिकं वर्णविकारतो यौगिकव्यवस्थितिकतया दुरीक्षमिव संजायेत, तदैवंविधे स्वतन्त्रनिर्देशे क्रियमाणे सति समुचिता प्रतिपरामर्शिकाऽपि क्रियते, तय. ऊति-, ऊम-, १अत्र-, २अत्र-, सत्-, आग्नेय-, आतिथ्य-, अग्ना-विष्णु- ।

३. यदा समासत्वेनोपकल्प्यमाने सुबर्हे प्रातिपदिकेऽवयवतः संशयो भवति, तय. अनीक-, अभीक-, अनर्विश्- ।

४. अथ गणतो निर्देशभाजां सुबर्हाणां प्रातिपदिकानां येऽवान्तराः प्रभेदा भवन्ति, ते प्रत्येकं प्रतिपरामर्शिकया सनाथ्यैवं स्वतन्त्रतयाऽपि निर्दिश्यन्ते, तय. अमी-, अमु-, २अह-, अहर्-, अहस्- ।

५. पूर्वपदतया समासान्तरमननुप्रविष्टः सन् नञ्-समासश्च प्रथमस्तम्भीयतया स्वतन्त्रं निर्दिश्यते, तय. अ-पति-, अ-पतिघ्नी-, अ-जात- (वैतु. अजात-शत्रु-) ।

(झ) विसंख्यात-सुबर्हप्रातिपदिक-निर्देशिका

१. स्वर-भेदेन श्रूयमाणानि सवर्णानि सुबर्हाणि प्रातिपदिकानि विसंख्याय निर्दिश्यन्ते, तय. १अ-मेनि-, २अ-मेनि-, १अपस्-, २अपस्-, २अरु-णी-, ३अरु-णी- ।

२. अथ स्वरभेदव्यतिरिक्तकारणान्तरप्रयोजिताऽर्थभेदप्रदर्शनौपयिकतयाऽपि सुबर्हप्रातिपदिक-विसंख्यानमाद्रियते, तय. १अप्-, २अप्-;१अ-दिति-, २अ-दिति-; १अरति-, २अरति-; १अरत्नि-, २अरत्नि-; १असुर-, ४अ-सुर-।

३. सवर्णाऽव्ययतः पृथक्करणाऽर्थमनपेक्षितमपि सत् क्वचिदेतद् विसंख्यानमाद्रियते, तय. १अङ्गिरस्वत्-, १अनु-।

(ञ) सौपरूप-निर्देशिका

१. सुब्योगे प्रातिपदिकस्याऽन्त्यमेकाज्मात्रं तत्पूर्ववर्तिनः प्रातिपदिकावशेषस्य संग्राहकेण सता विच्छेदकेन पुरस्कृतं सन्निर्दिश्यते, तय. अंश- > -शः, -शम्, -शस्य।

२. एकाज्मात्रकाणां प्रातिपदिकानां सुब्योगीये निर्देशे तावद् विच्छेदकेन संग्राह्यस्य पूर्ववर्तिनः प्राति-पदिकांऽशस्यैवाऽभावात् तत्प्रयोजनाभावात् तत्प्रयोगाभावो भवति, तय. सत्- > सत्, सन्तः, सन्तौ।

३. प्रातिपदिकाऽपेक्षया स्वरतो विशेषे प्रदर्शयितव्ये सत्येव सुब्योगीये निर्देशे स्वराङ्कनमाद्रियते, तय. सत्- > सतः, सताम्, सद्भ्यः।

४. सौपानि रूपाणि संघटितपरामर्शिकासौकर्याऽनुरोधेन यथावर्णमात्रं न तु यथाव्यक्ति वा यथाविभक्ति वा निर्दिश्यन्ते, तय. अंशु- > -शवः, -शवे, -शुः; अम्र,म्रा- > -म्रम्, -म्रा, -म्राः, -म्रान्।

५. [1]गणप्रातिपदिकाऽवान्तरप्रातिपदिकीयानि सौपानि रूपाणि यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. अदस्- > अमी- > -मी, -मीभ्यः, -मीषाम्।

६. साऽऽम्रेडितानि सुब्-रूपाणि माध्यमिकविच्छेदकवन्ति सन्ति यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. अंशु- > -शुः-शुः, अंहस्- > -हसः-हसः, अग्नि- > -ग्निम्-ग्निम्।

(ट) उत्तरपदत्व-निर्देशिका

एकैककस्य सुब्-रूपीयस्य खण्डस्याऽन्ते वर्गकोष्ठेऽन्तस् तत्तत्प्रकृतप्रातिपदिकोत्तरपदाः समासाः पूर्वपदतो विमुद्रं निर्दिश्यन्ते, तय. अंशु- ··· [°शु- अन्°, उप°, तृप्त°]।

४. अव्यय-प्रकरणम्

१. अव्ययमात्रं वैशेषिकसंकेतविरहितं सद् यथास्ववैशेषिकसंकेताभ्यां धातोश्च सुब्योगीयात् प्राति-पदिकाच्च सुवेचं भवति, तय. अथ, अनु,√अद् > अत्त्वा, अत्तवे; अनु √दिश्>अनु-दिश्य, अधरात्।

२. व्युत्पत्तेः पारोक्ष्याद्वाऽन्यथा यतः कुतो वाऽकृज्जातीयतया प्रदर्श्यमानानि सन्त्यव्ययानि यथावर्णमात्रं स्वातन्त्र्येण निर्दिश्यन्ते, तय. अति, २अथ, २अनु।

३. क्त्वान्त-तुमुन्नन्तप्रकारकाणि कृज्जातीयान्यव्ययानि सांप्रतिकेषु कोषेष्वाख्यात-सविषयीक्रियमाणान्यपि सन्तीह सजातैः सुब्योगीयैः कृदन्तरैः सस्तम्भीकृत्य तत्साधारण्येन यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. √अद् > अत्तवे, अत्तुम्, अत्त्वा।

४. अनूपचितकायानि सन्ति कृज्जातीयान्यव्ययानि यथास्वप्रकृतिभूताऽव्ययान्यनु मात्रयैकया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. √ अद् > अत्त्वा > अत्त्वाय।

---

[1] गणभावेन निर्दिष्टे तद्धितो द्रष्टव्यः।

५. यान्यव्ययानि स्वप्रकृतिभूतेभ्यः सुब्योगीयेभ्यः प्रातिपदिकेभ्यः स्वरूपतो नाऽतिविप्रकृष्टानि स्युः, तानि तदुपरि तदवान्तरप्रातिपदिकतया पृथङ् निर्दिश्यन्ते, तय. **अधर- > अधरात्** ।

६. समासाऽवयवतां प्रपन्नानामव्ययानां विषय एते विशेषा अवधेया भवन्ति—

(क) तत्तदव्ययपूर्वपदतया विशिष्टानां धातूनां च प्रातिपदिकानां च तत्तदव्ययाऽनधीनतया यथास्ववर्णमात्रं निर्देशा भवन्ति, तय. **अनु√१पत्, अनु-पथ-, अभि√रुह्, अभि-रूप-** ।

(ख) मूलतः समासाऽवयवभूतानि सन्ति प्रतीकगतत्वेन पृथगिव श्रूयमाणान्यव्ययानि यथोक्तपूर्वसामान्य-व्यवस्थं वर्तुलकोष्ठेऽन्तः प्रदर्शितैः सद्भिर् मौलिकैरुत्तरपदैः सनाथ्य निर्दिश्यन्ते (तु. भू. ४, २, ग, १४, ङ), तय. **अभी**(भि√ई) > **अभि**(ईमहे) ।

(ग) यदा समस्तस्य कृज्जातीयस्याऽव्ययस्योपसर्गांशो मूले व्यवहित इव श्रूयते, तदा तस्य निर्देशः ϕ इत्येतेन संकेतेन पुरस्क्रियते (तु. भू. ४, २, ग १४, ग), तय. **अभि-समे**(म्-आ√इ) > ϕ**अभि-समेत्य** ।

(घ) मूलत उत्तरपदविधया समासाऽवयवतां भजदपि सद् निहतंभावुकमव्ययं यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यते[1], तय. **इव, उ, च, चित्** ।

(ङ) यदा तूक्तपूर्वं निहतंभावुकमव्ययमव्ययान्तरस्याऽन्ते श्रूयते, तदा तद् यथासामान्यव्यवस्थं समासाङ्ग-भूतमेव निर्दिश्यते, तय. **अथ > अथो** ।

(च) एवं सत्यपि यदा तु निहतंभावुकमव्ययमुपसर्गभावुकस्याऽव्ययान्तरस्याऽन्ते श्रूयते, तदा तत् ततो व्यवच्छिद्य पृथगेव निर्दिश्यते येनोपसर्गोपसृष्टसंबन्धोऽव्यवहित इव प्रतीयेत, तय. **अपे**(प√इ) > **अप**(एतु) < **अपो**(एतु), **अप√म्यक्ष्** > **अप···म्यक्ष** < **अपो···म्यक्ष**, **अपे**(प√ई)**ज्** > **अप···अपेजते** < **अपो···अपेजते** ।

७. अव्ययानां विसंख्यानेऽयं वक्ष्यमाणो निमित्तोद्देशोऽवधेयः —

(क) यदा तानि सस्वर-निःस्वरोभयथा श्रूयन्ते, तय. **१कम्, २कम्, १यथा, २यथा** ।

(ख) यदा वैशेषिकसंकेतस्य पर्याप्तौ सत्यामपि सवर्णात् सतः सुब्योगीयात् प्रातिपदिकाद् व्यवच्छेदविशेषोऽभिप्रेतो भवति[2], तय. **२अनु, २अभि, ३अव** ।

८. समस्तानामव्ययानां यथासामान्यप्राप्ति द्वेधा निर्देशो भवति । यथास्ववर्णमात्रं च पूर्वपदीयप्रति-परामर्शिकासहकृतं यथोत्तरपदनिर्देशं च, तय. **सम**(मृ√ऋ)**र्धि > समर्धयित्वा** इति च **अर्धयित्वा सम्**° इति च ।

५. स्वर-प्रकरणम्

(क) आधारग्रन्थीयं स्वराङ्कनम्

यथोपलम्भमेतद्ग्रन्थप्रकृतविभागीयाऽऽधारग्रन्थानां मध्ये सप्तसु तावत् सामग्र्येण स्वरोऽङ्कितो भवति । त एत ऋग्वेदो माध्यन्दिन-यजुर्वेदः काण्व-यजुर्वेदस्तैत्तिरीय-यजुर्वेदो मैत्रायणीय-यजुर्वेदः कौथुम-सामवेदः शौनकीया-

---

[1] एतान्यव्ययानि सर्वाणि तैत्तिरीये पदपाठे, पदपाठान्तरेषु च इव-व्यतिरिक्तानि, पृथक्-पदतया पठ्यन्ते ।

[2] उपरितनखण्डात् प्रभृत्ययं नियमोऽन्यथासिद्धायमानो द्रष्टव्यः (तु. भू. ४, १, ३, क, ३)

ऽथर्ववेदश्च सन्ति । अपरेषां मध्ये तु खिलसूक्तेष्वंशतः काठक-यजुर्वेदे च क्वचित् क्वचित् स्वराङ्कनमुपलभ्यते । कपिष्ठल-कठ-यजुर्वेदस्य जैमिनीय-सामवेदस्य चाऽद्यावधि निःस्वरमेव संस्करणमभूत् ।

(ख) रेखीयो गम्यः प्रकारः

१. ऋग्वेदे तैत्तिरीय-यजुर्वेदे चोदात्तो नाम मुख्यः स्वरः स्वतोऽनङ्कितः सन्नन्यतोऽधोरेखितप्रागनुदात्ततोऽन्यतश्चोर्ध्वदण्डित-स्वरितितोत्तराऽनुदात्ततो विज्ञप्तो भवति, तय. अग्नये । स्वरितोत्तरवर्त्यनुदात्तमात्रमप्याऽधोरेखितोदात्त-स्वरितान्यतरोदयानुदात्तमनङ्कितं भवति, तय. अग्निमीळे पुरोहितम् (ऋ १, १, १) इत्यत्र पु० इत्येतद्वैपरीत्येन °ळे इति । अस्य खलु स्वरितोत्तरस्याऽनङ्कितस्य सतोऽनुदात्तस्योदात्ततयाऽऽभासो मा भूदित्यर्थं स्वरितस्य च तदुपरितनस्योदात्तस्य च मध्ये संकेतविशेषौ स्थाप्येते । तथाहि । यदा स्वरितो ह्रस्वो भवति, तदा १ इति, यदा चाऽसौ दीर्घस्तदा तस्मिन् स्वयमप्यधोरेखिते सति ३ इति, तय. अप्स्व१न्तः (ऋ १, २३, १९), क्वे३ दानीम् (ऋ १, ३५, ७) । उदात्त-स्वरितान्यतरोदयोऽनुदात्तोऽधोरेखितो भवतीति सूचितमिवाऽधस्तात्, तय. अग्निम्, कन्या । मन्त्राऽर्धादौ वा वाक्यादौ वा वर्तमानमनुदात्तमात्रमङ्कितं भवति, तय. अनुकामम् (ऋ १, १७, ३) ।

२. अयमङ्कनप्रकारः शौनकीयाऽथर्ववेदे माध्यन्दिन-यजुर्वेदे काण्व-यजुर्वेदे यथामूलकोशं कपिष्ठलकठ-यजुर्वेदे चाऽपि लब्धप्रचारोऽभूत् । एवमपि तावद् उदात्ताऽनुदात्तयोर्विषये सामान्ये सत्यपि स्वरितस्य विषये सन्त्येव बाह्वृचतैत्तिरीयेतरग्रन्थीयाः केचिद् विशेषाः, तथाहि—

(अ) शौनकीयेऽथर्ववेदे स्वरितादुपरि ꣳ इति संकेतो भवति, तय. वीर्यꣳम्, सर्वा अꣳस्मिन् (११, ८, ३२), ज्येष्ठवरोꣳऽभवत् (११, ८, १) । उदात्तादुपरितनः स्वरितस्तु बाह्वृचवत् साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. तं न्यूर्णुवन्तु सूतवे (१, ११, १) । उदात्ते परतो ह्रस्वात् स्वरितादूर्ध्वदण्डितात् सत उपरि १ इति संकेतो भवति, तय. अप्स्व१न्तः (१, ४, ४) । तस्यैव दीर्घस्य सतस्तु संकेतो बाह्वृचनिर्विशेषो भवति, तय. विकेश्यो३ विघ्नताम् (१, २८, ४) ।

(आ) माध्यन्दिन-यजुर्वेदे ꣵ इत्येतेनाधो-दीर्घहस्तकेन स्वरितः साधारण्येन संकेत्यते, तय. दिवीव (६, ५), वीर्यमसि (१९, ९), आस्येन (२, ११) । उदात्ते परतस्त्वसावधस्त्रिशूलकेन संकेत्यते, तय. वीर्यं मयि (१९,९), अप्स्वन्तः (९, ६), योऽस्मान् (१, २६) । यदा तावत् स्वरितोदात्तयोर्मध्ये विरामो व्यवधत्ते, तदाऽधोदीर्घहस्तकस्यैवोत्सर्गो भवति, तय. वरूथ्यः । वसुः (३, २५) । यजुरादौ वाऽर्धर्चादौ वा वर्तमानश्चोदात्तादुपरितनभूतश्च स्वरितस्तु साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. त्र्यम्बकं यजामहे (३, ६०), अव देवं त्र्यम्बकम् (३, ५८), उर्व्या व्यद्यौत् (१२, १) ।

(इ) काण्व-यजुर्वेद उदात्ते परतः स्वरितमात्रमधोरेख्यत इत्येव विशेषः[१], तय. अप्स्वन्तः (१०, २, ३), योऽस्मान् (१, ९, ४), प्रसवेऽश्विनोः (१, ३, ६) ।

(ई) कपिष्ठलकठ-यजुर्वेदेऽन्यथा सर्वथा काण्व-यजुर्वेदेन स-प्रक्रिय एव वर्तमान उदात्तोदयोऽधोरेख्यमाणो ह्रस्वस्वरितो दीर्घतामप्यापाद्यत इत्यस्त्येवाऽणीयान् विशेषः, तय. उर्वान्तरिक्षम् (१, २), अप्स्वान्तः (४८, ४) ।

---

[१] अस्मदीये मूलकोषे माध्यन्दिनप्रकारीयः संभेदोऽपि लक्ष्यते । एतच्छाखीयत्वेनाऽनुदात्तभूमिस्वरितीयस्याऽधोवर्तुलकस्योपलम्भोऽपि परैः सूचितो भवति (तु. ZDMG ४९, १५१) ।

(ग) संख्याङ्कीयः सिद्धः प्रकारः

सामवेदे मूर्धन्यसंख्याऽऽत्मको विभिन्नः किल सिद्धः प्रकारः प्रवर्तते । एतदीया मुख्या विशेषा इमे सन्ति[1]—

१. सामान्येनोदात्तस्वरितानुदात्ता यथाक्रमं मूर्धन्यस्थितिभिः १, २, ३ इत्येताभिः संख्याभिः ससंकेता भवन्ति, तय. **अग्निं वेः** (१, २१)।

२. परंपरिताऽनेकोदात्तमध्ये प्रथम एव लब्धसंकेतो भवति, तय. **आ तु** (१, १६७), **स्पार्हं तद् आ** (१, २०७), **न हि** (१, २४१)।

३. आवसानिक उदात्तः १ इत्यस्य स्थाने २ इत्यनेन संकेत्यते, तय. **वयम्** (१, १४)।

४. आवसानिकपरंपरिताऽनेकोदात्तमध्ये प्रथम एव नान्तरीयोक्तपूर्वया दिशैव च संकेत्यते, तय. **महो हि षः** (२, ९६), **उते धाम्** (२, १५६), **नान्यं त्वत्** (२, ३३४)।

५. अनुदात्तव्यवहितयोरुदात्तयोर्मध्ये प्रथमः २ इत्यनेन संकेत्यते, तय. **अग्ने आ याहि** (२, १०)।

६. यदा परंपरिताऽनेकोदात्ताऽनुग उदात्तोदयोऽनुदात्तो भवति, तदा परंपरितप्रथम उदात्तः २उ इत्येवं संकेत्यते, परश्च १ इत्येवम्, तय. **शंयोरभि** (१, ३३), **वना त्वं यन्मातॄः** (१, ५३)।

७. परंपरितानेकोदात्ताऽनुगः स्वरितः २ इत्यस्य स्थाने २र इत्येवं संकेत्यते, तय. **नि होता** (१, १), **निर्गा अक्रन्तत्** (१, ५८५)।

८. यदा उदात्तभूमिः स्वरित आवसानिको वाऽनुदात्तोदयो वा भवति, तदाऽसौ २र इत्येवं संकेत्यते, तय. **उक्थ्यम्** (२, १११६), **मनुष्येभिः** (१, ७९), **नीव** (२, १००६), **देव्येतु** (१, ५६)।

९. उदात्तोदय उदात्तभूमिः स्वरितः २ इत्येवं संकेत्यते प्लुतिं चाऽऽपाद्यते, तय. **पार्यू३तं द्वितीयया** (१, ३६), **अभ्यो३दिशः सूरः** (१, १२८)।

१०. उदात्त-स्वरिताऽन्यतरोदयपरंपरिताऽनेकाऽनुदात्तमध्ये चरम एव संकेत्यते, तय. **समुद्रम्**, **इन्द्राभ्यो३दिशः** (१, १२८)।

११. स्वरितस्याऽनुगतया वर्तमानमनुदात्तमात्रं न संकेत्यते, तय. **चित्रं राधो अमर्त्य** (१, ४०)।

१२. आवसानिकाऽनुदात्तोदयान्यतरस्वरितोदयोऽनुदात्तः ३क इत्येवं संकेत्यते (इह तु. अधस्तनम् ८मीयमुदाहरणम्)।

(घ) प्रथमः प्राक्तनो रेखीयः सिद्धः प्रकारः

अथ यो मुख्यस्योदात्त-स्वरस्य साक्षादिव संकेततः सिद्धंभावुकः प्राक्तनो रेखीयः प्रकारो मैत्रायणीय-यजुर्वेदे, काठक-यजुर्वेदे, पैप्पलादाऽथर्ववेदे चोपलभ्यते, स एवात्र संगृह्यते—

१. मैत्रायणीय-यजुर्वेदे काठक-यजुर्वेदे चोदात्त ऊर्ध्वदण्डयते, तय. **अग्निः**।

२. उदात्तभूमेः स्वरितस्य कृते चोभयत्राऽधोभुमकः ८ इति सामान्यः संकेतो भवति, तय. **दिवीव** (मै १, २, १४), **व्यसृपः** (काठ ७, १२), **शुण्ठोऽधि°** (मै २, ६, १३), **क्व**।

---

[1] उदाहरणीयस्थलसंकेताः कौथुमसामवेदीया भवन्ति ।

[2] Sch. त्वियमधोरेखा न प्राऽयोजि । अत एवेहाऽप्युदाहरणान्तरेष्वेतदप्रयोगो द्रष्टव्यः ।

३. मैत्रायणीय-यजुर्वेदे सन्नतरो[१]ऽधोरेख्यते (तय. भुग्नि-), काठक-यजुर्वेदे चासावधोदण्डेन संकेत्यते, तय. भग्नि- ।

४. उदात्तोदयस्य स्वरितस्य विषयेऽपि चैतयोः शाखयोर्मध्ये भवत्येव कियानपि वि-संवादः । तथाहि । मैत्रायणीयाः ३ इत्यङ्कं ततः पुरस्तात् प्रयुञ्जते, कठाश्च तं स्वरितमेव काण्वसाधारण्येनाऽधोरेखयन्ति[२], तय. प्रसु३वे-ऽश्विनोः (मै १, २, १५), वेतु. प्रसवेऽश्विनोः (काठ. २, ९) ।

५. स्वरितीयह्रस्व-दीर्घ-भेदप्रयोजितस्तु नेहोभयत्र कोऽप्यवान्तरविशेषो भवति ।

६. मैत्रायणीया अनुदात्तभूमेः स्वरितस्य कृते सामान्येन तिरोरेखां प्रयुञ्जते, तय. धियः ।

७. सन्नतरोदयत्वे त्वस्याऽनुदात्तभूमेः स्वरितस्य कृते त ऊर्ध्वत्रिपुण्ड्रकं प्रयुञ्जते[३], तय. प्रथमः, प्रसु३वे-ऽश्विनोः (मै १, २, १५) ।

८. कठा अनुदात्तभूमेः स्वरितस्य कृते सामान्येनाऽधोबिन्दुना निर्वाहं पश्यन्ति[४], तय. धियः ।

९. पैप्पलादाऽथर्ववेदेऽप्युदात्तीय ऊर्ध्वदण्डः प्रयुज्यते सन्नतरश्च काठक-यजुर्वेदवदधोदण्डेन संकेत्यते च, तय. दाता ।

१०. यत्त्वत्राऽनुदात्तभूमिः स्वरितोऽधोबिन्दुना सनाथ्यते तदपि काठकेन सामान्यमावहति, तय. कामः ।

११. माध्यन्दिन-यजुर्वेद-सामान्येन च मैत्रायणीय-काठकयजुर्वेद-भेदेन च तत्रोदात्तभूमिः स्वरितः साधारण्येनाऽधोदीर्घहस्तकेन द्योत्यते, तय. न्यक्, शरव्या या (१४, २, ७), तन्वा शंतमया (१४, २, ८) ।

१२. स्वरितादुपरितनस्योदात्तस्य यथावदूर्ध्वदण्डग्रहात् तस्य स्वरितस्य कृते विशिष्टतरं संकेतान्तरं नाऽपेक्ष्यते ।

१३. स्वरितादुपरितनस्याऽनुदात्तस्य त्वनुदात्तभूमिस्वरितवदुपचार इष्यते यावताऽसावधोबिन्दुना सनाथ्यते, तय. आस्याय (१६, १०४, ६) ।

(ङ) द्वितीयः प्राक्तनो रेखीयः सिद्धः प्रकारः

काण्व-माध्यदिनीययोः शतपथ-ब्राह्मणयोः केषुचिद् ग्रन्थान्तरेषु (तु. C. काशब्रा. भू. पृ. ९) चाऽपरः खलु रेखीयः सिद्धः प्रकारो लब्धप्रतिष्ठो भवति । इमे तावदेतदीया विशेषा भवन्ति—

१. अत्रोदात्तोऽधोरेख्यते[५] ऽनुदात्तश्चाऽनुदात्तभूमिः स्वरितश्च नाऽङ्क्येते, तय. अग्निना ।

२. उदात्तोदय उदात्तो नाऽङ्क्यते, तय. केतपूः केतम् (५, १, १, १६)[६] ।

---

[१] सन्नतरो नामोदात्तस्वरितान्यतरोदयोऽनुदात्तः प्रसिद्धो द्रष्टव्यः ।

[२] Sch. त्वस्या अधोरेखायाः स्थान ऊर्ध्वबुध्नितं काकपदकं (^) प्रयुङ्क्ते ।

[३] मैत्रायणीयानां पदपाठ उक्तपूर्वो बाह्वृचः प्रकारो लब्धप्रतिष्ठोऽभूदित्यपरो विशेषोऽप्यत्र वैचित्र्यैक-वृद्धिकरो भवति ।

[४] Sch. अनुदात्तभूमिं स्वरितं नैव संकेतयति । सात. तु मूलोक्तस्थितिद्वयनिर्वाहाय यक. अधो-हस्तकं (∟) चाऽधस्त्रिशूलकं (ᴗ) च प्रयुङ्क्ते ।

[५] तु. C. काशब्रा. भू. पृ. ९ यत्र भाषिकस्वरस्य स्वरूपत आलोचनायां प्रवृत्तायां पुरातन उदात्तः कालेनाऽनुदात्ततां गत इत्यभिप्रायः परकीयो वादः प्रत्युक्तो भवति ।

[६] एतत्खण्डोदाहरणीयस्थलसंकेताः माशब्रा. द्र. ।

३. परंपरितानां सतां बहूनामुदात्तानां मध्ये चरम एवाङ्क्यते, तय. **अग्निर्हि वै धूर्थ** (१, १, २, ९)।

४. उदात्तभूमि-स्वरितस्य संकेतार्थं तदुदयमक्षरमधोरेख्यते[1], तय. **वीर्यम्**।

५. एवं तावदुदात्तभूमि-स्वरितोदयेऽक्षर उदात्ते सति तदीयाऽधोरेखा तस्य चोपरितनस्य स्वरितस्य च समानं ग्राहिका भवति। एवं च स्थिते तदुदयमुदात्तान्तरं चेद् भवति, तर्हि तन्नाङ्क्यते, तय. **यज्ञो वै स्वः** (१, १, २, २१), **मानुषं नेद् व्यृद्धम्** (१, ७, २, ९), वैतु. **इति सैषा** (१, ४, १, २६) यत्र तिकारोऽनुदात्तः सन्नात्मोदयोदात्तेकारीयाऽधोरेखाया अन्यथासाधने प्रयोजको न भवति।

६. उदात्त-स्वरिताऽन्यतरोदयस्य स्वरितस्य तूक्तपूर्वः संकेतो न व्याहन्यते, तय. **यज्ञो वै स्वरुः** (१, १, २, २१), **देवा वै स्वरुगन्म** (१, ९, ३, १४), **इति सैषैतम्** (१, ४, १, २६)।

७. कण्डिका-ब्राह्मणान्यतराऽवसानीय उदात्तः कण्डिका-ब्राह्मणान्यतराऽऽस्य उदात्ते परतस्त्रिभिरधोबिन्दुभिः संकेत्यते[2], तय. **देवत्रा** ॥ **सः** (५, १, ४, ७ उ)।

८. उदात्तो वाऽनुदात्तो वाप्यावसानिकः सन् स्वरिते परत एवमधोबिन्दुत्रिकेण संकेत्यते, तय. **इति** ॥ **तेऽविदुः** (३, ४, ३, ७ उ), **प्रतिप्रस्थाता** ॥ **सोऽध्व°** (४, २, १, १३ उ)।

९. यदाऽऽवसानिकस्याऽपि सतोऽक्षरस्य परेणाऽक्षरेण संहिते पाठे सति स्वरितः संभवति, तदा तदुदयस्योपान्त्यस्याऽक्षरस्यैवमधोबिन्दुत्रयेण संकेतो भवति, तय. **एव**। **एतत्** (३, ४, २, १३)।

१०. अङ्कितस्य सत उदात्तस्याऽनुनासिकतां प्राप्तावनुनासिकचिह्नमप्यधोरेख्यते, **शतुँ-शतँ ह** (३, ४, ३, १८); वैतु. **यज्ञँ सुमभरन्** (३, १, ४, ४)।

(च) एतत्कोषीयो रेखीयः सिद्धः प्रकारः

१. एवं तावद् यत्र कुत्रचित् किंचित् सामान्यमपि बिभ्राणेषु प्रायेण त्वन्योन्यं नितरामिव विशिष्यमाणेष्वेव पुरातनेषु बहुषु स्वराङ्कनप्रकारेषु विद्यमानेष्वपि कथमिव सर्वशाखीयसौवरस्थितिर् नाम केनाऽपि शाखासर्वस्वसाधारणतां भजमानेन सता प्रकारविशेषेण युगपदेव हस्तामलकीक्रियेतेत्येवमभिप्राया खलु प्रक्रियमाणस्य सतोऽस्य समस्तवैदिकवाङ्मयस्य प्रातिनिध्यमिव कुर्वाणस्य चैतिहासिकदृष्ट्या तदीयतुलनात्मकाऽध्ययनमधिकृत्यौपयिकतां बिभ्राणस्य च कोषस्य बलवत्यपेक्षाऽभूत्।

२. अस्याश्चाऽपेक्षायाः पूर्त्यर्थं यः सम्यग् विचारितः सन् पुराणानां प्रकाराणां सारायमाण इव प्रकारविशेषोऽत्र लब्धप्रवेशो भवति, स सर्वेषां प्रेक्षकाणां प्रकाममभिमतः सन् सुकरत्वाच्च सुग्रहत्वाच्चाऽपि सर्वत्र भविष्यति प्रकाशमेष्यत्सु वैदिकग्रन्थीयसंस्करणेषु चरितार्थयेत।

३. अस्मिंस्तावत् प्रकारेऽनुदात्तमात्रमनङ्कितं भवति। अनुदात्तो ह्युदात्ताऽभावस्य संज्ञा भवति। अस्य नीचैस्त्वं नामाऽऽपेक्षिको धर्मो भवति। उदात्त एव किल मौलिक आर्यभाषीयः स्वरो भवति। तदपेक्षयाऽनुदात्तो नीचैरुच्चार्यते। यदाऽयमुदात्तोदयो भवति, तदा भूयोऽपि नीचैर्गत इव लक्ष्यमाणः सन् सन्नतर इत्युच्यते। यदा चायमुदात्ताऽनुगो भवति, तदाऽस्मिन् सोपानक्रमिकस्य सतः स्वराऽवरोहस्य लक्ष्यमाणत्वादांशत उदात्तधर्मतायाः समावेश इव भवति, तेन चाऽयं समाहाररूपः सन् स्वरित इत्युच्यते। छायारूपस्त्वयं भवति। न ह्यस्या-

---

[1] web. अत्राऽधोरेखाद्वयं प्रयुक्तं द्र.।

[2] web. तावदेषा स्थितिर्द्वाभ्यामधोबिन्दुत्रिकाभ्यां संकेत्यते।

ऽनुदात्तभूमेः सतः काऽपि प्रागुदात्तस्वतन्त्रा सती प्रातिस्विकी स्थितिर्भवति । तथा ह्युदात्तान्तरोदयत्वे सत्ययमनुदात्त एव सन् सन्नतरतामुपगतोऽनुदात्त एव पुनर्भवति । एवं तावच्च् शुद्धो वा सन्नतर-स्वरिताऽन्यतरत्वोपाधिको वाऽनुदात्तः पूर्वोत्तरान्यतरपार्श्ववर्तिनः सन्नतर-च्छायास्वरिताऽन्यतरव्यवहितस्य वा नान्तरीयतया स्थितस्य वोदात्त-स्यैव स्थितिलक्षकमात्रतामनुप्राप्तः संस्तदीयाऽङ्कनत एव स्वतःसिद्धविज्ञप्तिकयथायोगविभिन्नोक्तपूर्वावान्तरस्वरूप इति कृत्वैव नैतदीयाऽन्यथासिद्धाङ्कनगौरवमिहाऽऽद्रियते ।

४. यदधस्तादुदात्तो मौलिकस्वर इति कृत्वाऽङ्कनार्हत्वेन प्रत्यपादि, तत्र खलूदात्तभूमेः सतोऽभिनिहित-प्रश्लिष्ट-क्षैप्र-जात्याऽन्यतमत्वेन प्रातिस्विकस्थितिमतो वास्तविकस्य स्वरितस्याप्यङ्कनार्हत्वस्य समावेशोऽभिप्रेतो भवति[१]। एवं तावदुदात्तश्चोदात्तभूमिः स्वरितश्च द्वावेव स्वराविह पार्थक्येनाऽङ्कनमर्हत इति कृत्वा पुरातनानामुक्तपूर्वाणां संकेता-नामेव मध्याद् ऋग्वेदे, तैत्तिरीय-यजुर्वेदे, तैत्तिरीय-ब्राह्मणे, तैत्तिरीयाऽऽरण्यके, तैत्तिरीयोपनिषदि, काण्व-यजुर्वेदे, कपिष्ठल-कठ-यजुर्वेदे चैकान्तिकतया, माध्यन्दिन-यजुर्वेदे, शौनकीयाऽथर्ववेदे च यथास्वोक्तपूर्वप्रक्रियं पर्याप्ततया, स्वरितसंकेतत्वेन प्रयुक्तपूर्वत्वादूर्ध्वदण्डः (=अ॑) एव चोदात्तभूमिस्वरितस्य, शातपथप्रसिद्धिरधोरेखा (=अ॒) चोदात्तस्य संकेतौ निर्धारितौ भवतः[२] ।

५. ये चैतद्ग्रन्थीय-स्वराङ्कनीया व्यावहारिका विशेषा भवन्ति, त इमे संगृह्योल्लिख्यन्ते—

(क) अगतिका वा सगतिका वा मूलधातवश्च, क्विब्-णिजन्यतरान्ता नामधातवश्च तदीयविभिन्नस्वराणां सतां रूपाणामसंभिन्नं संकेतनं सुकरं स्यादिति स्वरतो नाङ्क्यन्ते, तय. √१अक्ष्, √२अक्ष्, अति√मुच्, अल्खली√कृ, √अव् > √ओम्, अ॒न्त- >√अन्ति ।

(ख) नामधात्वन्तराणि तु स्वरतः संकेत्यन्ते (तु. भू. ४, २, क, ७, अ), तय. अ॒घ->√अघा॒य् ।

(ग) तिङन्तानि रूपाणि स्वरतः संकेत्यन्ते, तय. √१अक्ष् >अक्ष्णु॒ते ।

(घ) संनिहितपदान्तरनिमित्तप्रयोजितनिघातानि तिङ्-रूपाणि स्वरतो न संकेत्यन्ते[३], तय. √१अक्ष् >अक्ष्णुयात् ।

(ङ) अनङ्कितस्वर-संस्करणेभ्यो ग्रन्थेभ्यः संगृहीतानि सन्ति तिङ्-रूपाणि तदीयशब्दान्तरसामान्येना-ऽनङ्कितान्येव ध्रियन्ते, तय. √अज् >अजामसि, अजन् ।

(च) यदाऽङ्किताऽनङ्कित-स्वरेभ्य उभयेभ्यो ग्रन्थेभ्यस्तिङ्-रूपाणि संगृह्यन्ते, तदाऽनङ्कितस्वर-ग्रन्थीयानि तिङ्-रूपाणि यथाऽङ्कितस्वरग्रन्थीयस्वरवच्छ्रुति[४] निर्दिश्यन्ते, तय. अनु √ध्व(ध्वं)स्>अनुदध्वसे॒ ।

(छ) अङ्कितस्वर-ग्रन्थीयं सुब्योगीयं वाऽव्ययं वा कृन्मात्रं स्वरवद् निर्दिश्यते, तय. √अत्>अ॒तत्-अ॒तिथि-, √अद्>अ॒त्तवे, अ॒त्तुम् ।

(ज) अनङ्कितस्वर-ग्रन्थीयः कृद् निःस्वरं निर्दिश्यते, तय. अग्नि-मेदिन्–, अग्नि-यानी- ।

---

[१] मूलतो जात्य-क्षैप्रयोरभेदो द्रष्टव्यः (तु. पृपृ. ४२७^{i}, ५३७^{i}, ५३८^{p}) ।

[२] तस्मिंस्तस्मिन् पुराणे वा नूतने वा सौवरे संकेते प्रतिनियतायाः स्वरविशेषसंकेतनविषयायाः स्वा-भाविक्याः शक्तेरभावाद् यथासमयं शक्तिविशेष उपाधीयत एव ।

[३] अस्य ग्रन्थस्य यथाश्रुतानुक्रमणस्वरूपताया एतदीयलक्षणशास्त्रस्वरूपताऽतिरेकित्वादित्यभिप्रायः ।

[४] अपि तानि स्वरतो वस्तुतस्तथा स्युर्न वा स्युरित्यस्य तत्तन्मूलीयवाक्यस्वतन्त्रविचाराधीन-त्वादस्मिन् विषयेऽन्यत्यो निर्देशोऽप्रमाणं भवति ।

(झ) अङ्किताऽनङ्कितस्वरेभ्य उभयेभ्यो ग्रन्थेभ्यः संगृह्यमाणः कृद् यथास्वरवद्ग्रन्थीयश्रुति निर्दिश्यते[1], तय. अंशु- ।

(ञ) व्युत्पत्त्यौपयिकतयोपकल्पितानां कृतां स्वरनिर्देश औपकल्पनिको भवति, तय. *अन्तः(<ऱ्)-पर्शु- ।

(ट) यदा व्युत्पादनप्रयोजितः सन् स्वर उपकल्पनाया विषयो भवति, तदा स्वरवदक्षरं स-तारकं निर्दिश्यते, तय. अच्छॅरा-, अष्ट्रा-दंष्ट्रॅ- ।

(ठ) यदौपकल्पनिकस्य सतः कृतो विषये सौवरी स्थितिर्दुर्विनिगमना भवति, तदाऽसौ निःस्वरं निर्दिश्यते, तय. √अट् > अट्णार- > आट्णार- ।

(ड) निघातमात्रवन्ति सर्वनामानि निःस्वरं निर्दिश्यन्ते, तय. अस्मद्- > २*अँ(> न्)-, *ई-, *सी-, एन-, सम-, त्व- ।

(ढ) निहताऽनिहतोभय-प्रयोगवन्ति सर्वनामान्युभयथा पृथग् निर्दिश्यन्ते, तय. इदम्- > ३अ-, ४अ-; अस्मद्- > १मय्-, २मय्- ।

(ण) अलुक्-समासे पूर्वपदायमानानि चाऽवान्तरप्रातिपदिकीक्रियमाणानि च सन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अग्र- > अग्रे ।

(त) द्वैस्वर्येण श्रूयमाणाः समासास्तथैव निर्दिश्यन्ते, तय. बृहस्पति-, वनस्पति-, अग्नी-वरुण- ।

(थ) यथाप्रातिस्विकप्रातिपदिकस्वरवन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अंहस्- > -हसः (=अंहसः) ।

(द) हल्पूर्वोदात्तयण्भाव-प्रयोजितः[2] सुब्-उदात्तो न निर्दिश्यते, तय. ऊति > -त्या(=ऊत्या) ।

(ध) यदा सुपि परत उदात्तयोर् इवर्णोवर्णयोः स्थानेऽन्यतः अय् इति वा इय् इति वाऽन्यतश्च अव् इति वा उव् इति वा भवतः, तदा सुब्-रूपं निःस्वरं निर्दिश्यते, तय. अग्नि- > -ग्नयः (=अग्नयः), धी- > धियः (=धियः), अंशु- > -शवः (=अंशवः), अभ्रू- > -भ्रुवः (=अभ्रुवः) ।

(न) उदात्तयणभाव-प्रयोजितः सुप्-स्वरितो यथावद् निर्दिश्यते, तय. १अरुणी- > -ण्यः, अश्वतरी- > -र्यः ।

(प) यदा प्रातिपदिकनिघात-प्रयोजकः सुप्-स्वरः प्रवर्तते, तदाऽसौ यथावद् निर्दिश्यते, तय. अघायत्- > -यते, १अप्- > अपः, २अप्- > अद्भिः ।

(फ) उदात्तनिवृत्तिप्रयुक्तः सुप्-स्वरो यथावद् निर्दिश्यते[3], तय. असन्- > -स्नः, अस्थन्- > -स्थ्नः ।

(ब) आद्युदात्त-निघातोभयविधमामन्त्रितं पदं स्वीयसंकेतविशेषभूत-वर्तुलकीयाया अधोरेखाया भावाऽभावाभ्यां यथायोगं विविच्य निर्दिश्यते, तय. १अक्ष- > -०क्ष, २अक्ष- > -०क्षाः, आदित्य- > -०त्य ।

(भ) निःस्वरं निर्दिश्यमानानि प्रातिपदिकान्यनुबध्नन्ति सुब्-रूपाणि कैमुतिकेनैव निःस्वरं निर्दिश्यन्ते, तय. अ-कृतपूर्व- > -र्वम्, अस्मद्- > (*अँऱ् > *अँ >) न्- > नौ, नः ।

---

[1] अप्यस्वरवद्ग्रन्थीयोऽनेकाच् कृद् वस्तुतो यथानिर्दिष्टस्वरो भिन्नस्वरो वेत्यत्राऽयं निर्देशोऽनैकान्तिको भवति ।

[2] वैतु. पृ. ५८८^{b} (तु. उपरिष्टात् फ च) ।

[3] तु. पृ. ५८८^{b} यदन्वधस्ताद् (द) इत्यत्र प्रत्तमुदाहरणमप्यस्यैव नियमस्य विषयो भवति ।

(म) साम्रेडितानां सुब्-रूपाणां नियताऽऽम्रेडितांशनिघातानां सतां निर्देश उक्तपूर्वसुब्रूपीयनिर्देश-सामान्यमेव बिभर्त्ति, तय. अंशु->-शुः-शुः (=अंशुः-अंशुः)।

(य) अव्यय-मात्रं यथास्वरश्रुति निर्दिश्यते, तय. अनु, अभि, एतवै।

(र) सस्वरनिःस्वरोभयविधश्रुतिकमव्ययं यथायथं पार्थक्येन निर्दिश्यते, तय. १कम्, २कम्, १यथा, २यथा।

(ल) निहतमात्रस्वरूपमव्ययं तथैव निर्दिश्यते, तय. इव (तु. भू. ४, ४, च, ४), उ, घ।

(व) सस्वरनिःस्वरोभयविधश्रुतिकं समासाङ्गभावुकमव्ययं यथायथं विविच्य निर्दिश्यते, तय. अति-√पू>अतिपवते, अतिपवते, अप√गु(>गू)ह्>अप-गूळ्ह-, अप-गूहमान-।

६. स्थल-प्रकरणम्

१. प्रतितिङन्तसुबन्ताऽव्ययनिर्देशाऽनुपदं यथाश्रुति समग्राणि स्थलानि निर्दिश्यन्ते। तत्र तत्तद्-ग्रन्थोद्देशतस्तावदयं निर्देशक्रमो भवति—

(क) ऋग्वेदे—१. ऋ.,　२. खि.।
(ख) यजुर्वेदे—१. मा.,　२. का.,
　३. तै.,　४. मै.,
　५. काठ.,　६. क.।
(ग) सामवेदे—१. कौ.,　२. जै.।
(घ) अथर्ववेदे—१. शौ.,　२. पै.।

२. प्रत्युपस्थिते स्थलनिर्देशे प्रथमं तावद् यथाऽपेक्षं ग्रन्थनाम्नः संक्षेपो दीयते। तदनु नान्तरीयतया ग्रन्थीयप्रधानाऽवान्तरविभागप्रदर्शिकाः संख्या दीयन्ते। आसां च मध्ये या प्रथमा भवति सा प्रधानविभागीया भवति, अवान्तरविभागीयास्त्वितरा यास्ततश्चाऽन्योन्यं च प्रार्धविरामेण व्यवच्छिद्यन्ते। संख्यानामन्ते च विरामो दीयते, तय. अकन्तः पै १, ४३, २.

३. यदा स्थलविशेषनिर्देशमनु स्थलान्तरीयो निर्देशः क्रियते, तदा ययोः कयोरपि द्वयोः स्थलाङ्कनमात्र-योर्मध्येऽर्धविरामो दीयते, तय. अंहस्->-हः ऋ १, ४२, १; २, २३, ४; अंशु- > -शून् शौ ५, २०, १०; पै···.

४. ग्रन्थविशेषीयाऽनेकस्थलानामङ्कन उपस्थिते सति प्रथमायामेव तदीयमात्रायां सर्वास्तत्तद्वि-भागीयाः संख्या दीयन्ते। उत्तरासु तु तदीयमात्रासु समानाः सतीः प्रधान-मध्यमविभागीयाः संख्या नावर्त्य याश्चरम-विभागीयाः सत्यो विभिन्नाः संख्याः स्युस्ता एव निर्दिश्यन्ते, तय. अक्ष्णया तै ५, २, ७, ५^{२}; १०, ४; ५; ३, ५, ३^{२}; < ५, २, ७, ५^{२}; ५, २, १०, ४; ५, २, १०, ५; ५, ३, ५, ३^{२};

५. अनेकेषां परंपरितानां स्थलानां निर्देश उपस्थिते सति प्रथमचरमयोः सतोः स्थलयोरेव निर्देशः क्रियते, तन्मध्ये विच्छेदकश्च दीयते, तय. अग्नि- > -ग्निम् काठ १६, ८-११; १९, ३^{२}-५^{२}.

६. यदि क्वचिद् मध्यमानां संख्यानामपि विषय उक्तपूर्वप्रकारकं पारंपर्यं निर्देश्यं भवति, तर्हि तासां मध्याद् अप्येवं प्रथमचरमयोः सत्योरेव निर्देशः क्रियते, तन्मध्ये च विच्छेदको दीयते, तय. अंहस्- > -हसः शौ ४, २३-२९, १-७.

७. यथा रूपविशेषीयाणां स्थलनिर्देशानामन्योऽन्यमर्धविरामेण व्यवच्छेदो भवति, तथैव विभिन्नरूपीयाणां स्थलसंख्याङ्कव्यूहानामन्योऽन्यमर्धविरामेण व्यवच्छेदः क्रियते, चरमरूपीयचरमस्थलीयसंख्याङ्कादूर्ध्वं च विरामो दीयते, तय. अंशु- > -शवः····; -शवे···; -शोः····; ३, १२, ४.

८. रूपविशेषाणां सस्थलानां सतां प्रथमं परंपरितो निर्देशो भवति, तदनु च तत्साधारणस्थलीयाः संख्या दीयन्ते, तय. अति[४](चर), (अति) चर पै ३, ३३, ६; अत्याशित- > -तस्य, -तेन मै ३, ६, २.

९. यदा रूपविशेषस्य स्थलविशेषीया विशेषसंख्याकाऽऽवृत्तिः सूचनीया भवति, तदा तदङ्कः स्थलाङ्कशीर्षण्यतया निर्दिश्यते, तय. अंहूरण- > -णम् काठ १०, ९[२]; अग्नि- > -०ग्ने काठ १८, ३[३]; ४[८]; १६[१४].

१०. तत्तद्ग्रन्थीयतयाऽन्योन्यं प्रायेण भूयोविशिष्टानि सन्ति तत्तत्प्रधान-मध्यम-चरमविभागीयानि प्राक्प्रसिद्धानि मण्डलाऽध्यायप्रभृतीनि नामान्युक्तपूर्वप्रकारेणेह संख्याङ्कनमात्रेण निर्वाहसंभवादन्यथासिद्धानीति कृत्वा नोपयुज्यन्ते[१]। अयं तावत्तदीयः स्वरूपतश्च संख्यातश्च परिचयः संग्रहेणोच्यते—

(क) ऋग्वेदेऽष्टकाऽध्याय-वर्ग-मन्त्रात्मकश्च मण्डलाऽनुवाक-सूक्त-मन्त्रात्मकश्च चतुष्टयौ सन्तौ द्वौ विभागप्रकारौ भवतः। एतयोर्द्वितीय एव प्रसिद्धतरत्वादिहोपयुज्यते, प्रतिमण्डलं सूक्तानां परंपरितात् संख्यानादनुवाकीयनिर्देशस्याऽन्यथासिद्धत्वात् प्रतिस्थलं संख्यात्रितयस्यैवाङ्कनं च क्रियते।

(ख) ऋग्वेद-खिलानि सूक्त-मन्त्र-प्रविभक्ताऽध्यायपञ्चकात्मकानि भवन्ति। एत एव त्रयो विभागाश्चाऽत्र संख्याप्यन्ते। संहिताऽरण्यं च परिशिष्टं चोभे अपि द्विधा प्रविभक्ते सती यथाक्रमं षष्ठ-सप्तमाऽध्यायतयाऽङ्क्येते। द्वितीय-तृतीय-चतुर्थेष्वध्यायेषु सन्ति कतिचित् सूक्तानि यानि पृथङ् मन्त्रप्रविभक्त-खण्डद्वयात्मकानि भवन्ति। तदीयस्थलाङ्कन उपस्थिते सति सूक्ताङ्कीयशीर्षण्यभूतेन २ इत्यङ्केन द्वितीयखण्डीयताया विवेकेन परामर्शो भवति, तय. √ १अस् > असि खि ४, ७[२], १[२]। एवं पञ्चमाध्यायीयसप्तमसूक्तस्थ-खण्डपञ्चकस्य विविक्तः परामर्शः सूक्त-मन्त्राङ्कमध्यीयतया धृतेन सताऽङ्कविशेषेण क्रियते[२], तय. अदिति- > -तेः खि ५, ७, १, २.

(ग) माध्यन्दिन-यजुर्वेदो मन्त्रप्रविभक्तचत्वारिंशदध्यायात्मकः सन् संख्याद्वयेन परामृष्टविभागद्वितयो भवति।

(घ) काण्व-यजुर्वेदस्य दशकाऽध्यायाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढो विभागश्चत्वारिंशतोऽप्यध्यायानां माध्यन्दिन-यजुर्वेदवत् परंपरितसंख्यापनेन त्रिव्यूढः सन् संख्यात्रयेण परामृष्टो भवति[३]।

(ङ) तैत्तिरीय-यजुर्वेदीयो विभागः काण्ड-प्रपाठकाऽनुवाक-खण्डात्मकतया चतुर्व्यूढः सन् चतुर्धा संख्याप्याङ्क्यते[४]।

(च) मैत्रायणीय-यजुर्वेदः प्रपाठक-खण्ड-प्रविभक्ताऽध्यायचतुष्टयात्मकः सन् संख्यात्रयेण परामृष्टत्रिव्यूढविभागो भवति।

---

[१] तत्तद्ग्रन्थीय-तत्तद्विभागीय-पुष्पिकीयाणां निर्देशानां स्थलाङ्कन उपस्थिते सति यथायोगं केवलाद् ग्रन्थनाम्नो वा विभागविशेष-सहकृतग्रन्थनाम्नो वोपरि पुष्पि. इति संक्षेपो दीयते, तय. तु. इठिमिका-, ओरिमिका-।

[२] एतद्ग्रन्थीय-प्रकृतखण्डादग्रतस्तावदस्य सूक्तमन्त्राङ्क-मध्यीयाङ्कस्य सूक्ताङ्कीय-शीर्षण्यतयैव स्थितिः संपादयिष्यमाणा द्रष्टव्या।

[३] एतद्ग्रन्थीयसामग्रीसंकलनात् पश्चात् प्रकाशं नीयमाने सात. प्रत्यध्यायं मन्त्राणां परंपरितपाठेनाऽनुवाकीयो विभागोऽप्यन्यथासिद्ध इव क्रियते।

[४] मैसू. त्रुटितपाठत्वात् तदीयः खण्डपरंपरितेन त्रिव्यूढोऽपि सन् विभाग इह नाऽनुस्रियते।

(छ) **काठक-चरक-यजुर्वेदः** खण्डप्रविभक्त-स्थानकात्मकतया व्यूढः सन् संख्याद्वयेन परामृष्टो भवति। आश्वमेधिकपरिशिष्टीयास्त्रयोदश प्रधानविभागा अपि स्थानकीकृत्य च चत्वारिंशता स्थानकैः परंपरयित्वा च परामृश्यन्ते। एवं तावत् संकलितानि सन्ति स्थानकानि त्रिपञ्चाशत्संख्याकानि संपद्यन्ते[1]।

(ज) **कपिष्ठल-कठ-यजुर्वेदे**ऽष्टकाऽध्याय-खण्डात्मकतया त्रिव्यूढो विभागोऽध्यायपरंपरितेनाऽन्यथासिद्धीभूताऽष्टकविवेकः सन् संख्याद्वयेनैवेह परामृष्टो भवति[2]। चत्वारिंशोऽध्यायोऽखण्डप्रविभक्तः सन्नेकखण्डात्मकतया सर्वत्र १ इत्येतेन खण्डाङ्केन सहैव निर्दिश्यते।

(झ) **कौथुमसामवेदे** प्रथमं तावद् द्वौ विभागौ भवतः। पूर्वार्चिकं चोत्तरार्चिकं च। आरण्य-काण्डं वाऽऽरण्य-संहिता वेति च महानाम्न्यार्चिकमिति च पूर्वार्चिकाऽनुगता परिशिष्टद्वयी भवति। पूर्वोत्तरार्चिकयोः प्रपाठकाऽर्ध-दशति-मन्त्रात्मकश्चतुर्व्यूढो विभागो भवति। पूर्वार्चिकीया षट्-प्रपाठकी प्रतिप्रपाठकयुगलं काण्डव्यवहारेण त्रिकाण्ड्यपि भवति। प्रपाठकानां परंपरितेनाऽन्यथासिद्धस्त्वयं काण्ड-विभागो भवति। यत्तूत्तरार्चिके दशतेः स्थाने सूक्तं व्यवह्रियते तत्तदवान्तरविभागविशेषीयसंज्ञामात्रीयविशेषत्वान्न विशिष्यते। अस्ति तावदुभयमुख्यविभागसाधारणोऽध्याय-खण्ड-मन्त्रात्मकस्त्रिव्यूढोऽपरोऽपि विभाग-प्रकारः। अस्मिंश्च प्रकार आरण्य-काण्डस्यापि षष्ठाऽध्यायात्मकतया व्यवहारो भवति। अपि चोत्तरार्चिके क्वचित् खण्डमन्त्रयोर्मध्यगामितया सूक्तविभागोऽप्युपलभ्यते। इह तावदुक्तपूर्वयोः प्रकारयोः कतरेणचनापि विभागे सति परामर्शिका नितान्तं दुष्करा भवतीति कृत्वा च BC. इत्यत आंशिकं संकेतं गृहीत्वा च पूर्वोत्तरार्चिके यथाक्रमम् १ इति २ इति च संख्याप्य परामृश्येते च, तदुभयीया मन्त्राश्च माध्यमिकविभागाऽन्यथासिद्धयर्थं पृथक्परंपराभ्यां संकल्यन्ते च। अनया दिशोभयार्चिकीयस्थलाङ्कनं द्वाभ्यां द्वाभ्यां संख्याभ्यां साध्यते। एवमारण्य-काण्डम् ३ इत्येवं महानाम्न्यार्चिकं च ४ इत्येवं परामृश्येते। आरण्य-काण्डे दशति-खण्डाऽन्यतरनामको मध्यमो मन्त्रगणात्मको विभागो भवतीति कृत्वा तदीयं स्थलाङ्कनं संख्यात्रिकेण संपाद्यते। मध्यमस्य कस्यचिद् विभागस्याभावाद् महानाम्न्यार्चिकीयं स्थलाङ्कनं तावद् द्वाभ्यां संख्याभ्यामेव क्रियते[4]।

(ञ) **जैमिनीय-सामवेदे** पूर्वार्चिकमिति प्रथमः, आरण्यं च महानाम्न्यश्चेत्युभयात्मको द्वितीयः, ऊहगानमिति तृतीयः, उह्यगानमिति चतुर्थः, इत्येवं चत्वारो मुख्या विभागाः सन्तः प्रत्येकं खण्ड-मन्त्रात्मकतया द्विधा प्रविभक्ता भवन्ति। एतदीयं स्थलाङ्कनं च त्रिभिः संख्याभिरभिनिर्वर्त्यते। पूर्वार्चिकीयः खण्डगणात्मकपर्वरूपोऽवान्तरविभागश्चैवं तद्गतद्वितीयपर्वगतोपपर्वप्रकारकोऽपरोऽवान्तरविभागश्च मुख्यविभागान्तरत्रिकवत् खण्डपरंपरितेनाऽन्यथासिद्धाविव क्रियेते[5]।

---

[1] मुख्यानां चत्वारिंशत्-स्थानकानां मूलत **इठिमिका** (< ***इथिमिका** = ***प्रथमिका**), **मध्यमिका**, **ओरिमिका** (< ***अवरिमिका** = ***अवरमिका**), **याज्यानुवाक्या**श्चेत्येवं **ग्रन्थ**चतुष्कतोऽपि विभाग आसीदित्यत्र तत्तद्ग्रन्थसंकेतवत्यः स्थानकीयाः पुष्पिका द्रष्टव्याः।

[2] भावे क्तान्तं पदं द्रष्टव्यम्।

[3] काण्ड-प्रपाठक-खण्डात्मकोऽपि विभागोऽस्यां शाखायां कदाचिदादरं लेभ इत्यत्रैतदीयमूलकोशीयं साक्ष्यं भवति।

[4] इहत्यस्य च मुद्रितसंस्करणमात्रीयस्य च स्थलाङ्कनप्रकारसर्वस्व संवादनार्थं तु. आर्चि. १.

[5] र. पुरातनविभागीयः प्रकारश्चेहाऽनुस्रियमाणः प्रकारश्चोभावपि प्रदर्शितचरौ भवतः।

(ट) **शौनकीयाऽथर्ववेदे** द्वौ विभागप्रकारौ प्रवर्तेते। काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च प्रकारः काण्ड-प्रपाठकाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढश्च प्रकारः। एतयोर्मध्ये प्रथम एव तावदिहानुवर्त्यमानः सन् संख्यात्रिकेण द्योत्यते[1]।

(ठ) **पैप्पलादाऽथर्ववेदे** च द्वौ विभागप्रकारौ प्रवर्तेते। काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च काण्डाऽनुवाक-[2]खण्ड-मन्त्रात्मकश्चतुर्व्यूढश्च। एतयोर्मध्ये तावत् प्रथम एवेहानुवर्त्यमानः सन् संख्यात्रयेणाऽङ्क्यते। यत्र क्वचिच्च (तु. ३, ३७) सूक्तानि मन्त्रतोऽविभक्तानि भवन्ति, तत्र तान्येकमन्त्रात्मकानीति कृत्वा १ इत्येतन्मन्त्रस्थानीयाऽङ्कप्रदानेन संख्यात्रयेणैवाऽङ्क्यन्ते। एवमविविक्तमन्त्रविभागस्थलीयाङ्कन उपस्थिते सति विच्छेदकव्यवहितयोः सतोर्द्वयोर्मुद्रितसंस्करणीययोरङ्कयोर्मध्याद् द्वितीयो विच्छेदकदक्षिणपार्श्वीयोऽङ्क एवेह प्रदर्श्यते (तु. ९, १२, ६-७)।

७. संकेत-प्रकरणम्

इह तावद् निर्देशस्य समूह्यर्थं वैशद्यार्थं वा ये केचन संकेताः प्रायुक्षत, त इमे भवन्ति—

१. √ इति **धातुकः**[3] प्रातिस्विकचिह्नतया धातुमात्रेण पुरस्क्रियते, तय. **√१अंह्**।

२. √- इति स-विच्छेदको धातुकः प्रकरणत आक्षेप्याऽऽख्यातांशानामुपसर्गाणामुपरिष्टात् प्रयुज्यते, तय. **अति√-**।

३. – इति **विच्छेदकः** प्रातिपदिकमात्रान्ते प्रत्तः संस्तदीयसुब्योगीयतामुपदर्शयति। शब्दमात्रीयाक्षरविशेषस्याऽधस्ताद् दीयमानश्चायं धर्मान्तरमिव बिभ्राणः संस्तत्रोदात्तस्य व्यवस्थितिं सूचयति।

४. - इत्यर्धविच्छेदकः प्रातिपदिकादुपरि नान्तरीयतया निर्दिश्यमानात् संक्षिप्तात् सतो रूपविशेषात् पुरस्तात् प्रत्तः संस्तदीयार्थंशस्य पूरयितव्यतामुपक्षिपति, तय. **अग्नि->-म्निः**, वैतु.–**म्निम्**। अयं समासेऽवग्रहत्वेनाऽपि प्रयुज्यते, तय. **अग्रे-ग-**।

५. । इत्यूर्ध्वदण्डो वर्णमूर्ध्नि दीयमानः सन् शब्दविशेषीयैकस्वरस्य सतः स्वरितस्य व्यवस्थितिं प्रदिशति, तय. **अ-कुध्र्यञ्च्-**।

६. = इति **संतोलः** स्वतः प्राग्वर्तमानस्य सतः स्वत उत्तरवर्तिना सता तुल्यत्वं सूचयति, तय. 'तया गत्या' (=तेन प्रकारेण), पृ. ११२^{b}।

७. + इति **योजकः** प्रकृतिप्रत्ययीयं वा समासावयवीयं वा योगं संकेतयति, तय. **√जन्+डः** (पृ. ३२^{o}), **६अ+रैवथ-** (पृ. ४९९^{m})।

८. → इत्यभिपुङ्खः स्वतः प्राग्वर्तिनः सतः स्वोत्तरवर्त्यात्मकतया परिणामं संकेतयति, तय. **अंशो-**(र→)रा-।

९. > इत्यभिकोणः = →, तय. **२अभि>भी**।

१०. ← इति **प्रतिपुङ्खः** स्वत उत्तरवर्तिनः सतः स्वप्राग्वर्त्यात्मकतया परिणामं संकेतयति, तय. **६अ←नम्**।

---

[1] WR. शंपां. इत्येतयोः क्वाचित्कस्थलाङ्कनभेदवतोः सतोः संवादनार्थं तु. आचि. २।

[2] मूलकोषे खण्ड->*कण्ड->काण्ड इति काश्मीरवाचनिकप्रवृत्तिसुलभविकारमध्योऽपपाठो द्रष्टव्यः।

[3] धातुं संकेतयतीत्यभिप्रायपरस्तद्धितो भवति। एवमुपर्यपि तत्तत्संकेतसंज्ञात्वेन प्रयुज्यमानाः शब्दविशेषा यथावद् बोद्धव्याः।

११. < इति **प्रतिकोणः** = ←, तय. **अन्तः**(<र्)-**कोशु-**

१२. < > इति **कोणयुगं** स्वतः पूर्वोत्तरवर्तिनोरन्योन्यप्रकृतिविकृत्यन्यतरभावं संकेतयति, तय. **अनुडुह्** < >**धु॑-** (पृ. १६५[b])।

१३. ऽ इति **वक्रकं** संहिताविषय उत्तरवर्तिनोऽकारस्य पूर्ववर्तिनि सांहितिक आकार एकार ओकारे वाऽन्तर्भावं संकेतयति, तय. वाऽन्यस्य (पृ. १३[f]); स्वरेऽविशेषः (पृ. ४[b]); भूरिविमृश्योऽयम् (पृ. १३[f])।

१४. ऽऽ इति **द्विवक्रकमु**त्तरवर्तिन आकारस्य पूर्ववर्तिनि सांहितिक आकारेऽन्तर्भावं संकेतयति, तय. पञ्चम्यर्थस्याऽऽकाङ्क्षितत्वात् (पृ. ५[f]); °कर्मताऽऽपद्येत (पृ. ७५[a]) ।

१५. (ऽ) इति कोष्ठितं **वक्रकमु**त्तरवर्तिनोऽकारस्य पूर्ववर्तिनि पूर्वरूपैकादेशात्मकेऽकारेऽन्तर्भावं संकेतयति, तय. **अग्नै(ऽ)यण-** ।

१६. , इति **प्रार्ध-विरामो** यत्र तत्र शाब्दिके वा स्थलीये वा निर्देशे यथापेक्षं लघिष्ठव्यवच्छेदकत्वेन प्रयुज्यते, तय. **√१अस्, अ॒स्ति**; **अँनस्**(>ड्, ळ्)**√१वह्**; **अ॒ध, अ॒धा**; **अ॒न्त,न्ता-**; **अनु,>नू-याज॒-** ।

१७. ; इत्यर्ध-**विराम** एकैकस्याः स्थलाङ्कनमात्राया व्यवच्छेदकतया प्रयुज्यते, तय. **अं॒श-** > **-शः** ऋ २, १, ४; २७, १.

१८. . इति **विराम** एकैकस्य पदसंग्राहकनिर्देशखण्डस्य च समासाभिमुखे संक्षेपान्तरे वा स्थलाङ्के वा परतोऽसत्येकैकस्य संक्षेपस्य चाऽवसाने व्यवच्छेदकतया प्रयुज्यते, तय. **अनु√दिश्**,······१०५., **अं॒श-**····**१७.** । पा. (वैतु. पाभे.) इति च, **अं॒श-** > **-शः** ऋ २, १, ४ (वैतु. ऋ.) इति च ।

१९. ' ' इति शीर्षण्यं **प्रार्धविराम-प्रतियुगं** स्वमध्यगतस्य प्रायेणेतिकारेणाऽनुगतस्य सतः पाठस्य ग्रन्थान्तरीयोद्धारात्मकतां संकेतयति, तय. '**कृत्योक-**' (पृ. ८[g]) ।

२०. ० इति **वर्तुलकं** शीर्षण्यतया प्रयोगतः पूर्वोत्तरस्थित्यनुक्रमेणाऽधस्तनीं चोपरितनीं च पूरयितव्यतां संकेतयति, तय., **अंशु- °शु- अन्°** (= **अनंशु-**), **°वामीरनु°** (= **अग्ने वामी॒रनु संवृ॒शि** पृ. २०१°)। **इदमेव च वर्तुलकं** यदाऽर्धविच्छेदकस्य च संक्षिप्तस्य सतः सुब्रूपस्य च मध्ये दीयते, तदा तस्य रूपस्याऽऽमन्त्रितभावः सूच्यते, तय. **अं॒शु-** > **-०शो, अ॒ग्नि-** > **-०ग्ने** ।

२१. * इति **तारका** यस्योपरि धृता भवति, तस्यौपकल्पनिकत्वं संकेतयति । तत्र ये विशेषा भवन्ति, त इमे सन्ति—

(क) वामपार्श्वतः शीर्षण्या सतीयं शब्दविशेषस्य तदर्थविशेषस्य वोक्तपूर्वं स्वरूपमाचष्टे, तय. **√*अप्, √१अस्** *हिंसायाम् ।

(ख) सस्वरस्याऽक्षरविशेषस्योपरि धृता सतीयं तस्य स्वरस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अप्सर-हुँ-, अँ॒-संबाज्य-** ।

(ग) आवसानिक-**विच्छेदकस्योपरि** धृता सतीयं तत्प्रतियोगिनः सुब्योगीयताया उक्तपूर्वं स्वरूपमाचष्टे, तय. **अन्तर्-*** ।

(घ) अवग्रहस्योपरि धृता सतीयं तस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अन्तरि*क्ष-** ।

२२. ? इति प्रश्नकः शब्द[1]-रूप[2]-ग्रन्थनामसंक्षेपाऽन्यतमीयाद् निर्देशात् पुरस्ताच्च स्थलाङ्कनिर्देश-मात्राया उपरिष्टाच्चोपचर्यमाणो यथास्थितस्य तत्तन्निर्देशस्य विषये सामान्यतो वा तत्तद्विशेषतो वा दुरूहता-सांशयिकताऽध्यवसेयकल्पतादिप्रकारकमर्थं संकेतयति । येष्वेतद्विषयभूतेषु तावदस्योपचारो भवति, तानीमानि संगृह्येरन्—

(क) पाठ-स्वरूपे, तय. ?अ-कल्याणी-, अश्री- > -श्यौ पै ६, ६, १? ।

(ख) वर्ण-स्वरूपे, तय. ?अंहारि- ।

(ग) तात्पर्य-स्वरूपे, तय. ?अकन्त- ।

(घ) अवग्रह-स्थितौ, तय. ?अप्-सर्- ।

(ङ) व्युत्पत्ति-स्वरूपे, तय. ?३अर्य- ।

(च) उपकल्पना-स्वरूपे, तय. ?√*अराय् ।

(छ) स्वर-स्वरूपे, तय. अष्ट्री मै ४, २, १४? ।

एवं टिप्पणेषु चायं व्यु. मूपा. इत्यादितस् तत्तद्विषयीयात् संक्षेपादुपरि ध्रियमाणस्तत्र तत्र निर्णयाभावं सूचयति ।

२३. ϕ इति संकेतः कृतः पुरस्तादुपचर्यमाणस्तस्य व्यवहितोपसृष्टत्वं भवतीति च स्थलाङ्कीय-मात्राविशेषादुपरि ध्रियमाणश्च तत्रैव स्थले व्यवहितोपसृष्टत्वं भवतीति च संकेतयति, तय. ϕ अप-शोशुचत्-, अप-घ्नत्- > -घ्नन् ऋ ८, ४३, २६ϕ.

२४. ‡ इति संकेतः शब्द-रूप-ग्रन्थनामसंक्षेपान्यतमीयाद् निर्देशात् पुरस्तादुपचर्यमाणस्तदधिकृतायाः पाठस्थितेर् नित्यं टिप्पणितस्थलस्य सतो बाह्वृचादिग्रन्थान्तरीयश्रुतिविशेषस्याऽपेक्षया भिन्नाऽऽत्मकतां संकेतयति, तय. अ-जर-> ‡-रस्य । स्थलविशेषीयपाठस्थितेरेवंप्रकारतायां सूचयितव्यायां सत्यां तु संकेतोऽयं तत्तत्स्थला-ङ्काऽवसानतः क्रियते, तय. अग्नि-मत्->-मान् काठ २३, ११ ‡ ।

२५. † इति संकेतः शब्द-तद्रूपाऽन्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तद्गतः श्रुतिसामा-न्यस्य बाह्वृचमूलकतां सूचयति, तय. †अज्म-, अज्मन्->†-ज्म । यदा तु निर्देशविशेषस्य श्रुतिविशेषीय-तयैवैवंप्रकारकता सूचयितव्या भवति, तदा तच्छ्रुतिविशेषीयव्याप्तिमात्रानुपाततोऽयं संकेतः स्थलाङ्कीयमात्राविशे-षात् पुरस्ताद्वोपरिष्टाद्वोपचर्यते, तय. अच्युत-च्युत्- > -च्युत् शौ २०, ३४, ९† । यदा चाऽपि निर्देशविशेषस्य श्रुतिविशेषीयाऽऽवृत्तिबहुत्वविषयत्वे सति क्वाचित्कतयैवैवंप्रकारकता सूचयितव्या भवति, तदा शीर्षण्यावृत्तिसूचक-संख्यावतः स्थलाङ्कविशेषादनन्तरं यावदावृत्त्येवंप्रकारकता सूचयितव्या भवति, तावदावृत्तिसूचकशीर्षण्यसंख्यायुतोऽयं संकेत उपचर्यते, तय. अस्मद्- >*न्- > -नः मै ४, १४, ९[१३];[३] †[६] ।

२६. ¶ इति संकेतः शब्द-तद्रूपान्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तस्य कृष्णयजुर्वेद-विशेषीयब्राह्मणभागीयतां सूचयति । यदा च निर्देशविशेषस्य श्रुतिविशेषीयतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽयं संकेतस्तच्छ्रुतिव्याप्तिमात्रानुपाततः पुरस्ताद्वोपरिष्टाद्वा प्रयुज्यते, तय. ¶अपि√सृज्, अव√पद्> ¶अवपद्यन्ते, २अरण्य->-ण्यम् मै¶ १, ९, ७···· । यदा तु निर्देशविशेषस्य स्थलविशेषीयाऽऽवृत्तिबहुत्वे

---

[1] धातूनां च व्ययाऽव्ययोभयविधानां प्रातिपदिकानां चैषा सामान्यसंज्ञा द्रष्टव्या ।

[2] तिङन्तं वा सुबन्तं वा तत्तत् पदमिह यथास्वप्रकृतिभूतशब्दापेक्षया तत्तद् रूपमित्युच्यते ।

[3] अन्यथासिद्धोऽयमर्धविराम इति कृत्वा प्रकृतखण्डादूर्ध्वमस्याऽप्रयोगो भवति ।

सति क्वाचित्कतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽऽश्रुतिसंख्याशिरस्कात् सतः स्थलविशेषीयादङ्कादनन्तर-मेवंप्रकारकतापर्यायसंख्याशिरस्कतयाऽयं संकेतो ध्रियते, तय. अधि मै ४, ४, ५²;¹ ¶¹ ।

२७. $ इति संकेतः † इत्यस्य च ¶ इत्यस्य चोक्तपूर्वप्रकारेण प्रवर्तमाने विषयोत्सर्गे रूपस्थलविशेषा-ऽन्यतराऽपेक्षयाऽपवादभावं सूचयति, तय. अ-चन्द्र- > -$²न्द्रम्. ¶अनायतन- > -नः $शौ···, अपराह्ण- > -¶ह्णे···पै १०, ६, ७$.

२८. पृथक्कारेण वैशद्यमुद्दिश्येह प्रयुज्यमानानां त्रयाणां कोष्ठकानां तावदयं विषयविभागो भवति—

(क) ( ) इत्यर्धचन्द्रककोष्ठकेऽन्तर्निर्देशीया योगविषया वर्णविकारविषया वा सूचना क्रियते, तय. अ-का-(ण>)णा-, अपि√ष्ठा(<स्था), अभ्या(भि-आ)√वह् । उपसृष्टतिङन्तप्रकरणे प्रकरणगम्य आख्यातिकोंऽशोऽप्यर्धचन्द्रककोष्ठके निर्दिश्यते, तय. अति √चर्>अति°(चर) ।

(ख) [ ] इति दण्डककोष्ठके प्रतिशब्दीयखण्डान्त औत्तरपदिको निर्देशः क्रियते, तय. अंशु-··· [°शु-अन्°, उप°···]; √अव्···· [अनु > न्व्°···] ।

(ग) ⌊ ⌋ इति नागदन्तककोष्ठके निर्देशविशेषीयस्तत्तच्छ्रुतिगतत्वेनाऽन्तर्बाह्वृचीयः संवादो निर्दिश्यते, तय. १अइध्य- > -इध्यैः ऋ ⌊६, ६०, १; ८, ७३, १४⌋ ।

(घ) यदा बाह्वृचनिर्देशविशेषस्य स्थाने संवादिषु बाह्वृचेषु वा ग्रन्थान्तरीयेषु वा श्रुत्यन्तरेषु तस्य निर्देशविशेषस्याऽश्रवणे सति तत्पर्यायान्तरं श्रूयते, तदा तन्निर्देशविशेषीये बाह्वृचे स्थले नागदन्तककोष्ठके निर्दिष्टे सत्यंशतस्तत्संवादिश्रुत्यन्तरस्थलाङ्कनं नागदन्दककोष्ठकाऽऽभ्यन्तरिके-ऽर्धचन्द्रककोष्ठके क्रियते, तय. अंशु- > -शुः ऋ ९, ⌊६२, ४ (८२, १)⌋, २असपत्न,त्ना- > -त्नः ऋ १०, १७४, ⌊(१५९, ४) ४⌋; -त्ना ऋ १०, १५९, ⌊४ (१७४, ४)⌋ ।

(ङ) टिप्पणेषु संवादि-विसंवादिमतान्तराणां चान्येषां पदार्थानां च वैशद्यविशेषेण समर्पणार्थमेतेषां कोष्ठकानां व्यवच्छेदकमात्रतया प्रयोगो भवति । तथाहि । यदैक एव कोष्ठकोऽपेक्ष्यते, तदाऽर्ध-चन्द्रककोष्ठक उपयुज्यते । यदा तु द्राघीयसि विचारे प्रवर्तमाने सति कोष्ठकानामन्योन्यमाभ्यन्तर-भावेन समावेशः सावसरो भवति, तदा [(⌊ (⌊ ⌋) ⌋)] इत्याकारकस्तदीय उपयोगक्रमो द्रष्टव्यः ।

८. मुद्रा-प्रकरणम्

१. अस्य ग्रन्थस्य मूल-भागः प्रतिपृष्ठं स्तम्भत्रयेण विभक्तो भवति ।

२. प्रतिपृष्ठमादिमः शब्दो वामतोऽन्तिमश्च दक्षिणतः शीर्षण्यतया निर्दिश्येते । यदा त्वेतयोरुभयो-र्वाऽन्यतरस्य वा विभिन्नाऽनुक्रमाद्यक्षरत्वात् पृष्ठविशेषीयसामान्याऽनुक्रमविघातकत्वं भवति, तदैनयोरुभयोर्वाऽन्य-तरस्य वा स्थाने कोणिताऽन्तः सन् धात्वादिमूलभूतस्य शब्दस्य निर्देशो भवति, तय. अनु√धा > (पृ. २०१) ।

३. प्रतिपृष्ठविभागीयस्तम्भं शाब्दिका निर्देशास्तावत् प्रातिस्विकेषु तत्तन्मूलाऽपेक्षया यौगिकपारंपर्यतः प्रत्ययान्तरयोगमेकैकया मात्रया दक्षिणतो व्यवच्छिद्यमानेष्वन्योन्यसापेक्षोपरितनावस्थितिष्वापञ्चमात् सहजसंभवो-पयोगेषु वैयाकरणार्थनिर्भरेषु स्तम्भेषु क्रियन्ते, तय. √अत्, √*अप्, √१अश् ।

---

¹ तु. गतपृष्ठस्य ३यं टिप्पणम् ।

² प्रकृते खण्डे बाह्वृचश्रुतिमात्रगतः संवादो भवति । इत ऊर्ध्वं खण्डान्तरेषु त्वाधारग्रन्थमात्रगतः संवादोऽपि प्रदर्शयिष्यते ।

४. सार्वधातुकाऽऽर्धधातुकविषयकतिङन्तानां च सार्वधातुकप्रकरणीयभिन्नविकरणकरूपाणां च समूढप्रातिपदिकीयाऽवान्तरप्रातिपदिकीयरूपाणां चाऽन्योन्यविवेकार्थं प्रत्येकं खण्डपार्थक्यं क्रियते, तय. **अनु√गम्**, **√गच्छ्**, **अति√तृ**, **अस्मद्-**, **अहन्-** ।

५. एवं तावत् सर्वे शब्दा इह वंशपरंपराभिरिव निर्दिश्यमाना उपक्रमोपसंहारविवेकतः सुलक्षा भवन्ति । कस्कः शब्दः कियतीं कियतीं वैदिकवाङ्मयीयां प्रयोगर्द्धिमाप्तवानित्यप्यनेन प्रकारेण समीक्षितुमुपलभ्यते । तथाहि । यावद् **अती** (ति√इ), **अप√नुद्** इत्येवंजातीयानामुपसृष्टानां धातूनामाश्चर्यमिव द्वितीयस्तम्भाऽतिक्रमो भवति, तावद् **√अत्**, **√*अर्** इत्येवंजातीयाः शुद्धा धातवः प्रायेण चतुर्थं स्तम्भमभिव्याप्य प्रवर्तमाना उपलभ्यन्ते ।

६. अस्य ग्रन्थस्य वृत्तिभागस्तावट् टिप्पणमयो भवति । टिप्पणानि चैतानि सामान्यतः स्तम्भद्वयेनोपनिबद्धानि भवन्ति (वैतु. पृ. १८६ यत्र स्तम्भत्रितयस्याऽपि प्रयोगो लब्धाऽऽदरो भवति) । प्रत्येकं टिप्पणं च वैलक्षण्यप्रयोजित-दृष्टिसौकर्यमुद्दिश्याऽऽङ्गलवर्णशिरस्कतयाऽऽरभ्यते ।

७. एकैकस्य निर्देशस्य तत्तदङ्गमङ्गान्तरविवेकेन विस्पष्टं लक्ष्येतेत्यभिप्रायेण विभिन्नमुद्रात्रयी प्रयुक्ता भवति । इयं तावदस्मिन् विषये व्यवस्था कृता भवति—

(क) गुर्व्या कृष्णया मुद्रया तावदेतानि निर्देश्यानि भवन्ति—

१. शुद्धा उपसृष्टाश्चाऽनुपसृष्टाश्च धातवः ।

२. अयौगिकत्वेन निर्देशभाञ्जि व्ययानि चाऽव्ययानि च प्रातिपदिकानि, प्रतिपरामर्शीयनिर्देशभाञ्जि विलक्षणानि सुप्-तिङन्यतरीयरूपाणि, यथावर्णमात्राऽनुक्रान्तानां प्रतिपरामर्शीयनिर्देशभाजां प्रातिपदिकपरंपराणां मध्ये प्राथमिकानि प्रातिपदिकानि च ।

३. प्रत्येक-स्थलाङ्कीयमात्रायाः प्रधानविभागीया संख्या ।

(ख) लघ्व्या कृष्णया मुद्रया तावदेतानि निर्देश्यानि भवन्ति—

१. तिङ्-रूपाणि ।

२. सुब्-रूपाणि ।

३. यौगिकनिर्देशभाञ्जि व्ययानि वाऽव्ययानि वा कृत्तद्धिताऽन्यतरात्मकानि प्रातिपदिकानि ।

४. व्ययाऽव्ययाऽन्यतरप्रकारकप्रातिपदिकीयाः समासाः ।

५. यथावर्णमात्रानुक्रान्तानां प्रतिपरामर्शनीयनिर्देशभाजां प्रातिपदिकपरंपराणां मध्ये द्वितीयप्रभृतीनि प्रातिपदिकानि, तय. **अत्तवे** इत्यत ऊर्ध्वम् **अत्तुम्** इत्यादीनि ।

६. टिप्पणेषु तावद्—१. उद्धृताः पाठाः, २. धातवस्तदीयानि तिङ्-रूपाणि च, ३. यौगिकतया निर्दिष्टानि प्रातिपदिकानि च तदीयानि सुब्-रूपाणि च, ४. अव्ययात्मकानि प्रातिपदिकानि, ५. पाणिनीयाः प्रत्ययाः, ६. **शोधः** इति पदं चैतदभिप्रायकं पदान्तरं च, ७. **उसं.** इति संक्षेपश्चैतदभिप्रायकं संक्षेपान्तरं च ।

(ग) सितया मुद्रया तावदेतानि निर्देश्यानि भवन्ति—

१. उक्तपूर्वमुद्रान्तरनिर्देश्यांशव्यतिरिक्तः स्थलाङ्कनात्मको भागः ।

२. उक्तपूर्वमुद्रान्तरनिर्देश्यांशव्यतिरिक्तष् टिप्पणात्मको भागः ।

४. उपसृष्टाऽनुपसृष्टा मूल-धातवः primary roots, simple as well as composite.	→ १. व्ययाः कृतः declinable derivatives.	→ { १. नामधातवः denominatives. २. समासाः compounds. ३. समानादिवर्णास्तद्धिताः homo-vocalic secondary derivatives. } →	→ कृतः Primary derivatives. → समासाः compounds. → विभिन्नादिवर्णास्तद्धिताः allovocalic secondary derivatives.	→ समासाः compounds. ,, ,, ,, ,,
	→ २. अ-व्ययाः कृतः indeclinable derivatives.	→ उपचयात्मका अव्ययाः कृतः extensional absolutives & infinitives.	× ×	× ×

४. मूलाऽऽर्यभाषीयस्य भृँ इत्यस्य त्रिवृत्तविपरिणाम-प्रस्तारः

(THE THREE-FOLD VARIATIONAL EXPANSION OF THE UR-ARYAN भृँ)

(क) भ(भँ)र्[1]



[1] प्रस्तारगतेषु ध्वनिषु सर्वत्र स्वराङ्कनाऽभावेऽपि स्वाभाविकी सस्वरता सुस्थिता द्रष्टव्या ।

[2] एतत्-प्रभृति पूर्ववर्तिनौ रषौ निमित्तीकृत्याऽऽविर्भावुको न् >ण् इति विपरिणामस्तत्र तत्र यथासंभवं संगतो द्रष्टव्यः ।

(ख) भ्रि(भ्रिँ)र्[1]



[1]प्रस्तारगतेषु ध्वनिषु सर्वत्र स्वराङ्कनाऽभावेऽपि स्वाभाविकी सस्वरता सुस्थिता द्रष्टव्या ।

[2]एतत्-प्रभृति पूर्ववर्तिनौ रषौ निमित्तीकृत्याऽऽविर्भावुको न् > ण् इति विपरिणामस्तत्र तत्र यथासंभवं संगतो द्रष्टव्यः ।

(ग)भु (भुँ)र्[1]



[1]प्रस्तारगतेषु ध्वनिषु सर्वत्र स्वराङ्कनाऽभावेऽपि स्वाभाविकी सस्वरता सुस्थिता द्रष्टव्या ।

[2]एतत्-प्रभृति पूर्ववर्तिनौ रषौ निमित्तीकृत्याऽऽविर्भावुको न् > ण् इति विपरिणामस्तत्र तत्र यथासंभवं संगतो द्रष्टव्यः ।

अथ

वैदिक-पदानुक्रम-कोषे

सांहितिके प्रथमे विभागे

प्रथमः खण्डः

अ

१ अ- ←अस्मद्- यद्र.
२ *अँ→नृ- ←अस्मद्- यद्र.
३ अ-, ४ अ- ←इदम्- यद्र.
५ अ- ←एतद्- यद्र.
६ अ[a] ←नञ्.
अन्[b]

अंश[c]– -शः ऋ २,१,४; २७, १; ५, ४२, ५; ७, ३२, १२; मा ३४, ५४†; का ३३, २, १७†; मै १, ६,१२[२]¶; काठ ११, १२†; शौ ६, ४, २; २०, ५९, ३†; पै ६, १९, ४; –शम् ऋ १, १०२,४; २, १९, ५; ३, ४५, ४; तै ७, १, ६, २[२]¶; शौ ७, ५२, ४; ११, ८, २; पै २, २३, १; ३, ३६, ५†; ५, १३, ४; १६, ४; १२, ६, ७; १५, १३, २; –शस्य मै १, ६, १२¶; –शा ऋ ५, ८६, ५; १०, १०६, ९; –शाः ऋ १०, ३१, ३; –शान् शौ ११, १, ५; पै १६, ८९, ५; –शाय ऋ १,११२,१; मा १०, ५; का ११, ४, २; तै १, ८, १३, ३; मै २, ६, ११; काठ १५, ७; –शेन मै ३, ८, ४; काठ ८, १७.
[°श– परा°, भूत° यद्र.]

अंश-ध्री– अंस- अद्र.

¶**अंश-प्रास्**[d]– -सः मै १,६,१२.

¶**अंश-भू**[e]– -भुवा तै ६, ४, ८, २; ३.

¶**अंशो(र→)रा**[f]– -राः मै ४,४,१[२].

अंशु[g]– -शवः ऋ ८, ९, १९; ५३, ४; खि ३, ५, ४; तै ६, ४, ४, ४¶; ¶मै ३, ७, ४; ९, १; ४, ५, ४; ५; ¶काठ २४,५;२६,२; १०[२]; २७,६; ¶क ३७,६;४०, ५; ४१, ८[२]; ४२, ६; जै ४, १८, ८†; शौ ९, ६, १४; ११, १, १८; १९, ६, १६; २०, १४२,४†; पै ९, ५, १४; १६, ९०, ८; १११, १४; –शवे ऋ १, ४६, १०; –शुः ऋ ३, ३६, ६; ४,२२, ८; ५, ४३, ४; ९, [६२,४; (८२,१)]; ६८,४;७४, २;५; ८९, ६; ९१,३; ९२, १; १०, १७, १२; १३; ९४,१०; मा ७, २६†; १८, १९; २०, २७; का ७, ११, १†; १९,७, १; २२, २, ४; तै १, २, ६,१; ३, १, ८, ३¶;१०,१[२]†; ४,७, ७, १; ६, ६, १०, १¶; मै २, ११, ५; ३, ४, १¶; काठ २, ८[२]; १८, ११; २१, ११¶; ३४,३; ३५,८[३]†[२]; क २८,११; ४८, ९†; †कौ १, ४७३; २, ३५८; ४, २; ५; ८; जै १, ३१, ६; ४९, ७†; ३,३०,१†; शौ ५, २९, १३; पै ६, ९, १; –शुः शौ ५, २९, १२; पै १३, ९, १५; १६; –शुः-शुः मा ५, ७; का ५, २, ५; तै १, २, ११, १; ६, २, २, ४; मै १, २, ७; ३, ८, २; काठ २४, ९; क २, २; ३८, २; –शुना ऋ ४, ५८, १; मा १७, ८९†; २०, २७; का १९, १, ३†; २२, २, ४; तै १, २, ६, १; मै १, ६, २†; कौ १, ३०५; जै १, ३२, ३; पै ८, १३, १†;

---

[a]) नलोपः(पा ६,३,७३)। अ-क-,अ-कनिष्ठ- प्रभृ.यद्र.।

[b]) नुडागमः(पा ६,३,७४)। अन्-अक्त- प्रभृ. यद्र. ।

[c]) प्रथममक्षरम् √१अशेर् वा√अनेर् वा निर्वाच्यमितीवाभिसंधायास्य निर्वचनमनयोर्धात्वोरन्यतरस्य शम् इत्यव्ययेन योगतोऽनुशशास या. (२, ५; १२, ३६)। अर्वाञ्चस्तु√१अश् इति धातुमात्राद् व्युत्पादयन्ति । यच्चेह कैश्चिद् वाच. प्रभृ. आभिधानिकैः √अंशेर् निर्विवक्षा प्रकटीकृता तदद्दढप्रतिष्ठं भवति। तादृशस्य मौलिकत्वेन विशिष्टस्य धातोरेव काल्पनिकमात्रत्वात्। न हि तस्य धातोरन्यानि कानिचिदपि तिङ्रूपाणि वा कृद्रूपाणि वोपलभ्यन्ते यदाधारेण तस्य स्वतन्त्रधातुतया सत्ताङ्गीक्रियेत । अतः √१अश्>*१आशु-<अंश- इत्येवम् २आ(शु>) शु- इत्यतो विवेकार्थम् आद्यस्याऽनुनासिकतायां सिद्धायां तदुध्रस्वत्वस्य च स्वरपूर्वसंक्रान्तेश्चाविर्भावः प्राकृतिकः । पाप्र. घञन्तत्वेऽन्तोदात्ते प्राप्ते (पा ६,१,१५९) आद्यविकार आत्वाभावात्तदभावे वृषाद्याद्युदात्तत्वं द्र. (पा ६,१,२०३)।

[d]) षतस.। 'थाथ-'(पा ६,२,१४४) इत्यन्तोदात्तत्वम्। उप. प्र√२अस्+घञ् । अथवा कर्मण्य् अण्। कृद्-उत्तरपदप्रकृतिस्वरः (पा ३,२,१;१,३; ६,२,१३९)।

[e]) कर्मण्युपपदे √२भू+क्विप्। उप. धातुस्वरः प्रकृत्या (पा ६, १, १६२; २, १३९)। अथवा षतस. ष. च कर्मणीत्यविशिष्टा सौवरी स्थितिः ।

[f]) =अच्छेर- इति SBW.। व्युत्पत्तिस्तु विस्पष्टेतरत्वाद् विमर्शमपेक्षते। स च किंचिदिवेह प्रदर्शयितुं शक्यः। अंशान् सस्यप्राचुर्य-निदानभूतान् ऐश्वर्यप्राप्ति-लक्षणान् ईरयद्- इति । विस्तरस्तु वैश. द्र० ।

[g]) अंशुर् अंशेन व्याख्यातः (तु. या २, ५; १२, ३६)। उः प्रत्यय इह भवतीत्येव विशेषः। प्रत्ययस्वरेण

–†शुभिः ऋ [१, ९१,१७; ९, ६७, २८]; ९, १५,५; मा १२, ११४; का १३, ७, १३; तै ६, ४,५,७¶; मै ४, ५,५¶; काठ ३५, १३; कौ २, ६२०; जै ३, ५०, ७; पै १६, ७१, २$; –शुभ्याम् मा ७,१; का ७, १, १; तै १, ४, २, १; ६, ४, ५, ३; मै १, ३, ४; काठ ४, १; २७, १; क ३, १, ४२, १; –शुम् ऋ [१, १३७, ३; (९, ६५, १५)]; ३,३६,७; ४, २६, ६; ५, ३६, १; ६, १७, ११; २०, ६; ७, ९८, १; ८, ५,२६; ७२, २; ९, ६८, ६; ७२, ६; ८६, ४६; [(८५, १०); ९५,४]; ९७, १४; १०, ९४, ९; ११३, २; १४९, ५; खि १, २, ८; तै २, ३,५,३¶; ४,१४,१; ¶३,२, २, १; ३, ४, ३; ¶६, ६, १०, १; २; मै ४, ९, २७; १२,२; काठ २९, ६[२]¶; ३५,१४; ४०, ५; क ४५, ७[२]¶; ४८,१३; कौ १, २९८; २, १५७†; जै ३, १५, ५†; ४, १०, ४; शौ ७, ८६, ६; २०, ८७, १†; पै १, १०२, ४; –शुषु मा ८, ५७; का ९, ७, ४; –शू तै ६, ४, ५, ३¶; –शून् तै ६, ४, ४, ४[२]¶; ६, ९, २; मै ४,७,७[२]¶; ¶काठ २६, १०; २७, १[२]; ३०, ७; ¶क ४१, ८; ४२, १[२]; शौ ६, ४९, २; ११, १, ९; १२, ३, २०; पै १, ९६, २; ५, ३६, ६; १६, ८९, ९; –शून् शौ ५, २०, १०; पै ९, ६, ९; २४, १०; –०शो मा ७,३; का ७,१,३; शौ ७,८६,३; -शोः ऋ १, १२५, ३; २,१३,१; ३, ४८, २; ४, १, १९; २५, ३; ९, ९६, ८; १०७, १२; १०, ९४, ८; तै ६,६,१०, २¶; काठ २९, ६[२]¶; क ४५, ७[२]¶; †कौ १,५१४; २,११७; †जै १, ५३, ४; ३, १२, ४.

[°शु– अन्°, उप°, तृप्त°, सोम°]

अंशु-मत्[a]– -मत् तै ३, २, २, १¶; –मन्तम् खि १, ७,४; शौ १३, २,७; –मन्ति तै ३, २, २, १¶; –मान् शौ ८,१,२; पै १६, १, २.

†अंशुमती[b]– -$ती: शौ ८, ७,४; पै १६, १२, ४; –तीम् ऋ ८, ९६, १३; काठ २८, ४; क ४४, ४; कौ १, ३२३; जै १, ३४, १; शौ २०, १३७, ७; –त्याः ऋ ८, ९६, १४; १५; खि ३, ९, १; शौ २०, १३७, ८; ९.

अंशोर– अंश- द्र.

अंस[c]– -सः पै ४,१४, ७; –सम् पै १३, १०,१०; –†सयोः ऋ ५, ५७, ६; मै ४, ११, ४; १४, १८; पै १६, १४७, ६$; –सा मै ४, १३, ४; काठ १६, २१; –साभ्याम् ऋ १०, १६३, २; मा २५, ३; का २७, ३, २; तै ५, ७, १३, १; ७, ३, १६, २; मै ३, १५, ३; काठ ५३, ६; ५३, ३; †शौ २, ३३, २; २०, ९६, १८; पै ४, ७, २†; ९, ३, ११; –से तै ५,३, १, ५¶; शौ ८, ६, १३; –†सेषु ऋ १, ६४, ४; १६६, ९; १०; १६८, ३; ५, ५४, ११; ७, ५६,१३; मै ४,१४,१८; –सौ ऋ १,१५८, ५; मा २०, ८; का २१, ७, ७; तै ५, ३,१,५¶; मै ३, ११, ८; काठ २०,१०¶; ३८,४; क ३१, १२¶; शौ ९, ४, ८; १२, ७; १०, २,५; ९, १९; ११, ३, ९; पै १५, १२, ४; १६, २४, ७; ५३, १५; ५९, ५; १३७, ९; १३९,७.

[°स– वि°, शिति°]

†अंस-त्र[d]– -त्रम् ऋ ८, १७,१४; कौ १, २७५; जै १, २९, ३; –त्रा ऋ ४, ३४,९.

अंसत्र-कोश[e]– -शम् ऋ १०, १०१, ७.

¶अंस-दघ्न[f]– -घ्नम् मै १, ६, ६[२]; –घ्ने मै १, २, १०.

अंस[g]-(घ्र[h]→)ध्री– -ध्रीम्[i]

चान्तोदात्तः (तु. पाउ १, २७; पा ३, १, ३)।

[a]) मतुप् प्रत्ययः । स चोदात्तः (पा ६, १,१७६) ।

[b]) स्त्रियां ङीपः पित्वान्निघाते स्वरेऽविशेषः(पा ४,१,६)।

[c]) √१अम्+सन् प्रत्ययो नित्-स्वरश्च(पाउ ५,२१; पा ६,१,१९७) । इदं प्राति० ←√अंस् इति मतं (तु. शक.) नेष्टम् । धातुरसौ नाधा. एतन्मूल इत्यस्य सुवचतरत्वात् ।

[d]) उस. । √त्रै+कः प्रत्ययः (पा ३, २,३)। कृद्-उत्तरपदप्रकृतिस्वरे प्राप्ते पूर्वपदप्रकृतिस्वरार्थं दासीभारादित्वम् उपसंख्येयम् (तु. पा ६, २, ४२; १३९)।

[e]) बस. । पूर्वपदप्रकृतिस्वरः (पा ६,२,१)। उप. यद्र. ।

[f]) दघ्नच् प्रत्ययश्चित्-स्वरश्च (पा५,२,३७; ६,१,१६३)।

[g]) द्वितीयमक्षरं तालव्यं पै. इति विवेक्तव्यम् । तच्चोच्चारणमात्रे प्रादेशिक-विकारतया व्याख्येयमित्यतिरोहितमिव भवति ।

[h]) कारकोपपदे √धृ इत्यतो मूलविभुजादित्वात् कः प्रत्ययस् थाथादि-स्वरश्च (पावा ३,२,५; पा ६,२,१४४)।

[i]) शौ. मुपा. '-ध्रीम्' इति तृतीयेन वर्णेन भवति भूयिष्ठकोशाश्रयात् । सा. तु चतुर्थमेवात्र वर्णमाह ।

शौ ११, १,२३; पै[a] १६, ९१,३.

¶अंसे-पा(द→)द्[b]– -पात्,द् मै २, ६, १३; काठ १३, ६; –पादम् काठ १३, ६.

अंस्य[c]– -स्याः ऋ १, १९१,७.

√१अंह्[d] अहन्- द्र.

√२अंह्[e]

*अंह्– -हः[f] ऋ ६,३,१.

†अंहति[g]– -तिः ऋ १, ९४, २; ८, ७५, ९; तै २, ६, ११, २; मै ४, ११, ६; काठ ७, १७; पै १२, १, २; –तिभ्यः ऋ ५,५५, १०; काठ ८, १७; –तिम् ऋ ८, ६७, २; २१.

अंहस्[h]– -हः ऋ १, ४२, १; २, २३, ४; ⌊५; ८, ११, ६; १०, १२६, १⌋; २८, ६; ⌊३३, २; ६, ४४, १६⌋; ३४, १५; ३, १५, ३; ५९, २; ४, २, ९; ३, १४; ११, ६; ⌊१२, ६; १०, १२६, ८⌋; २०, ९; ५, ३१, १३; ४५, ११; ६, २, ४; ३, २; ४, ८; ११, ६; ३७, ४; ६७, ८; ७, ४०, ४; ६०, ६; ६६, ५; ८२, ७; ८, १९, ६; ९, १०४, ६; १०, ३५, १४; ३९, ११; ६३, ६; तै २, २, ७, ४¶; ३, ४, ११, ५†; ४, ७, १५, ७†; ¶मै १, १०, ८; १०; ११^{६}; १२; १३; १४; ३, १६, ५†; †४, १०, २; १४, ९; १५; †काठ २, १५; २१, १३; २३, १२; ¶३६, ३; ५; ६^{८}; ७; ८; ११; †कौ १, ३६५; ४२६; २, ७०२; †जै १, ३८, ४; ४१, ८; ३, ४६, ८; †पै ५, ३९, १; ८; १५, २०, १; –ह(:)सु शौ ६, ३५, २; –हसः ऋ १, १८, ५; ३६, १४; ५८, ८; ९; ९१, १५; ९३, ८; १०६, ⌊१–६⌋; ११५, ६; ११७, ३; ११८, ८; १३६, ५^{२}; १८०, ५; २, २६, ४; ३३, ३; ३, ३२, १४; ४, २, ८; ५३, ६; ५५, ५; ५, ५१, १३; ६, १६, ⌊३०; ७, १५, १५⌋; ३१; ⌊४८, ८; ७, १६, १०⌋; ७, १, १५; १५, ३; १३; ७१, ५; ⌊१०४, २३; १०, ५३, ५⌋; ८, १८, ६; १०; २४, २७; ३१, २; ९, ५६, ४; १०, २४, ३; २५, ८; ३६, २; ३; ६५, १२; ६६, ५; ९७, १५; १२६, २; १३२, ७^{२}; १६४,४; खि १, १२, ६; २, ६, १८; ५, ५, १०; मा ४, १०; १२, ९; ४०; ८९†; १९, १०; २०, १४–१६; ३३,४२†; का ४,४, ४; १३, १, १०; ३, ११; ६, १५†; २१, १, ९; २२, १, १–३; ३२, ३, १३†; तै १, ५, ११,५¶; ६, १२, ३†; ८,१,१; २, २, ७, ४¶; ३, १३, १^{२}; ४, २,२–३¶; ३, १, ४, ३; २, ४, ३^{२}; ४, २, ६, ४†; ३, १३, ४; ५†; ७, १५, १^{२}; २^{२}; ६^{२}; मै १, ७, १; ४; ¶१०, २$; १०^{२}; ११; १२^{२}; १३; २, २, १०¶; ३, १^{५}; ५, ३¶; ७, १३^{२}†; ३, ११, ७; १०^{३}; १६, ५^{६}; †४, ८, ९; १०, १; १२, ३; १३, १; ९; १४, ४; १७; काठ २, १४†; †८, १४; १६; ९, १¶; ¶१०, ९^{४}; १०^{२}; ११, ११^{२}; १५, १२¶; १६, ८; १३^{२}†; २१, १३; १४; २२, १५^{६}; ३५, ४; ¶३६, ५; ६^{३}; ७; ३७, १८; ३८, ५^{३}; ७†; क ८,२; ४; ४८,५; †कौ १,२४; ३९७; २, ७३१; ११८२; ३, ४, ८$; †जै १, ३, ४; ४४, ७; २, २, १; ४, ६, १०; शौ २, ४, ३; २८, १; ४, १०, १; ३; २३–२९, १–७; ६, ३, २; ४५, ३†; ९६, १†; ७, ६६,१; ११७, १; ८, २, १८; ४,२३†;

---

[a]) पै. कोशसाक्ष्यं '-भ्रियम्' इति रूपं समर्थयति। तत् सम्यग् अवधेयम्।

[b]) बस.। पूपप्रस्व. (पा ६,२,१)। पूप. सप्तम्या अलुक्। उप. लोपः समासान्तः (पा ५, ४, १३८)।

[c]) तात्रभविकेऽर्थे यति प्रत्यये द्व्यच्कत्वादाद्युदात्तः(पा ४, ४, ११०; ६, १, २१३)।

[d]) √२अह् इत्यस्यैवाऽनुनासिकोपक्रमं प्रकारान्तरमित्यर्वाचामभिसन्धिर् भवति (तु. GW.)। अयं च धा. √२अह् इति च यक. √अह् इत्यनेन √अघ् इत्यनेन च समानं समूलतया प्रतिपत्तव्यौ भवत इति तु तत्त्वम् अवधेयम्।

[e]) <√हन् इति या ४, २५।

[f]) पञ्चम्यर्थीयमेतद् रूपमित्यत्र विप्रतिपत्त्यभावेऽपि मूलस्वरूपपरिच्छेदतो भवत्येवाभियुक्तानां विवादः (तु. सा. GW., ORN.)। प्रकरणतः पञ्चम्यर्थस्याऽऽकाङ्क्षितत्वात् क्विबन्तस्य प्राति. पं१ स्यात्। 'सावेकाचः' (पा ६, १, १६८) इति विभक्तिस्वरे प्राप्ते 'न गो-' (पा. नाउ.) इति तन्निषेधः उसं.। स्याद्वा एउ. अंहस्- इत्यस्यैव द्वि१। एवं तावद् द्वितीयायाः पञ्चम्यर्थतया श्रूयमाणत्वात् √२पा इत्यस्य द्विकर्मकता उसं. (तु. पाम १,४,५१)।

[g]) अतिच् प्र. चित्स्वरश्च (पाउ ४,६२; पा ६,१,१६३)।

[h]) असुन् प्रत्ययो नित्-स्वरश्च (पाउ ४,२१३; पा ६, १, १९७)। अत्र अहन्-> अंहस्- इत्यपि कल्पना भवति कुतूहलैककृत् (तु. भा. तै १, ४, १४, १)।

७, १३; १०, ५, २२; ११, ६, १–६; ८; १०–२१; १४, २, ४५; १९, ४४, ८; ९; पै १, १२, १; ४१, ४; २, ११, ३; २४, २–४; २६, १; २; ८५,४; ४, २४, ७; २५, १; ५; २८, १–६; ३३–३९, १–७;५,१७, ८;३९, २†; ७, ३, ८; १९, ९; ९, २२, ३–२३; १३, १३, ९; १५,३,८;९;१३, १–५; ७–९; १४, १–९; ११; २०, ३†; १६, २, ४; ४, ८; ८, ५†; ११, ३†; १३, ३; १४९, ११; –हसः–हसः शौ १, ३१,२; पै १,२२,२; –¶हसा तै २, ४,२, ३; काठ १०, ९[२]; १०[२]; –हसि ऋ १, ५४, १; –हांसि ऋ [६, २, ११; १४, ६;(१५,१५)];७, २३, २०; खि २, ६, १९; ७, ५; ८, ५; शौ २०, १२, २†. [°हस्- अति°]

अंहसस्प(हसः-प)ति[a]– -तये मा ७, ३०; २२, ३१; का ७, १२, १; २४, १८, १.

अंहस्पत्य[b]– -त्याय तै १, ४, १४, १; ६,५, ३, ४; मै ३, १२, १३.

¶अं(हस्>)हो-गृही(त[c]–>)ता– -ताः मै १, १०, ६; १०; काठ ३६, १; ५.

अं(हस्>)हो-मुच्[d]– -¶मुक् तै २, ४,२,१; मै २,२,१०; ४, ३, ९;काठ १०,९;१०;–¶मुग्भ्याम् तै ७,५, २२, १; मै ३,१५,११; काठ ४५, १९; –मुचः मा ४, १३; का ४,५,५; तै १, ६,१२, ३; –मुचम् ऋ १०,६३,९; खि २,४,२; तै १, ६,१२,४;२, १, ११, १†, २, ७, ४¶; शौ १९, ४२, ४; –मुचा मै ४, १४, ६; –¶मुचे तै १, ८, ९,१; २, २, ७, ४;४, २, २[२]; ३[२]; ५, १२, ५; ७, ५, २१, १; २२, १[२]; मै २, २, १०; ६, ६; ३, १५, ११[२]; ४, ३, ९; १२, ३; काठ ८, १६$; १०, ९[२]; १०[४]; १५, ४; ४५, १८; १९[२]; शौ १९, ४२,३$.

√*अं(हस्>)हो-य[e]

अंहो(यु[f]>)यू– -युवः ऋ ५, १५, ३.

?अंहारि[g]– -रिः क २, ७.

†अंहु[h]– -होः ऋ १, [६३, ७; (४, २१, १०)]; १०७,१; २, २६, ४; ५, ६५, ४; ६७, ४; ८, १८, ५; ६७, ७; मा ८, ४; ३३, ६८; का ८, १, ३; ३२, ५, १४; तै १, ४, २२, १; २, १, ११, ४; मै १, ३, २६: काठ ४, १०; क ३, ८.

¶अंहीय(यस्[i]–>)सी– -सी काठ २४, ९; २५, ९; क ३८, २; ४०,२.

अंहु-भेदि[j]– -भेदाः खि ५,२२, १; मा २३, २८; का २५, ६,८; शौ २०, १३६, १.

---

a) पपा. अवग्रहाभावः । तस. ष. अलुक् । पूपप्रस्व. प्राप्ते सामान्योऽन्तोदात्त उसं. (यक्र. पा ६, ३, २१; २, १८–१९; १, २२३)। पति-शब्दस्य मुख्यार्थबाधाद्वा विशेष इत्यूह्यम् ।

b) प्राग्दीव्यतीयेष्वर्थेषु पत्युत्तरपदलक्षणो ण्यः प्रत्ययो वृद्ध्यभावः प्रत्यय-स्वरश्च (पा ४, १, ८५; ३, १, ३; तु. भा. तै १, ४, १४, १)।

c) तृतस. । पूर्वपदप्रकृतिस्वरः (पा ६, २, ४८)।

d) उस. । क्विबन्त-कृद्-उपप्रस्व. (पा ६, २, १३९)।

e) नाधा. । परेच्छायां क्यच् प्रत्ययः (पावा ३,१,८)।

f) उः प्रत्ययस्तत्स्वरश्च (पा ३, २,१७०;१, ३)। स्त्रियाम् ऊङि तत्-स्वरेण सति शिष्टेन स्वरः (पावा ४, १, ६६)।

g) एवं किल मुपा. भवति । तस्य च चिन्त्यत्वं द्र. (यतु. अङ्घारि-)। एवं तु. क १, १६ यत्र तादृक्-प्रकारक एव मुपा. भवति ।

h) उः प्रत्ययः प्रत्यय-स्वरश्च (तु. पाउ १,७; पा ३, १,३)।

i) ईयसुन् प्रत्ययो नित्-स्वरः स्त्रियां ङीप् च (पा ५,३, ५७; ६, १, १९७)।

j) अंहु यथा स्यात्तथा भिद्यत इति कृत्वा उस.। उप. <√भिद्+इन् (पावा ३,३,१०८)। 'ञ्नित्यादिर्' (पा ६, १, १९७) इत्याद्युदात्तः। 'गतिकारक-' (पा ६, २, १३९) इति उपप्रस्व. द्र.। वि. सद् विशेष्यगर्भतया प्राति. इदं व्याख्येयं भवति। तद्विस्तरस्तु वैश. अनुसंधेयः। विवरणे विब्रुवन्तोऽपि भे(द–>)दी- इति दीर्घान्तं प्राति. अत्र भवति बस. चेत्यत्र उ. च म. च BW. च समनसो भवन्ति । न तु तेनेष्टापत्तिर्भवति । बस. पूपप्रस्व. दुर्वारत्वप्रसङ्गात् । उप. आद्युदात्तत्वसिद्ध्यर्थं घञन्तत्वेन प्रतिपत्तौ स्त्रीत्वे टापः स्थाने ङीपः प्रवृत्तावपरमप्यलक्षणत्वं द्र.। म. समासावयवयोः पूर्वापरविपर्यासोऽपि चिन्त्य इति दिक्। उप. इकारान्तस्य स्त्रियां श्रवणं संभवेदित्यत्र कामं कानिचित् सजातीयानि प्राति. निदर्शयेरन् (तु. ऊर्मि-, त्विषि-, वेदि- प्रभृ.)। एस्थि. उप. दीर्घान्तत्व-निपातन-प्रयासोऽन्यथा-सिद्धायमानः सुत्यज इति सर्वं चतुरस्रं द्र.।

†अंहुर्[a]- -रः ऋ १०,५,६; शौ ५,१,६; पै ६,२,६.

√*अंहु(>हू)रि [b]

अंहूरण,णा[c]- -णम् काठ १०,९[2]¶; -णा ऋ ६,४७,२०; शौ ९,२,३; पै १६,७६,३; -णात्[d] ऋ १,१०५,१७; शौ ६,९९,१.

√अक् अङ्क्- इटि द्र.

¶अ-क[e]- -कम् तै ५,३,७,१; मै ३,३,१; काठ २१,२; ३५,१८[4]; क ३१,१७; ४८,१६[4].

°अक- उप°, परा°

अकः √कृ द्र.

अ-कनिष्ठ[e]- -ष्ठासः ऋ ५,५९,६; ६०,५.

?अकन्तः[f] पै १,४३,२.

¶१अ-कर्ण,र्णा[g]- -र्णया तै ६,१,६,७; -र्णाः, -र्णान् तै १,८,९,३.

¶२अ-कर्ण[g]- -र्णः मै ३,९,५.

¶अ-कर्णक[h]- -काय तै ७,५,१२,१; काठ ४'५,३.

अ-कर्मन्[i]- -र्मा ऋ १०,२२,८.

†अ-कल्प[i]- -ल्पः ऋ १,१०२,६; पै ३,३६,३.

?अ-कल्या(ण->)णी[j]-

†अ-कव,वा[e]- -वाः ऋ ५,५८,५; मै ४,१४,१८; -वाभिः ऋ १,१५८,१; ६,३३,४; -वेभिः ऋ ६,६०,३; मै ४,१३,७; काठ ४,१५; -वैः ऋ ३,१४,१६.

†अ-कवा(व-अ)रि[e]- -रिम् ऋ [३,४७,५; ६,१९,११]; मा ७,३६; का ७,१८,१; तै १,४,१७,१; मै १,३,२१; काठ ४,८; क ३,६; -री ऋ ७,९६,३.

अ-कवच[i]- -चः शौ ११,१२,२२.

अ-कवि[e]- -विषु ऋ ७,४,४.

?अकशादश्ववैत्पुरातकः[k] पै १,९४,४.

¶अकस्य-विद्[l]- -विदः मै १,५,१२.

¶अ-का(ण->)णा[e]- -णया तै ६,१,६,७; -णा[m] मै ३,७,४.

अ-काम[i]- -मः काठ २८,५¶; क ४४,५¶; शौ १०,८,४४; -माः तै ३,२,८,३; काठ ९,१७[2]¶; शौ ६,११४,३; पै १६,४९,३.

अ-कामकर्शन[e]- -नः ऋ १,५३,२; शौ २०,२१,२; -नम् खि ५,७,१,१०; मै ४,१३,२; काठ १५,१३.

¶अ-कामप्रीत[n]- -ताः काठ ३'५,१७; क ४८,१५.

अ-काय[i]- -यम् मा ४०,८; का ४०,१,८.

?अ-कारः[o] पै १,८६,१.

?अ-कार्यम्[p] पै ५,३४,६.

---

[a]) पपा. अनवगृहीतः। मत्वर्थे रः प्रत्ययस्तत्-स्वरश्च। (तु. पा ५,२,१०७; या ६,२७)। उरच्-प्रत्ययान्तश् चित्-स्वरः कृत् स्याद् इति वा (तु. पाउ. १,४१; पा ६,१,१६३)

[b]) नाधा. णिच्-प्रत्ययान्तः उसं. (तु. पा ३,१,२१)।

[c]) युच् प्रत्ययश् चित्-स्वरश्च (पा ३,३,१०७; ६,१,१६३; GW.)।

[d]) विशेष्य-गर्भं वि. भवति न तु सं. (वैतु. सा. GW. MW.)

[e]) तस.। अव्यय-पूपप्रस्व. (पा ६,२,२)। उप. यद्र.।

[f]) 'अक्रान्तम्' इति शोधः संभाव्येत (तु. 'अर्वाञ्चम्' इति नापू. मन्त्रे)।

[g]) तस. पूपप्रस्व. (पा ६,२,२)। उप. कर्ण- इति मत्वर्थीयोऽच्-प्रत्ययान्तः (तु. पा ५,२,१२७)। अथवा, बस. एव स्यात्। एवं सत्य् उप. आद्युदात्तम्। अन्तोदात्त-प्राप्तौ (पा ६,२,१७२) नञ्-स्वर औपसंख्यानिकः द्र.। अयं च सौवरो विशेषः तै. उपलभ्यते न शाखान्तरे (वैतु. नाउ.)।

[h]) नापूटि. द्र.। समासान्ते कपि ह्रस्वान्तेऽन्त्यात् पूर्वे स्वरे प्राप्ते कपिपूर्वत्वम् उपसंख्येयम् (पा ५,४,१५४; ६,२,१७३; १७४)।

[i]) बस. अन्तोदात्तश्च (पा ६,२,१७२)। उप. यद्र.।

[j]) शौ. WR. एवं नञ्-पूर्वत्वेन शिश्रावयिषन्तौ सन्तौ कल्याणी- इत्यत्रं यथावद् निराकृतौ यद्र.।

[k]) दुरूहः संस्करणान्तराऽपेक्षः मुपा. भवति।

[l]) तस.। उप. कर्माणि ष. अलुक् कारकोत्तरकृत्-प्रकृतिस्वरश्च। नञ्-पूर्वत्वे तत्स्वरे प्राप्ते (पा ६,२,२) कृत्-स्वरार्थं नञ्-समासस्ततः पूर्वविप्रतिषेधेन द्र. (तु. पाम ५,१,११९)।

[m]) मूल एतत्-प्रभृतिषु चतुर्षु पदेषु मुपा. चिन्त्यः तु. √क्री इत्यस्य 'क्रीयते' इत्यत्र (मै ३,७,४) संटि.। पूर्वस्मिन् नञि सस्वरे सति तद्वर्जमवशिष्टं पदं निहतं द्र.। अतस्ततोऽग्रे 'स्यात्' इत्यस्य क्रियापदस्यापि निहतत्वात् '-णा' इत्यत्र निहितः स्वरोऽशुद्धः द्र.। एवं ततोऽग्रे 'अखर्वा' इत्यत्रापि (तु. संटि. १६)। एवम् एतत् स्पष्टं भवति यत् पूर्वोक्तः पदचतुष्टयीस्वरः संपादकस्य स्वोपज्ञः पूर्वोक्तदिशा मिथ्याभूतश्च भवति। पूर्वपदस्य नञ उदात्तत्वात् 'स्याद°' इत्यत्र 'द्' इत्यनेन सस्वरेण भाव्यम्। अन्ततश्च 'असक्षशफा' इत्यत्र पूर्ववन् नञ उदात्तत्वे 'प्त' इत्यस्य सस्वरत्वमलक्षणं द्र.।

[n]) तस.। उप. तृतस. द्र.।

[o]) 'अकार्षुः' इति मूलतः सम्भाव्यते।

[p]) '?उद-कार्य-म्' इति स्यात्। 'उद्-अकार्यम्' इति मुपा. चिन्त्यः। 'कुरु' इति पदस्य साम्निध्यात् कस्यचित् कर्त्तव्यविशेषस्य न त्वकर्त्तव्यस्य सम्भावनोत्पाद्येतेति

अ-कितव[a]— -वम् मा ३०,८; का ३४, १,८.

अ-कुत्र[b] ऋ १, १२०, ८.

अ-कुध्र्यञ्च्[c]— -ध्र्यक् ऋ १०, २२, १२.

अ-कुप्यत्[a]— -प्यन्तः शौ २०,१३०,८.

अ-कुमार[a]— -रः ऋ १, १५५,६.

अ-कुश(ल[a]→)ली— -ली: मै १, ११, १०.

अ-कू(ट[a]→)टा— -टया तै ६,१,६,७.

अ-कूपार[a]— -रः ऋ १०, १०९, १; शौ ५, १७, १; पै ९, १५, १; -रस्य ऋ ५, ३९, २; मा २४, ३५; का २६, ७, ५; तै ५, ५, १३, १; मै ३, १४, १६; कौ २, ५२३†; जै ३, ४०,२०†.

†अ-कृत[a]— -तः ऋ १, ६३, ४; -तम् ऋ ६, १८, १५; ८, ६६, ९; खि ३, १०[2], ८?[d]; २०, १; मै ४, १२, ३; काठ ८, १६; शौ २०,९७,३; पै २, २४, ३$; -ता ऋ ४, १८, २; -तात् ऋ १०,६३,८; -ते ऋ १,१०४,७. [°त- कृत°]

अ-कृतपूर्व[e]— -र्वम् पै १६, १२३, ३.

†अ-कृत्तरुच्[f]— -रुक् ऋ १०, ८४, ४; शौ ४,३१, ४; पै ४,१२,४.

¶अ-कृत्वा[a] मै ४, ३, २.

अ-कृश[a]— -शासः तै ३, २,८,५.

अ-कृषीव(ल[a]→)ला— -लाम् ऋ १०, १४६, ६.

¶अ-कृष्ट[a]— -ष्टम् तै ५, २, ५, २[2]; ३; काठ २०, ३[2]; क ३१, ५[2].

अ-कृष्टपच्य,च्या[g]— -¶च्यम् तै २, ४, ४, ३; ४, ७, ५, २$; मै २, २, ४; ४, ३, २; काठ १०, ११; १२, ७; १८,१०$; क २८,१०; -च्याः मा १८,१४; का १९, ५, २; तै ६,१,३,७¶; मै २,११,५; काठ २६,५¶; क ४१,३¶; -च्ये शौ ५, २९, ७; पै १३, ९, ८.

अ-कृष्ण[a]— -ष्णः मा २३, १३; का २५, ४, २.

¶अ-क्लृप्त,प्ता[a]— -प्तम् तै ३,४,९,३; मै ३, ७,१; काठ २९,१०; ३०, ३; क ४६, ३; ६; -प्तस्य तै ५, ४, ८, ५; मै ३, २, ९[2]; ४, १; ७, १; काठ २१, ११; -प्ताः तै ३,४,८,३; ७, २,४,१;४,३,६.

¶अ-क्लृप्ति[a]— -प्तिम् तै ७, २, ७,१.

†अ-केतु[h]— -तवे ऋ १,६,३; मा २९, ३७; का ३१,२,१; तै ७,४,२०, १; मै ३, १६, ३; काठ ४४, ९; कौ २, ८२०; जै ३, ५७,१०; शौ २०, २६,६; ४७,१२; ६९, ११.

अ-के(श→)शी[i]— -श्यः पै १६, १०५,१.

‡अ-को(श→)शा[h]— -शाः मै २, ७, १३; काठ १६, १३.

अक्त-, अक्ता-, अक्तु-, अक्त्वा √अञ्ज् द्र.

?अक्रम[j] पै ५, १०, १.

अ-क्र[k]— -क्रः ऋ १,१४३,७;१८९,७;

विमर्शापेक्षम् ।

[a]) तस. । अव्यय-पूपप्रस्व. (पा ६, २, २) । उप. यद्र.

[b]) '-त्रा' इति संहितायां दीर्घः । तस. उत्तरपदाद्युदात्तत्वम् उपसंख्येयम् (तु. पा ६, २, १९९) ।

[c]) पपा. अनवगृहीतः । नञादित्वं संदिग्धं भवति । सा. भाष्ये तददर्शनात् । यद्यपि भाष्यीये क्वाचित्के मूको॰ (तु. MM.) तत्सद्भावोऽपि लब्धप्रवेशो भवति तथापि तत्सद्भावपक्षे नञ्-स्वरस्याऽवश्यं-भावित्वात् (पा ६, २, २) तस्य चेहानुपलम्भात् तदभाव एवाऽनुमीयेत । अथवा यथा 'अध्रि-सध्र्योर् अन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम्' (पावा ६,३,९२) इति कृत्-स्वरस्य बाधनं भवति, एवं नञ्-पूर्वत्वे नञ्-स्वरस्यापि बाधनम् उपसंख्यायेत । ननु तत्र कुध्रि- इति नैव पठ्यते कुतस्तदन्तोदात्त-निपातनमिति चेत् । सत्यं, तस्याप्य् उपसंख्यानं कर्त्तव्यं यथा सह>सध्रि- तथा कुह>कुध्रि- इति (तु. पा ६, ३, ९५) । यत्तु PW. अकुध्र्युञ्च्- इत्यत्रोदात्तं निर्दिशति तन्न । उदात्तनिवृत्तिस्वरेण स्वरितस्यैव सावसरत्वात् (पा ८, २,४) प्रामाणिक-साक्ष्यन्तरोपबृंहितत्वाच्च । नञ्-पूर्वत्वा-पूर्वत्वपक्षयोरुभयोरपि रूपं क्रिवि. भवतीति समानम् ।

[d]) अत्र यस्थि. उताहो कृतम् इति पदमिति संदेहः । तु. 'अज्ञानतः' इत्यत्रत्यं टि. ।

[e]) तस. उप. यद्र. । इहत्यं रूपं क्रिवि. भवति ।

[f]) तस. नञ्-स्वरः (पा ६,२,२) । उप. 'कृत्त-रुच्-' इति बस. । अथवा 'अकृत्त-रुच्-' इति बस. पूपप्रस्व. (पा ६,२,१) ।

[g]) तस. । 'कृत्योक-' (पा ६,२,१६०) इत्युक्तः स्वरः ।

[h]) बस. अन्तोदात्तश्च (पा ६,२,१७२) । 'अपुष्पाः' इति ऋ (१०, ९७, १५) पाभे. ।

[i]) बस. । स्त्रियां ङीप् (पा ४, १, ५४) । 'वि-केशी-' इति शौ (११, २, ११) पाभे. यद्र. ।

[j]) विकारभूयिष्ठः पाठो नैकान्तिकपर्यवसानः । तक्म-सकक्षस्य 'अक्मन्-' इत्यस्य वा रूपं स्यात् 'तक्म' इत्येव वा मूलतः पाठः स्यादित्युत्प्रेक्षामात्रमिह द्र. । प्रकरण-संगति-परीष्टिपरो विमर्श-विशेषस्तु वैश. अन्वेष्टव्यो भवति ।

[k]) नञ्-पूर्वस्य आङ्-पूर्वस्य वा √क्रम् इत्यस्य रूपं द्र. (या ६,१७) । डः प्रत्ययः । प्रथमे कल्पे भावे वा कर्मणि वा यक. बस. तस. च । स्वरार्थं तु. यक. पा ६, २, १७२; १६० (चार्वादिषु उसं.) । उत्तरे च कर्तरि प्रत्यये पूप. ह्रस्वत्वं कृद्-उपप्रस्व. (पा ६, २, १३९) चेति विवेकः ।

३, १, १२; ४, ६, ३; -क्राः ऋ १०, ७७, २.

†अ-क्रतु[a]- -तुः ऋ १०,८३,५; शौ, पै ४, ३२, ५; -†तुम् शौ ३, २५, ६; -तून् ऋ ७, ६, ३.

अक्रन् √कृ द्र.

अ-क्रविहस्त[b]- -स्ता ऋ ५, ६२, ६.

अ-क्रव्या(व्य-अ)द्[c]- -०व्यात् शौ १२, २, ३; ४२; -व्यादा पै १६, ७१, १.

अ-क्रि[d]- -क्री ऋ १, १२०, २.

अ-क्रीळ(ड)त्[c]- ळन् ऋ १०, ७९, ६.

¶अ-क्रीत,ता[c]- -तः तै ६, १,१०,५; काठ २६, ३; क ३७, २; -तम् काठ ३४,३; -†ता[e] काठ २४,१.

अ-क्रुद्ध[c]- -द्धः मै २, ९, ९.

अ-क्रूर[c]- -¶रम् मै ३, २,३;८,२;५; १०,१; ४, १, १०; -रेण पै ६, ९, ८.

¶अ-क्रूरंकार[c]- -राय तै ५, १, ७, १; काठ १९, ७; क ३०, ५.

अ-क्लु(स्त→)स्ता[f]- -स्ताः मै ४,२,९.

√१अक्ष्[g], अक्ष्णुते, अक्ष्णुयात्, अक्ष्णुयात् मै ४, २, ९. [निर्°]

१अक्षि(त→)ता[h]- -ताः मै ४, २, ९[२]. [°त- अन्°]

अक्षित(व्य→)व्या[i]- -व्याः मै ४, २, ९[२].

१अष्ट- निर्°, °कर्णी-

√२अक्ष्[g], ?अक्षतु[j] पै १०, २, ३.

?आक्षिषुः √१अश् द्र.

अक्ष्- अक्ष्णोः[k] मै ३, ११, ५.

a) बस. । अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र. ।

b) तस. । नञ्-स्वरः (पा ६, २, २)। उप. बस. द्र. ।

c) तस. । अव्यय-पूपप्रस्व. (पा ६, २,२)। उप. यद्र. ।

d) वैयुत्पत्तिकः संकेतो विमर्शापेक्षः वैश. द्र. ।

e) -ताः इत्येवं मुपा. शोध्यः तु. सोम->-मेन इत्यत्र सस्थटि. ।

f) मूलकोशभूयिष्ठसाक्ष्याद् 'अक्लस्ता' इति वकारवत् प्रातिपदिकस्वरूपं भवति। व्युत्पत्तिस्तु विमर्शापेक्षिणी वैश.द्र.

g) यः √अक्ष् इति पर. च वेट् च विकल्पितश्नप्रस्नुतया चोपदिष्टः (पा ३, १, ७५) तस्य तावद् यावदुपलभ्ये वैदिके वाङ्मये तिङ्रूपाणि नैव दृष्टिपथमवतरन्ति । 'आक्षिषुः' इति लुङि यद्रूपं भवति तद्विषयेऽभियुक्ताः √१अश् इत्यस्य वेदम् √२अक्षेर् वेदमित्युभयथा संस्कारसंभवाच्च व्याप्त्यर्थसाम्याच्च विनिगमकान्तराभावाच्च विवेक्तुमक्षमाः संदिहत एव। एवंभूतेऽपि आक्षाण- इति कृद्रूपस्य √२अक्षेर् व्युत्पत्तिः सुलभेति कृत्वा तस्य धातोः सद्भावोऽनुमन्तव्यो भवति । अनुमते च तस्मिन् अक्ष्-, अक्ष-, अक्षि- प्रभृतिशब्दानामपि व्युत्पादनमस्मादेव धातोः कर्तव्यम् इति भवत्येव पन्था ऋजीयान् । ननु मूलतः √१अक्ष् इत्यस्यापि √१अश् इत्यनेन स्यात् कोऽपि विस्मृतप्रायः सनन्तप्रकारकः पुरातनः संबन्धस्तेन च प्रसिद्धतराद् √१अश् इत्यस्माद् एव यथाकथंचिद् आक्षाण- इत्यस्याप्य् अक्षादिशब्दान्तरवद् व्युत्पत्तिः द्र. इति चेन्न । एवं सति मौलिकाभेदाश्रयेण बहूनामपि धातूनां पृथक् संख्यानानुपपत्तेः । नन्विष्टापत्तिरिति चेन्न । √१अक्ष् इत्यस्य दुरुपपादापत्तेः । तस्य हि √१अश् इत्यस्मात् पृथग्भूतानि तिङ्रूपाणि कृद्रूपाणि च श्रौतान्युपलभ्यन्ते । असौ चापि केवलमर्थवशात् प्रयोगविशेषवशाच्चैव पृथङ् निर्देशमर्हन् √२अक्ष् इत्यस्य तन्मूलभूतस्य सत्ताऽनङ्गीकारे कैमुतिकत्वेनैव विभ्रष्टसत्ताक आपद्येत । अत उक्तदिशोभयोर् √१,२अक्ष् इत्येतयोर् निर्देशौ दुष्परिहरो वेदितव्यः। ननु कथम् √१अक्ष् इति √२अक्ष् इतीमम् आश्रितो भवतीति चेदुच्यते । तथाहि। व्याप्तिमात्रे वर्तमानः √२अक्ष् इत्येव व्यतिवेभनरूपातिशयितव्याप्तिविशेषं यदाह तदा √१अक्ष् इति जायमानोऽर्थविवेक-सौकर्याय पृथङ् निर्देशमर्हति। वेट् चासौ उभयपदी च। अल्पतरविषयत्वाच्च √१अक्ष् इत्यस्य प्रथमसंख्याकत्वेन पुरस्तान्निर्देशः द्र. ।

h) पाप्र. धा. ऊदित् । ततो निष्ठायां विकल्पित इटि प्रत्यय-स्वरः (पा ३, १, ३;७, २, ४४) ।

i) तव्यति प्रत्यये तित्स्वरितत्वम् (पा ६, १, १८५) । शेषं नापूटि. द्र. ।

j) एवम् इवाऽभिप्रयन् मुपा. चिन्त्यः । प्रत्यक्षकृते मन्त्रे युष्मच्छ्रुतिप्रधाने प्रपु. योगस्याऽसंगतेश्चाऽर्थतोऽन्वयक्लेशाच्च। अक्षतोदक(:) इत्येवं किलाऽत्र साधीयान् मूको. द्र. । युष्मदभिधेयस्योपमेयभूतस्याऽक्षतोदकेन समुद्रेण साम्यप्रदर्शनेऽन्वयपर्यवसानसमुपलम्भादिति यावत्। अन्यच्च, यथा मूको. समुद्रेव° इत्येवमुपलभ्यते तथैतत् प्रतीयेत यद् अत्र समुद्र इव >समुद्रेव इत्याकारकः सन्धिः श्रुत्यभिप्रेतो भवतीति। तथा च सति छन्दश्चरणस्य यथालक्षणत्वमुपजायमानम् अप्येनमेव श्रुत्यभिप्रायमुपबृंहयेद् इत्यलं मुपा. संस्करणान्तरसापेक्षत्वोपवर्णनविस्तरेण ।

k) मूको. साक्ष्येण संभाव्यमानं स्त्रीत्वं प्राति. (तु. अक्षी- >-क्ष्यौ इत्यस्य पै ६, ६, १ इत्यत्रत्यं च तत उत्तराणि च टि.) । सद्भावाभ्युपगमे क्विबन्तं प्राति. द्र.। अस्मिन्नेव प्रकरणे वाजसनेयिनः स्वरितान्तम् 'अक्ष्योः'(मा२१,४८) इति। तैत्तिरीयाश्चोदात्तान्तम् 'अक्ष्योः' (तैब्रा २,६,१४,१) इति पठन्ति। अत्र तु तस्माद् अक्षी-

[°क्ष- अन्°]

१अक्ष[a]- -०क्ष ऋ ३,५३,१९; -क्षः ऋ १, १६४, १३; १६६, ९; ३, ५३, १७; ६, २४, ३; ८, ५, २९; १०, ८५, १२; ¶तै २, ६, ३, ३; ६, २, ९, १; ¶मै ३, २, २; ४, ६, ८; काठ २५, ८¶; क ४०, १¶; शौ ९, १४, ११†; १४, १, १२†; १९, ५३, २; पै १२, २, २; १६, ६७, ३†; १५१, ३; -क्षम् ऋ १, ३०, १४; १५; ७, ३३, ४; ¶तै ३, १, ३, १; ६, २, ९, ४; काठ १०, ५¶; †कौ २, ४३५; ४३६; †जै ३, ३३, १०; ११; †शौ २०, १२२, २; ३; -क्षाः मै ४, ५, ९¶; -क्षात् शौ २, १४, २; -¶क्षान् काठ ८, ७; क ७, ४; -‡क्षाय[b] खि ५, १४, १; -क्षे ऋ ८, ४६, २७; मै ३, ६, ८¶; पै ५, ९, ४; -‡क्षेण ऋ १०, ८९, ४; कौ १, ३३९; जै १, ३५, ८. [°क्ष- अधस्°, रथ°]

¶अक्ष-सङ्ग[c]- -ङ्गम् तै ६, ३, ३, ४; मै ३, ९, २. [°ङ्ग- अन्°]

अ(क्ष→)क्षा-नह्[d]- -नहः ऋ १०, ५३, ७.

२अक्ष[e]- -क्षः ऋ १०, ३४, ४; -क्षस्य ऋ १०, ३४, २; -क्षाः ऋ १०, २७, १७; मै ३, ६, ३¶; शौ ६, ७०, १; ७, ११४, ६; १४, १, ३६; पै १, ४९, २; २, ३५, ३; ४, ९, १; १०, ७; -०क्षाः शौ ७, ५२, ९; -क्षाणाम् मै ४, १४, १७; शौ ६, ११८, १; ७, ११४, ५; पै ४, ९, ४; १६, ५०, ३; -क्षान् ¶मै १, ६, ११; ४, ४, ६[2]; शौ ४, १६, ५; ७, ११४, ७; पै ४, ९, ६; ५, ३२, ५; -क्षासः ऋ १०, ३४, ६; ७; -क्षेभ्यः शौ ७, ११४, २; पै ४, ९, ३; -क्षेषु काठ ३६, १५; शौ ४, ३८, ४; ५, ३१, ६; ६, ३८, ३; ७, ११४, १; १२, ३, ५२; १४, १, ३५; पै २, १८, ४; २६, २; ४, ९, २; ९, २२, १६; १०, ६, ५; १६, १४९, ३; -क्षैः ऋ १०, ३४, १३; मै ३, ६, ३¶; शौ ७, ५२, १; -क्षौ[f] शौ १९, ५०, १. [°क्ष- अन्°, अधि°, अनाप्त°, अपिनद्ध°, आप्त°, कृष्ण°, चतुर्°, धूम्र°, पद्म°, पद्मदलायत°, पद्मपत्रायत°, परस्°, पर्यस्त°, पिङ्ग°, प्रति°, भूरि°, मुक्त°, विरूप°, विष°, शुष्क°, श्येत°, स°, सनिस्र°, सम्°, सहस्र°, हरि°, हिरण्य°]

अक्ष-क- अन्°

अक्ष-का(म→)मा[g]- -माः शौ २, २, ५; पै १, ७, ५[h].

इत्यस्माद् दीर्घान्ताक्षिप्रभवाद् रूपात् पृथग्भूतमेव रूपं पठ्यते। पपा. अप्येवमेव। ततश्च १अक्ष- २अक्ष- अक्षि- अक्षी- इत्येतेभ्यो विविक्तस्य हलन्तस्य अक्ष्- इत्यस्य शब्दस्य सद्भावः संभाव्यते। स एव नञ्-पूर्वः अनक्ष्- इत्यत्र अद्र.। अपि च 'सौ' (पा ६,१,१६८) इति विभक्तिस्वरः द्र.।

a) अन् प्रत्ययो नित्स्वरश्च (पाउ ५,३३; पा ६,१,१९७)।√१अश् इत्यस्माद् व्युत्पत्तिपक्षे सकारादित्वं प्रत्ययस्येष्येत (पाउ ३,६५)। अन्यत् सर्वं समानमिति दिक्।

b) अविश्लिष्टः पाठः। श्रुतिविप्रतिपादश्च भूयानत्र भवति। तद् यथा। 'यक्षाय' इति (शौ २०, १२८, १२) पाण्डु. मुपा.। तत्र 'युक्ष्माय' इत्येवं पाठम् उद्दः WR.। शांश्रौ १२,१४,५ इत्यत्रापि 'युक्ष्माय' इति पठ्यते। अन्ततः 'यक्षाय' इत्येवमपि केषुचित् शौ. कोशेषूपलभ्यते। मूलतः किंविधात्र श्रुतिः किमर्था वेत्यत्र वैश. अनुसंधेयम्।

c) कारकोपपदे √सञ्ज्+अधिकरणे घञ् प्रत्ययः। 'थाथ-' (पा ६, २, १४४) इत्यन्तोदात्तः। रूपं क्रिवि. उपलभ्यते।

d) कारकोपपदे √नह्+क्विप्। कृद्-उपप्रस्व. (पा ६, २, १३९)। पूप. संहितायां दीर्घः (पा ६, ३, ११६)।

e) अत्र प्रत्ययस्य नित्त्वं निवर्ततेतिमात्रं नापूप्त.विशेषः द्र.

f) अत्र मूको. 'अक्ष्यौ' इत्यपि भवति। (तु. अक्षी-> -क्ष्यौ मै १, ६, ७ टि.)।

g) 'अक्षान् देवनसाधनभूतान् कामयते' इत्यभिप्रायवन्तः PW., BW., MW., W. प्रभृतयोऽर्वाञ्चः २अक्ष- इत्य् उपपदम् इत्याहुः। तच्चिन्त्यं भवति। देवन-प्रकरणाऽभावाच्च सामान्येन रूप-यौवन-सम्पद्विशेषलक्षणभूतस्याऽप्सरः-कर्तृक-मनोमोहन-श्रेष्ठसाधनभूतस्य कामयुक्तत्वस्य तस्या नेत्रयोः श्रुत्या प्रतिपित्सितत्वाच्च। अतोऽक्षि-पर्यायभूतः २अक्ष- एवेह प्रकृतः द्र.। सा. उपपदसमासतया व्याचष्टे 'अक्षाणि कामयमाना-' इति। तथात्वे सामान्येन बहुव्रीहि-लक्षणस्य पूपप्रस्व. अभावः स्याद् उपपदसमासलक्षणस्य कृद्-उपप्रस्व. च भावः स्यात्। भवति तु तत्र पूपप्रस्व. (पावा ३,२,१)। बस. इत्यपि वा सुवचम् (पाम. त.)।

h) अर्वागभियुक्तप्रतिपादित-द्यूतप्रकरणाऽऽभासाऽभिभवजनितश्च 'अक्षिकामाः' इत्याकारक-मूलकोशसाक्ष्य-विरुद्धश्च मुपा. चिन्त्यः। यत्सत्यमेतच्छाखीयो मूल-कोश-प्रदर्शितः पाठः शाखान्तरीयस्य 'अक्षकामाः' इति पाठस्याऽपेक्षया विशेषेणोपरिष्टाद् उक्तस्याऽभिप्रायस्य समर्थनाय प्रभवेद् यथा नेह देवनस्य प्रकरण-सांगत्यं किमपि भवतीति च यथा चेहाऽक्ष- शब्दो नेत्रवाचक इति च।

अक्ष-दुग्ध[a]— -**ग्धः** शौ ५, १८, २; पै ९, १७, २[b].

अक्ष-पराजय[c]— -**यम्** शौ ४, १७, ७.

अक्ष-राज[d]— -**जाय** मा ३०,१८; का ३४, ३, ५.

अक्ष-वृत्त[e]— -**त्तम्** मै ४, १४, १७; शौ ६, ११८, २; पै १६, ५०, ४.

¶**अक्षा(क्ष-आ)वप**[f]— -**पस्य** काठ १५, ४.

¶**अक्षा(क्ष-आ)वाप**[g]— -**पस्य** तै १, ८,९,२; मै २,६,५; ४,३,८.

अक्षन्[h]— -**क्षाणि** मै ४,४,३; –¶**क्षन्** तै ६,१,९,१; –†**क्षभिः** ऋ १, ८९,८;१२८,३;१३९,२[२];२,२, ४; ९, १०२, ८; १०, २१, ७; ७९, ५; १२७, १; मा २५,२१; का २७, ११, ८; मै ४, १४, २; काठ १३,१६; ३९, १५; कौ २, १२२४; –**क्षाणि** ऋ ७, ५५, ६; पै ४, ६, ५; –**क्ष्णः** ऋ ८, २५, ९; खि ५, ७, ४, ७; मा ४,३२; का ४, १०, ३; तै १, २, ४, १; ६, १, ७, ३; मै १, २, ५: काठ २,६; क १, १९: –¶**क्ष्णा** मै २, ३, ६; –**क्ष्णोः** खि १, ११, ८; शौ १९, ६०, १.

अक्ष(न्>)ण्-वत्[i]— -**ण्वते** तै ७, ५, १२, १; काठ ४५, ३; –**ण्वन्तः** ऋ १०, ७१, ७; –**ण्वन्तम्** खि १,५,७; –†**ण्वान्** ऋ १, १६४, १६; शौ ९, १४, १५; पै १६, ६७, ६.

१**अक्षर**[j]— -**रः** पै १२,२,१; –**रम्** ऋ १, १६४, ४२; ३, ५५, १; खि ५, ३, २[२]; ३; –**रा** ऋ १, ३४, ४; ७, १, १४; –**राः** शौ १३, ३, ६; –**राणि** मा २३, ५७;

a) अर्वाञ्च आभिधानिका व्याख्यातारश्च (PW., BW., MW., W. द्र.) देवन-प्रकरणकम् २**अक्ष-** इति पूर्वपदं ब्रुवाणाश्चिन्त्याः स्युः। तादृशस्य प्रकरणस्याभावात्। तदपेक्षयाऽक्षि-पर्यायभूतस्याऽपरस्य तस्यैव शब्दस्याऽत्र ग्रहणं साधीयः स्यात्। भूयान् विस्तरस्तु वैश. द्र.

b) '**अक्ष-दुग्धः**' इति मूकोपा.। तस्याऽपि '**दुग्धदोहाः**' इति कठश्रुति-निदर्शनेन व्याख्यानं प्रकरण-संगतं संभवेदित्यादि-विस्तरः वैश. अनुसंधेयः। मुपा. च शौ. श्रुत्या साम्याऽऽपादनेच्छाया औत्कव्यं मूले द्र.।

c) तस.। '**थाथ-**' (पा ६, २, १४४) इत्यन्तोदात्तः।

d) तस.। समासान्ते **टचि** चित्स्वरः (पा ५, ४, ६१; ६, १, १६३)।

e) सतस.। पूपप्रस्व. (पा ६, २, २)। उप. यद्र.।

f) **कर्मण्युपपदे आ√वप्+अच्** (तु. पा ३,१,१३४)। **थाथादि-स्वरः** (पा ६, २, १४४)।

g) नापूदि. **अण्**। कृद्-उपप्रस्व.(पा३,२,१;६,२,१३९)।

h) **√१अश्+सनिः** प्रत्यय औणादिकः प्रत्ययस्वरश्च (पा ३, ३, १; १, ३)। यद्वा **√२अक्ष्+अनिः** (तु. पाउ १,१५९) इत्यस्यां निष्पत्तौ सकारः प्रकृत्युपजनः स्यात्। पाणिनीयास्त्व् **अक्षि-** इत्यतः कृताऽनङादेशादुदात्ताद् व्युत्पादयेयुः (पा ७,१,७६)। प्रथमे कल्पे समानेऽर्थे समानाद् धातोः कृत्-प्रत्ययसुभिक्षजः किञ्चिन्मात्रं भिन्नानां बह्वंशेन सरूपाणां बहूनां नाम्नां मौलिक आविर्भाव आस्थीयेत। उत्तरे तु मूलत एकस्य तथानिष्पन्नस्य प्रधानीभावितस्य नाम्नः सत इतराणि नामानि नैरुक्तिक-विकारमात्राणि स्युरिति विवेके सुदर्शे तारतम्य-प्रामाण्ये विविच्चां विमर्शः शरणायताम्।

i) अत्र पाणिनीया **मतुपि** प्रातिपदिकस्य नकारलोपं ततो नुटं च कृत्वा (पा ८, २, १६) नुड्-उत्तरस्य पिन्निहतस्य **मतुपः** स्वरं साधयेयुः। स्यादत्रैवं वाच्यं यथैकेषाम् अन्नन्तानां नाम्नां **मतुपि** नकारलोपो भवति न च भवत्येकेषामिति। ननु ततः किम् इति। उच्यते। नुटोऽनुशिष्टेरेवं निवार्यत्वं प्रसिध्येद् इति। ननु नुटोऽभावे तदुत्तरत्वाभावे कैमुतिके सति '**ह्रस्वनुड्भ्याम्**' (पा. ६, १, १७६) इत्युक्तो **मतुपः** स्वरो न स्यात् तेन च तद्लक्ष्यानुविधायित्वं तन्त्रस्य कथं प्रसिध्येद् इति। उच्यते। सति सिद्धे लक्ष्यविशेषाऽननुविधायित्वे तन्त्रस्यैवं चोद्यं स्यान्नान्यथा। न चेह तथात्वमिव तस्य प्रतीयेत। **मतुप्**-स्वरानुशिष्टेरेव शोधार्हत्वानुदर्शनात्। तथाहि, नुटो **मतुपः** स्वरेऽनुशिष्यमाणे सति **वृमन्-वत्-**, **दामन्-वत्-**, **ओमन्-वत्-**, **अश्मन्-वत्-**प्रभृ. नलोपानन्तरं भूतपूर्वगत्याऽन्नन्तेभ्यो **मतुपि** नुडागमे कृते **मतुपस्** तदुत्तरत्वसिद्धौ तत्स्वरे प्राप्ते तदभावेऽव्याप्तिदुष्टाऽनुशिष्टिः स्यात्। अतोऽत्रैवं वाच्यं यथाऽनकारलोपिभ्य आद्युदात्तेभ्योऽन्नन्तेभ्यः प्राति. **मतुप्** पिन्निहत एव भवतीति। यथा निदर्शितेषु प्राति.। अन्तोदात्तेभ्यस्तु तादृशेभ्यः प्राति. **मतुब्** उदात्तो भवतीति च। यथा **उदन्-वत्-**,**अस्थन्-वत्-**, **दधन्-वत्-**, **आत्मन्-वत्-**, **ध्वस्मन्-वत्-** प्रभृ. इति। अथाऽपि यथा **मन्-**प्रत्ययान्तानां प्राति. स्वातन्त्र्येण कृद्भावो भवति, एवम् अन्नन्तानामपि प्राति. आदेशीभावाद्यतन्त्रं स्वतन्त्रं च तथात्वमङ्गीक्रियेतेति पुष्टपूर्वस्य पुनःपोषणमिव भवति।

j) **√१अश्** यद्वा **√२अक्ष्+सरः** प्रत्ययः। प्रत्ययाद्युदात्तत्वेन मध्यस्वरः (पाउ ३,७०; पा ३,१,३)। **अ-क्षर-** इत्येवं

५८; का २५, १०,५;६; ¶तै २, ४, ११, १²; ५, ८, ३; ६, १,५; ३, २, ९, १²;२²; ३; ४; ६, १, ६, ३; ६, ११,५; ¶मै १, ७,३; ११, १०⁸; २, ३,७; ४, ४²; ३, ६,५;४,७,५; ¶काठ ९,१;१०, ७; १२,५; १४, ४⁵; २३, १०; ३४, १२; ¶क ८, ४; ३७, १; –¶रात् तै ५,१,९,१;६,१,२,७; –रे ऋ १,१६४, ३९; ६, १६, ३५; तै ६,१,६, २²¶; काठ २३, १०²¶; क ३७, १²¶; कौ २, ७४७; जै ३, २२, २; शौ ९, १५,१८; पै १६,६९,८; –रेण ऋ १, १६४, २४; १०, १३, ३; शौ ९, १५,२; १८, ३,४०; पै १६, ६८, २. [°र- अशीति°, अष्ट°, अष्टाचत्वा- रिंशत्°, एक°, एकादश°,चतुर्°, चतुर्दश°,चतुर्विंशति°, चतुश्चत्वारिंशत्°, त्रयोदश°,त्रि°,त्रिंश°,त्रिंशत्°,दश°, द्वात्रिंशत्°, द्वादश°, द्वि°, नव°, पञ्च°, पञ्चदश°, शत°,सप्त°, सप्तदश°, सहस्र°.]

अक्षर-स्व- अशीति°

अक्षर-पङ्क्ति[a]– -¶ङ्क्तयः काठ ९,२²; क ८,५²;–ङ्क्तिः मा १५, ४; का १६, १,६; तै ४, ३, १२, ३; मै १, ११,१०; २,८,७; काठ १४, ४¶; १७, ६; क २६, ५; –ङ्क्तिम् मै १, ११, १०¶; –ङ्क्तीः तै ५, ३, ८, २¶.

¶अक्षर-शस्(:)[b] तै २, ५, ८, ३; मै ३, १, १; ७, ७.

†२अक्ष(र→)रा°– -रा ऋ ७, १५,९; ३६,७; –राणाम् ऋ ३, ३१, ६; मा ३३, ५९; का ३२, ५,५; मै ४, ६, ४; काठ २७,९.

अक्षि[d]– -क्षि ऋ ९, ९, ४; ¶तै ५, ३, १२, १; २; ६, ४, १०, ५; ¶काठ २७, ८[2e]; शौ १, ८, ३; १५,१८,२²; पै ४,४,९;–क्षिणी शौ १०, ९, १४; ११, ३, २; –क्षिभिः काठ ३५,१‡[f]; –क्षीणि शौ ४, ५, ५‡[g].

अक्षि-क- अन्°

†अक्षि-पत्[h]– -पत् ऋ ६, १६, १८; १०, ११९, ६; काठ २०, १४; कौ २, ५७; जै. ३, ६, ३.

अक्षि-भु[i]– -भुवः मा २३, २९; का २५, ६,९; शौ २०,१३६,४.

¶अक्ष्या(क्षि-आ)मय[j]– -यः काठ २७, ८.

अक्षी[k]– -क्षी ऋ १, ७२, १०; [११६, १६; ११७, १७]; १२०, ६; २, ३९, ५; १०, ७९, २; पै ६, ६, २; –क्षीभ्याम् ऋ १०, १६३, १; खि ४, १०, ३; ते ७,३,१६, १; ¶काठ १२, १०; शौ २, ३३, १†; ११, ४,

नञ्-पूर्वत्वाभ्युपगमपक्षे 'नञो जर-' (पा ६, २, ११६) इत्यत्रोपसंख्यानम् द्र. ।

[a]) बस. पूर्वपदप्रकृतिस्वरः (पा ६,२,१)। उप. यद्र.

[b]) वीप्सायां शसि प्रत्ययस्वरः (पा ५, ४, ४३; ३, १, ३)।

[c]) असमस्तः कृत् नापूश. द्र.। स्वरमात्रे विशेष इत्येकः कल्पः। अस्मिंश्च कल्पे प्रत्ययो निद् भवत्य् आद्युदात्त-करणः शेषं प्रकृत्यादि पूर्ववत् द्र.। तस. अयं नञ्-स्वरः (पा ६,२,२) इत्यपरः कल्पः। क्रियाम् अर्थविशेष-निरूढौ विशेष्यगर्भविशेषणत्वेनैकस्य प्राति. अवान्तर-विशेष इव समजनि। तद्विस्तरः वैश. द्र.।

[d]) √१अश्+सिन् प्रत्ययो नित्स्वरश्च (तु. पाउ ३, १५६; पा ६, १, १९७)। यद्वा √२अक्ष्+इन् प्रत्ययः स्यात् (तु. अक्षन्- यटि.)।

[e]) 'अक्षी' इति पठन् SIM. चिन्त्यः। एकवचन-सङ्ख्या ह्रस्वत्वं साधीयः स्यात्।

[f]) 'अक्षभिः' इति बाह्वृचः (१,८९,८) पाभे.।

[g]) 'अक्षाणि' इति बाह्वृचः (७,५५,६) पाभे.।

[h]) कारकोपपदे √१पत्+क्विप्। कृद्-उपप्रस्व. (पा ६, २, १३९)।

[i]) उस.। क्विबन्त-कृद्-उपप्रस्व. (पा. ६,२, १३९)। °भु- इति ह्रस्वान्तं प्राति. अनुमन्वानो म. चिन्त्यः। अत्र च बाह्वृचानां पाभे. अवधेयः। तद् यथा। काश्मीरीयमूलकोशे 'अक्षीभगो' इति पाठः। स एव च खि ५, २२, ४ इत्यत्र मुपा.। तदीयमूलकोशान्तरीयोऽपरः पाठः 'सत्यसाक्षीवगो यथा' इत्यपि भवति (तु. खि ५, २२, ४ टि.)। पूर्वस्मिन् पादे सक्थ्ना प्रमाणभूतेन नार्या देशनस्य श्रावितस्योपमानमुखेनोपबृंहणे मंत्रस्वारस्यात् सक्थि-साकल्य-स्थापनाय 'सत्यस्याक्षिभुवा यथा' इति तृतीयान्तः पाठो मूलतः प्रवृत्त इति संभाव्यते। तन्निश्चयस्तु भूयस्तरां याजुष-मूलकोशान्वेषणापेक्ष इति तत्परा अभियुक्ता लब्धसंकेताः स्युः। शौ. तु 'सकुला' इति नारी-विशेषणं श्रावयति। भूयिष्ठ-मूलकोशीय-साक्ष्यादपि स एव पाठो लब्धप्रतिष्ठो भवति। अतस्तच्छाखीयः पाठः 'अक्षिभुवः' इति प्रथमान्त एव साधुरिति विवेकोऽवधेयः।

[j]) बस.। उप. यद्र.।

[k]) द्विवचनमात्रे श्रूयते। नापूश. ई इत्यादेश उदात्तः (पा ७, १, ७७)। यद्वा 'कृदिकारादक्तिनः' (पाग ४, १, ४५) इति बह्वादिष्व् अन्तर्भाव्य ङीष् प्रत्ययः द्र.। लक्ष्येऽविशेष उभयथाऽपीति दिक्।

३[2]; २०, ९६, १७†; पै ४, ७, ९†; १६, ५५,३;५६,३;५७,३; —क्ष्योः[a] मा २१, ४८; का २३, ६,१; —क्ष्योः[a] तै ३, २,५,४;५, ५,९,२; शौ ५, ४, १०; ६,२४, २;१२७,३; पै १,३१,४;—क्ष्यौ[b] मै १,६,७[c]; काठ २०,६; क ३१, ८; शौ १, २७, १; ४, ३,३; ५, २३,२;२९,४;६,९,१[2];७,३७, १; पै १,५५,३; २,८,३;३३,२; ३;९०,२[2];४,२०,२;६,६,१?[d]; ७,२,३?[e]; ८,३, ८?[f];१०, ७?[g]; १३, ९, ५?[h]; १४, १७?[h]; १६, ५३,२?[h]; ९६,८?[h]; १३७,३?[h].

अक्षी-भग[i]— -गः खि ५,२२,४.

अक्षु[j]— -क्षुः ऋ १, १८०, ५; —क्षुम् शौ ९, ३, ८; पै १६, ३९, ८.

अक्षु-जाल[k]— -लाभ्याम् शौ ८, ८, १८.

?अक्षु-माला[l]— -लाभ्याम् पै १६, ३०, ६.

[a]) 'उदात्तस्वरितयोर्' (पा ८,२,४) इति स्वरितोत्सर्गे 'उदात्तयणः' (पा ६,१,१७४) इति व्यवस्थापको नियमोऽनुशिष्टो भवति । तस्य नियमस्य विद्यमानेऽपि चारितार्थ्योऽवसरेऽस्मिन् प्रवृत्त्यभावः शुक्लयजुर्निघ्नः द्र. शाखान्तरीयायास् तत्प्रवृत्तेरुपलम्भात् (तु. नाउ. रूपम्) ।

[b]) स्वरितत्वं विभक्तेः सर्वनामस्थानत्वाद् उदात्तविषयत्वाऽभावाद् द्र. (तु. नापूटि.)।

[c]) इह मूको. 'अक्षौ' इति च 'अक्शौ' इति चापि भवतः। तेन मूलतः २अक्ष्- इत्यस्य अद्व्यर्थे सद्भावः द्र.।

[d]) मूको. 'अक्षो' इति पाठो भवति। ततश्च 'अक्षौ' इत्येवं-प्रकारको मौलिकः पाठ इत्यपि संभावनायोपलभ्येत । तत्राऽपि शब्दरूपम् अक्ष्- इत्यतो वा २अक्ष्- इत्यतो वा जातमिति संदेहः । तत्र 'मधुसंदृशी' इति पार्श्वधृतं स्त्रीवृत्तं विशेषणपदं विनिगमकं स्यात् । यद्यनयोरुभयोर्वाऽन्यतरस्य वा स्त्रियाम् एतद् रूपं संभवेत् तदा तदीयमिदं रूपं भवितुमर्हेन्नान्यथा । ह्रस्वाऽवर्णाऽन्तस्य तादृशं तावत् रूपं न संभवति । हलन्तस्य अक्ष्- इत्यस्य तु संभवति। अतस्तदीयमेतद् रूपमिति संभाव्येत ।

[e]) 'अक्षौ' इति मूकोपा.। अत्र सन्नियोग-पठितात् स्त्रीविषयाद् हलन्ताद् 'नास्' इति शब्दाद् भवेद् एतत् सुकल्पं यथा अक्ष्- इति शब्दस्य 'अक्षौ' इति रूपं विवक्षितं न तु अक्षी->अक्ष्यौ इति । भवत्येव तादृशः शाखान्तरे पाठः (तु.शौ ५,२३,३) परं तत्र 'नास्' इत्यस्यापि स्थाने 'नासा' इति रूपं प्रयुक्तम् उपलभ्यते। अत उभयोः शब्दयोर्विषये तत्तच्छाखीयः पाभे. इति वक्तुं पार्येत। यद्येवमभ्युपगमः स्यात्तर्हि 'नास्' इति शब्दवत् अक्ष्- इत्यपि शब्दः स्त्रीविषयः स्यादित्यपि संभाव्येत (तु. पै ६, ६, १ इत्यत्रत्यस्य मूकोपा. नापूटि.) ।

[f]) 'अक्षौ' इति मूको. न तु ततश्छान्दसमानुकूल्यमिव जायते । मुपा. अपि चिन्त्यः प्रमाणाभावात् । शौ ४, ६, १ इत्यत्र हि 'अक्ष्यम्' इति भूयिष्ठकोशानुमतः पाठो भवति। सा. तु तत्र 'अक्षम्' इति पपाठ। प्रकरणाच्चेह चक्षुरर्थ एवाऽपेक्ष्यते न तु तदाश्रितस् ताद्धितः कोप्यन्योऽर्थः। यथा पूर्वम् आञ्जनस्य वृत्र-कनीनिकया साम्यमुक्तमेवमधुना तदीयं पर्वत-नेत्रत्वमुत्प्रेक्षितुमिष्टमित्यस्य सुवचत्वात्। अतो द्वौ विकल्पौ भवतः । 'अक्ष्यौ' इत्यप्रामाणिकः पाठ एव समीचीन इत्येकः। कोशीयः 'अक्षौ' इत्येव मौलिकः पाठस्तदनन्तरं च 'स्वम्' इत्यस्य वाऽन्यस्य वा कस्यचिच्छब्दस्य प्रमादजो भ्रंश इत्यपरः । तद् भूरिविमृश्योऽयं विषयः ।

[g]) 'अक्षौ' इति मूको. स्पष्टं पठ्यते। तद्विशेषणतया पार्श्वधृताद् दुरूहाद् 'नकरणी' इति शब्दादेतत्तावत् सूहं स्याद् यदत्र स्त्रीविषयस्य हलन्तस्य अक्ष्- इत्यस्याऽभीष्टं रूपम् 'अक्षौ' इति। पै १३,९,५ इत्यत्र 'मोक्षौ' इति मूको. 'अक्षौ' इत्यस्यैव समर्थको भवेन्न तु कथमपि 'अक्ष्यौ' इत्यस्येति सुवचम् । पै १३, १४, १७; १६, ५३,२ इत्यत्र च स्पष्टम् 'अक्षौ' इत्युपलभ्यते । पै १६, ९६,८ इत्यत्रत्यः 'अक्षम्' इति पाठोऽपि पूर्ववद् 'अक्षौ' न तु 'अक्ष्यौ' इति संकेतयेत् । तत्रत्यो लेखकप्रमादश्च पङ्क्त्यवसान-सुलभाऽऽलस्य-कारित इत्यपि संभाव्येत। पै १६, १३७, ३ इत्यत्र चान्ततः स्पष्टमेव 'अक्षौ' इति पठितं भवति । प्रकरणसंगमनं च तत्रत्यम् अक्ष्- इत्यस्य स्त्रीविषयत्वे पर्यवस्येदित्यप्यनुसंधेयम् (तु. यद्->यौ इत्यत्र पै १६, १३७, ३ टि.) ।

[h]) 'अक्षौ' इत्येव पाठः संभाव्येत। विमर्शः नापूटि. द्र.।

[i]) अक्षिभू- इत्यत्र टि. गद्र.।

[j]) उन् प्रत्ययो नित्-स्वरश्च (तु. पाउ १, ६; पा ६, १, १९७)। √१अशेर् व्युत्पत्तिपक्षे तु क्सुन् प्रत्ययः (तु. पाउ ३,१५७)। स्वर उक्तः ।

[k]) द्वस.। सामान्यः सामासिकः स्वरः (पा ६,१,२२३)।

[l]) मुपा. 'अक्षमालाभ्याम्'इति मूको.नोपात्तः शाखान्तरीयश्च पाठः(तु.नापूटि.) पूर्वांशतः स्वीकृत इत्यत्र को हेतुरिति तु वयं न जानीमहे। वास्तविकपाठभेदानादाय प्रवृत्तानां शाखानामेवंप्रकारकेण संमेलन-प्रयासेनाऽप्रामाणिकश्रुतिप्रवर्त्तनप्रसङ्गात्। 'अक्षमाला' चेह्रोपवर्ण्यमाना रुद्राक्षमालायाः प्राक्तनतम-संकेतभूता स्यादित्यपि विमर्शापेक्षम्। यमुपा. नापूदि.द्वस., मूकोपा.तु तस.स्याद् इति विशेषोऽपि सुगमः द्र.।

?अक्षोर्[a] पै २,८१,२.

अक्ष्ण[b]-

अक्ष्ण-यावन्[c]- -वानः ऋ ८,७,३५.

¶अक्ष्णया[d] तै ५, २,७,५²;१०,४;५;३, ५,३²; ४, ५,१²; ६,२,८,३²; ३,६, ३; १०, ६²; मै ३,२, ८²; ९; ६, ३; ८, ९; १०,३²; काठ २०, ९²; २१, ७; क ३१, ११².

अक्ष्णया-द्रुह्[e]- -ध्रुक् ऋ १,१२२, ९.

अक्ष्णयाँ-स्तोम[f]-

¶अक्ष्णया-स्तोमी(य→)या[g]- -याः तै ५, ३, ३, १².

अक्ष्य[h]- -क्ष्यम् शौ ४, ९, १. [°क्ष्य- आक्ष°.]

२अक्षु- √१अश् यद्र.

आक्षाण[i]- -णे ऋ १०, २२, ११.

अक्षण्वत्- √२अक्ष् द्र.

अक्षत् √क्शा>क्षा<ख्या द्र.

[a]) मुपा. भूयिष्ठवैकृत-विशिष्टो भवति। 'अक्षोर् अरसम् (?अलसम्) अपलुम्पतु' इत्यस्मदीयः शोध-प्रस्तावश्च भवति। अक्ष- इत्यस्य च 'अक्षोर्' इत्योसि रूपं द्र.। तु. अक्ष- इत्यत्र यस्था. टि.।

[b]) √२, १ अक्षेर् व्याप्त्यर्थाद् अतिवेधनार्थाद्वास्य पर्ण-वर्णाऽन्न-रत्नाऽऽदिशब्दान्तरवद् औणादिके (पाउ ३,६) न-प्रत्यये निष्पत्तिरित्यर्थः। एवं लघीयसा प्रत्ययेन संभवति निर्वाहे 'कृत्यशूभ्यां क्स्नः' (पाउ ३,१७) इत्यत्र किमिति सानुबन्धो गुरुतरोऽन्यः प्रत्ययो विहित इति नैव सूहम् इव प्रतिभाति। तस्मिन्नपि सति शब्दसिद्धावभेदो भवति। धात्ववयवभूतस्य संयोगादेः ककारस्य लोपे षस्य च कुत्वे प्रत्ययाऽऽदि-सकारस्य षत्वे च तत्संभवादित्यर्थः। यत्र √२अक्षेर् अभ्युपगमे वैशिष्ट्यं भवति यत्र √१अश इत्यस्य व्याप्तिसकलसंघाताऽपरार्थस्याभ्युपगमे न तथा सुलभमिव भवतीत्याद्यर्थ-विस्तरः वैश. अनुसंधेयः। यदपि शक. प्रामाण्येन PW. प्रभृतयोऽर्वाञ्चोऽस्य क्लीब-विषयं भेदान्तरमाहुस्तदप्रमाणमिति सुत्यजमिव भवति। सहपठित-कृत्स्न-शब्दवच्चास्य विशेषणमात्रत्वं सुवचं भवति (तु. पाउ ३, १७)। यत्तु तत्रापि नपुंसकतया पाठो भवति तन्निर्देशसामान्य-परं न च क्लीबमात्रतानिष्ठापरमिति द्र.। यच्चाप्यस्य निष्पिपादयिषयेव PW. √अक्ष् इत्यस्याऽऽवसानिकं संकेतमकार्षीत् तन्निर्मूलमिव भवति। कदाचित् ततः प्रागुदाहृतस्य बृउ. पाठस्याऽन्ते 'मुञ्चति' इति शब्देन ध्वनिसाम्यजनितभ्रमद्वारेण तदुत्थापितत्वादिति दिक्।

[c]) उस. √या+वनिप्। कृद्- उपप्रस्व. (पा ६, २, १३६)। अक्ष्ण- इत्यस्याऽत्राऽपि क्रियाविशेषणतया प्रयोगो भवति ततश्चापि क्लीबतायोग इति सुवचमिव भवति।

[d]) इह अक्ष्ण- इत्यस्य भावप्रधानो निर्देशो वक्तव्यः। ततश्च तिरोभावेन कौटिल्येनाऽसारल्येनेत्यादितृतीयान्त-सकलीभूत-शब्दान्तरवत् क्रियाविशेषणतायोगः सुवचः। याच् प्रत्ययश्चात्र तृतीयार्थे। चित्स्वरेणान्तोदात्तः (पा ७, १, ३९; ६, १, १६३) द्र.।

[e]) उस.। क्विबन्त- कृद्-उपप्रस्व. (पा ६,२,१३९)।

[f]) बस. पूपप्रस्व. (पा ६, २, १)।

[g]) तस्येदमित्यर्थे गहादेराकृतिगणत्वाच् छ→ईयः प्रत्ययस्तत्स्वरश्च (पा ४, २, १३८; ३, १, ३)।

[h]) तु. पै ६, ६, १ यत्राऽतिशयोक्तिमुखेनाऽऽञ्जनस्य वृत्र-कनीनिकात्वं च त्रिककुत्-पर्वताऽऽहितत्वं च श्रावितं भवति। इह तु तस्य केवलमुत्तरं विशेषणमभिप्रेत्य पर्वताऽक्ष्यत्वं श्रूयते। तद्भवति विमर्शः किमेतद् 'अक्ष्यम्' इति। उच्यते। 'अक्षि अक्षे अक्षिणि वा भवं तदर्थं हितं वाऽक्ष्यम्' इति यत् प्रत्ययः (पा ५, १, ५)। प्रथमे कल्पे दृष्टिशक्तिपर्यायो भवेद् वाक्याऽन्वयश्च वृत्र-कनीनिकात्व-दिशा दृष्टिशक्त्याऽऽरोपपूर्वकमतिशयोक्त्यैव साध्यः। द्वितीये कल्पे तु वाक्यभेदेनाऽन्वयः द्र.। तद् यथा। 'पर्वतस्याऽसि' इति तत्-प्रभवत्वात्तदीयोऽसीत्याञ्जनाऽभिजनोपवर्णनपरमेकं वाक्यं कर्तव्यम्। 'अक्ष्यमसि' इति नेत्ररोगाऽपहरत्वात् तदर्थं हितमसीत्युपयुक्तविशेषणाऽन्तरोपवर्णनपरं चापरं वाक्यं कर्तव्यमिति। यद्वा भाव एव प्रत्ययः स्यात्। एवमप्यक्ष्णो दर्शन-साधकता-द्वारा तद्भावस्य दृष्टिशक्त्यव्यभिचारात् पूर्वोक्त एवार्थसामान्ये पर्यवसानमिति कृत्वा तृतीयः कल्पो नेह विवेचनायोपलभ्येत। 'यतोऽनावः' (पा ६, १,२१३) इत्याद्युदात्तत्वं चेह द्र.। यत्तु क्वचित् (तु. W. इत्यस्य OP) तैतं स्वरितमिव प्रादर्शि तदपलक्षणं च समस्तकल्पेन मूको. विसंवादि च द्र.। यदपि क्वाचित्कं मूलकोशीयं सायणीयं च साक्ष्यम् 'अक्षम्' इति पाठं प्रत्युपस्थापयितुमुपलभ्यते (तु. W. पाण्डु. टि.) तदप्यसत्। अक्षर-न्यूनस्य दुर्वारत्वाच्छन्दोबाधात्। यथास्थिते तु यणः स्थान इयादेशकरणेन तस्य सुवारत्वं द्र.। यच्चाप्यन्ततः कश्चिदर्वाक्तनः (तु. W. संकेतः) 'अक्षव्यम्' इति वा 'अक्षरम्' इति वा शोधमाह तत्तु प्रमाणाभावाच्चाऽन्यथा सम्यग् निर्वाहे संभवति सर्वथानपेक्षितत्वाच्च नितरां सुत्यजमिति दिक्। तु. अक्षी-> -क्ष्यौ इत्यत्र पै ६,६,१ टि.।

[i]) लिटि कानचि चित्स्वरेणान्तोदात्तः (पा ३, २, १०६; ६,१,१६३)। नुडभावविमर्शः √१अश् इत्यत्र अद्र.।

अ-क्षत,ता[a]— -तः ऋ ५, ७८,९; १०, १६६,२; शौ १२, १,११; पै १, ४५,२; ४,६,७;५,३०,४; १२, ६, ५(?)[b]; १३, ३, ११†; १६, ३४,५; —तम् पै ५,३०,४;१४, १, १०; —ताः पै १६,१००,१२; —तानाम् पै १४, १, १०; —तौ पै १०, ९, ३.

अ-क्षतो(त-उ)दक[c]— -कः पै १०,२,३

अ-क्षति— -तिम्[d] पै १६, १००, २.

?अ-क्षतु[e]— -तुः पै १४, ३, ११.

अक्षन् √घस् द्र.

अक्षन्- √२अच् द्र.

अ-क्षय[f]— -ये शौ १९, ५२, ३; पै १, ३०, ३.

¶अ-क्षय्य[g]— -य्यम् मै १, ८,६; काठ ३१, १५.

१अक्षर-,२अक्षरा-,अक्षि- √२अच् द्र.

अक्षाः अति√क्षर् द्र.

अ-क्षित्[h]— -क्षित् मै १, ८, ६.

१अक्षित- √१अच् द्र.

२अ-क्षित,ता[i]— -तः तै १, ६, ३,३; ७, ३, ४; मै १,४, ७¶; काठ ५, ५[२]; ८, १३[२]; क ८, १[२]; शौ ४, ५, ७; ६, १४२, २; ९, १, ६; ११,१,२०; पै १६, ३२,७;९१, १[j]; —तम् ऋ १, ९, ७; ५८,५; [६४, ६; ९, ७२, ६]; १३०,५; ५, ५३, १३; ७, ६५,१; ८, ७, १६; ७२,१०; ९, २६, २; ३१, ५; ६८, ३; ७८, ३; ११०, ५; १०,१०१, ६; मा १८,१०; ३८, २६[२]; का १९, ४, ३; ३८, ६, १[२]; तै १, ६, ५, १; २, ४, १४, १; ३, १, १०, ३; ११,७†; ४, २, ५, ५[२]†; मै १, ४, २[२]; ७[२]; काठ ३८,१४‡[k]; ४०, ११; †कौ २, ८५७;९५४; शौ ३, २४,४[२]; ७; २९, ४; ५; ४, २७, २; ७, ८६, ६; १८, ४, ३६; १९,५४, ४; २०, ७१,१३†; पै १,१०२, ४; ४, ३५, २; ५,४०, ८; ११, ५, ४;८; १२, २,१४; १६,७०, २; —तस्य शौ ७, ८०,४; —†ता ऋ ३,४०,७;९,६८,३; शौ २०, ६, ७; —ताः काठ ४०, १३[२]; शौ १, १५, ३; ६, १४२, ३[४]; ७, ८६, ६; १०, ६,१४; पै १, २४, ३; १६,४३, ७;७०,१०; —ताम् तै ३,३,११,३; मै ४,१२,६; शौ ७, १७,२; ८५,२; १८, ४,३२; —ते ऋ ९, ११३, ७; मै ३, २, ६¶; —तौ शौ ९, १, ७; पै १६, ३२,६. [°त- अन्°]

अ-क्षि(त→)ता-वसु[l]— -सुम् ऋ ८, ४९, ६; खि ३, १, ६.

†अ-क्षितो(त-ऊ)ति[m]— -तयः ऋ ८, ३, १५; मै १, ३,३९; कौ १, २५१; २, ७१२; जै १, २६, ९; ३, ५८, ९; शौ २०, १०,१; ५९, १; —तिः ऋ १, ५, ९; ६, २४, १; शौ २०, ६९,७; —तिम् ऋ ४, १७, १६.

---

[a]) तस.। नञ्-स्वरः (पा ६,२,२)। उप. <√क्षण् यद्र.।

[b]) ओषधि-प्रकरणे '—ताः' इत्येव पाठः संभाव्येत।

[c]) बस.। 'अक्षतु' इत्यस्य √२अक्ष् इत्यत्र टि. यद्र.।

[d]) मुपा. किमिति संदिग्ध इति नैव विस्पष्टमुक्तं भवति। मूलतोऽयमेव पाठः स्यादित्यत्र तु. २अक्षित- > -तः इत्यत्र पै १६, ६१, १ टि.। यथा तत्र ब्रह्मौदनोऽक्षततया प्रतिपादितो भवति तथैवेह पक्वौदनस्य (स्वयमक्षततयैव) अक्षतिप्राप्तिद्वारता प्रतिपाद्येत। यथा च तत्र शाखान्तरीयपाठधृतिरप्रमाणा भवति तथेह संदेहोत्पादनमहेतुकमिति सर्वं निरवद्यम्।

[e]) अन्यत्र प्रसिद्धि-रहितोऽयं निगमः। √क्षण् इत्यस्मात् तु-प्रत्ययेनौणादिकेन क्षतु- इत्यस्य भावे निष्पत्तिः स्यात् ततश्च 'शतौदना क्षतुमुक्ता क्षतिरहिता' इत्येवं विशेषणतामुखी प्रकरणसंगतिरबाधा स्यात्। तथाविधा शतौदना भवतात्तमाम् इत्यातिशायनिकाऽऽशीःपर्यवसानश्च मन्त्रस्वरसः द्र.।

[f]) तस.। पूपप्रस्व. (पा ६,२,२)। उप. <√१क्षि यद्र.।

[g]) तस.। शक्यार्थे यति यान्तादेशे नञ्-स्वरं बाधित्वा 'कृत्योक-' (पा ६,२, १६०) इत्यन्तस्वरः।

[h]) बस.। अन्तोदात्तः (पा ६, २, १७२)। उप. भावे क्विप् द्र.।

[i]) तस. नञ्-स्वरः (पा ६,२,२)। उप. क्तान्तम्।

[j]) मुपा. शाखान्तराद् (तु. शौ ११, १, २०) इह धृतः। मूलकोशीयः पाठस्तु 'अक्षतः' इति भवति। शाखाद्वयप्रामाण्यान्मन्त्रस्यास्य मौलिकत्वप्रसिद्धौ सत्यामप्यक्षताक्षितयोः कतरो मौलः पाठ इति विमर्शार्हो विषयः। तात्पर्ये विशेषाभावाद् विनिगमकान्तराभावे यथाशाखं त्वध्येतव्यं भवति। एवं सति किमिति तथा नेहाकारीति न जानीमहे। तु. अक्षति- > -तिम् इत्यत्र पै १६, १००, २ टि. यत इहापि कौशः पाठ एव मौल इति विनिगमनयाप्युपलभ्येतेति दिक्।

[k]) 'अनुपक्षितम्' इति पाभे. (ऋ १०,१०१,५)।

[l]) अक्षित-वसु- इति पपा.। बस. पूपप्रस्व. (पा ६, २, १)। अथवा तस. नञ्-स्वरः स्यात् (पा ६,२,२) उप. च बस. स्यात्। उभयथापि स्वरे च तात्पर्ये च सामान्यं द्र.। पूप. दीर्घस्तदुपसंख्यानोत्सर्गसूत्रे (पा ६, ३, १३७) निदर्शयितव्यः।

[m]) समास-स्वरार्थं नापूटि. द्र.।

अक्षितव्य- √१अक्ष् द्र.

१अ-क्षिति[a]- -तयः तै २,४,१४,१; मै ४, ९, २७; १२, २; काठ १०, १२; पै १,१०२,४; -ति ऋ[१, ४०, ४; (५, ३४, ७)] [(३, ९, १) ८, १०३; ५; ९, ६६,७].

२अ-क्षिति[b]- -तये पै १६, ७०, २; १०; -तिः का २, ३,८; तै ४,७, ४, २; मै २,११, ४; काठ ५, ५; १८,९; क २८, ९; शौ ११, ९, २५; १०, ४; २६; पै ५, ४०,७; १६, ८४, ४; ८५, ४; ८७, ६; -तिम् खि ४, १२,२; ¶तै १,७, १,६;३,४; मै ४,९,२७;१२,२; काठ १०, १२; शौ १८, ४, २७; पै ५, २८, ८; ४०, ४; ५; -त्यै मा ६, २८; का ६, ७, ६; तै १, ३, १३, २; ६, ३, ३; ७, ३,४; ६, ४, ३,४; मै १, ३, १; ४, ५, २¶; काठ ३, ९; ५, ५; ८, १३; क २, १६; ८, १.

अ-क्षियत्[c]- -यन्तम् ऋ ४, १७, १३.

अक्षी- √२अच् द्र.

अ-क्षीयमाण,णा[d]- -णम् ऋ ३, २६, ९; तै ३, ३,११, ४; शौ ७,२१, ३; पै ५, ४०, ४; -णस्य तै १, १, १०,२; काठ, क १, १०; -णा ऋ १, १५४, ४; -णाः मा १७, ३; का १८, १,४; तै ४, ४, ११, ४; मै २, ८, १४; काठ ४०, १३; -णे पै २, २३, ५.

अक्षु- √२अच् द्र.

अ-क्षुध्[e]- -क्षुत् मा १८,१०; का १९, ४, ३; तै ४, ७,४,२; ५, ४, ८, २; मै २,११,४; ३,४,१¶; काठ १८, ९; क २८, ९.

अ-क्षुध्य[f]- -ध्याः शौ ७, ६२, ४; ६; पै ३, २६, ३.

¶अ-क्षुध्यत्[g]- -ध्यताम् मै १, ६, ३; ५; -ध्यन् तै ५, ४, ४, १; काठ २१, ७.

अ-क्षेत्रविद्[h]- -वित् ऋ ५, ४०, ५; १०, ३२, ७.

अ-क्षेम[i]- -मम् पै १४, २, ३.
१३; काठ २०, ७; २५,५; २८, १; ३१, १०; क ३१, ९; ३७, ७; ३९, २; ४४, १; ४७, १०; -काः तै ७, ४,११, २; ५,९,१; मै ३, ८, ६; ४, २, १४; काठ ३३,३.

¶अ-क्षोधुक,का[j]- -कः मै १, ४,११; ६, ४; ५; ११; ३, २, ७; ४,१,

?अक्षौर्, अक्ष्ण-,अक्ष्य- √२अच् द्र.

?अक्ष्लिली[k]- -ली शौ २०, १३४,६.

अ-खनत्[l]- -नन्तः[m] ऋ १०, १०१, ११.

अ-खर्व,र्वा[l]- -र्वम् ऋ ७, ३२, १३; शौ २०, ५९,४; -र्वा[n] मै ३, ७, ४¶; -र्वेण तै २, ५, १, ७¶.

¶अँ-खलति[l]- -तिः काठ २८, ८; क ४४, ८.

अ-खात[l]- -तम् शौ ५, १३, १.

अ-खि(द्र→)द्रा[l]- -द्राः तै ३, ५, ८, १; काठ २९, ५; ३९, ३; क ४५, ६.

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. क्षिति- <√१क्षि+कर्त्तरि क्तिच् औणादिकः यद्र.। एवं किल नाउ. क्तिन्नन्तोत्तरपदात् सुभेदेऽस्मिन् प्राति. यदिह सा. (ऋ १, ४०, ४) बस. इति च 'नञ्सुभ्याम्' (पा ६, २, १७२) इत्यनुशिष्टः स्वरश् छन्दसि सर्वविधिविकल्पान्न भवतीति चाह, तन्निष्प्रयोजनप्रयासमात्रं द्र.। एवमर्वाञ्चोऽपि GW. प्रमृ. इह क्तिजन्तम् उप. अविविच्यन्तश् चिन्त्या इति किमु वक्तव्यम्।

[b]) उप. भावे क्तिन्नन्तम् इतिमात्रम् नापूटि. विशेष उक्तपूर्वो भवति। शेषं तत्र गतम्।

[c]) तस.। नञ्-स्वरः (पा ६,२,२)। उप. <√२क्षि यद्र.।

[d]) उप. कर्मणि शानच्। स्वरः एपूटि. द्र.।

[e]) नापूदि. समासस्वरौ। उप. √क्षुध्+भावे क्विप् यद्र.।

[f]) बस.। नञ उत्तरं क्षुध्-+यत् (पा ५, १, ६७) यद्र.। अन्तोदात्तः (पा ६, २, १७२)। उप. गृहिविशेषणं समासश्च गृहविशेषणमित्यभिसन्धिः। तस. उप. गृहविशेषणं सद् गृहिविशेषणतयोपचरितमिति दवीयांसमिव मार्गं संकेतयन् सा चिन्त्यः। तदुक्तदिशा 'ययतोश्च' (पा ६, २, १५६) इत्यन्तोदात्तेऽविशेषः। यदपि उप. य-प्रत्ययान्ततया तेन प्रत्यपादि, तदप्यलक्षणं स्यात्। यत्-प्रत्ययौत्सर्ग्यदर्शनात्। अत्राऽर्वाञ्चः (तु. MW.) उपचारसंकेतमकुर्वाणा एव तस. इति यद् भणेयुस्तन् नितरामपुष्टमिति दिक्।

[g]) तस. नञ्-स्वरः (पा ६,२,२)। उप. शत्रन्तं यद्र.।

[h]) तस.। औत्सर्गिको नञ्-स्वरः (पा ६, २, २)।

[i]) तस.। उप. यद्र.।

[j]) 'कृत्योक-' (पा ६, २, १६०) इति नञ उत्तरस्य उक-प्रत्ययान्तस्यान्तोदात्ताऽनुशिष्टेरपवाद उसं.। नञ्-स्वरः सामान्यः द्र. (पा ६,२,२)।

g) तस.नञ्-स्वरः (पा६,२,२)।उप. अव√पृच्+क्तः।

h) बस. अन्तोदात्तः (पा ६,२, १७२)। उप. <अव √ब्रू यद्र.। (तु.या ६,२९; सा.ऋ १०,८४,५। वैतु. सा. शौ ४,३१,५ यत्र अनवब्रव- इतीव तस. इत्युक्तं भवति)।

i) सस्व. नापूटिदि. द्र.। नाउ. पूप. भवति। अत्र अव√भृ> अव-भ्र- इति भावे क-प्रत्यये उप. द्र.। यत्तु वि. इति कृत्वाऽस्य उप. भावे निष्पत्तिमपरे नेव समर्थयेयुः (तु. सा. GW. प्रभृ. च) तच्चोद्यं स्यात्। भ्र-भावनिष्पत्तौ हि तस. नञ्स्वरः स्यान्न तु बस. अन्तोदात्त इति यावत्। यदपि सा. (ऋ २, ३४,४) अव-भ्र- <√भ्रंश्+डः प्र.(पा ३,२,४८ इत्यत्र उसं.) इत्याह, तन्न। गुणविशेषेऽसति गौरवमात्रत्वात्।

j) तस. उप. अव√रुध्+(क्त्वा→)ल्यप्।

k) बस. अन्तोदात्तः (पा ६,२, १७२)। उप. √अव्+असच् प्र. (पाउ ३,११७) इति वा (तु. सा. NW. च); अव√सा(<सो)+कः प्र. इति वा (तु. GW.MW.)।

l) तस. नञ्-स्वरः (पा ६, २, २)। उप. अव√ह्वृ+अच् प्र. (पा ३, १, १३४)।

m) सस्व. नापूटिदि. द्र.। उप. अव√१अन्+णमुल् प्र.। यत्तु मै. पपा. 'अनवा-अनम्' इत्येव निरदेशि, तच् शोधनीयम्। पूप.नञ्-उत्तरमेकस्य उपसर्गस्य 'अव'इत्यस्यैवाभ्युपगमाद् द्वितीयस्य उपसर्गस्याऽऽङोऽनभ्युपगमाच्चाऽथ उप. णिति प्र. परे वृद्धेरनिवार्यत्वादिति। ननु पूप.

१०, २; काठ २६, ८; ९; ३६, ४; क ४१, ६; ७.

†**अन(न्-अ)वायु**[a]- -यम् ऋ ७, १०४, २; काठ २३, ११; शौ ८, ४, २; पै १६, ९, २.

¶**अन(न्-अ)वार्**[b]- -रम् तै ७, ५, ३, २; काठ ३३, ५.

¶**अन(न्-अ)वेत**[c]- -तः, -तौ तै २, ६, ३, ५.

¶**अन(न्-अ)वेष्ट**[c]- -ष्टम् मै १, १०, ११; १३; काठ ३६, ७.

?**अनव्याधात्**[d] पै ७, १५, १.

अन(न्-अ)शन- अशन°, साशन°

अन(न्-अ)शनि[e]- -नि तै २, ४, ७, १.

¶**अन(न्-अ)शित**[c]- -तम् तै १, ६, ७, ४.

†**अन(न्-अ)श्नत्**[c]- -श्नन् ऋ १, १६४, २०; शौ ९, १४, २०; पै १६, ६७, १०.

अ-नश्यत्[f]- -श्यतः काठ ३८, १२.

अन(न्-अ)श्रु[b]- -श्रवः ऋ १०, १८, ७; शौ १२, २, ३१†; १८, ३, ५७; -श्रू मा ४, ३३; का ४, १०, ४; तै १, २, ८, २[g]; काठ २, ७[b].

†**अन(न्-अ)श्व**[b]- -श्वः ऋ [१, १५२, ५; ४, ३६, १]; ६, ६६, ७; -श्वम् ऋ १, ११२, १२; १२०, १०; -श्वासः ऋ ५, ३१, ५; तै १, ६, १२, ६; मै ४, १२, २; काठ ८, १६.

अन(न्-अ)श्वदा[c]- -दाम् ऋ ५, ५४, ५.

अ-न(ष्ट->)ष्टा[c]- -ष्टाः मै ४, १, १.

†**अनष्ट-पशु**[i]- -शुः ऋ १०, १७, ३; शौ १८, २, ५४.

अनष्ट-वेदस्[i]- -दसम् ऋ ६, ५४, ८.

अनस्[j]- -नः ऋ २, १५, ६; ४, ३०, ११; १०, ५९, १०; ७३, ६; ८५, १०; १२; ८६, १८; १३८, ५; तै ५, २, २, ३¶; ¶मै १, ८, ९; ४, ८, २; ३; ¶काठ १९, १२[२]; २४, ६; २६, २; २८, ४; ५; ¶क ३१, २[२]; ३७, ७; ४०, ५; ४४, ४; ५; †शौ १४, १, १०; १२; २०, १२६, १८; पै १५, ११, ३[k]; -नःसु काठ २, ७; -नसः ऋ ४, ३०, १०; ८, ९१, ७; १०, १०२, ६; शौ १२, १, ४७; १४, १, ४१†; पै ४, २६, ७†; -नसा ऋ ३, ३३, ९; १०; ¶तै ५, २, २, ३; ६, १, ९, ३[२]; ¶मै ३, ७, ८[l]; ¶काठ १९, १२; २४, ६[२]; ¶क ३१, २; ३७, ७[२]; -¶नसि तै ५, ४, १०, २; -¶नसे

एक एवोपसर्गो न द्वावित्यत्र विनिगमकं ब्रूहीति । उच्यते, तु. शब्रा १, ३, ५, १४ यत्र 'अवान्यात्' इति पदं श्रूयते अन्यथा 'गतिर्गतौ' (पा ८, १, ७०) इति सतोर्हि द्वयोरुपसर्गयोः पूर्वस्य निघाते 'अवान्यात्' इत्यनेन भाव्यमित्यभिसन्धेः । ननु भोः कथम् 'अवानिति' (शब्रा ४, ३, २, ६) इति समाधित्सेरिति । यद्-योगीये तत्र तिङ्निघाताऽभावे धातुस्वरस्य सामञ्जस्यादिति ।

a) सस्व. नाउटि. द्र. । उप. अव√इ+भावे अच् प्र. (पा ३, ३, ५६) । प्रयोगतः क्रिवि. द्र. ।

b) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

c) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

d) तु. पै २, ८५, ३. यत्र समानेऽपि मन्त्रे 'अनव्यधात्' इत्यस्य प्रामादिकस्य मूको. स्थाने 'एनं व्य् अधात्' इति प्रामादिकशोधमुखः मुपा. भवति । उभयत्र मन्त्रस्य तृतीये पादे प्रमादतः 'पातु' इति पदस्य भिन्नक्रमत्वं संभाव्य 'पातु पश्चाद् अनुव्याधाद्' इति शोधः पर्येष्टव्यः ।

e) त्रिपूटि. सस्व. द्र. । प्रयोगतः क्रिवि. द्र. ।

f) तस. नञ्-स्वरः । उप. <√२नश् यद्र. । तैआ ६, ५, २ इत्यत्र 'अनुः-स्रतः' इत्यस्यान्यस्य च पाभे. कृते यतु. वैप२ टि. ।

g) अनःश्रुत्- इत्यस्य वा अनःश्रित्- इत्यस्य वा मूलतः प्राति. सतः यनि. प्राति. विकारमात्रमितीवाभिप्रयन् भा. विमृश्यः ।

h) मूको. एकदेशमुपाश्रितः 'अनश्च' इतीव मुपा. ।

i) बस. पूपप्रस्व. (पा ६, २, १) । उप. यद्र. ।

j) √२अन्+कर्तर्य् असुन् प्र. (पाउ ४, १८९) । नित्त्वादाद्युदात्तः (पा ६, १, १९७) । अथवा मूलतः अन्-अर्- इति तस. नञ्-स्वरः (तत्र च उप. √१ऋ+कर्तरि विच् प्र.) । एवं चास्य स्वतोऽगतिमति (=भाररूपेऽन्येनोह्ये) पदार्थमात्रे सामान्यायाः प्राथमिक्या वृत्त्याः सत्या वहने भारो यदधिकरणत्वेनोह्यते तस्मिन् शकटे वैशिष्ट्यं समजनीति सुवचम् (तु. WW १, १३२) । मूलतो रेफान्तत्वेऽस्य प्राति. अनर्-विश्- इत्यत्रत्यं पूप. विनिगमकं द्र. (एवम् अनड्-वाह्- इत्यत्र पूप. अनर्-> *अनल्->अनड् इति प्राकृतायितं सुलभम्) । अथापि वा *अ + नश्-(>ष्>ड्, श्, र्) इत्येषा मौलिकी स्थितिः स्यात् । एस्थि. अस्मिन् कल्पे नापू. कल्पाद् उप. प्रकृत्यंशमात्रे भेदः द्र. । तथाहि तत्र उप. <√१ऋ इह च उप. <√१नश् इति सुवेचम् । उभयत्र विनिगमिका सामग्री तु समानेति दिक् ।

k) 'मनः' इति मुपा. चिन्त्यः (तु. अधिसर्पिस्- इत्यत्रत्यं टि.) ।

l) 'मनसा' इति मुपा. चिन्त्यः (तु. क. पृ २०१. संटि. ७) ।

तै ६, २, ६, १; -¶नांसि तै ३, १, ३, १; ६, ३, २, ३; [°नस्-अर्चन°]

*अनस्(>ड्,ळ्)√१वह्[a]

अनडु(ड्-उ)ह्<>धुं[b]- -डुत्सु ऋ ३, ५३, १८; -डुद्भिः मै २,७, १२; पै २, २२, ४; -डुद्भ्यः शौ ६,५९,१;-¶डुहः तै २,२,९,४; मै १,६,४;८; २, १,७; ३,६,१; काठ ६, ३; १०, १²; २२,१३; क ४,२; $शौ ४, ११, ३; ८; ९; ११; $पै ३, २५,५; ७; ९; १०; -¶डुहा तै ६, १, १०, २; मै ३, ७, ७; काठ २४,२; क ३७, ३; पै १२, ३, ९$°; -डुहि शौ ४, ११,७.

आनडुह[d]- -हे मै ३, ७,४.

अनड्-वाँह्[e]- -ड्वान् मा १४, १०; १८, २७; २१, १८; २२,२२; २९,५९; का १५, ३, ४; १९,८,४; २३, २,७; २४, ८, २; ३१,७,१; तै ¶१,५, २, ४; ¶२, २, २,१; १०, ५²; ६, २, ३; ४; ४, ३, ५, १; ७,१०, २; ५, ५, २४,१; ¶६, १, १०, २; २, १, १; ७, ५, १८, १; ¶मै १, ६, ४²; ७, २; ८, ९; २, १,१०; ५,४;६, १²$; २;८, २$; ११,६$; ३, ७,४;९;११, ११$; १२, ६$; ४,३, १²; ४, ८; ८, ६; काठ ६, ३; ८, ८; १५; १३, ६; १५, १²; १७, २; १८, १२; २४, ८; २९, ४; ३८, १०; ४५, १४; ४८, ३; ¶क ४,२; ८,३; २६,१$;२९, १$; ३८, १; ४५, ५; शौ ४, ११, १⁴; २; ४; १०; ५, १७, १८; ८, ५, ११; ९, १, २२; ११, ६, १३; ७, १८; १२, ३, ४९; १९, ३९, ४; पै ३, २५, १⁴; २; ३; ८; ११; १२; ५, १, ५; १५, ५; ६, ५, ५; ७, १०, ४; ८, १२, ११; ९, १६, १;१६,२२,३; २८,१;१५४,८.

अनड्-वाह्[f]- -ड्वाहः मा २४,८; १३;का २६, २,३; ३, ३; तै ५,६,१८,१; मै ३,१३,९; १८; काठ ४९, ८; शौ १९,५०, २; पै २, २२, ३; ८, १८,२; ९, १०, ११; १४, ४, १२; -ड्वाहम् ऋ १०, ५९, १०; खि ५, ५, ४; मा २८, ३०;३५, १३; का ३०, ३, ७; ३५, ४, १२; तै १, ८, १८, १¶; ¶मै १, ६, ४²; २, १, ६; काठ ११, ५¶; क ७,२¶; शौ ९, ५,२९; १२, २, ४८; पै ५, ३१, ६; -ड्वाही ऋ १०, ८५, १०; तै ५, ६, २१, १²; मै ४, ४, ९¶; काठ ५०, १²¶; शौ ३, ११, ५; ७, ५५, ५; १४, १, १०†; पै १, ६१, ३;८, ११, ३.

¶अनड्-वा(ह्>)ही[g]- -ही

---

a) एकार्थवृत्तीनां सतामपि प्रत्ययभेदतः किञ्चिन्मात्रविरूपान्तानां नाउउ.कृतां व्यु.औपयिकोऽयं धातुर् द्र.।पूप. स्>ड् इत्यन्तद्विवरणार्थं तु. माप्रा.३,४५, वस्तुतः ड्>द् द्विपूटि. च। यत्तु नाउ. कृति उप. वुह्- इत्याकारकमिच्छेयुः केचित् (तु.GW. प्रभृ.) तदयुक्तम्। क्विब्-भिन्नप्रत्ययान्तरे निष्पन्नस्य सतोऽसर्वनामस्थानेऽजादिप्रत्यये परतः संप्रसारणं स्यादित्यस्य द्राघीयसः पथोऽपेक्षया क्विपि निष्पत्त्यैव निर्वाहलघीयस्त्वदर्शनाद् उपधावृद्ध्यभावे सति संप्रसारणवद्रूपाभावाऽननुपपत्त्यदर्शनाच्चेति दिक्। यदपि तदेव उप. वाह्- इत्येवंमात्रम् PW. इच्छति। तदप्ययुक्तमेव। तथा सति 'वाह ऊठ्' (पा ६,४,१३२) इत्यस्य प्रसङ्गाद् ह्य् अनडुहः प्रभृ.उदुपधत्वम् अनड्वाही-इत्यत्र संप्रसारणेतरोपधत्वं च नोपपद्येत। एस्थि. यनि. तत्तत्प्रत्ययपरत्वं नाउउ. कृत्सु यथाकार्यं साध्ववधेयमिति दिक्।

b) उस. क्विब् उसं. तदन्तकृद्-उपप्रख. क्त्वात् संप्रसारणं च (यक्र. पा ३, २, ६१; ६, २, १३९; १, १५)। भ-संज्ञायां परिणतहकारान्तता चरितार्था भवति। ततोऽन्यत्र (=पदान्ते) मौलिकवर्गतृतीयान्तता सुप्रतिष्ठिता द्र. (तु. टि. √१वह्; वैतु. पा ८, २, ७२ यदनु ह्>द् इत्याकारको वर्णपरिणामो भवति)। यथेह उप. वह्- इति वा वाह्- इति वा पराभिमतं सदपि नैव युक्तं भवति, तथा नापूटि. गतार्थं द्र.।

c) '-डुहान्' इति मूको. '-हाम्' इति ष३ मूलतः सतोऽपभ्रंशः स्यात्। मुपा. तु नितरामपलक्षणत्वादुपेक्ष्यः।

d) तस्येदमित्यर्थे अञ् प्र. ञित्-स्वरश्च (पा ४, ३, १२३; ६, १, १९७)।

e) उप. ण्विः प्र. (पा ३,२,६४)। सस्व. एपूदि. द्र.। मौलिकोपधाभूतोऽकारः सानुनासिकः सन्नपि वृद्धिविषयः द्र. (वैतु. पा ७, १, ९८; ८२ यदनु सौ परे एपू. प्राति. आम् च नुम् चेष्येते)।

f) नापू. उपधायाः निरनुनासिकत्वमात्रत्वे विशेषः (वैतु. पा ७, १, ९८ येन द्विपू. प्राति. आम् भवति न तु भिन्नं प्राति. क्रियते)।

g) उस. कर्मण्य् अण् प्र. ततः स्त्रियां ङीष्य् उदात्तनिवृत्तिस्वरः (पा ३, २, १; ४, १, १५; ६, १, १६१)। व्यु. यतु. अनोवाहु- (वैतु. पाप्र. गौरादिषु पाठाद् ङीषन्तता च अनडुह्- इत्यत्र आम् च [पाग ४,१,४१; पावा ७, १, ९८])।

मै २,६,३; ४,३,४; काठ १३, ६;१५,२; –हीम् काठ १३,६.

?अन(न्-अ)र्विश्[a]– -र्विशे ऋ १, १२१, ७.

अनस्-वत्[b]– -स्वन्तः ऋ १, १२६, ५; –स्वन्ता ऋ ५, २७, १.

अनस्वती[c]– -ती शौ १०, १, १५.

¶अनस्विन्[d]– -स्वी तै ५, २, २, ३; काठ १९,१२; क ३१, २.

अनस्विनी– -नी पै १६, ३६, ५.

अ(नस्>)नो-वाह[e]– -हौ तै ५,६, २१, १; काठ ५०, १.

¶अ(नस्>)नो-वाह्य[f]– -ह्यम् तै ६, १, ९, ४; मै ३, ७, ८; काठ २४, ६; क ३७, ७.

?अनसृ(तैं>)ता[g]– -ताम् पै ८,१६,५.

अन(न्-अ)स्थ[h]– -स्थः ऋ ८, १, ३४; –स्थाः शौ ४, ३४, २; पै ६, २२, २.

¶अनस्थक[i]– -कम् मै ३, ३, ५; काठ २१, ५; क ३१, २०; –कात् मै ३, ७,५; काठ २४,५; क ३७,६; –काय काठ ४५,३$

†अन(न्-अ)स्थन्[j]– -स्था ऋ १, १६४, ४; शौ ९,१४,४; पै १६, ६६, ४.

अन(न्-अ)स्थि[k]-

अनस्थिक[l]– -काय तै ७, ५, १२, २; –केन तै ६, १, ७, १[2]¶.

¶अन(न्-अ)स्थिचित्[m]– -चित् मै ३, ५, १.

अ-नह्यमान– -नस्य पै १६, १२०,१.

अना इदम्- द्र.

अना(न्-आ)कृत[n]– -तः ऋ १,१४१,७.

---

a) सांशयिकः पद-विभागः। अनस्- +विश्- इत्येवं कास. इति PW. प्रभृ. केचित्। सा. अपि विकल्पेन व्यु. एतामनुमनुते। तथा सति 'गतिकारक-' (पा ६, २, १३९) इति स्वरेण भवितव्यं पूपप्रस्व. च न भवितव्य-मिति चोद्यम्। अतः अन्+आर्विश्- इति यत् सा. पक्षान्तरं भावयति तत् स्वरतः साधीयः (=तस. नञ्-स्वरः)। उप. अपि कास. भवत्य् उपप्रस्व.। तत्र च पूप. √१ऋ+भावकर्मणोर् विच् प्र.इति संकेतितमात्रं द्र. (तु. अनस्- टि.)। अथवा बस.पूपप्रस्व.। तत्र च 'अनो विड् विश्यत इति कृत्वा निवासो यस्य'इति वा (तु.GW.) 'अनोयुक्ता विशो यस्य' इति वा (इह मध्यमपदलोपः) 'अनांसि च विशश्च यस्य' इति वा विग्रहः। अनस्> अनर् इत्यत्र तु. उषर्बुध्- (उषस्>उषर्)।

b) मतुपो वत्वे भत्वम् (पा १, ४, १९)। प्रत्ययस्य च पित्त्वान्निघाते स्वरे विशेषाऽभावः।

c) स्त्रियां ङीपः (पा ४,१,६) पित्त्वान्निघाते स्वरस्त-दवस्थः।

d) मत्वर्थे विनिः प्रत्ययस्तत्स्वरश्च (पा ५,२,१२१)।

e) कर्मण्युपपदे √१वह्+अण् प्र.। कृद्-उपप्रस्व. (पा ६, २, १३९)।

f) उस. 'गति-' (पा ६, २,१३९) इत्युक्त उपप्रस्व.। उप. <√१वह्+ण्यत् तित्-स्वरश्च (पा ६,१,१८५)।

g) अनु√सृप्+क्तः प्र. स्त्रियां टाबन्त इह शिश्रावयिषित इति पूर्वोत्तरसापेक्षालोचनवताम् अतिरोहितमिव भवेत्। अत इह अनुसृप्ताम् इति शोधितः पा. द्र.। अनुपदं श्रूयमाणस्याक्षरस्य शोधार्थं यस्था. तु. टि. ?२अहन्-, ?पूषन्-, ?पापी(यैं->)या-, ?शमिष्ठ(तैं>)ती-।

h) बस. 'नञ्दुःसुभ्यः' (पा ५, ४, १२१) इत्यत्र अस्थि- इत्यस्य उसं. द्र.। तेन विकल्पेन समासान्तोऽच् चित्स्वरेणाऽन्तोदात्तः। स्याद्वा पक्षान्तरं (तु. नाउ. टि.)।

i) उक्तसमासान्तादपि कप् उसं. (पा ५, ४, १५४)। कपि च परे 'ह्रस्वान्ते' (पा ६, २, १७४) इति स्वरः। ननु समासान्तात् समासान्तो मा भूदित्य् एउ. अनस्थन्- इत्यस्मादनुक्तसमासान्तात् कपि ह्रस्वान्तीय उक्तः स्वरः स्यादिति। नेति। कथमिति। 'नलोपः' (पा ८, २, २) इति स्वरविधौ नलोपस्याऽसिद्धत्ववचनाद् ह्रस्वान्तत्वाऽभावादिति दिक्। (तु. अचर्मक-, अच्छ-न्दुस्क- प्रभृ.)। इह च नापू. च मूलतः अस्थि- इत्यतो विवेच्यस्य *अस्थ-(यद्र.) प्राति. उपाश्रयेण वा सर्वं चतुरस्रं स्यादिति दिक्।

j) पाप्र. उप. (अस्थि->अस्थन्) इत्यत्र अनङ् समासान्तः उसं. (पा ७,१,७५) तत्स्वरेण चान्तोदात्तः। मूलतः अस्थन्- इति अस्थि- इत्यतः पृथक् प्राति. (यद्र.) इति कल्पे तावद् अन्तोदात्तः (पा ६, २, १७२) इत्युक्त इति विवेकः सुलभः।

k) समासान्तप्रत्ययाऽभावे विकल्पः (तु. द्विपूटि.)। अन्तोदात्तः (पा ६, २, १७२)।

l) समासान्तः कप् (पा ५, ४, १५४)। यत् कपि परे ह्रस्वान्तीयः स्वरः (पा ६, २, १७४) न भवति कपिपूर्वीयः (पा ६, २, १७३) एव च स्वरो भवति, तत्र शाखाविशेषनिघ्नविशेषत्वेन समाधानमनुसंधीयेता-ऽन्यथा वेति विमृश्यम्।

m) तस. नञ्-स्वरः (पा ६, २, २)। उप. उस. कर्म-ण्युपपदे √१चि+क्विप् प्र. कृद्-उपप्रस्व. च (पा ६,२, १३९)।

n) सस्व. नापूटिदि. द्र.। उप.आ√कृ+कर्मणि क्तः प्र.।

अना(न्-आ-अ)क्ताक्ष[a]- -क्षः खि ५, १३, १; शौ २०, १२८, ६[b].

¶अना(न्-आ)क्रम[c]- -माय मै ४, १, १४.

†अना(न्-आ)ग,गा[d]- -गाः ऋ ७, ८७, ७; ९७, २; १०, ३६, १२; मा ३३, १७; का ३२, १, १७; तै ४, ७, १५, ७‡[e]; -गान् ऋ ३, ५४, १९; ४, १२, ४; १०, १२, ८; मै ३, १६, ५; काठ २, १५; शौ १८, १, ३६; -गाम् ऋ ८, १०१, १५.

¶अना(न्-आ)गत[f]- -तम् तै २, ५, ५, १; -ताय तै ६, २, १, १.

अना(न्-आ)गमिष्यत्[f]- -ष्यतः शौ १६, ६, १०.

१अना(न्-आ)गस्[g]- -गसः ऋ १, २४, १५; १२३, ३; २, २३, ७; ४, ५४, ३; ५, ८२, ६; ७, ६२, २; ८, [४७, १८; १०, १६४, ५]; ६७, ७; १०, ३५, ३; ३६, ९; ३७, ७; ६३, ४; खि ४, ५, ३; मा ४, १२; १२, १२†; का ४, ५, ४; १३, १, १३†; †तै १, ५, ११, ४; ४, १, ११, २; २, १, ४; मै १, २, ३; १८†; ४, १०, ३†; १४, १७[2];†; †काठ ३, ८; १६, ८; ४०, ११; क २, १५†; कौ ३, १, ४†; जै २, ५, १२†; शौ ७, ७, १; ३५, १; ८८, ३†; ९, ५, २; १६, ६, १†; १८, ४, ६९; पै २, ३९, २; १४, ४, १७; १६, ३५, ७; -गसम् ऋ [(१, १६२, २२) ४, ३९, ३]; १०, ६३, १०; मा २१, ६†; ७; का २३, १, ६†; ७; तै १, ५, ११, ५†; मै ४, १०, १†; काठ २, ३; ७, १६†; शौ १९, ४४, ३; पै २, ३, १; १५, ३, ३; १६, ३६, ८; -†गाः ऋ ५, ८३, २; ७, ६०, १; ६६, ४; ८६, ७; मा ३३, २०; का ३२, २, ३; मै ४, १२, ४; कौ २, ७०१; जै ३, ४६, ७.

†अनागास्-त्व[h]- -त्वम् ऋ १, ९४, १५; [१६२, २२; (४, ३९, ३)]; १०, ३५, ३; मा २५, ४५; तै ४, ६, ९, ४; काठ ४६, ५; पै १२, १, १५; -त्वे ऋ १, १०४, ६; ६, ५०, २; ७, ५१, १; तै २, १, ११, ६; मै ४, १४, १४; -त्वेन ऋ १०, ३७, ९.

अना(गस्>)गो-हत्या[i]- -त्या शौ १०, १, २९; पै १६, ३७, १०.

२अना(न्-आ)गस्[j]- -गसः शौ १०, १, ७; १९, ५०, ७; -गसम् शौ २, १०, १–८; १०, १, १८; -†गाः ऋ १०, १६५, २; शौ ६, २७, २.

---

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. बस. द्र.। तत्रापि पूप. <आ√अञ्ज्, उप. च २अक्ष- यद्र.।

[b]) अत्र -क्ता- इति पाण्डु. स्वर-संकेतो दुरूहः द्र.।

[c]) तस. नञ्-स्वरः (पा ६, २, २)। उप. <आ √क्रम् यद्र.।

[d]) सस. एउटिदि. द्र.। उप. *आग- (<आ√हन् [<घन्>] गन्+कर्तरि डः प्र.) इति वा (=[√अङ्घ्+कर्तर्य् अच् प्र.] >अङ्घ- >*आघ-) इति वा प्राकृतिकवर्णपरिणामभाग् द्र.। व्यु. २आगस्- इत्यस्मात् प्रत्ययमात्रे भिन्नम्। यत्त्वेतद् =१आगस्- इति कृत्वाऽपरे (तु. GW. प्रभृ.) बस. इह भवतीति प्रतिपन्नास्तच्चिन्त्यम्। बस. सत्यन्तोदात्त आपद्येतेति दिक्। भूयानपि विस्तर इह नाउउ. वैश. च द्र.।

[e]) 'अनागान्' इति ऋ (४, १२, ४) पाभे.।

[f]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[g]) समास-स्वरौ नापू. द्र.। उप. २*आगस्- इत्य् असुना प्र. निष्पन्नम्। यदपीहाऽन्ये PW प्रभृ. १आगस- इत्येतद् उप. इति कृत्वा बस. इत्याहुस्तद् द्विपूटिदि. चिन्त्यम्।

[h]) भावे त्वः प्र. (पा ५, १, ११९)। प्रत्यय-स्वरः। प्र१ रू. व्यवहारप्राचुर्यात् प्राति. तत्सरूपतायामिव प्रतिभातायां तत एव भावे प्र. उत्पत्तिर्जातेति सुतर्कं सच् छान्दसमिति वा प्राकृतिकमिति वोपवर्ण्यताम्।

[i]) षतस. सासस्व. (पा ६, १, २२३)। उप.< √हन् यद्र.।

[j]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप.१आगस्- इत्यत्र असुन् प्र.। यत्त्विह तस. इति MW. आह, तन्न। तथात्वे नञ्-स्वरापत्तेरिति यावत्। यदपि GW. इह आ√गा>आगा- इति कर्त्रर्थे निष्पन्नं प्राति.उप.भवतीति च नञ्पूर्वत्वे च तस. भवतीति चाह तदुभयमसत्। '-गसः' '-गसम्' इत्येतयो रू. व्याख्यानार्थमस्य यनि. प्राति. अवश्यमभ्युपेयेत्वादभ्युपेते चास्मिन् '-गाः' इत्यस्य रू. अप्येतदीयत्वेन सुवचत्वे सिद्धे पराभिप्रेतस्य प्राति. अन्यथासिद्धायितमात्रत्वाच्च, यतरे कतरेऽपि च प्राति. अभ्युपगते सति गपूदि. स्वरतस् तस. अनुपपन्नत्वाच्चेति (तु. NW.)। एवं तावद् अस्य प्राति. अर्थतः गपू. अतिसूक्ष्ममिवाऽन्तरं भवति। (गपू.=आगसोऽकर्तृ- इत्य् एतच्च =आगसा रहित- इति)। अस्य चातिसूक्ष्मस्याऽर्थान्तरत्वस्य स्वरभेद एव लक्षणं भवतीति किमु वक्तव्यम्। एस्थि. अपि गपू. एव निगमसुभिन्नं भवत्यस्य तु प्राति.

¶अना(न्-आ)ग्नेय[a]- -यम् मै १, ७, ३[२]; ४[२]; काठ ९, १[२]; २[३]; १८, १९; क ८, ४[२]; ५[३]; २९, ७.

¶अना(न्-आ)च्छिन्नस्तुक[b]- -कस्य मै ३, ८, ५.

¶अना(न्-आ)च्छृणण[c]- -ण्णम् तै ५,१, ७, ४; कठ १९, ७; क ३०, ५.

अना(न्-आ)जानत्[d]- -नन् शौ ६, ११९, ३; पै १६, ५०, ७.

¶अना(न्-आ)ज्ञात[d]- -तम् तै २, १, ६, ५[२].

¶अनाज्ञात-यक्ष्म[e]- -क्ष्मः काठ १३, ६.

¶अनाज्ञातयक्ष्म-गृहीत- -तः काठ १३, ६[२].

अना(न्-आ)तत[d]- -तम् खि ५, १५, १७; शौ २०, १३२, ७; -ताय मा १६,१४; का १७,१,१४; तै ४,५,१,४; मै २,९, २; काठ १७,११; क २७, १; पै १४, २,१२.

१अना(न्-आ)तुर,रा[f]- -†रम् ऋ १, ११४, १; ८, ४७, १०; १०, ९७, २०; मा १२, ९५; १६, ४८; का १३, ६, २२; १७, ८, २; मै २,९, ९; काठ १७, १६; क २७, ६; पै १५, १५, २; -रस्य पै १, ९७, ३; -राः ऋ १०, ९४, ११; -०रे पै ४, २२, ६; -रेण पै २, ६१, १.

२अना(न्-आ)तुर[g]- -रम्[h] तै ४, २, ६, ५; ५, १०, २; -रान् शौ १२, २, ४९.

१अना(न्-आ)त्मन्[d]- -त्मने तै ७, ५, १२, २.

२अना(न्-आ)त्मन्[i]-

अनात्मक[j]- -काय काठ ४५, ३.

†अ-नाथ[e]- -थम् ऋ १०, १०, ११; शौ १८, १, १२.

अना(न्-आ)दि(ष्ट>)ष्टा[d]- -ष्टाम् शौ १५, ६, १६.

¶अना(न्-आ)दृत्य[d] तै २, ५, ३, ५; ५, ३.

अना(न्-१आ)धृ,घ्रा[k]- -ध्यम् तै ५,७, ९, २¶; शौ ८, २, १९; पै १६, ४, ९; -ध्या शौ ५, १८, ३; पै ९, १७, १०; -ध्याम् शौ ५. १८, १; पै ९, १७, १.

अना(न्-आ)धृष्[l]- -धृषः शौ ६, २१, ३.

अना(न्-आ)धृष्ट,ष्टा[d]- -०ष्ट मै १, ४, ९; -ष्टः ऋ७,१५,१४; तै ४,४, ८, १; काठ ३९, ११; -ष्टम् ऋ ८,२२,१८; खि ४, १, १; मा १, ३१; ५, ५; ९[३]; १४, ९; का १, १०, ४; ५, २, २; ३, २[३]; १५, ३, २; तै १, २, १०, २; १२, १[२]; ४, ३, ५, १; ४, १२, २; ६, २, २, ३[२]; मै १, १, ११; २, ७; ८[३]; ४,४; ३, १६,४; ४, १४, १७; काठ १, १०; २, ८; ९[२]; ५, ६; ७, १४; २२, १४; ३२, ६; क १, १०; २, २; ३[२]; ६, ४; पै २, ३०,५; -ष्टा मा ७, १२; १७; ३७, १२; का ७, ६, २; ७, ३; ३७, २, २; मै १, ३, १२; ४,९, ३; काठ ४, ४; २७, ८; क ३, ३; -ष्टाः मा १०,४;७; का ११, २, ४; ४, ३; तै १, ८, १२, १; मै २, ६,८[२]; ४,४,२¶; काठ १५, ६[३]; पै १, ३८, ३; १६, १५१, ५; -ष्टानि ऋ १०, १३८,४; खि ५,५,२; -†ष्टाभिः ऋ ४, ३२, ५; ८, १०२, १५; कौ २, ९२२; जै ४,६,७; -ष्टाय तै १, ५, १०, १; -†ष्टासः ऋ १, १९, ४; पै ६, १७, ५.

अनाधृष्ट-रथ[e]- -थाः खि ५,५,९.

अना(न्-आ)धृष्य पै १३, १०, १०.

अना(न्-आ)धृष्य,ष्या[k]- -ष्यः मा२७, ७; का २९,१,७; तै ४,१,७,३; मै १,९,१;५¶;२,२,१२¶;१२, ५;४,१४,१३; काठ ९, ९;१२;

ऋ. दशममण्डलमात्रे च शौ. च यस्य. विरलमेव श्रवणं भवतीति विविचामनुसंधानाय कल्पताम् ।

a) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र. । यत्तु नानाग्नेयम्(=न । अना°)इत्यत्र मुपा.'नानाऽग्नि->नानाग्नेयम्' (तु. BW., SBW.) इतीव वा 'नाना । आग्नेयम्' (तु. SIM) इतीव वा पदकृत्यं प्रास्तावि, तदसत् (तु. तैब्रा १, ३, १, २; ६) ।

b) सस्व. नापू. द्र. । उप. बस. द्र. ।

c) सस्व. एपू. द्र.। उप. √छृद् + कर्मणि क्तः प्र. ।

d) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

e) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र. ।

f) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

g) शाखाभेदात् तस. नञ्-स्वरः (पा ६, २, २) । 'रम्' इति वा. क्रिवि. द्र. ।

h) 'अनातुरम्' इति ऋ (१, ११४, १) पाभे. ।

i) सस्व. द्विपूटिदि. द्र. । अयं संकेतः नापू. विवेकार्थो नाउ. स्वरसिद्धावौपयिकश्च द्र. ।

j) समासान्तः कप् प्र. (पा ५, ४,१५४) । स्वरविधौ नलोपाऽसिद्धेः (पा ८, २, २) ह्रस्वान्तीयस्वराप्रवृत्तौ कपिपूर्वीयः स्वरः (पा ६, २,१७३ उ.) तु. अनस्थक-, अनस्थिक- इत्यत्र टि. ।

k) तस.उप.कृत्यान्तत्वाद् नञ्-स्वरं बाधित्वा'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तः ।

l) तस.नञ्-स्वरः(पा६,२,२)। उप.आ√धृष्+क्विप् प्र.।

१८,१६; क८,१२¶; २९,४; शौ ७,८४,१; पै ३, ३३,७; –ष्यम् ऋ ४,१८, १०; मा ५, ५; का ५,२,२; तै १,२,१०,२; ६,२,२,३[२]; मै १,२,७; ८[३]; २,८,२; ४,४,१¶; काठ २,८; ९[२]; ७,१४; १७,२; क २,२; ३[२]; ६,४; २६,१; पै १५,१,५; –†ष्या ऋ १०,४४,५; शौ २०,९४,५; –†ष्याः ऋ १०,१०३,१३; १५४,२; मा १७,४६; का १८,४,१४; तै ४,६,४,४; मै ४,४,१; कौ २,१२१२; शौ १८,२,१६; पै १,५६,१; –ष्याय मा ३८,७; का ३८,२,१; मै ४,९,८; –ष्यौ कौ २,१२१९.

†अना(न्-आ)नत[a]– -०त ऋ ६,४५,९; –तः ऋ ८,६४,७; ९०,४; कौ १,१४२; जै १,१५,८; –तम् ऋ [७,६,४; १०,७४,५]; –तस्य ऋ ८,६८,४; कौ १,३६४; जै १,३८,३; –ताः ऋ १,८७,१.

¶अँना(न्-आ)नीत[b]– -ताः काठ ८,११[२]; क ७,८[२].

अना(न्-आ)नुजा[c]– -जाम् तै ४,३,११,३[d]; काठ ३९,१०.

†अना(न्-आँ)नुद्[e]– -दः ऋ १,५३,८; २,२१,४; २३,११; शौ २०,२१,८; –दम् ऋ १०,३८,५.

†अनानुदिष्ट(?<ष्ट)[f]– -ष्ट(?<ष्ट): ऋ १०,१६०,४; शौ २०,९६,४.

अना(न्-आँ)नुभूति[g]– -तीः ऋ ६,४७,१७.

अना(न्-आ)पि[h]– -पिः ऋ [(१,१०२,८) ८,२१,१३; (१०,१३३,

a) तस. नञ्-स्वरः (६, २, २)। उप. आ √नम्+क्तः।

b) सस्व. नापू. द्र.। उप. आ√नी+क्तः।

c) सस्व. एपू. द्र.। उप. <अनु-जा- (<२अनु √जन्) यद्र.।

d) सा. पुं. यजमानपरतयाऽन्वयमिच्छति। तथा सति प्राकरणिकानामनेकेषां पदानामर्थानामपार्थं क्लिष्टकल्पनमिव द्र.) तु.सस्थ.टि.२अनु√जन्>अनु-जा->-जाम्, √वद्>वदत्->-न्ती-)।

e) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. आ √नुद्+(इगुपधलक्षणः) कः प्र. (पा ३,१,१३५)। पपा. तु अननु-द्- इत्याकारको भवति। ततः अनु-द्- (<२अनु √१दा) इत्य् उप. भवतीति कृत्वाऽन्यैरेतत् प्राति. व्याख्यायि (वैतु. सा.ऋ १,५३,८ यत्र तेन उप. <आनु (<अनु)√२दा(<दो) इत्यास्थायि)। यदत्र यनि. उप. भवति तत्र ऋ १०,३८,५ इत्यत्र स्व-वृज्- इत्यत्रत्यस्य स्वेति विशेषणस्य च रध्र-चोदन- इत्यत्रत्यस्य नोदनपर्यायभूतक्रियार्थवचनस्य च साहचर्यं ज्ञापकं भवेद् यथा स्तूयमान इन्द्र आनुदाऽन्तररहितः स्वत एव दुष्टदमने च दानाभिमुखतया धनवत्-प्रेरणे च प्रवृत्तो भवतीति यावत्। अन्यच्च। यदपि GW. MW. चेह तस. इतीव पश्यन्तौ व्याचक्रतुस्तदपि भ्रान्तमिव भवति। तथा सति नञ्-स्वरः स्यान्नान्तोदात्त इति। एस्थि. यत् पपा. अनुसारिभिः प्राक्तनैरभियुक्तैर् उप. सांहितिको दीर्घ इवाऽऽस्थायि तत् सारतो विमृश्यम्।

f) आतिशायनिक इष्ठन् प्र.। नित्स्वरः (पा ६,१,१९७) (तु. चोदिष्ठ- प्रमृ.)। यमु. प्राति. ष्ठ>ष्ट इत्यतिप्राचीनो विकारः संभाव्येत। अत्र 'अननु-दिष्ट-' इति पपा. तदनु २अनु√दिशेः क्तान्तं कृतसांहितिकदीर्घप्रथमाऽच्कम् उप. इत्येवं च (तु. नापूटि.) प्रागभ्यर्हितानां व्याख्यानं द्र.। एस्थि. अपि नापूदि. सर्वेषु वीर्योपलक्षितेषु कर्मसु परप्रेरणां प्रत्यसहिष्णुरिन्द्रो ब्रह्मद्विड्घननेऽतितमामिव तथा भवतीति प्राकरणिकस्वारस्यसंवादनसहचरीवोक्तपूर्वाऽऽतिशायनिकी संभावनाऽनुसंधीयतां विविग्भिः।

g) तस. नञ्-स्वरः (पा ६,२,२)। उप. (आ[=आप्त-] *अनु-भूतिम् इति कृत्वा) *आऽनुभूति- इति प्रास.(तु.पावा २,२,१८)। यद्वा (आ[=आप्ता] अनु-भूतिरासामिति कृत्वा) *आऽनुभूति- इति बस. (तु. पावा २,२,२४)। उभयथाप्य् अननुभूतपूर्वाः शरदः इत्यर्थतोऽभिसंबन्धः समानः। यावता पूर्वीरनुभूतपूर्वाः शरदोऽवधून्वान इन्द्रोऽननुभूतपूर्वा अपि तास्तत्तरीति, अतः स पूर्वाणि सख्यानि परिवृज्याऽपराण्यभ्येतीति यत् पूर्वार्धे श्रुत्यभिप्रेतं भवति तत् सत्यमिति निदर्शनालङ्कारः (तु.नाउ. अप्य् अपरस्यै व्यु.)। अत्र अननु-भूति- इति पपा. तदनुवर्तिनी चोभयी प्रागर्वाचामभिप्रवृत्तिर् द्र.। तद् यथा। बस. (=अनुभूतिरहिताः [प्रजाः]) इति सा.। उक्तः बस. वा तस. वेति विकल्पिनोऽर्वाञ्चश्च (GW. MW. NW.)। उभयत्र २अनु°>आनु° इति दीर्घापत्तेश्च सांहितिकं निपातनं द्र.। यथा चैकमन्यतरतोऽपि साध्वन्वयाभावो भवतीत्यत्र भूयः वैश. अनुसंधेयम्।

h) बस. भवति नञ्-पूर्व इति प्रागर्वागभ्यर्हिता आहुः। तत् कथं नान्तोदात्तः (पा ६,२,१७२) इति चोद्यम्। तत् साध्यं कथमिति। तस. भवतु न बस. इति। तेन तावत् सौवरी चातुरक्षी कामं निष्पद्यताम् (पा ६,२,२) न

२)]; १०, ३९, ६; कौ १, ३९९; २, ७३९; जै १, ४५,१; शौ २०, ११४, १.

अना(न्-आ)त,ता[a]– -तः ऋ १, १००,२; तै ७,१,१०,३¶; काठ ८, ७¶; क ७, ४¶; –¶तम् तै २,५,११,४; ५, १, ९, १[2]; ६, १,२,७[2]; मै १, ४, ११; ५, ७[2]; ११, ९; २, २, १२; ५, २; काठ १०,८; –¶तस्य तै ७, १,५,६; –ता काठ ३८, १४; –ताः शौ ४,७, ७; ५, ६, २; पै ६, ११, २; –ताम् तै ७, ४, ५, ३¶; –तेन मै ४, २, ११.

अना(न्-आ)व्यु[b]– -व्यम् ऋ७,६६,११.

अ॑ना(न्-आ)वयु[c]– -॰यो शौ ६,१६,१.

†अ॑ना(न्-आ)भयिन्[d]– -॰यिन् ऋ ८, २, १; कौ १, १२४; २,८४; जै १, १३, १०; ३, ८, १०.

अ॑ना(न्-आ)भव[e]– -॰व काठ ६, ७; क ४, ६.

¶अ-नाभि– -भिम् काठ २०, ७; क ३१, ९.

अ॑ना(न्-आ)भु[a]– -॰भो मै १, ८, ५.

अना(न्-आ)भू[a]– -भुवः ऋ १, ५१,९.

अ-नामग[f]– -गः शौ १९, ४५, २.

अनामन्[g]– -नात् शौ १२, ४, ५; ८.

१अ॑ना(न्-आ)मय[a]– -[?h]यः पै १६, ५, ७.

२अना(न्-आ)मय[i]– -या खि ५, १५, ५[?j]; शौ २०, १२९, २०; –याः शौ ९, १३, १३–१८; पै १६, ७५, ३–८.

अना(न्-आ)मयत्[k]– -यत् मा १८, ६; का १९, ४, २; तै ४, ७, ३, २; मै २, ११, ३; काठ १८, ९; क २८, ९; पै १०, १२, १.

†अना(न्-आ)मयित्नु[l]– -त्नुभ्याम् ऋ १०, १३७, ७; शौ ४, १३, ७; पै ५, १८, ८.

†अ-नामिन्[m]– -मि ऋ ३, ६२, ५; ६, ८, ६; तै १, ५, ११, २; मै ४, ११, १; काठ ४, १६.

अना(न्-आ)मृण[n]– -णः ऋ १,३३,१.

¶अना(न्-आ)मृत[o]– -तम् तै ५, २, ३,१; काठ ७,१२[2];२०,१;२२, ६[2]; क ६, २[2]; ३१, ३; ३४, १[2]; –ते तै ५, २, ३, २; काठ २०, १; क ३१, ३.

अना(न्-आ)यत[p]– -तः ऋ [४, १३, ५; १४,५.]

त्वाऽऽर्थीति (आपि-रहिते वृत्तेर्नाऽऽपि-भिन्न इत्यभिसन्धेः)। उच्यते। इह उप. बस. भवत्विति। सोऽपि कल्पना-मूलत्वाद् विकल्पितविग्रहः द्र.। तद् यथा। नञ उत्तरस्य (सहु>)*साऽऽपि- इति मूलतः सतो नैरुक्तिकः सकारलोपो नकारोपजनश्च स्यातामिति प्रथमः कल्पः (तु. अगोपा-)। 'आ(ऽऽशाः) आपुयोऽनेनाऽनया वा' इति माध्यमिकधातु-जलोपे सत्य् आ॑ऽऽपि- इत्य् उप. इति द्वितीयः कल्पः (पावा २,२,२४)। 'अन्-(आशाः) आपुयोऽनेनाऽनया वा' इति नञ्मात्रातिरिक्तस्य धातुजांऽशस्य पूप. लोपे सति बस. पूपप्रस्व. इति कृत्वा नञ्मात्रस्य पूप. स्वरः प्रकृत्येति च तृतीयः कल्प इति दिक् (चरमश्चायं प्रकारः नापू. अपि द्र.)।

a) तस. नञ्-स्वरः (पा ६, २,२)। उप. यद्र.।

b) तस. नञ्-स्वरं बाधित्वा 'कृत्य-' (पा ६,२,१६०) इत्यन्तोदात्तः। उप. यद्र.।

c) आवयुः सन्नेव तदुप्रत्वशमनायेव नञ्-पूर्वत्वेन श्राव्येत। उप. आवयु- यद्र.। सस्व. एपूटि. द्र.।

d) तस. नञ्-स्वरः। उप. आ√भी + कर्तर्य् इनिः प्र. (तु. पा ३, २, १५७) इति वा अ॑-भय-(प्रास.) + मत्वर्थे इनिः प्र. (पा ५,२,११५) इति वा।

e) सस्व. नापूटि.द्र.। उप. आ-भव॑-(आ√भू+अच् प्र.)। एस्थि. माध्यमिकरेफोपजनः मुपा. चिन्त्यः।

f) सस्व. नापूटि. द्र.। उप. १*नाम-ग- (नाम्ना गच्छति नाम-मुदित्वर्थः) इति तत्त्वतः पर्येष्टव्यम्।

कथमिति। मूको. पा. बहुविकृतत्वेनोपलम्भात् (तु. पाण्डु.)। यत्तु सा. अ-नामक- इति बस. अत्र पठित्वेव व्याचष्टे, तदसत्। तथा सति कपिपूर्वीयःस्वरःस्यात् (पा६,२,१७३)। 'माम् अगतस्य' इति पै. (तु. W.) यच्छ्रूयते तेनापि सुगमो निर्वाह इति (कल्पनान्तरकृते तु. W. WR. च)।

g) पपा. अवग्रहो न भवति। व्यु. ?। १अ+(भावार्थे) आ-मन- (<आ√मन्) इति बस. अन्तोदात्तः (पा ६, २, १७२) इतीव W. द्र.। १अ+आमन- (<√२अम् >आमि+भावे ल्युट्) इतीव च LUD. द्र.।

h) अयं मुपा.'अनामयत्' इति मूको.स्थाने संस्कारमान्याद् धृतः।'-यम्'इत्य् असं.द्वि१ सत् क्रिवि.इत्येव सुपठम्।

i) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

j) 'अनामया' इति मुपा. स्वरश्चिन्त्यः।

k) तस. नञ्-स्वरः (पा ६, २, २)। उप. √२अम् >आमि + शतृ-प्र.।

l) तस. उप. <√२अम् >आमि + इत्नुच्-प्रत्यये णेर् अय्-आदेशे (तु.पाउ ३,२९; पा ६,४,५५) नञ्-स्वरापवादः 'कृत्योक-' (पा ६,२,१६०) इत्यन्तोदात्तः उसं.।

m) सस्व. एपू. द्र.। उप.√नम्+ताच्छीलिकः णिनिः।

n) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. आ √मृण् + कः (पा ३, १, १३५)।

o) तस. नञ्-स्वरः। उप. आ√मृ+क्तः प्र.।

p) उप. आ√१यम्+क्तः प्र.। शेषं नापू. द्र.।

¶अना(न्-आ)यतन,ना[a]— -नः मै ३, ४, १०; ४, ७, ६; काठ १०, ३; २६, ३; २८, ३; ३०, ७; ३४, ९; ३५, १८; क ४१, १; ४४, ३; ४८, १६; $शौ ११, ३, ४९; $पै १६, ५८, ४; ५; -नम् मै ३, ४, १०; ४, ७, ६; काठ २१, ८; २६, ३; क ४१, १; -नाः तै ३, १, ९, २; ३; ७, १, ५, ४; मै ३, ८, १; १०, ५²; काठ २४, १०; २९, १²; क ३८, ३; ४५, २²; -नानि काठ १२, ५; -ने मै १, ६, ११; ३, १, ४; ४, ४; ७, ७; ४, ५, २; ८, ५; काठ ३५, १८; क ४८, १६.

अना(न्-आ)युध[a]— -धासः ऋ ४, ५, १४; ८, ९६, ९.

¶अना(न्-आ)रब्ध[b]— -ब्धः तै ६, ४, २, १.

¶अना(न्-आ)रभ्य[b] तै १, ६, ८, १; काठ ३२, ७; ३६, ११.

अना(न्-आ)रम्भण[a]— -¶णः तै २, ६, ५, ६; -णम् काठ २१, ८¶; -1णे ऋ १, ११६, ५; [१८२, ६; ७, १०४, ३]; खि १, २, १; शौ ८, ४, ३; पै १६, ९, ३.

अना(न्-आ)रुद्ध— -द्धः पै १६, ७२, ६.

¶अना(न्-आ)र्त,र्ता[b]— -र्तः तै ३, ४, ३, ६; काठ १२, १०; -र्तम् पै ९, २२, २४; -र्ताः तै ७, ५, १, ३; -र्ताम् काठ ३५, १९; क ४८, १७; -र्तेन मै २, ४, १.

¶अना(न्-आ)र्त्ति[b]— -र्त्यै तै २, ६, ९, ३; ८; ३, १, ७, १; २, ४, २²; ५; ७, ४, २, ४.

¶अना(न्-आ)र्त्विजीन[c]— -नः काठ १३, ४.

अना(न्-आर्य→)र्या— -र्या पै २, ३१, २.

अना(न्-आ)र्षेय[b]— -याणाम् शौ ११, १, ३३; पै १६, ९२, ३; -याय मै ४, ८, ३¶.

१अना(न्-आ)ल(<र)ब्ध[d]-

¶अनालब्धा(ब्ध-अ)यता[e]— -ता काठ २४, ३[f]; क ३७, ४.

२¶अना(न्-आ)लब्ध[g]— -ब्धम् तै ६, ३, ५, २.

¶अना(न्-आ)लभ्य[h] मै १, ४, १०; ४, १, ४²; ५, ६; काठ ३१, ३; क ४२, ६; ४७, ३.

अना(न्-आ)लम्बु(क→)का[i]— -का काठ ३५, १८; क ४८, १६.

¶अना(न्-आ)लेश[a]— -शे तै ५, १, ५, ५.

अना(न्-आ)वयस्[j]— -याः शौ ७, ६५, ३.

†अना(न्-आ)वि(द्ध→)द्धा[b]— -द्धया ऋ ६, ७५, १; मा २९, ३८; का ३१, २, २; तै ४, ६, ६, १; मै ३, १६, ३; काठ ४६, १; पै १५, १०, १.

अना(न्-आ)व्या(ध→)धा[k]— -धाम् शौ १४, १, ६४.

अना(न्-आ)वृत्[b]— -वृत् ऋ १०, ९५, १४.

अना(न्-आ)वृ(त>)ता[b]— -ताम् शौ १५, ६, १९.

१¶अना(न्-आ)व्रस्क[l]— -स्काय तै ३, १, ५, १; ६, १, १०, ३; ३, ८, ३.

२अना(न्-आ)व्रस्क[m]— -स्कः शौ १२, ४, ४७.

†अना(न्-आ)शस्त[a]— -स्ताः ऋ [१, २९, १; २, ४१, १६]; शौ २०, ७४, १.

*अना(न्-आ)शिंस्[a]-

a) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र.।

b) तस. नञ्-स्वरः (पा ६,२,२)। उप. यद्र.।

c) तस. उप. ऋत्विज्- +तादर्हिकः खञ् प्र. (पा ५, १, ७१)।

d) अर्थपार्थक्यनिदानोऽयं नाउ. पृथङ् निर्देशः द्र.। तच्चाऽर्थपार्थक्यं किञ्चिदानमित्येतद् १आ√लभ् इत्यत्राऽनुसंधीयताम्।

e) कस. पूप. च उप. चोभे तस. नञ्-पूर्वौ भवतः (=अना[र→]लब्धा चासाव् अयता चेति तु. तै ६, १, ७, ५ यत्रात्रत्यस्य पूप. स्थाने 'अबद्धा' इत्येतद् 'अयता' इत्येतच् च पृथक् द्वे पदे भवतः)।

f) मूको. 'अनालब्धा' इति पूप. भवति। ततः 'अनाऽऽलब्धा' इत्यस्य मूलतः बस. सतः संकेतोऽपि सुग्रहः तथा सत्यपि यनि. कस. अव्यभिचरितः।

g) तस. नञ्-स्वरः (पा ६, २, २)। उप. <२आ √लभ् यद्र.।

h) नापूटि.सस्व.द्र.। उप.१आ√लभ्+क्त्वा>ल्यप्।

i) उप. <१आ√(र>)ल(म्भ्>)म्ब् यद्र.। शेषम् अनपरोधुक- इत्रत्ये टि. द्र.।

j) सस्व. द्विपूटि. द्र.। उप. आ-वयस्- यद्र.। यत्तु WI. आकारान्तं प्राति. निरदेशि तदप्रमाणम्।

k) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. आ √व्यध्+भावे घञ् प्र.।

l) तस. नञ्-स्वरः (पा ६, २,२)। उप. आ√व्रश्च्+भावे घञ् प्र. कुत्वम् (पा ७,३,५२)।

m) सस्व. एपूटि. द्र.। उप. नापूटि. द्र.।

¶अना(न्-आ)शीर्क[a]- -र्केण तै १, ६, १०, ४.
अना(न्-आ)शीर्दा[b]- -र्दाम् ऋ १०, २७, १.
†अना(न्-आ)शु[c]- -शवः ऋ १, १३५, ९; ८, १, १४; शौ २०, ११६, २; -शुः खि ५, १३, ६; शौ २०, १२८, १०$; -शुना ऋ ६, ४५, २; -शोः ऋ १०, ३९, ३.
¶अना(न्-आ)शुमवत्[b]- -वन्ति काठ २३, ३[३].
¶अना(न्-आ)श्वस्[d]- -श्वान् तै १, ६, ७, ३; ४[२].
अ-नाष्ट्र- -ष्ट्रः पै १०, २, ५; -ष्ट्रम् पै ५, २८, २.
अना(न्-आ)स्[e]- -नासः ऋ ५, २९, १०.
अ-नासिक[f]- -काय तै ७, ५, १२, १; काठ ४५, ३.
¶अना(न्-आ)स्क(न्→)न्ना- -न्ना काठ १२, १३.
?अनास्त[g] पै ७, ८, ९.
अना(न्-आ)स्थान[f]- -ने ऋ १, ११६, ५.
अना(न्-आ)स्माक[h]- -कः शौ १९, ५७,५; -कम् शौ १९, ५७,४.
?अनास्य[i]- -०स्यौ क २, १.
अना(न्-आ)स्राव[f]- -वम् शौ २, ३, २; पै १, ८, २.
अना(न्-आ)हत[b]- -तः पै २, ३१, ४.
अनाहत-शी(र्षन्)र्ष्णी[j]- -र्ष्णी तै ३, २, ५, १.
¶अना(न्-आ)हित[b]- -तः मै १,६,४.
¶अनाहिता(त-अ)ग्नि[k]- -ग्निः काठ ६, ७; ८, ११; क ४, ६; ७,८; -ग्नेः काठ ९, १५.
अना(न्-आ)हुत[b]- -तम् पै ६, १४, १.
¶अना(न्-आ)हुति[b]- -तिः तै ५, ४, ३, २; -तिम् ऋ १०, ३७, ४; ६३, १२.
¶अ-निखात,ता[b]- -तः काठ ३७, १६; -ता मै ३, ८, ९.
अनितभा[l]- -भा ऋ ५, ५३, ९.
¶अ-निधाय[m] मै १, ६, ६.
†अनि(न्-इ)ध्म, ध्मा[f]- -ध्मः ऋ २, ३५, ४; १०, ३०, ४; तै २, ५, १२, २; शौ १४, १, ३७; -ध्माम्? मै ४, १२, ४‡[n].
अनि(न्-इ)न[o]- -नस्य ऋ १, १५०, २.

---

a) बस. समासान्तः कप् (पा ५, ४, १५४)। 'कपि पूर्वम्' (पा ६, २, १७३) इत्युक्तः स्वरः। अयस्मयादित्वञ्च द्रस.। तेन पदत्वाद्रुत्वं भत्वाद्विसर्जनीयाभावश्च (पावा १, ४, २०)। यत्तु भा. 'नम्सुभ्याम्' (पा ६, २, १७२) इत्यन्तोदात्तत्वमाह तद् भ्रान्तमिव स्यात्।

b) तस. नञ्-स्वरः (पा ६,२,२)। उप. यद्र.।

c) चार्वादित्वम् द्रस. तेन तस. नञ्-स्वरापवादोऽन्तोदात्तो भवति (पा ६, २, १६०)। उप. यद्र.।

d) तस. नञ्-स्वरः। उप. √२अश्+क्वसुः प्रत्ययः (पा ३, २, १०९)।

e) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. नास्- इति GRI.। आस्- (<>आस्य-) इत्यन्ये। 'मृध्रवाचः' इत्यनुपदश्रूयमाणविशेषणान्तरापेक्षयोत्तरो बहुसंमतः कल्प एव साधीयानिति मतं भवति।

f) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र.।

g) असंस्कृत एव मुपा. भवति नितरां दुष्पठः। अना(न्-आ)स->-सम् ('यज्ञम्') इति शोधः संबन्धश्च द्र.।

h) तस. नञ्-स्वरे प्राप्ते चार्वादित्वञ् द्रस. अन्तोदात्तः (पा ६,२,२;१६०)। उप. (अस्मद्>) अस्माक-+अण् (पा ४, ३, २)। यद्वा अस्माक- (यद्र.) इत्यतः प्राति. भावेऽपि प्र. उप. निष्पन्ने सति बस. अन्तोदात्तः (पा ६, २, १७२) इत्येवं सुवचतरं द्र.।

i) वास्तविकः पाभे. वा अनश्रु- इत्यत्र गपू. (यद्र.) प्रामादिकविकारमात्रं वेति विमृश्यताम् (तु. संटि.)। प्रथमे कल्पे अ-नास्य- इत्येवं पदविभागः स्याद् अन्-आस्य- इत्येवं वेत्यपरो गवेषणार्हो विषयः।

j) बस. पूपप्रस्व. (पा ६,२,१)। उप. शीर्षन्-+ङीप् प्र.उपधालोपश्च (पा ४, १,२८; ६,४,१३४)।

k) बस. पूपप्रस्व. (पा ६, २, १)। अन्-आहिताग्नि- इत्येवं तस. नञ्-स्वरे (पा ६, २,२) स्वरतः समाने संभवत्यपि यदसौ नोररीकृतस् तत्र नञः क्रियार्थरूपगुणप्रतिषेधे वर्तमानाया मुख्याया वृत्तेः क्रियावतः पदावयवस्याऽऽहितेत्यस्य समासान्तरोपसर्जनीभावे सति बाधो मा भूदित्येतद् बीजं द्र.। अर्थनित्यत्वेन परीक्ष्यत्वाल् लक्ष्यलक्षणानामित्यभिसन्धेः।

l) वैसं. इतीवाऽनवग्रहः पपा. भवति। तस. नञ्-स्वरः (पा ६, २, २)। उप. *इत-भा- (बस.) इति पदविभाग-कल्पना व्यु. निमित्तमात्रतया गृह्येत।

m) तस. नञ्स्वरः। उप. नि√धा+क्त्वा>ल्यप्।

n) '-ध्मः' इत्यस्य स्थानेऽपपाठः स्यात् (तु. नापू. ऋ. ऋ [२,३५,४] स्थलम्)। अस्मे इति पपा. (तु. संटि.) यः पाभे. भवति सोऽपि दुष्पठः द्र.।

o) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

अ-निन्द्या[a]– -न्द्याः शौ ११,१०,२२; पै १६, ८७, २.

अ-निन्द्य[b]– -न्द्यः ऋ ९, ८२, ४; –०न्द्या ऋ १, १८०, ७.

अनि(न्-इ)न्द्र, न्द्रा[c]– -न्द्रम् ऋ ७, १८, १६; –न्द्राः ऋ १, १३३, १; ५, २, ३; १०, ४८, ७; –न्द्रान् ऋ १०, २७, ६; –न्द्राम् ऋ ४, २३, ७.

अनि(न्-इ)न्द्रियं[d]– -याः पै १६,७६,९.

†१अ-निपद्यमान[a]– -नम् ऋ [१, १६४,३१; १०, १७७, ३]; मा ३७,१७; का ३७,३,४; मै ४, ९, ६; पै १६, ६८, १०.

२?अ-निपद्यमान[e]– -‡नम् शौ ९, १५, ११.

अ-निबद्ध[a]– -द्धः ऋ [४, १३, ५; १४, ५].

अ-निबाध[f]– -धः ऋ ३, १,११;[५, ४२, १७; ४३, १३].

अ-निभृष्ट,ष्टा[g]– -ष्टः ऋ १०, ११६, ६; शौ १९, ६०, २; –ष्टम् मा १०,६; का ११, ४,२; तै १, ८, १२,१; मै २, ६,८;४,४,२[2];¶; काठ १५, ६; –ष्टाः तै १, ८, १२, १.

अनिभृष्ट-तविषि[h]– -षिः ऋ २, २५, ४; ५, ७, ७.

अनिभृष्ट-तेजस्– -जाः काठ १८, १६; क २९, ४.

†अ-निमान[i]– -नः ऋ १, २७, ११; ६, २२, ७; कौ २, १०१४; जै ४, ९, ५; शौ २०, ३६, ७.

अ-निमिष्[a]– -मिषा[j] ऋ ३, ५९, १; ७, ६०, ७; तै ३, ४, ११, ५[k]; काठ २३, १२; ३५, १९; क ४८, १७.

१अ-निमिष[l]– -षम्[m] ऋ ५, १९, २; ७, ६१, ३.

†२अ-निमिष[c]– -षः ऋ १०,१०३, १; मा १७, ३३; का १८,४, १; तै ४, ६, ४, १; मै २, १०, ४; काठ १८,५; क २८, ५; कौ २, ११९९; शौ १९, १३, २; पै ७, ४, २; –षम्[n] ऋ १, २४, ६; –षाः ऋ २, २७, ९; –षेण ऋ १०, १०३, २; मा १७,३४; का १८, ४, २; तै ४, ६, ४, १; मै २, १०, ४; काठ १८,५; क २८, ५; कौ २, १२००; शौ १९, १३, ३; पै ७, ४, ३.

अ-निमिषत्[a]– -षद्भिः ऋ [१, १४३, ८; (६, ८, ७)]; –षन्तः ऋ १०, ६३, ४.

†अ-निमेष[a]– -षम्[n] ऋ १,३१,१२; १६४, २१; मा ३४, १३; का ३३, १, ७; शौ ९, ९, २२; पै १६, ६७, १२.

१अनि(न्-इ)र[o]– -रेण ऋ ४, ५, १४.

२अनि(न्-इ)रा[p]– -राः ऋ ८, ४८, ११; मा ११, ४७; का १२, ४, ११; मै २, ७, ५; काठ १६, ४; –०म् ऋ ७, ७१, २; ८, ६०, २०; १०, ३७, ४; खि ५, २१, ३; मा १२, १०५; का १३, ७,

---

a) तस. नञ्-स्वरः (पा ६,२, २) । उप. यद्र. ।

b) तस. उप. ण्यदन्ते कृति 'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तः ।

c) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र. ।

d) बस. । निरिन्द्रिय- इति पाभे. (शौ ९,२, १०)। स चापि समानार्ऽर्थः बस. यद्र. ।

e) नापू. स्थाने स्वरतोऽपपाठो वा स्यात् पाभे. वा (तु. ऋ १, १६४, ११)। उत्तरे कल्पे <आ नि√पद् इतीयं मौलिकी स्थितिः स्यात्। ततः प्रथमाजह्रस्व-त्वनिर्देशः प्राकृतिको वा स्याद्वास्तविकः प्रामादिको वा स्याद् मूको. एव विद्यमानः । उभयथाऽप्य् उपप्रस्व. गतिद्वयात्मकं पूप. उपकल्पयेदित्यव्यभिचरितं द्र. । एवं तावद् वस्तुतोऽर्थभेदवती श्रुतिद्वयीति संभाव्येत विस्तरतः वैश. चानुसंधीयेत ।

f) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. नि √बाध्+भावे घञ् प्र. ।

g) तस. नञ्-स्वरः । उप. नि√भ्रस्ज्+क्तः यद्र. ।

h) बस. पूपप्रस्व. (पा ६,२,१)। तुटि. अनाहिताग्नि-यत्रत्यया दि. तस. नेह लब्धादरः । उप. यद्र. ।

i) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. नि √१मा+ल्युट् प्र. ।

j) तृ१ सत् प्रयोगतः क्रिवि. द्र.। एतद् <१अ-निमिष- (=नाउ) इति PW. विमृश्यः (तु. NW.; वैतु. GW. MW.) ।

k) उप. कर्तरि कः प्र. इति तृ१=द्वि३ इति च कृत्वा देव- पर्यायत्वेन यद् भा. विकल्पेन व्याचष्टे तत् क्लिष्टक-ल्पनाऽव्यभिचरितं द्र. ।

l) तस. नञ्-स्वरः । उप. नि√मिष्+भावे कः प्र. ।

m) एतद् रू. <नापू. इति प्रतिपन्नौ GW. MW. च चिन्त्यौ द्र. । प्रयोगत एतत् क्रिवि. भवतीत्यभ्युप-गमसामान्ये सति नापू. न. द्वि१ अनिमिड् इत्याकारकं स्यान्न यनि. इत्यनुपपत्तिदर्शनादिति दिक् ।

n) द्वि१ सत् प्रयोगतः क्रिवि. द्र. ।

o) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. <इरा- यद्र. ।

p) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

४; तै ४, २, ७, २; मै २, ७, १४; काठ १६, १४; क २५, ५; शौ २०, १३५, १३.

अ-निरा(र्-आ)हित[a]— -तः शौ १२, २, ३५; ३६.

¶अ-निरुक्त,क्ता[b]— -क्तः तै ७, ४, २, ३; मै १, १०, ५; ११, ९[२]; ३, ६, ५; काठ १२, ९; १४, १०[२]; २०, ५; २४, ८; २६, १; २८, १०; ३३, ४; ३५, २०; क ३१, ७; ३८, १; ४०, ४; ४५, १; ४८, १८; —क्तम् तै ६, २, ७, ३; मै ३, २, ५; ४, ६; ८, ९; ४, ८, ६; काठ ६, ५; ९, १५[२]; १६; २९, ४; ३२, १[२]; क ४, ४; ४५, ५; —क्तया मै ३, ६, ५; ४, ८, ६; —क्ता काठ १२, ९; —क्ताः मै ३, ४, ६; ८, १०[२]; काठ १४, १०[२]; —क्तानि काठ २१, २[२]; क ३१, १७[२]; —क्ताम् तै २, ५, ७, ३; काठ ३६, १३.

?अ-निरुक्तसामन्[c]— -मा काठ १४, १०.

¶अ-निर्ऋतिगृहीत[d]— -तम् मै ४, ३, १.

¶अ-निर्घात[b]— -ताय तै ३, १, ८, ३; २, ४, २; मै ४, ४, ४.

¶अ-निर्दाह[e]— -हाय तै २, ३, ६, २; ७, ४; मै २, ३, ७; ३, ३, ३; ४, १, ९; काठ १२, ५; ३१, ७; क ३०, २; ३; ३१, ७; १८.

अ-निर्दाहुक[f]— -कः मै १, ४, ८; काठ ३२, ४.

¶अ-निर्दिष्टभाग[g]— -गः तै २, २, ४, ६.

¶अ-निर्मार्ग[h]— -र्गाय मै १, ८, ५; २, ३, १[२]; ४, ३, ६[२]; ४, १; काठ १२, ५; ८; १३; २४, १०; क ३७, ७[i]; ३८, ३.

¶अ-निर्याच्य[b] तै ५, २, ३, १; मै ३, १, ३; २, ३; काठ २०, १; ३०, ९; क ३१, ३.

¶अ-निर्वाह[j]— -हाय मै ४, ८, ५.

¶अ-निर्वीर्य[k]— -र्यः काठ २८, ८.

१अनिल- २अनिल- √१अन् द्र.

अ-निविशमा(न→)ना[b]— -नाः ऋ ७, ४९, १.

†अ-निवेश(न→)ना[l]— -नानाम् ऋ १, ३२, १०; पै १३, ६, १०.

अ॑-निवीर्य[m]— -र्यः काठ २७, ९.

अ-निवृत[b]— -तः ऋ ३, २९, ६.

अ-निशित,ता[n]— -तः मा १, २९; का १, १०, १; काठ ३१, १४; —तम् ऋ २, ३८, ८; ९, ९६, २[o]; तै ४, ७, १५, ४[p]; —ता मा १, २९; का १, १०, १; —ताः मै ४, १, १२[२]; काठ १, १०; ३१, ९[२]; क १, १०; ४७, ९[२]; ¶.

†अनिशित-स(र्ग→)र्गा[q]— -र्गाः ऋ १०, ८९, ४; कौ १, ३३९; जै १, ३५, ८.

अ-निःशस्त[r]— -स्ताः ऋ ४, ३४, ११[s].

---

a) नाउटि. सस्व. द्र.। उप. <निर्-आ√धा यद्र.।

b) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

c) यनि. तस. नञ्-स्वरः (पा ६, २, २)। वस्तुतस्तु सुपा. चिन्त्यो भवति। निरुक्त-सामन्-(यद्र.)इत्यस्याऽनञः प्राति. एव प्राकरणिकत्वात् (तु. मै १, ११, ९)।

d) सस्व. एपूटि. द्र.। उप. निर्ऋति-गृहीत- इति तृतस. द्र.।

e) उप. <निर् √दह् यद्र.। शेषम् द्विपूटि. द्र.।

f) तस. कृत्योकीयस्वराभाव-कृते अ-क्षोधुक- टि. द्र.।

g) तस. नञ्-स्वरः (पा ६, २, २)। उप. निर्दिष्ट-भाग- इति बस. यद्र.।

h) सस्व. नापूटि. द्र.। उप. निर् √मृज्+भावे घञ् प्र.।

i) काठ. समानप्रकरणे अनुद्दाह- इति श्रूयमाणं यद्र. (तु. संटि.)।

j) उप. निर् √वह्+घञ् प्र.। शेषं द्विपूटि. द्र.।

k) सस्व. एउटि. द्र.। अनिवीर्य- इति प्रमाद-भ्रंशितमध्यरेफः पाभे. यद्र.। उप. बस.।

l) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. नि √विश्+अधिकरणे ल्युट् प्र.।

m) तस. नञ्-स्वरः। उप. *नि-वीर्य- बस. (प्रावा २, २, २४)। यद्वा =निर्वीर्य- (गपूटि. द्र.)।

n) सस्व. नापूटि. द्र.। उप. १निशित- (<√निश्) यद्र. (तु. शब्रा १, ३, १, ६; ४, १, २, २५ यत्र यक्र. अनुपरत- इति चराचर- इति चैतत्पर्यायभावतो निर्दिश्येते; अर्वाञ्चश्च [GW.MW.NW.प्रमृ.])। एस्थि. सर्वत्र पपा. अनि-शित- इत्येवं निरदेशीतीव कृत्वा सा. प्रमृ. भाष्यकारैर् उप. =२नि-शित- (<नि √शा<शो) इत्यवधार्य तत्र तत्र व्याख्यानप्रौढिं प्रदर्शयद्भिस्तत्प्रयोजितान्वय-पीडनादौ व्यर्थमादरः प्रादर्शि (भूयानप्यत्र विस्तरः √निश् इत्यत्र द्र.)।

o) क्रिवि. सद् न. द्वि१ द्र.।

p) यतु. ?अ-निषित-> -तम् तत्रत्यं टि. च।

q) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

r) तस. नञ्-स्वरः (पा ६, २, २)। उप. निर् (<>स्) √शंस्+क्तः प्र.।

s) इह श्रूयमाणं रू. प्र३ (तु. 'सजोषसः सूरयः' ऋ ४, ३४, ६ प्रमृ.)। एस्थि. एतद् रू. सं३ इति यद् GW. आह तन्निःसारं द्र.।

अ-निषङ्ग[a]- -ङ्गाय ऋ १, ३१, १३.
अनि(न्-इ)ष(व्य→)व्या[b]- -व्याः ऋ १०, १०८, ६.
?अ-निषिञ्चनः[c] पै १५, १५, ९.
?अ॒-निषित[d]- -तम् मै ३, १६, ५; काठ २२, १५.
अ॒-निष्कृत[e]- -तः पै ३, ३३, ४[f]; –।तम् ऋ ८, ९९, ८; ९, ३९, २; कौ २, २४९; जै ३, २१, १४.
अ-निष्कृति- -स्या पै ३, १७, ३.
¶अ॒नि(न्-२इ)ष्ट,ष्टा[e]- -ष्टः काठ ३५, १७; क ४८, १५; –ष्टम् तै ६, ६, ६, २; –ष्टाः तै २, ६, १, ५; –ष्टेभ्यः काठ ५, ४; ३२, ४; –ष्टेषु काठ ३५, १८; क ४८, १६.
¶अनि(न्-इ)ष्टक[g]- -के तै ५, ४, १०, ३^{2}; मै ३, ४, ५; काठ २२, २.
अ-निष्कर्य॒[h]- -कर्यम् काठ २४, ५; क ३७, ६.
अ॒-निष्टृत[i]- -तः ऋ ८, ३३, ९; मा २७, ४; का २९, १, ४; ७; तै ४, १, ७, २; ३; मै २, १२, ५^{2}; काठ १८, १६^{2}; क २९, ४^{2}; कौ २, १०४८†; शौ ७, ८२, ३; †२०, ५३, ३[j]; ५७, १३; पै ३, ३३, ७.
¶अ॒-निष्ट्य[k]- -ष्ट्यः काठ ७, १३^{3}; क ६, २^{2}.
¶अ॒नि(न-२इ)ष्ट्वा[e] काठ १२, ७^{2}; ३५, १७; क ४८, १५.
अ॒-निहत्य[l] शौ १२, ३, ४४.
अ॒नीक[m]- -कः पै ४, २४, ७; –।कम् ऋ १, ११३, १९; ११५, १; १२१, ४; १२४, ११; १६८, ९; २, ३५, ११; ३, ३०, १३; ४, ५, ९; १५; ११, १; १२, २; ५, २, १; ४८, ४; ७६, १; ६, ४७, २८; ५१, १; ७, १, ८; ९; ८८, २; ८, ९६, ९; १०, २, ६; ७, ३; ४३, ४; ४८, ३; ६९, १; मा ७, ४२; ८, २४$; १३, ४६; २९, ५४; का ८, १७, १; ९, २, २; ४, २$; १४, ४, ९; तै १, ४, ४३, १; ४५, १$; २, ३, ८, २; ४, १४, ४; ४, ३, १३, १; ६, ६, ६; ६, २, ३, १¶; मै १, ३, ३७; ३९¶; २, १, १०¶; ३, १६, ३†; ४, १४, ४; काठ ४, ९; १३; २२, ५; ६; ८; २९, ३; ४६, १; क ३, ७; ११$; ३४, १; ४५, ४$; कौ ३, ११० २; ३, ५, ३; जै २, ४, ६; शौ ४, २७, ७$; ६, १२५, ३; ७, ३७, १$; १३, २, ३४$; ३५; २०, १७, ४; १०७, १३; १४; पै ४, ३५, ७; १५, ११, ७; १२, ४; १६, १५१, ५; –का ऋ ३, १९, ४; ४, २३, ७; –कात् पै ८, १३, ११‡; –कानि मै २, १, १०¶; –के ऋ ४, ५८, ११; ६, ४७, ५;

a) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. नि √ष(>स) ञ्ज् + घञ् षत्वं कुत्वं च ।
b) तस. उप. साध्वर्थक-यदन्ते नञ्-स्वरापवादो ऽन्तोदात्तः (पा ४, ४, ९८; ६, २, १५६)।
c) मुपा. नितरामकृतसंस्कारः । वस्तुतः पूर्वमन्त्रस्य यः 'एषा' इत्यु उत्तरार्धो भवति सोऽस्य मन्त्रस्य पूर्वार्धे स्यात् । 'अनिषेचनं चक्षुषी' इत्यनेन शोधितपाठेन तृतीयेन पादेन च तस्य मन्त्रस्य गायत्र्या छन्दसा पूर्तिः स्यादिति विचारयन्तु सुधियः । एवं तावदिह तस. नञ्-पूर्वः । उप. नि √वि(<सि)च्>नि-षेचन- इति यद्र.।
d) अ॒-निशित- >-तम्(गद्र.)। अत्र मूको. पा. वैकृतं द्र. (तु. संटि.)।
e) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।
f) 'अ॒निष्टृतः' इति (शौ ७, ८२, ३) पाभे.।
g) बस. अन्तोदात्तः (पा ६, २, १७२)। विशेष्यगर्भ वि. द्र.। उप. इष्टका- <√यज् यद्र.।
h) तस. नञ्-पूर्वः । 'कृत्य-' (पा ६, २, १६०) इत्यन्तोदात्तः । उप. निष्कर्य- यद्र.।
i) तस. नञ्-स्वरः (पा ६, २, २)। उप. <नि √ष्टृ<स्तृ यद्र.।
j) पपा. निस् √स्तृ> *नि॒ः-स्तृत- इतीव उप. निर्दिष्टं विवेक्तव्यम् ।
k) सस्व. एपूटि. द्र. । उप. निष्ट्य<निस्+त्यप् प्र. षत्वं च (पावा ४, २, १०४; पा ८, ३, १०१) यद्र.।
l) सस्व. द्विपूटि. द्र. । उप. <नि √हन् यद्र.।
m) √२*अन्+ईकन् प्र. (पाउ ४,१७)। नित्स्वरः (पा ६, १, १९७)। यद्वा तस. स्याद् नञ्-स्वरः (पा ६, २,२)। उप. च (नि>)नी+क- (<१अक- <√अच्, ञ्च्)। अथवा, नापू. कल्पे नञोऽभावे सति नि इत्यस्य स्थाने अनु इति द्र. । तथा च सति समाननिष्पत्तेर् अ॒नूक- इत्यस्मात् प्राति. विवेचनप्रयोजनः ऊ>ई इति वर्णपरिणामः। अथापि वा नापू. एव कल्पे नञभावे सति नि इत्यस्य स्थाने ३*अ॒न् यद्र. (तु. अन्तर्, २अ॒न्तर-) । माध्यमिक ईकार उपजनः (तु. सम् (ईक्-)। अन्ततस्तदेव उप. दर्शनार्थेन √२अक् इत्येतेनाभिसंबद्धं स्यात् पूप. च सप्तमीप्रकारकम् (२अ॒न्->) अनि इति कृ. सद् दीर्घीभूतं स्यादित्यपीहाभियुक्तानामूहः द्र. (तु. WW. १, १२, ६; १६९)।

५; ७, ४, ३; ८, ७४, ४; १०२, १३; ९, ९७, २२; खि ५, ५, ८; मा १७, ९९†; २०, ३६; का १९, १, १२†; २२, ४, १; मै ३, ११, १; काठ ३८, ६; ४०, ७; १४; †कौ १, १३; ५३७; २, ९२०; †जै १, २, ३; ५५, ५; ४, ३, ४; ६, ५; –केन ऋ २, ९, ६; मा ५, ३४; का ५, ८, ५; तै १, ३, ३, १; †४, ३, १३, २; ६, १, ५; मै १, २, १२; ¶१०, ५; १४[2]; ३, ९, ५¶; †४, १०, ५; ११, ४; काठ २, १३; २१, १३; ३५, २०; ३६, ८[2]; क २, ७; ४८, १८¶; –केषु ऋ ८, २०, १२; –†कैः ऋ [३, १, १५; ५४, १]; ४, १०, ३; ७, ८, ५; मा १५, ४६; का १६, ५, २८; तै ४, ४, ४, ८; मै ४, १०, २; ५; ११, ४$; काठ २०, १४; कौ २, ११२८; पै ४, २७, ६. [°क- चतुर्°, ज्योतिस्°, तिग्म°, त्रि°, द्वि°, पुरु°, बृहद्°, शत°, सु>स्व्°]

¶अनीक-स्व[a]– -स्वाय मै १, १०, १४; काठ ३६, ८.

अनीक-वत्[b]– -वते मा २४, १६; २९, ५९; का २६, ४, १; ३१, ७, १; तै १, ८, ४, १¶; ५, ४, ५, ४[2]¶; ५, २४, १; मै १, १०, १; २, १, १०¶; ३, १३, १४; काठ ९, ५; ४८, ३; क ८, ८¶; –वन्तम् खि ४, १४, १; –वान् तै ५, ४, ५, ४¶[2].

अनीक-शस्(>ः)[c] शौ ५, २१, ८; ९; ६, १०३, ३.

¶अनी(न्-ई)जान[d]– -नः मै १, ४, ६; ४, ८, ६; –नम् तै ६, ६, ७, ३; –ने मै ४, ८, ६.

†अ-नीड(ळ)[e]– -डः ऋ १०, ५५, ६. कौ २, ११३३.

अनी(न्-ई)शान[d]– -नः तै ६, २, ५, १; मै १, ७, १.

अनी(न्-ई)श्वर[d]– -राः शौ १२, ३, ४२.

१अनु- √१अन् द्र.

२अनु[f] ऋ १, ६, ४[g]; १०, १२[h]; १५, ५; २५, १६; ३३, ११[i]; ३७, ९; ३८, ११[j]; ४४, १०; ४६, १४[k]; ४९, ३[l]; ५०, ३[m]; ६[n];

---

a) भावे स्वः (पा ५, १, ११९)। प्रत्ययस्वरः।

b) मतुपः पित्त्वाभिघाते स्वरः पूर्वावस्थः।

c) शस् प्र. (पा ५, ४, ४२)। प्रत्ययस्वरः।

d) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

e) सस्व. नापू.द्र.। यत्तु सा. प्रभृ. उप. आश्रयपर्यायतया पश्यन्तः बस. अत्राहुः, तन्न। तथा सत्यन्तोदात्तापत्तेः (पा ६, २, १७२)। यथा त्वेतद् उप. सरूपादाश्रयपर्यायात् संप. विविक्तं सद् वि. इति संभाव्येत तथा विवरणतः १*नीळ- इत्यत्र यद्र.। तस्मिन्न् उप. वि. सतीह तस. भवतु न बस. इति तु तत्त्वम्।

f) =२अनू- इति रू. प्रयोगतः द्वि१ क्रिवि. च सद् उभा नि. योगमुपेत्यैकत्वमिवापन्नं द्र.।

g) लक्षणे कर्मप्रवचनीयः (पा १, ४, ९०)।

h) अत्र उ. म. (तु. मा. ५, २९) यद् 'अनु-वृद्धयः' इत्येकं पदमित्याहतुस्तत् स्वरदोषादुपेक्ष्यम्। अन्वयेऽशक्त इव सन् स्क. पदपूरणतामाहेति सम्भाव्यते। इन्द्रमभिलक्ष्य तदनुगतास्तदुद्देश्यकाः सर्वा वृद्धयश्च सर्वा जुष्टयश्च भवन्त्वित्याकारकस्यान्वयस्य न केवलं संभवादपि त्वभीष्टत्वात् (तु. सा. वें PW. प्रभृ.)। तथा ह्युत्तरस्यामृचि पुनरिन्द्रस्य स्तुतिभिरभिवर्धनं श्रूयते।

i) कप्र. इति सा. वें. GW. च। √क्षर् इत्यनेन गतित्वेन योगम् MW. वष्टि। तन्न। स्वधामनुलक्ष्य न तु तां कर्मतया विषयीकृत्य क्षरणस्य विवक्षितत्वात्।

j) रोधस्वतीर् अनुलक्ष्यत्येर्थतः कप्र. (तु. सा. वें; वैतु. GW. अनु···यात्)।

k) उषस उपाचरणमकर्मकमाख्यातमभिप्रेतं द्र.। आश्विनश्रीरनुलक्षणस्य विषयो न त्वनूपाचरणस्येति विवेकाद् गतित्वदर्शी वें. चिन्त्यः।

l) लक्षणे वेत्थंभूतलक्षणे वा कप्र.। अध्याहारमुखेन सा. अप्येनमेवार्थमभिप्रयन् स्यात्। गतित्वं तु नितान्तमनपेक्षितमित्यभिसन्धिः।

m) सा. एव केवलम् 'अनु-वि-अहश्रम्' इत्याख्यातयोगमाह। तत्र चाऽऽख्यातिकप्रत्ययस्य कर्तरि भ्रान्तदृष्टत्वं बीजम्। रूपं चेदं कर्मणि न तु कर्तरीत्यस्य कृते तु. √दृश्। ऋ १०, ३०, १३ इत्यत्र स्वयमसौ भाष्यकारोऽपि द्र.।

n) उत्तरमन्त्रेण प्रकरणसामानाधिकरण्ये सति वरुणस्य पृथिव्यादिलोकत्रयदर्शकत्वे तात्पर्यं द्र.। तत्राप्य् 'अनु जनान्' इत्यतः पृथिवी संकेतिता (पृथिव्यामित्यर्थः)। √भुरण्यु इत्यस्य चोभयथा वृत्तं भवति सकर्मकं च (तु. ऋ १, १५५, ५; ५, ७३, ६; ८, ५९, १; १०, ३५, ९) अकर्मकं च (तु. ऋ ४, २७, ३; ८, ९, ६)। तदिहाकर्मकत्वं द्र.। यत्तु सा. PW. च 'अनु···पश्यसि' इति योगमाहतुस्तन्न। उत्तरेण मन्त्रेण तात्पर्यसमन्वयदर्शनात्तद्वदिहाऽप्यनुपसृष्टस्य √पश् इत्यस्योपयुक्ततरत्वादित्यभिसन्धेः (तु. GW. W.)।

७१, ६; ८०, [१–१६]; ८[a]; ९; ८२, ३[b]; ८४, [१०–१२]; ८८, ६[c]; ९५, ३[d]; ११३, १३; १२०, ११[e]; १२१, ३; ७; १२६, ३[f]; ५; १२८, १[२]; १३६, ५; १३८, ३[g]; १४१, ३[h]; ९[i]; १४८, ४; १६१, ३[j]; १६४, २८[k]; १६५, ५[l]; १६६, १०[m]; १६७, १०; [१७५, ६[n]; १७६, ६]; १७६, २[o]; १८०, ८; १८१, ५; १८३, ३[p]; १८७, ४[q]; १९१, १५[r]; २, १, १५[s]; २, [४; ९, ७०, ३]; ५[t]; ८; ८, ५[u];

a) कप्र. इति खलु सा. साध्वाह। कर्मापेक्षातोऽधिकरणापेक्षाया बलीयस्त्वप्रतीतेः।

b) उद्दिश्य प्रयाणेऽभिप्रायाद् अनुप्रयाणं यद् GW. PW. आहतुस्तन्न। तस्यानुगमनपर्यायत्वात्तस्य चेहाऽसंगतत्वात्।

c) अतिक्लिष्टान्वय उत्तरार्धे कदाचिद् **'अनु''' अस्तोभयत्'** इत्याख्यातमभिप्रेतं स्यात्।

d) **'अनुष्ठु''' अनु''' विद्वौ'** इत्यन्वयं वष्टि सा.। न त्वसौ सुवचः। **'अनुष्ठु'** इत्यनेनैवाऽनोरनुक्रमाद्यर्थस्याऽऽगतत्वाद् व्यर्था पुनरुक्तिर्भवेदिति। समग्रश्च तदीय उत्तरार्धर्चीयोऽन्वयो व्यत्यस्तः। न ह्य् ऋतून् प्रशासता सूर्येण पार्थिवानां पूर्वा दिग् अनुविधीयते। पूर्वां दिशमनु (=तस्यामित्यर्थः), प्रशासता तु तेनर्तवोऽनुष्ठु विधीयन्ते। इहैतावतैवाऽलं विस्तरः वैश. अनुसन्धेयः।

e) **'जनान्'** इत्यनेन च **'सोम-पेयम्'** इत्यनेन च पर्यायेणाभिसंबद्धुमनोरेकस्याऽध्याहारः कर्तुं योग्यः। एवं कृते च तयोरर्थविवेकः द्र. (तु. सा.)।

f) **'मा'** इत्यस्य प्रामुख्यसाधको लक्षणार्थः कप्र. (तु. सस्थ. उप; वैतु. PW. GW. **अनु''' आगात्'** इति)।

g) अनुसृत्येति यत् सा. व्याचष्टे तदनुलक्ष्येत्यर्थे द्र.। **'तां नियुतम् अनु'** इति च तत्राऽन्वयः।

h) **'अनु''' मथायति'** इतीवाभिप्रयन् सा. चिन्त्यः (तु. ऋ ३, ४३, १; ५०, २ प्रभृ. GW. च)।

i) **सीम्** इत्यनेनान्वितः कप्र. भवति। यत्तु सा. इममन्वयं व्यभिचार्य्य **'अजायथाः'** इत्यस्य क्रिप. वि. अव्य. (=गतिभिन्नत्वे सति तत्-सकक्षम्) इतीव सम्बन्धमभाषत, तच्चिन्त्यम्। गतिप्रकारके संबन्धेऽपि **सीम्** इत्यस्य रू. कर्माऽऽकाङ्क्षापूरकत्वेन दर्शनादिति यावत्। लक्षणार्थप्राधान्यात् कप्र. एव स्यादिति तु स्थितिः (तु. GW.)।

j) **'वः'** इत्येतदनुबद्धो लक्षणे कप्र. (वैतु.सा. पश्चादर्थे अव्य. इति भाषुकः)।

k) **'अनु''' अमीमेत्'** इति गतियोगवादिनः पाश्चात्या भवन्ति। तत्र हि तेऽभिप्रेतमनुलक्षणात्मकमर्थमन्तर्भावयन्ति। तदयं वादश्चिन्त्यो भवत्यप्रामाणिकत्वादन्यथाप्रसिद्धेश्च। तथाहि। अनुगमनाऽनुशब्दनाऽनुभोजनादिप्रयोगेषु योऽनोरर्थो भवति तेनैव तत्सदृशेनैव वाऽर्थेनेहापि भाव्यम्। स चाऽऽनन्तर्यसादृश्यादिविशिष्टो नितरां लक्षणार्थविलक्षण इत्यभियुक्तानामतिरोहितमिव भवति। अतो यथाऽभिमतव्याख्यानं लक्षणोद्देशाद्यर्थः कप्र. एव प्रकाश्यताम्। सामर्थ्यात् प्रसिद्धेश्च। सा. च कप्र. अभिप्रयन्नप्यर्थस्य विषये न साधुवादी। तद्विस्तरस्तु वैश. द्र.।

l) **स्वधामनुलक्ष्य** (=तद्विषय इति यावत्) त्वमिन्द्राऽस्माकं भवसीति तुरीयपादस्याऽर्थः पूर्वां पादत्रयीं प्रति हेतुतयोपन्यस्तः। यत्तु सा. **'अनु''' बभूथ'** इति योगमाह तद् विमृश्यम्।

m) तु.सा., वैतु. च PW. प्रभृ.। येषां **'वि-अनु''' धिरे'** इत्याख्यातयोगोऽभिमतो भवन् **'गतिर्गतौ'** (पा ८, १, ७०) इत्युक्तं पूर्वगतिनिघातमुपक्षिपेद् अथ **'श्रियः'** इति द्वि३ अनन्वितमिव कुर्यादिति नैवाऽऽद्रियेत।

n) **'अनु''' जोहवीमि'** इति सा. गतित्वमपि विकल्पयति। तन्न। निविदामनुहवनस्य हवनस्य वा श्रुत्याऽप्रसिद्धत्वाद् निविद्द्वारकस्य हवनस्य च प्रसिद्धत्वात् (तु. ऋ १, ८९, ३; ९६, २; २, ३६, १६)।

o) कर्मणि प्रयोगमाहुः PW.MW.GW.। तच्चिन्त्यम्। **'युम्'** इति कर्मपदस्य तथा सति संबन्धक्लिष्टत्वात्।

p) वें. सा. PW. च **'अनु''' वर्तते'** इति योगमाहुः। तथापि विमर्शसहं स्थलं द्र.।

q) गतित्वेऽपार्था द्वैस्वर्यापत्तिरित्यसकृदवोचाम।

r) PW.MW. **अनु''' प्रवावृते** इति योगमाहतुः। तथा सति प्राधान्येनाभिप्रेतो लक्षणार्थो गौणो भवेत्। अनुपूर्वकगत्यर्थानामाख्यातानामर्थे लक्षणार्थाऽन्तर्भावश्चाऽप्रसिद्धः।

s) पूर्वेण **'भुवत्'** इत्याख्यातेन गतितया युयोजयिषुर् वें. चिन्त्यः।

t) चित्रमेतद् यत् सा. कर्मप्रवचनीयतयोपक्रम्य गतित्वे पर्यवसाययति। **√चित्** इत्यस्याऽकर्मकः प्रयोगः द्र. (तु. ऋ २, ३४, २)।

u) सा. इहाऽर्धजरतीयतीव। **स्वराज्य**-पदे कर्तरि प्रत्ययश्चेद् भवेत्तर्हि का गतिरनोरिति नासौ स्पष्टमाह। **'अनु''' वावृधुः'** इति योगश्चेदभिमतः स्यात्तर्हि णिजर्थान्तर्भावेऽपि सति न कोऽपि प्रसिद्धोऽन्वर्थान्वयः संभवेदिति दिक्।

[१३, १३;१४, १२]; २१,३[a]; २४, १३[b]; २८, २; ३०, २; ३६, ६[c]; ३७, १; ३८, ३; ५[d]; ६[e]; ७[f]; ४२, २; ३, ७, ६[२g]; १२, ७; १५, ३[h]; १७, १[i]; ५; २३, २; २६, ८[j]; ३३, ३[k]; ४; ३५, ८[l]; ४३, १[m]; ५१, १०[n]; ११; ५५, ४; ४, ४, १[o]; ८; ९; १६, १८[p];

a) लक्षणे इति सा., आनन्तर्ये इति वें.। उभयथाऽपि कप्र. एव ।

b) च्युतस्वरसंस्कार एव सा. आदिस्वरं वशा- इति पदं गवार्थे पश्यन्नगतिकत्वादनोर्गतित्वविकल्पमाचष्ट (तु. 'अनु वशान्' इति प्रयोगः [ऋ १,८२,३ प्रमृ.])। विस्तरस्तु वैश. द्र. ।

c) पूर्व्यो निविदोऽनुसृत्य प्रवृत्तस्य मे हुवस्य बोधत-मित्यन्वयः । सा. √शंस् इतीममध्याहरति गतित्वेनाऽनुं च तेन योजयति । श्रुतिस्वारस्यविरुद्धस्त्वयं योगो भवति। विस्तरस्तु वैश. द्र. ।

d) वें. अनु ''इषितम् इति केतमिति चोभयं भाग-मित्यनेन समानाधिकरणमित्याह । अन्वादि वाक्यान्तरं तु द्र. । केतमनुलक्ष्य सवित्रेषितमित्यन्वयः ।

e) लक्षणे कप्र.। सा. 'जायते' इति पदमिति शेष इत्येवं सुग्रहं द्र. ।

f) सप्तमीवचनः कप्र. (तु. GW., वैतु. PW.)।

g) तृतीयार्थे कप्र. । स्वेन धाम्नेति मन्त्रांशस्वरसः । 'अनु'''ववक्ष' इति योगं यत् सा. आह तच् चिन्त्यम् (तु. सस्थ. टि. परि√३वक्ष्)। अन्यत्र च 'अनुघोषम्' इति ब्रुवाणः स एव स्वरद्वयं प्रति चोद्यो भवेत्।

h) वें. सा. 'अनु'''विभाहि' इत्याख्यातयोगमाहतुः । तत्कर्मतया च ज्वालाशब्दोऽध्याह्रियते पूर्वी-शब्दस्य च पुरुशब्दात् स्त्रियां रूपापत्तिरुच्यते। परमेतावतः क्लेशवतः पथः सरलतरः कप्र. मार्गः। 'पूर्वीः (कृष्णाः) अनु (अनु-सृत्य तद्वद् इत्यर्थः) वर्तमानासु कृष्णासु त्वम् अग्ने''' विभाहि' इति सुश्लिष्टोऽन्वयः ।

i) 'अनु'''समिध्यमानः' इति गतित्ववादी वा पक्षे सप्तम्यर्थकर्मप्रवचनीयत्ववादी वा सा. उभयथाऽप्युपेक्ष्यः (तु. समानाभिप्रायाः श्रुतीः ऋ १, १६४, ४३; ५०; १०, ५६, ३; ९०, १६ प्रमृ.)। अथेह प्रथमे कल्प आदिस्वरं धर्म- शब्दम् अग्निविशेषणतया कर्त्तरि व्याचक्षाणः सा. नितरां च्युतसंस्कारः ।

j) सा.PW.GW.MW.अनु-प्रजानन्'इति द्व्युदात्तमे-कपदमाहुः । मति-शब्दश्चाऽग्नीरूपो ज्योतिर् इत्यस्य समानाधिकरणतया व्याख्यायते । वस्तुतस्तु 'मतिम् अनु' इति तु.कप्र.द्र.(तु.'हृदा मनीषी मनसाऽभिक्लृप्तः' (कठ. ६, ९)।

k) सुलभः सप्तम्यर्थे कप्र. । 'अनुसंचरन्ती' इति द्व्युपसर्गयोगं ब्रुवाणः GW. स्वरद्वयीं प्रति चोद्यो भवति ।

l) वें. 'अनु'''आगत्य' इति सा. च 'अनु'''प्रजानन्' इति योगावाहतुः। समानश्रुतिस्वारस्यं तु कप्र. इव द्रढयेत् (तु. ऋ ३, १२, ७; ७, ७,२; १०, १४, २)।

m) 'सोम-पेयम्' इत्यनेन संबन्धाल्लक्षणे कप्र. (तु. ऋ १, १४१, ३; ३, ५०, २; ७, ९०, ४; १०, ३७, ३)।

n) लक्षणे कप्र. । इदमाऽस्याऽन्वयः । नापू. मन्त्रे कृतां प्रार्थनामुद्दिश्येत्यर्थः (वैतु. सा. य इहाऽसंगतमिवा-ऽनुक्रमाऽर्थमाह)। यत्तु वें. एतदन्वयार्थं 'त्वाम्' इति पद-मिन्द्रपरमाचिक्षिप्सति तदप्ययुक्तम् । तथा हि सतीदमः 'सुतम्'इतिपदेन विशेषणत्वेन संबन्धे सिद्धे उत्तरार्धे'अस्य' इत्यस्य पदस्याऽन्वादेशीयेन सर्वनिघातेन भाव्यम् (पा २, ४, ३२)। ननु त्वदभीष्टेऽन्वयेऽपि समानं चोद्यमन्वादेश-सामान्यादिति चेद् । नेति ब्रूमः । 'सुतम्' इत्यत्र कस्य भावेऽभिप्रायात् पूर्वार्धेन च प्रथमस्य वाक्यस्य परिसमा-प्तिदर्शनाद् (वैतु. सा.) उत्तरार्धीयेनेदमा सुतस्य सतः सोमस्य प्रथमत एव उपस्थापनाद् अन्वादेशविषयाभावाद् 'ऊडिदम्-'(पा ६,१,१७१) इति स्वरस्य चारितार्थ्यादिति।

o) प्रथमे कल्पे प्रसिति-शब्दं सेनापर्यायीकुर्वन् सा. 'अनु'''द्रूणानः' इति योगमाह। आस्तां तावत् तच्चिन्ता तस्य नितान्तं निर्मूलत्वात्। प्रसितेरुक्तोऽर्थो व्युत्पत्ति-मात्रावष्टम्भः प्रवृत्तिप्रामाण्यशून्यः। गत्यर्थो √द्रू (स्वा.) √द्रू (क्र्या.) इत्यस्माद् विविक्त इत्यलं विस्तरान्तरेण। द्वितीये च कल्पेऽनोः कोऽर्थो भाष्यकृतोऽभिमत इत्येव न स्पष्टमुक्तं भवति । यदि नाम तृतीयार्थः कर्मप्रवचनीययोग इत्युच्येत तर्हि तृष्वीम् इति तृतीयार्थे द्वितीयेति तद्वचां-स्यपार्थान्यापद्येरन्। उक्तयोगत एव तत्सिद्धेः। न चापीह निरुक्तप्रामाण्यात् तृतीयार्थेऽनुरभिसम्मतस्तस्येति वक्तुं पार्येत। तदुद्धृते निरुक्तांऽशे तृतीयारूपयोर्मध्येऽनोः पाठो-पलम्भात्। यदि हि नाम द्वितीयायास्तृतीयात्वेन परि-णतिर् अनुना कारिता निरुक्तकारस्याऽभिप्रेताऽभविष्यत् तदोक्तप्रकारेणोक्तपरिणामकारितया परिसमाप्तशक्तित्वाद् अनोः पुनःपाठमसौ नाभ्यरोचिष्यतेत्यभिसन्धिः ।

p) लक्षणे कप्र. (तु. सा. [यत्त्वसौ भावे निष्पन्नं प्रमति- इत्येतत् स्त्री. प्राति. लक्षणया तद्वद्वृत्तित्वोपचा-रेण पुंसा सामानाधिकरण्यं भजत् सद् बस. भवतीति कृत्वा

२२, ७[a]; २९, ३[b];	५, २९, २[c]; ३२, १०[d];	५२, ६[g]; ५३, ५; ६[h];
४०, ४[2]; ५२, ६;	३३, २[e]; ४४, १[f]; ३;	१०[i]; ५९, १[j]; ६१,

स्वत एव पुं. भावयति, तद् यथा दाशतय्या वाचोयुक्त्या विरुध्येत तथा यद्र.] वैतु. वें GW. च लक्षणार्थमलक्ष-यन्ताव् **अनु'''आजगम्म** इति द्व्युपसृष्टाऽऽख्याताऽऽख्यायिनौ ।

a) **सीम्** (=पूर्वार्धश्राव्यमाणाः **स्वसॄः**) **अनु**लक्ष्येति संबन्धः (तु. वें. सा. च)। यश्चेहाऽपरोऽनुः श्रूयते तदर्थं यतु. **अनु√बन्ध्>अनु'''बद्धधान्-** इति (वैतु. सा. यः **'बद्धधानाः'** इति पदं **'सीम्'** इत्येतत्-समानं प्रकृतेन कप्र. अनुनाऽन्वितमिच्छति)। एवं यश्चेह **प्रः** श्रूयतेऽसौ गतितया **√स्यन्द्>स्यन्दयुध्यै** इत्यत्रान्वितः यद्र. (वैतु. सा. यो द्वितीयमुक्तपूर्वम् **अनुं 'स्यन्दयुध्यै'** इत्यनेन **प्रं** च **'मुचः'** इत्यनेन गतितया योजयितुमिच्छन् **'प्रमुचः'** इत्येकस्मिन् पदे द्वैस्वरी कथं, तिङि चोदात्तवति गति-निघाताभावश्च कथमिति चोद्यं नेव पश्यति । नापू. मन्त्रे च समानप्रकरणके **प्र√सृ** इत्यस्य **प्र√क्रम्** इत्यस्य च ये श्रुती भवतस्ते च नितरामिवोपेक्षते)। यत्तु PW. प्रभृ. **'अनुप्रमुचः'** इति द्विगतिकं त्रिस्वरमश्रुतपूर्वं क्रिप. श्रावयेयुस्तदतीव निस्सारं द्र. । निपातद्वय-प्राकरणिकसंबन्धाऽविभावनदुर्विपाकमात्रत्वात् स्वरसंचार-सौक्ष्मीं प्रत्य् अक्षम्यसाहसमात्रत्वाच्चेति दिक् ।

b) यद् वें. **'अनु'''श्रावय'** इत्याह तच्चिन्त्यम् (तु.सा.)।

c) कप्र. । **ईम्** इत्यनेन सना. वा यदित्येतच्छिरस्केन पूर्वार्धमितेन वाक्येन वाऽन्वयः । प्रथमे कल्पे **ईम्** इत्य-नेन नापू. मन्त्रे श्रावितचरोऽर्चनप्रकारः परामृश्यमानः द्र. । उत्तरे त्व् **ईम्'''इन्द्रम्** इति समानाधिकरणः संबन्धः । प्रथमे कल्पे लक्षणार्थे उत्तरे तु पश्चादर्थे-**ऽनुर्** इत्यपरो विवेकोऽपि द्र. (वैतु. PW. प्रभृ. **'अनु''' आर्चन्'** इत्येवं योजुकाः) ।

d) पादादौ **'यद्'** इत्याक्षिप्य पश्चादर्थे वा लक्षणे वा तदभिसम्बद्धः कप्र. (वैतु. सा. सर्वथोत्तन्त्रमिव **'क्षितयः'** इत्यस्य वि. इतीव भाषमाणः, PW. प्रभृ. च **'अनु'''नमन्त'** इत्यनपेक्षिताऽन्वर्थोपसृष्टिमाख्यातिकं योगं ब्रुवाणाः) ।

e) **'याः (धियः) अनु इत्था जोषं वक्षः'** इत्येवमन्वयः (वैतु. सा. **'अनु'''वक्षः'** इति योगोऽस्पष्टान्वितार्थः) ।

f) लक्षणे कप्र. । सामान्येन द्वितीयायां प्राप्तायामिह **'यासु'** इति सप्तमी द्र. । **अनु'''वर्धसे** इति योगं GW. मनुते स चात्र प्रत्याख्येयः ।

g) **'एनान्'''विद्युतो मरुतो'''अनु'''अह** अनुगच्छ-न्त्येव' इति सा. **√गम्** इतीममध्याहरन् अनोर्गतित्वं प्रतिपिपादयिषति । न चासौ यत्नस्तदीयः शोभनः । लक्षणार्थे कप्र. सुवचत्वे तेनैव च विद्युन्मरुत्-सान्निध्यात्म-कस्य श्रुत्यर्थस्वारस्यस्य सुवेदे ऽध्याहारस्य तदुपाश्रयस्य गतित्वकल्पनस्य वा सुतरामजागलस्तनायमानत्वं न व्यभिचरेत् । यच्च सा. **'एनान्'''मरुतः'** इत्यन्वादेशस्य चाऽन्वादिष्टस्य चोभयोः सपदि योगमेकस्मिन्नेव वाक्ये-ऽन्वयं च बभाषे तदपि तस्याऽसदृशमिवापतेत् । अन्वादेश-स्याऽन्वादिष्टस्थानित्वेनैव सावकाशत्वादित्यस्य निगदसिद्ध-त्वात् । न चेहैवोपरिष्टाद् **दिवः** इति षष्ठी न च तत्संगत्यर्थं **'मरुद्गणस्य'** इत्यश्रौतोऽध्याहारोऽपेक्ष्यत इत्यादिविस्तर-स्त्वस्मदीये वैश.द्र.। उक्तादेव न्यायाद् अन्वादिष्टाऽन्वादेश-विषयकाद् उत्तरार्धमात्रव्यापकैकवाक्यकल्पनामुपाश्रित्य प्रवर्तमानस्य MW. **'अनु'''अर्ते'** इति योगोऽपि सुत्यजः स्यादिति न बहु वक्तव्यमिवास्ति ।

h) **'अनु'''यन्ति'** इति योगं भाषमाणः PW. उपेक्ष्यः (वैतु. GW.)। तथा सति **'रोदसी'** इत्यस्याऽन्वयस्य स्वारसिकस्य दुर्लभत्वप्रसङ्गात् । यनि. तु पर्जन्यविसर्जे-नानन्तरं मरुतामुभयलोकसंसर्जुकेनेव सतेन्द्रधनुषा द्यावा-पृथिव्योर्मध्ये गतिः सुवचेति तदुपपत्तिः । यदपि सा. पर्जन्यविमोचनस्य द्यावापृथिवीविषयत्वमनुमन्येत तदपि चिन्त्यम् । **'दिवः'** पूर्वार्धे पर्जन्यकोशच्यावनाऽपादानत्वेन श्रावितत्वे सति तस्याः सपदि पर्जन्यविमुक्तजलाधारत्वस्य दुर्घटत्वाच्चायुक्तत्वाच्चेति दिक् । अपि च **'अनु'''वि''' सृजन्ति'** इत्येवं योगमातिष्ठमानः MW. चिन्त्यः । **''''यन्ति'** इत्यनेन च **'वि'''सृजन्ति'** इत्यनेन चैकस्यै-वानोर्युगपद्योगमुशन् PW. विमृश्यः ।

i) पूर्वार्धगते **'शर्धम्'** इति **'गणम्'** इति च पदे अनु-लक्ष्यत्वेनानेन कप्र. सताऽन्विते भवतः । सकलमन्त्रमये-ऽत्रैकस्मिन् वाक्ये सति यत् सा. पूर्वार्धोत्तरार्धभेदेन वाक्य-भेदं चकार । तन्मन्दम् । तदीययोजनाद्वयेऽप्य् **अनुप्रयन्ति'** इत्येकपदे द्वैस्वर्यप्रसङ्गादिति दिग् (अस्मदीययोजनायां तु. ऋ ५,५३,५)। PW. प्रभृ. गतित्वं मन्वानास्तथैवोपेक्ष्याः ।

j) इह **'श्रथयन्ते'** इत्यकर्मकमाख्यातम् (तुटि. **अनु √श्रथ्, श्रन्थ्>°शिश्रथः**, वैतु. GW. य इहाप्युपसृष्टमा-ख्यातमाह, सा. च य उपसृष्टिं च समर्थयति **√श्रथ्=√श्लिष्** इति धात्वन्तरसाम्यं च [तु. सा. ऋ ४,३२,२२ अपि])। एवं तावत् **'स्वं भानुमनु'** इत्येवं यनि. कप्र. एव द्र. ।

१९[a]; ७३, ४[b]; ७८, २[c]; ८१, | २[d]; ३[d]; ८६, ५; ६, १५, ९; | १७, १२[e]; २३, ८; २८, ४[f];

a) लक्षणे कप्र. (तु. सा. GW.)। गतिरेव वा स्यात्। तदा '**गोमतीर्…अनु…क्षेति**' इति सकर्मकतयाऽन्वयो वक्तव्यः। प्रायेण तु √२क्षि इत्यस्याऽकर्मकतयैव श्रुतयो भवन्ति। क्वाचित्कमेव च सकर्मकमपि श्रवणं भवति (तु. ऋ ५, ३७, ४)।

b) '**वाम्**' इत्येतेनाऽन्वितः पश्चादर्थे कप्र. द्र. (तु. GW., वैतु. सा. PW. यदनु '**अनुष्टुवे**' इति समस्तमाख्यातं भवति न्याय्येतरद्वैस्वर्यं च प्रसज्यते)। यथा च **स्तुव-**>**-वे** इति स१ स्यान्न चाऽऽख्यातमिति यद्र.।

c) लक्षणे कप्र. द्र.।

d) पाश्चात्यास्तु प्रथमे मन्त्रे '**अनु…विराजति**' इत्याख्यातं द्वितीये मन्त्रे च '**अनु…ययुः**' इत्याख्यातं पश्यन्ति। तदेतत्तदीयं दर्शनमदर्शनमिव भवति (तु. सा.)। उभयत्र लक्षणादिकर्मप्रवचनीयार्थविशेषोपपत्तेः। तथाहि। उषःकर्तृकया प्रयाणक्रियया सवितृकर्तृकाया विराजनक्रियाया लक्ष्यलक्षणसंबन्धो वा पौर्वापर्यसंबन्धो वा मन्त्रस्वारस्यानुरोधेन काममुपपद्येत। स एव च कर्मप्रवचनीयार्थ इत्यभिप्रायः। गतित्वे प्रयाणविराजनक्रिययोरभिधेयार्थस्वरूपसामान्ये सत्येव तयोः क्रिययोर्गतिद्वारा पौर्वापर्यसम्बन्धो भवेन्नाम वाच्यः। न तु '**पत्युर्मरणमनु म्रियते पत्नी**' इतीह प्रयुक्तमरणद्वयवत् प्रयाणविराजनक्रिययोः काऽप्यभिधेयार्थस्वरूपसमता संभवति येन प्रयाणापेक्षया विराजनस्याऽऽनन्तर्यद्योतकत्वेनाऽनोर्गतित्वमुपपद्यताम्। समानवाच्यार्थस्वरूपतायामानन्तर्यसाहचर्यसजातीयोऽनोरर्थो गतित्वद्योत्यो भवति विभिन्नवाच्यार्थकक्रियाप्रयोगे चाऽसावेवार्थः कर्मप्रवचनीयत्वं प्रयोजयतीत्याकारको विवेक इहाभिप्रेतो भवति। अथोत्तरस्यामृच्ययमपरो विवेकविषयोऽवधेयः। तद्यथेह सवितृकर्तृकदेवान्तरकर्तृकयोः प्रयातियातिक्रिययोरभिधेयस्वरूपं प्रति भेदाभावो भवति, तथा पूर्वोक्तदिशा तदीयाऽऽनन्तर्याद्यर्थो गतिगोचरीक्रियेतेत्येवं प्रत्यवस्थीयमाने उच्यतेऽयमपि नैव गतिविषय इति। कर्मान्तरसद्भावात्। को भावः। उच्यते। यत्र कर्तृविशेषकर्तृकक्रियामपेक्ष्य कर्त्रन्तरकर्तृकायास्तज्जातीयाया अपरायाः क्रियाया आनन्तर्याद्यर्थो गतिद्योत्यो भवति तत्र पूर्वा क्रिया कृद्वृत्तिं वाऽऽपाद्यते कर्तरि वाऽन्तर्भाव्यते। सा चैवं कृद्वृत्तिमापाद्यमाना वा क्रिया तदन्तर्भावविशिष्टो वाऽसौ कर्ताऽनूपसृष्टाया उत्तरस्याः क्रियायाः कर्मतया निर्दिश्यते। तद्वति वाक्ये कर्मान्तरं च न संभवति। यथा '**रामो गच्छति**' इति रामकर्तृकैका क्रिया। '**लक्ष्मणो गच्छति**' इति लक्ष्मणकर्तृकाऽपरा क्रिया। तयोः परस्परसम्बन्धावच्छेदो द्विविधः संभवति। '**रामस्य गमनमनुगच्छति रामं वाऽनुगच्छति लक्ष्मणः**' इति। न तु '**रामस्य वनगमनमनु लक्ष्मणः कीर्त्तिं जगाम**' इत्यत्र गतित्वं सम्भवति। उभयोः क्रिययोर्गत्यर्थसामान्येऽपि द्वितीयस्य कर्तुरीप्सिततमत्वेनाऽपरस्य कर्मणः प्रदानात्तदपेक्षया प्रथमकर्तुर्वा कृद्वृत्तिमापन्नायास्तत्कर्तृकायाः क्रियाया वा द्वितीयकर्तुरीप्सिततमत्वाभावेऽनुगतिविषयत्वाभावात्। अनुना कर्मप्रवचनीयेन तयोर्मध्ये वर्त्तमान आनन्तर्यसम्बन्धस्तु द्योत्यत एव। तद्वदिहाऽपि (ऋ ५, ८१, ३) सवितृकर्तृकप्रयाणक्रियां कृद्वृत्तिमापन्नामनु (अनुलक्ष्याऽनुसृत्य वा) अन्ये देवाः स्वीयमीप्सिततमकर्मभूतं महिमानं ययुर्नत्वनुययुरिति विवेकः कर्त्तव्यः।

e) तासां नदीनां संबन्धिनः **पन्थां** पथो मार्गान् **प्रवतः** प्रवणान् अन्वकार्षीरिति शेष इत्येवम् **अन्वि**त्युपसर्गयोग्यक्रियाध्याहारं च तत्प्रकारकमन्वयं च तद्भाष्यं च सा. अनुमेने। अत्र प्रत्येकस्मिन् पदे क्षोदक्षमे सत्यपि न विस्तारेणार्थ इति संकेतमात्रमुच्यते। '**प्रवतः**' इति शसि रूपस्य '**नीचीः**' इत्यस्य च '**अपसः**' इत्यस्य च समानाधिकरणभूतस्य तद्वद् **अपां** विशेषणत्वेन सहजेन चारितार्थ्यमुपागतस्य '**पन्थाम्**' इत्यमि रूपेणैकवचनेन विगतिगतीयमानं वचनव्यत्ययमुपाश्रित्य सामानाधिकरण्येन योजयितुं मनीषाऽनीशा तदीयेत्यवधेयम्। '**प्रवतः**' इत्यस्योक्तात् स्त्रियां शसि सामर्थ्यात् (तु. ऋ ७, ३२, २७ प्रमृ.)। अत उक्तो वचनव्यत्ययप्रस्तावो निरर्थकः। एवं चाऽनोः कर्मप्रवचनीयतया **पन्थाम्** इत्यनेनाऽन्वय ऋजूयत्युत्तरार्धमात्रव्यापकमेकमेव वाक्यं च भवेदिति।

f) '**उरुगायम् अभयम् अनु…विचरन्ति**' इत्याकारिका योजना GW. MW. प्रमृतीनां पाश्चात्यानामभिमता भवति। तत्र विमर्शो भवति। किमिह तासां गवामभयविशिष्टलोकविशेषं प्रति संक्रमणं शिश्रावयिषितं भवत्युताहो तासामिहैवाऽभयेन विचरणमिति। सूक्तगानि लिङ्गानि तावद् द्वितीयमेव विकल्पं द्रढयन्ति। ओपक्रमादोपसंहाराद् हि समग्रं सूक्तमेतद् गवामाप्यायने सुखविशेषाधाने पालने पोषणे च सुपठं भवति। अतः कप्र. उरुगायेनाभयेन इति तृतीयार्थे योगः। अभयस्य सिद्धवच्छ्रावितत्वान् नाऽयं साध्याभिप्रायोद्देशादिलक्षण-

३६, २[a]; ४६, १४[b]; ५४, ६[c]; ६३, ६[d]; ७; ६४, ५; ६६, ४२[e]; ६७, ६; ७५, ६[f]; ७, ७, २[g]; १८, १२[h]; ३१, ९[i]; ७०, ४[j]; ७७, ३; ८७, ७[k]; ८, १,

पदार्थवचन इति विवेकश्च सुकरः। तदकुर्वन् सा. तु चिन्त्यः।

a) 'अनुप्रयेजे' इति योगं सा.GW.चाहतुस्तदनभिमतं भवति। यत ऐन्द्रस्यौजसो लक्ष्यत्वेन समर्पयितुमिष्टत्वात्तदर्थीयोऽनुः कप्र. एव स्यात्। अन्यथा द्वैस्वर्यमप्यनुपपन्नं भवतीत्यपरं चोद्यं स्यात्।

b) इन्द्रचोद्यमानाऽश्वविशेषणपरेयमृक्। अनु-पदवाच्यलक्षणार्थविषयतया तेऽश्वा इह श्राव्यन्ते। तान् 'अनु' तानुद्दिश्य यदि 'क्लोशं'क्रोशनपूर्वकं 'स्वनि' शब्दोऽकारि तदा 'ये' उत्तरार्धश्रावितप्रकारेण 'आ'''वर्वृतति' इत्याकारकोऽन्वयो भवति। अस्मिन्नन्वये 'क्लोशम्' इति पदं √क्रुश् इत्यस्य क्रियाविशेषणतया प्रयुक्तो घञन्तः परिणामो वा णमुलन्तः परिणामो वा द्र.। सा. तु पूर्वस्या ऋचश् 'चोदयासे' इत्याख्यातमिहाप्यनुकृष्य तद्वत् ततोऽपि पूर्वतरयर्चोऽन्वयमाह। तद्विस्तरस्तु तत एव द्र.। स इहाऽनुं कर्मप्रवचनीयं 'क्लोशम्' इत्यनेन योजयतीति विवेकस्तु सम्प्रत्येव द्रष्टुं साम्प्रतम्। उभयोः √क्रुश् √स्वन् इत्येतयोः शब्दार्थयोर्लक्ष्यलक्षणसंबन्धावच्छेदकतानुपपत्तेः। न त्विह √क्रुश् इति भये इति वक्तुं लभ्येत। अप्रमाणात्। नतिश्चेहाऽनुपसर्गनिमित्ता सांहितिकी द्र.। लौकिक्या उपसर्गविशेषनिमित्ताया नतेर्भोजनमात्रगोचरतया (पा ८, ३, ६९) विधानादिति यावत्। यच्च MW. स्वीयशोधनाऽभिवर्धनपरिशिष्टे अनु√स्वन् इत्येवं योगमनुमेने। तदलक्षणम्। उभयस्वरोपपत्त्यभावादिति दिक्।

c) लक्षणार्थः कप्र.। यत्र यत्र यथा यथा च गावः प्रायुस्तत्र तत्र तथा तथा च प्रेहीत्यर्थः (एवं नाम ताः संरक्षन् संस् ताभिः सह गत्वा तासां प्रत्यायनसमयेऽरिष्टाभिस्ताभिः प्रत्यागन्तुमर्हेरित्यभिसन्धेः [तु. नाउ. मन्त्रः])। एस्थि.अपलक्षणामपि सतीं द्वैस्वरीमनुमन्वाना 'अनुप्र'''इहि' इति योगं च ब्रुवाणाः PW. प्रभृ. उपेक्ष्याः।

d) अनु-प्र√१पत् इतीवेह कल्पयन्तः सा.प्रभृ.नाद्रियेरन्। लक्ष्यमात्रभूतयोरश्विनोः प्रपतनक्रियया कर्तृत्वसंबन्धाभावे सति कस्यचिदपि तदनुप्रपतनकर्तृत्वेन वक्तुमनुपलभ्यमानत्वाल् लक्षणार्थः कप्र. पृथगन्वयः स्यादित्यभिसन्धेः।

e) एकतरत्र 'श्रिया दीप्त्याऽनुगताः' इत्यनोस्तृतीयार्थे कर्मप्रवचनीयतामभिप्रैति वें.। सा. अपि तद्वन्मानी भवति। एवं तु सति कर्मप्रवचनीयेन तृतीयार्थस्याभिहितत्वे 'श्रिया' इत्यनया तृतीयया नात्मलाभोऽपेक्षणीयः 'कर्म-' (पा २, ३, ८) इति सामान्यनियमाद् द्वितीययैवेह भाव्यमिति विमृशन्तु विविचः।

f) पूर्वार्धे यथाऽभिलषिते पुरोनयने श्राविते सत्युत्तरार्ध इह तत्प्रत्यनीकतया मनोऽनुसारि पश्चादुद्यमनं श्रावितं द्र.। एवं सत्य् अनोः कप्र.'मनः' इत्येतेन कर्मपदेन 'पश्चाद्' इत्यस्य क्रिवि. च 'यच्छन्ति' इत्येतेन संबन्धः (वैतु. या ९, १६ यदन्विव सा. 'पश्चात्' इत्येतत् पदं 'रश्मयः' इत्येतेन योजयन्नपि मनोऽनुकूलमित्युक्त्याऽनोरिवार्थं परिसमापयन्नपि तदीयं पुनःप्रसवमिवेच्छन्न् 'अनुयच्छन्ति' इत्यपि भाषते,GW. च यः'अनुयच्छन्ति' इति योगं समर्थयन् 'पश्चाद्' इत्येतद् अनोरर्थे कप्र. इतीवाऽभिसंदध्यात्)।

g) तृतीयार्थे कप्र. इति सा. साध्वाह। 'अनु'''आयाहि' इत्येवं योगं पश्यन् GW. चिन्त्यः स्यात्।

h) सादृश्यार्थे कप्र. (द्रुह्युम् अन्व् इति संबन्धः)। प्रथमे पादे श्रूयमाणे 'श्रुत-' इति 'वृद्ध-' इति च कवष-इत्यस्य वि. असती वैसं. भवत इति कृत्वा सा. आनुपूर्व्ये अव्य. इत्यातिष्ठते। PW. प्रभृ. च द्रुह्यु-कवषयोः सामानाधिकरण्यमिव पश्यन्तोऽनुं 'नि वृणक्' इत्येतद्व्यवहितं क्रिप. गतीकृत्याऽनुप्रवेशयन्ति। तदेतत् सर्वं सार्थविमर्शे द्र.।

i) कृष्टिकर्तृकसंनमनस्य सोमकर्तृकोर्ध्वीभावस्य च समानं देवताराधनमुद्दिश्य कृतत्वेन श्रावण एव मन्त्रस्वरसः। अतो 'भुवन्' इति क्रियायोगमुशन् GW. चिन्त्यः।

j) 'चक्ष्यथुः' इत्यनेन व्यवहितेन क्रिप. गतित्वाऽभिसंबन्धं सा. प्रभृ. उश्युः। उपसृष्टधातुवाच्यभूतस्याऽन्वेषणविशिष्टदर्शनार्थस्य प्रसङ्गाऽभावात् कप्र. सतोऽनोः सदृशार्थस्य च प्रासङ्गिकत्वाच्च तथेति दिक् (तु. ऋ ९, ९७, ५)। यथा च √ख्या इत्यस्योपसृष्टस्यानुपसृष्टस्य च सतोऽकर्मकमपि वृत्तं भवति तथा मा ११,१७[३] इत्यत्रत्ये टि. यद्र.।

k) गतिरिति वें.सा.PW.प्रभृ.च। तथा च सति'व्रतानि' इत्येतत् सकर्मकत्वेनाऽभीष्टस्याऽन्तर्भावितण्यर्थस्य' अनु-ऋत->-न्तः'इति शत्रन्तस्य कर्मतया योजयितुमिष्यते।

१४[a]; २, ३३[b]; ४, ८[c]; १०; २०[d]; ६, ३८[२e]; ९, २; १०, ६; [११, ८; ४३, २१]; १७, ५[f]; १९, ३५; २०, ७; २१, १८; ३२, १९[२g]; ४१, ३[h]; ७[i]; १०; ४८, १३; ५८,

यथा चेदमाख्यातं न सकर्मकं न चाऽन्तर्भावितण्यर्थं भवितुमर्हेत् तथा बाह्वृच्य एवास्याऽपराः श्रुतयो विस्पष्टं दर्शयन्ति (तु. ऋ ६, २, ४; ३, २; ८, ४६, २३ यत्र अश्व्-वार- वीत-वार- शब्दयोश्च विवेकोऽप्युक्तमेवार्थं द्रढयति)। एस्थि. मध्यमयोः पादयोर्हेतुहेतुमद्भावः द्र.।

a) '(वयम्) अमन्महीत् (यथा वयं) शूर! ते महता राधसा स्तोममनु सकृत् सु मुदीमहि' इत्येवमन्वयः। अनुरत्र तृतीयार्थे कप्र. भवति। स्तोतॄणां स्तोमसहकृतानामैन्द्रेण महता राधसा निमित्तभूतेन वा साधनभूतेन वा (सिध्यमानस्य) मोदातिशयस्याऽन्तर्विच्छिन्नपर्यायराहित्याऽऽत्मकसकृद्भावविशिष्टस्याऽनुभवस्य प्रार्थ्यमानत्वेन समर्पणे तात्पर्यवती भगवती श्रुतिर् द्र. (वैतु. सा. प्रभृ. यैः पूर्वार्धेन वाक्यमेकं परिसमाप्योत्तरार्धेन तदसंबद्धमिव वाक्यान्तरं कर्तुं कृतोत्साहैः सद्भिर्बलात्कारेणेव 'अनु···मुदीमहि' इति योगमुरीकुर्वाणैर् अनु √मुद् =अनु√मू इतीव बाभाष्यते)। उक्तपूर्वेऽस्मदीयेऽन्वये 'सु' इत्य् अव्य. क्रिवि. 'मुदीमहि' इत्यनेन क्रिप. संगच्छेतेति दिक्।

b) 'मघं हविर्लक्षणं धनं तद्वतो यजमानान् अनुमन्यनुमोदको भवति' इति प्रथमे कल्पे सा. गतित्वमाह। अत्र तावच् शसन्तस्य 'मघोनः' इत्यस्य 'अनु····मन्दी' इत्येवं कृताऽन्वयो दुर्घटश्चिन्त्यः। न च स्यान्नाम 'मघोनः' इति षष्ठी किमतो नश्छिद्यत इति वाच्यम्। अनुपसृष्टस्य 'मन्दी' इति शब्दस्य बाह्वृचे प्रसिद्धत्वात् (तु. ९, ५८, १ प्रभृ.)। उत्तरस्यामृचि 'वाजदावा मघोनाम्' इत्युपस्थिताच्छ्रौताल्लिङ्गादिहापि बहुत्वविशिष्टमघवद्विषयताऽनुमानाच्च। मध्यमे कल्पे तावदसौ 'मन्दी स्तुत्यः' इति नितान्तमसमर्थमर्थमिच्छन् वाक्यपूर्त्यावशक्तस् 'ताननुगृह्णातीति शेषः' इत्यनपेक्षिताऽध्याहारमुपाश्रयति। ततोऽपि सन्तोषमनाप्नुवन्निव चरमे कल्पे 'यस्य मघोनो धनवत इन्द्रस्य मन्दी स्तोता (अनु) अनुकूलो भवति' इत्युत्तन्त्रमसम्बद्धमनोरनुकूलार्थे प्रयोगं वाञ्छति। तेनाप्यथ प्रस्तुतमन्त्रावधिकामर्थपरिसमाप्तिमपश्यंश्च 'एष एतानि' इत्युत्तरत्रैकवाक्यतामाह।

c) तु. सा. यः ऋ ३, ३२, ११ इति श्रुत्यन्तरसंवादनेन तृतीयार्थतामस्य कप्र. सतः प्रतिपेदे (वैतु. GW. 'अनु ···वावसे' इति योगः)।

d) लक्षणे कप्र.। यत्तु सा. पश्चादर्थतामस्य पश्यन् 'यूथानि' इत्यनेन कर्मणाऽस्य संबन्धं मन्वानश्च 'निर्··· अजे' इति क्रिप. अकर्मकमाह, तन्न (यतु. निर् √अज्)।

e) इह पपा. 'वर्ति' >'वर्ति' इति शोधः द्र. (इन्द्रमनुलक्ष्य द्यावापृथिव्यौ वर्तनशीले भवत इन्दवश्च वर्तनशीला भवन्ति यथाऽश्वमनुलक्ष्य तदनुसारितया चक्रं वर्तनशीलं भवत्येवं मन्त्रान्वयस्य सुश्लिष्टत्वात्)। एस्थि. √वृत् इत्यस्य लुप्तप्रत्ययतकारं प्रपु. इति यदन्ये प्रतिपद्यन्ते (तु.सा.GW.)तदसंगतम्। निदर्शनवाक्ये तिङन्तापेक्षया कृदन्तस्य सतश् चक्रस्य वि. नेदीय इवाऽऽकाङ्क्षितत्वादित्यभिसन्धिः। एवं च तावदत्र मन्त्रे अनुर् द्विः श्रूयमाणतया सकृच्चाऽऽक्षिप्यमाणतया कप्र. द्र.।

f) सकलगात्राऽनुलक्षणस्य प्राधान्येन समर्पणे श्रुतिस्वारस्यप्रतीतेस्तत्र च लक्षणे कप्र. एव द्र. (तुटि. शौ २०, ४, २)।

g) स्वधा आहुवश्चानुलक्ष्य यत्रैव तास्तत्रैवेत्यर्थे कप्र.। यत्तु सा. द्वितीयमनुं पूरणमाह। तन्न। 'आहुवः' इत्येतेन द्वि३ तस्याऽन्वयस्य सुवचतरत्वात्।

h) लक्षणे कप्र.। 'तस्य वरुणस्य व्रतम् अनु तिस्र उषो वेनीरवर्धयन्' इत्यन्वयः। यत्तु वें. सा. च 'तिस्र उषः' इति द्वि३ इतीवाभिसन्धाय कालात्यन्तसंयोगार्थतयेव व्याचक्षाते। तच्चिन्त्यम्। 'तिसृभ्यः' (पा ६, १, १६६) इत्युक्तदिशा 'तिस्रः' इत्येतद् रू. प्र३ स्यात्। एतत्-समानाधिकरणं सद् 'उषः' इत्येतदपि च तथेत्यभिसन्धेर् (उषसः>उषः इत्येवं सकारलोपश्च संजात इत्यपरो विशेष इह समवधेयः। न तु क्विप्य् उष्- इति भिन्नं प्राति. स्यादिति। तथा सति जस्य् अन्तोदात्तानुपपत्तेरिति दिक्)। उक्ते चान्वये वेनीर् इति द्वि३ रू. (वैतु. सा. प्र३ रू. इति प्रतिपन्नः [यथा चैतद् रू. √वी>वय(न>)नी- >वेनी- इत्यस्य प्राति. भवति न च पराभिमतस्य √वेन् इत्येतन्निष्पन्नस्याऽन्तोदात्तस्य सतः सरूपकल्पस्यान्यस्य प्राति. इत्येतद्विस्तरः यद्र.])। एस्थि. उषस्त्रिकोपलक्षिताः सर्वेऽपि काला वरुणव्रतानुसारिणः सन्तो वेनीर्नाम नदीर् वर्धयन्तीति तत्तन्मन्त्रवर्णप्रसिद्धेः स्रोत्यानां वरुणाज्ञानुसारित्वे तात्पर्यं द्र.।

i) इत्थंभूताख्यान इह कप्र.। वरुणव्रताधीना देवा इत्यर्थः। व्रतस्य देवकर्तृकानुवर्तनक्रियायाः कर्मीभावेन विवक्षितत्वेऽनोर्गतित्वं वा वाच्यं तत्प्रयोग-

२[a]; ६३, ५[b]; ६९, १८[c]; ८८, ५[d]; १०३, २[e];	९, २२, ६[f]; २९, १[g]; ५४, १; ६३, ६; ७०, ३[h];	९२, ३[i]; ९७,५[j]; ३२[k]; १०३, ५; १०९, ७[l]; १०, २, ३[m];

सामर्थ्याच्च योग्यक्रियाऽध्याहारो वक्तव्यः (तु. वें. सा. GRI. प्रभृ.)। उभयोः कल्पयोरियानेव भेदो भवति यत् कर्मप्रवचनीयकल्पे देवानां वरुणव्रताधीनतामुखेन गतिकल्पे च तेषां तद्व्रताऽनुगमनाऽऽख्यानमुखेन वरुणः स्तूयते। प्रथमे तद्व्रतानुसारित्वं फलत्वेन कैमुतिकं द्वितीये प्रधानतया शाब्दस्तन्निर्देश इति दिक्।

[a]) लक्षणे कप्र. (तु. ऋ ८, ११, ८; ४३, २१)। यत्तु 'अनुप्रभूतः' इत्येकं पदमिति GW. MW. च। तदसत्। स्वरद्वयोपपत्तिविरहात्।

[b]) लक्षणे कप्र. (क्रतुम् अन्व् इति संबन्धः। 'ते' इत्यस्य चोत्तरार्धे संबन्धः)। क्रिवि. अव्य. इति सा. आह। तदीयेऽन्वये 'अनूषत' इत्यनेन क्रिप. गतिभावेन संबन्धवचनं साधीयः स्यादिति।

[c]) पश्चादर्थे अव्य. क्रिवि. (वैतु. 'अनु'''आशत' इत्येवं योजुकः सा. [एस्थि. ष. अन्वय आपद्येत न त्वसौ सुपोष इति चिन्त्यत्वं द्र.])।

[d]) 'अनु'''ववक्षिथ' इत्येवं योग इति कृत्वा यत् सा: सन्नन्ताद् *अनु√वह् इत्यत एतद् रू. आह। तन्न। अकर्मकस्य √२वक्ष् (यद्र.) इत्यस्याऽनुपसृष्टस्येह संगततरत्वादिति दिक्।

[e]) अधिकरणाऽनुलक्षणवचनः कप्र.। 'पृथिव्यां विवर्तमानः सन्नपि देवान् अच्छ मज्मना नाकस्य सानौ प्रतिष्ठत इव' इत्यभिप्रयती श्रुतिर् द्र. (वैतु. सा. यः देवान् इत्यनेनास्य संबन्धमाह; PW. प्रभृ. च येऽत्र 'अनु'''विवावृते' इति योगमाहुः; एवं वें. यः 'अनु'''प्र'''विवावृते' इति योगमाह)।

[f]) 'प्रवतः' (द्वि३) इत्येतदनुगतः कप्र. (तु. ऋ ६, १७, १२ प्रभृ., वैतु. सा. [यस्य प्रवतः इति प्र३, 'अनु'''आशत' इत्युपसर्गवती क्रिया चेति चिन्त्योऽन्वयः। पूर्वमन्त्रानुवर्तितबहुत्वविशिष्टसोमातिरिक्तकर्त्रन्तरानुपपत्तेरिति दिक्])।

[g]) लक्षणे कप्र.। 'अनुप्रभूषतः' इति द्वैस्वर्येऽप्युत्तरेण शत्रन्तेनैकपदतां ब्रुवन्तः GW. प्रभृ. चिन्त्याः।

[h]) उत्तरार्धर्च-दिग्-विशिष्टाः सन्तः केतव उभयलोकप्रसिद्धाः सन्त्व् इत्यस्मिन् मन्त्रस्वारस्ये निर्जागल्यमाने जनुर्द्वित्वस्य प्राधान्येन शुश्रावयिषितत्वात् तत्साधकः कप्र. द्र. (तु. सा., वैतु. वें. PW. प्रभृ. च 'अनु''' सन्तु' इति)।

[i]) सप्तम्यर्थे कप्र. द्र. (तु. नापू. स. सकृत्वा श्रुतिः। एवं तु. ऋ १, ९८, १; १८६, ११; ३, १६, ४; ५, ३७, १; ९, १११, ३; १०, ७५, ३ प्रभृ. यत्र √यत् इत्यस्य वृत्तम् अकर्मकं सत् तृ. वा स. वा सहकृतं श्रूयेत)। एस्थि. 'अनु'''यतते' इति योगमिच्छवः सा. प्रभृ. चिन्त्याः स्युः। अपरं च। सा. अनु√यत् इत्यस्य सकर्मकतामभिप्रयन् कर्मपदवाच्यस्याऽनुगमनरूपे यतने यदस्य वृत्तिमाह तदसमर्थमिव द्र.। अनोर् यतनक्रियार्थानुरञ्जकत्वात्तं प्रति गतिभावाभावाच्चोक्तायाः क्रियायाः कर्मपदवाच्यानुगमनसप्रयोजनतायामनोर्लक्षणार्थवाचकत्वेन पर्यवसानाच्चेति दिक्।

[j]) 'धाम' इति 'इन्द्रम्' इति च पर्यायेण कर्मकारकतां नयन् यत् सा. अनुमुपसर्गीभावयन्नप्युभयत्र तथा न करोतीत्यर्धजरतीयं तन्मतेनापि नितरामजोष्यम्।

[k]) गतित्वमनुरुन्धान इव सा. (तु. MM.) 'अभिक्रनिक्रदत् पुनः पुनः शब्दायते' इति चेद् भणत्, तदासौ चिन्त्यः। एवं हि सति 'पन्थाम्' इति कर्मपदमनन्वितमिवापद्यते। अन्तर्भावितप्रधानकर्मणः क्यङन्तस्य √शब्दाय् इत्यस्य कर्मान्तरापेक्षाभावात्। अतस्तदर्पितक्रियाया अधिकरणलक्षणतया अनुना कप्र. द्वितीयान्तं 'पन्थाम्' इति पदं समन्वितं स्यात्।

[l]) 'पूर्व्यः' इति (<पूर्वी-) द्वि३ इति कृत्वा तदन्वितः कप्र. द्र. (वैतु. वें. सा. यन्मते 'अनु'''पवस्व' इति योगः)।

[m]) देवानां मार्ग उपाश्रायि। तत्र किं लक्ष्यमिति। उच्यते, 'यच्छक्नवाम' (=यावती शक्तिर्भवति) 'तदनु' (तावतीं शक्तिमनुलक्ष्य=यथाशक्ति) प्रवोढुम् (=प्रकर्षेण क्रमितुं चलितुं=साफल्यं प्राप्तुम्) इति। एवं तावदस्मिन्नन्वये प्र√वह् इत्यस्याऽकर्मकतया प्रयोगः (तु. ऋ ५, ३०, ३; ४४, ८; ८, ४६, २६ प्रभृ.)। 'प्रवोढुम्' इत्यनेन (भावप्रधानेन नाम्नेव सता द्वि१) लक्ष्यभूतेनाऽनोरन्वय इतीवाभिप्रयन् भा. भवति (तु. तै १, १, १४, ३)। अस्यापेक्षया तावद् 'यच्छक्नवाम तत् प्रवोढुम् अनु (-शक्नवाम)' इत्येवं सकर्मकस्य अनु√शक् इत्यस्य प्रयोगतः साधीयानन्वयः संभवेत्। यस्त्वसौ 'तदनु' (=तं पन्थानमनु) इति लिङ्गव्यत्ययं विकल्पयति तत्

६[a]; ७; ११, ३; १४, १[b]; २[b]; ७[b]; १७,११[४०]; १८, १[d]; २७, ५; ३७, ५; ४०, ९; १०[e]; ४५, ११; ५१, ६[f]; ५६, ३[२g]; ६१, २१[b]; ६८, १२[i]; ९१, ७; ९७, १९; १०३, ६[२j];

संभवत्युक्तप्रकारके वाक्ययोजनान्तरे नाऽऽद्रियेत। सा. अनुक्रमार्थे अनुम् अव्य. (प्रवोढुमित्येतत्-संबद्धं) क्रिवि. चेच्छति। तदपि विमृश्यम्। यत्तु GW. प्रभृ. अनुप्रवोढुम्' इति योगमाहुस्तदसत्। एकस्मिन् पदेऽपलक्षणस्वरद्वयाऽनुपपत्तेः। ननु लक्षणस्य लक्ष्यानुविधायित्वोपगमाद् अत्रत्यं द्वैस्वर्यमनुलक्ष्य लक्षणान्तरं क्रियेतेति चेत्। न। सति संभव उपपत्त्यन्तरस्य सामान्यलक्षणापवादाऽनौचित्यादिति दिक्।

a) लक्षणे कप्र. (वैतु. सा. अनु…आयजस्व इत्येवमपि विकल्पुकः)।

b) अत्र पूर्वेषां पितॄणां स्वाः पथ्या अनु(=स्वैः पथिभिस् [तृतीयार्थे कप्र.]) परायणं यत्रेति सप्तम्यर्थेन पदेनाधिकरणमुखेन श्रावितं भवति। अनयैव दिशा परायणमार्गविवेकेन परायणाधिकरणनिर्देशः ऋ १०, १४, ७ इत्यत्र विस्पष्टः कृतो भवति। अत एव कारणाद् ऋ १०, १४, १ इत्यत्र 'प्रवतो महीरनु' इत्यत्र सप्तम्यर्थपर्यवसानकलक्षणोऽनुर्वक्तव्यः। प्रवत्सु महीषु परेयिवानिति यमस्तुतौ तात्पर्यम्। एवंस्थिते समानाधिकरणे 'प्रवतो महीः' इति पदे व्यधिकरणतया व्याचक्षाणोऽनुं च गतितया योजयितुकामः सा. चिन्त्यः। एवम् ऋ १०, १४, २ इति मन्त्रेऽपि सा. सप्तमीतृतीययोर्मध्येऽव्यवस्थया भ्रान्तचित्त एवाऽनोर्मन्त्रस्थं संबन्धमपश्यन्नध्याहारमुखेन नवीनं वाक्यमुपकल्पयति। ऋ १०, १४, ७ इत्यत्र त्वधिकरणविवेकस्य निगदसिद्धत्वात् सा. अपि साधु भाष्यमाह।

c) 'प्रथमान्' इति च 'युन्' इति च समानाधिकरणे पदे अन्यथा विवृण्वन् सा. चिन्त्यः। तद्विस्तरस्तु वैश. द्र.। तार्तीयीकपादस्थश्चाऽनुः कैश्चिदुत्तरत्र शत्रन्ते कृत्य् अनुगमयितुमुपलिप्सितं भवति। तन्न। स्वरविरोधादेव। पूर्वोक्तदिशाऽत्र कर्तृभिन्नकारकान्तराऽनपेक्षया भावस्वरूपस्य प्रधानस्य क्रियार्थस्य समर्पणमात्रेणाऽऽत्मवती श्रुतिर्भवति। अतः प्रधानकर्मतयाऽनाकाङ्क्षितत्वादत्र योनि-शब्दः क्रियालक्षणाऽधिकरणाऽन्यतरार्थपर्यवसायितया तद्वचनसमर्थेनाऽनुना कर्मप्रवचनीयेन योगाद् द्वितीयायां श्रावितो भवति। अथ तुरीये पादे सा. अकारणमेव चैत्तीमव्यवस्थितिमुपागतो विकल्पभूयिष्ठं भाष्यमभाषत। शालपथेनौपसंहारिकेणोद्धारेण तु सप्तम्यर्थपर्यवसायित्वदिशाऽनोः कर्मप्रवचनीयत्वस्यैव प्रदर्शितत्वाद् वचनव्यत्ययाद्यपार्थप्रयासपुरस्कृताऽनुजुहोमीत्याद्यनेक-विकल-विकल्पकर्दमकलिलायमानोऽसौ न कस्य दयनीयः स्यात्।

d) तुटि. ऋ १०, १४, १; २; ७ यत्रोक्तदिशाऽत्रापि तृतीयार्थे कप्र.। परेण पथा परेहि दूरं गच्छेत्यर्थः। तद्दूरगमनाधिकरणभूतदेशविशेषार्थश्चेह तुरीयपादस्थयाऽस्मदीयप्रजादिनिवासाधिकरणभूताऽस्मत्संनिहितप्रस्तुतदेशव्यतिरेचनमुख्यया प्रार्थनया संकेत्यते। 'अनुपरेहि' इति योगमिच्छवस्तु GW. MW. प्रभृ. सौवरीमनुपपत्तिमधिकृत्याऽनुयोक्तव्या भवेयुः (तु. सा.)।

e) लक्षणे कप्र.। यत्तु. सा. GW. प्रभृ. च 'अनु…दीधियुः' इति क्रियायोगमाहुः स्तच्चिन्त्यम्।

f) 'अध्वानम्' इत्येतदनुबद्धः कप्र.। यथा कश्चिद् रथी मार्गप्रस्थितः सन् कस्यचिदन्यस्य नियोगमुरीकुर्याद् अध्वानं प्राप्यैतदप्यन्वाचयेनेव संपादयिष्यामीति, तथाऽग्नेस्ते पूर्वे भ्रातरो देवान्तरोद्दिष्टहविर्वहनात्मकं नियोगमुरीकृतवन्त इत्यर्थः। एस्थि. तृतीयार्थे वा स्यात् सप्तम्यर्थे वा (वैतु. सा. PW. प्रभृ. 'अन्वावरीवुः' इति द्व्युपसृष्टमाख्यातं स्यादिति कृत्वा व्यर्थमपलक्षणं द्वैस्वर्यम् अभिलाषुकाः)।

g) प्रथमा…सत्या…धर्म (=धर्माणि) अनु' इत्येकत्र 'पत्म अनु' इत्यन्यत्र यथाश्रुतमन्वयः। सा. तु विहायैनमृजीयांसमन्वयं 'गाः' इत्यनेन क्रिप. गतित्वेन योगमपश्यत्। तस्य मन्ददर्शनस्यैवैतत् फलं यत् साधनतया श्राव्यमाणयोर् धर्मपत्मनोः(तु. ऋ १, १६४, ४, ३; ५०; ६, ३, ७; ८, ८, २३ प्रभृ.)साध्याऽनुप्रवेशः समजनीति दिक्।

h) 'कनायाः…उपमातिम्…अनु' इति संबन्धे सादृश्ये कप्र.। (वैतु. वें. सा. GW. ये अनु…परेयुः [<२अनु-परा√इ] इत्यातिष्ठन्ते)।

i) 'पूर्वीर्' इत्येतेनाऽभिसंबद्धः कप्र.। 'अन्वानोनवीति' इति योगं ब्रुवाणाः PW. प्रभृ. द्वैस्वर्यं प्रत्यनुयोक्तव्याः स्युः।

j) अत्र लक्षणे कप्र.। तु. अनुपदमेव मन्त्रे श्रूयमाणम् 'अनु संरभध्वम्' इति। यत्रेन्द्रस्य प्रामुख्येनाऽऽदर्शीकृत्य शिश्रावयिषितत्वात् तल्लक्षणः कप्र. भवति। मै. त्वेवंविधेषु स्थलेषु सामान्यतः प्रथमं कप्र. अपि निहततया लक्षयन्ती गतिभावं प्रापयन्ती च प्रतीयते। (वैतु. वें. सा. PW. GW. प्रभृ. च येषाम् अनुवीरयध्वम् इत्य् अनुसंरभध्वम् इति च योगावभीष्टाविव भवतः)।

१०५, २[a]?; ११५, ६[b]; १२२, २[c]; १२४, ९[d]; १२५, ७[e]; १३५, ४[f]; १४२, ७[g]; १४५, ६[h]; १४९, ३; १५९, २; १६८, २[i]; खि २, १४, १०; ३, १५, १; २६[j]; १८, १[k]; ५, ४, ४; ११; ६, १[l]; मा १, २०[g]; २, १५[2m]; २६[n]; २७[n]; †३, १६; ५२[g]; ४, २८[o]; ५, २९†; ४०[2]; ६, १२; ७, १२†; ८, ३७; ४०†; ९, १४[2]†; १०, १९[p]; ११, १२[g]; १७[4q]; †; १२, ३†;

a) 'अनु√१वी>अनु''''वेः' इत्यत्रत्यं सस्थ. टि. द्र.।

b) अस्य मन्त्रस्य 'यः'''वरम्'''अनु'''तृषु''' च्यवानः'''अनुद्रे'''चिद्'''धृषता'''भ्रन्वना''' इद् (अविष्यति तस्मै=) अविष्यते (वाजिन्तमत्वादिविशिष्टाय) जातवेदसे सुपिस्य (स्तुतिपरो भवेति शेषः)' इत्येवमन्वयः स्यात्तत्र च वरम् इत्यनेनाऽन्वितो लक्षणार्थः कप्र. अनुर् इति सरलः पन्थाः (वैतु. सा. LUD., GRI. यन्मतेन अनु√च्यु> ф अनु-च्यवान- इत्येकं समस्तं प्राति. भवति; एवं तु. ORN. यदीयविमर्शविस्तरानुविमर्शः वैश. अनुसन्धेयः)।

c) 'अनु'''अजनयन्' इति क्रिययाऽन्वयं ब्रुवाणाः PW. प्रभृ. चिन्त्याः। देवानां (विश्व-) जननव्यापारस्याऽग्नेस्तादृशव्यापारात्मकं व्रतमनुलक्ष्याऽभिनिर्वर्त्तुकत्वेन समर्पणे श्रुतिस्वारस्यप्रतीतेर्लक्षणाऽर्थो गतित्वे सति समासाङ्गीभावाद् गुणतां मा गादिति कृत्वा कप्र. इत्यभिसन्धेः। एस्थि. क्रिप. भावसामान्ये प्रयुक्तत्वात् सकर्मकस्य सतोऽपि कर्मनिराकाङ्क्षत्वं द्र.। अथवा समुचितं कर्माऽऽक्षिप्येत (तु. सा.)।

d) उत्तरेण कृता शानजन्तेन 'चर्चूर्यमाणम्' इत्यनेन गतित्वमुखेनैकपद्यमिच्छन्तः MW. प्रभृ. सौवर्या अनुपपत्तेर्विषये चोद्या भवेयुः (तु. सा.)।

e) अधिकरणानुलक्षणः कप्र. (तु. ऋ १, १८७, ४; १०, ९७, ७; १९; वैतु. PW. MW. अनु'''वितिष्ठे' इति युञ्जानौ)।

f) यः कुमार-मानसोपज्ञो रथः नापू. मन्त्रेऽश्राविं यद्विषये च तदितरेषां विप्राणां प्रवृत्त्यभाव इह समकेति, तमनुलक्ष्य (तदाधारेणेत्यर्थः) इतोऽग्रे साम तथाऽनभिप्लवां संप्रवृत्तिमलब्ध, यथा नाव्याहितं सत् किञ्चिद्वस्तु मध्येसागरमपि सुरक्षितं भवेदिति श्रुतिस्वरसे प्रतीयमानेऽपि यत् सा. प्रभृ. सर्वे व्याख्यातारः 'अनुप्रावर्तत' इति द्विस्वरं द्व्युपसर्गं च योगमनुमन्वीरंस्तत्राऽऽस्थाऽभावः साऽर्थः स्यात्।

g) लक्षणे कप्र. द्र.।

h) 'अनुप्र'''धावतु' इति योगं ब्रुवाणाः PW. प्रभृ. चिन्त्याः। प्राधान्येन विवक्षितस्य लक्षणार्थस्य तथात्वे गुणताप्रसङ्गादेकपद्ये सति द्वैस्वर्यानुपपत्तेश्च (गतिद्वयं समस्तं सदेकपिण्डीभूतमेकस्वरं च स्यादित्यभिसन्धिर्भवति [तु. W. शौ ३, १८, ६])।

i) 'वातस्य' इति षष्ठ्या सहाऽनुं कप्र. युयोजयिषुः सर्वथोत्तन्त्रः सा. उपेक्ष्यः। द्वितीयान्तेन 'वि-ष्ठाः' इत्यनेन पदेनास्याऽन्वयः द्र.।

j) पाठः खण्डितोऽतो विवेको दुःशकः।

k) तु. ऋ ७, ७७, ३; ८, ५८, १।

l) सप्तम्यर्थे कप्र. द्र.।

m) 'अनूजेषम्' इति द्व्युपसृष्टं द्विस्वरं च योगमुशन्तौ PW. MW. च चिन्त्यौ भवतः। अनुर् लक्षणे कप्र. द्र.। तथाऽन्वयस्य स्वारसिकत्वात्।

n) 'सूर्यस्याऽऽवृतमनु(=उद्दिश्य)आवर्ते' इति वाक्यार्थस्य सुस्पष्टत्वाल् लक्षणार्थे कप्र. (वैतु. यस्था. अन्वावर्ते इति तै. काठ. शौ. पै. सौवरः पाभे. यतस् तत्राऽनोरुपसर्गता स्पष्टा भवति। सूर्यस्याऽऽवृतः कर्मतया विवक्षितत्वे सत्य् अन्वा√वृत् इत्येतस्य सकर्मकता चेति दिक्)।

o) 'अमृतान्' इत्येतत्संबद्धो लक्षणे वाऽऽनन्तर्यार्थे वा कप्र. द्र.।

p) लक्षणार्थे समन्विते सत्यपि 'अनुरीयमाणाः' इत्यैकपद्यावच्छेदेन द्विस्वरं योगमनुमन्यमानौ PW. MW. च चिन्त्यौ द्र.।

q) सा. (तै ४, १, २, २) म. च व्यवहितेन 'अख्यत्' इत्यनेन क्रिप. गतित्वेन योगमाहतुः। तन्न। अनूपसृष्टधातुवाच्यार्थस्य प्रकरणाभावादिति यावत् (तुटि. ऋ ७, ७०, ४)। प्रथमयोर्द्वयोः पादयोश्चतुर्थे च पादे लक्षणार्थस्तृतीये च पादे सदृशार्थः कप्र. (तु. ऋ ५, ८१, २ यत्र सवितृ-संबन्धेन समानं वर्णनं भवति)। ननु √ख्या सकर्मकोऽकर्मको वेति। उभयमिति। कथमिति। उच्यते। यदा कर्मविशेषनिरपेक्षं सामान्येन दर्शनप्रकाशनाद्यर्थो भवति तदाऽयमकर्मकः (तु. ऋ १, ४६, १०; १२३, २; ४, १३, १; १४, १; १९, ९; २४, ८; १०, १२७, १ प्रभृ. शौ ७, ८२, ५ प्रभृ. च) एषु स्थलेषु क्वचित् क्वचित् प्रतिर् अनोः स्थाने श्रूयते। तत्र यदि प्रतिः कप्र. न स्यात्तर्हि प्रासङ्गिकार्थाद् विपरीतस्याऽर्थस्य प्रतीतिः स्यात् प्रतिख्यानात्मकस्य।

५[४a]; २८†; ९३†; **१३**, ५[४]†; ६; ७; ९†; **१७**, ३८[२]†; ६६[h]; **१९**, ४०[h]; ५४†[h]; **२०**, ४९†; **२७**, १६; **२९**, १९[४]†; ४३†; **३२**, ४; **३३**, ३२†; **३५**, ७†; का **१**, ७, ४; १०, ५[b]; **२**, ४, १[२c]; ६, ५[d]; ७[d]; ७, ५[e]; **३**, ३, ६†; ७, २†; **४**, ९, ५[e]; **५**, ७, ५†; **७**, ६, १†; ८, ११, २; १५, १†; **१०**, ३, ७[२]†; **११**, ६, ४[f]; **१२**, २, १; ६[४g]; †; **१३**, १, ३†; ६[४a]; २, ११†; ६, १९†; **१४**, १, ५[४]†; ६; ७; ९†; **१८**, ४, ६[२]†; ६, २[h]; **२१**, ३, ११[h]; ४, ४†; **२२**, ५, ३†; **२९**, २, ६; **३१**, २, १०†; ३, ८[४]†; **३२**, ३, ३†; **३५**, ३, ४; ४, ६†; तै **१**, १, १०, ३[h]; १४, ३†; २, ४, २[१]; ६, १[२i]; ८, १[e]; १०, १; १४, १†; ४[२]†; ३, १, २†; ७, १[२j]; ८, २; ४, ९, १†; ४४, ३[k]; ५, १, ३¶; २, २¶; ५¶[h]; ५, १†; ७, १†; ८, ३¶; १०, ४[l]; ६, ४, १[५]; २[३]; ५, २[४m]; ¶७, १, १[n]; ६[o]; ४, २[३p]; ५, १[२h]; ३[q];

न च तदुपयुज्येतेति यथा प्रतिस्तथाऽनुः प्रकरणसामान्ये कप्र. एव स्यादित्यभिसन्धिः ।

[a]) कप्र. द्र. । (तुटि. तै **१**, ६, ५,२; वैतु. मै **२**, ७,८ यत्राऽनुगतत्वार्थे विक्रमणक्रियाया एकपिण्डीभावेनेव विवक्षायाः संभाव्यमानत्वाद् अनोर्गतिभावस्तदर्थाऽनुप्राणितक्रियायाः सकर्मत्वं च भवति) ।

[b]) सप्तम्यर्थे कप्र. [तु. पूर्वस्मिन् पादे **'पशुषु प्रविष्टः'** इति; वैतु. सा. **अनु···वितस्थे** इति द्व्युपसृष्टमाख्यातमिच्छन् (तथा संभवत्यपि **'वि-स्थाम्'** इत्यत्राऽनुव्याप्यत्वमभिप्रेतमिति कृत्वा **'कालाध्वनोः'** (पा **२**, ३,५) इति द्वि. द्र. । सा. तु 'अनुसृत्य' इति भाषमाणः कर्मणि द्वि. इतीवाभिप्रैति)] ।

[c]) तुटि. मा **२**, १५[२] ।

[d]) तुटि.मा **२**,२६;२७।

[e]) तुटि. मा **४**, २८ ।

[f]) तुटि. मा **१०**,१९ ।

[g]) तुटि. मा **११**,१७[४] ।

[h]) लक्षणे कप्र. द्र. ।

[i]) तृतीयार्थे वा लक्षणार्थे वा कप्र. द्र. ।

[j]) लक्षणे कप्र. । गतिरिति ब्रुवन् MW. चिन्त्यः (तु. सा. भा. च) ।

[k]) आनन्तर्ये वा (तु. सा. भा. च) लक्षणे वा कप्र. द्र. । प्रथमे कल्पे **वसोर्धर्मस्य च दिवश्चाऽऽस्थानक्रियासामान्याऽपेक्षया** तत्पूर्ववर्तिन्या देवगणकर्तृकायाः क्रियाया **अपेक्षयाऽऽनन्तर्यं** द्र. (वैतु. सा. भा. च **वसुधर्मविषयस्याऽऽस्थानस्यापेक्षया द्युविषयस्याऽऽस्थानस्याऽऽनन्तर्यमिति**) । द्वितीये कल्पे **वसुधर्ममनुलक्ष्येति** संबन्धः (**तु. शौ ७, १०२, ४ पामे.**) ।

[l]) **लक्षणार्थे कप्र.** । (वैतु.PW.K. प्रभृ. **'अनुसंचरन्ति'** **इत्यपलक्षणद्विस्वरं योगमसत्यप्यनिवार्यत्वेऽनुमन्यमानाः**) ।

[m]) **लक्षणे कप्र.** । पृथिव्यन्तरिक्षद्युदिशां विक्रमणाधि**करणतया लक्ष्यत्वेनाऽनुश्रूयमाणत्वात्** (तु. K.; वैतु. भा. **यः पश्चादर्थे कप्र. इच्छन् वि√क्रम्** इत्येतम् आत्म. **सन्तं सकर्मकतां** प्रापयिष्यन् भवति) ।

[n]) लक्षणे कप्र.(तु.भा.) । K. त्व् **अनुम् 'उपतिष्ठन्ते'** इत्येतेनाऽऽख्यातेनाऽनुगमयति । पशूनां पाकयज्ञमनुलक्ष्योपस्थानस्य विवक्षितत्वात्तस्य च गतित्वे **गौणतापत्तेः** प्रथम एव कल्पः साधीयानित्यभिप्रेमः ।

[o]) दक्षिणाया यत्तद्वैशेष्येण युक्तायाः पश्वन्तरसंक्रमणलक्ष्यत्वेन शिश्रावयिषितत्वात् तदर्थीयः कप्र. द्र. ।

[p]) सा. भा. च **'लक्षण-'** (पा **१**, ४, ९०) इति कप्र. । **'तृतीयार्थे'** (पा **१**, ४, ८५) इति च K. । यथा तु MW. **आनन्तर्यार्थे** ग्राहयितुं गतित्वं संप्रधारयामास, नैतत् तथा संभवेत् । गतित्वं ह्युपगतोऽनुर्यदा भवति, तदैतदुपसृष्टस्याऽऽख्यातस्य द्विधा प्रवृत्तिर्भवति । कस्यचिदपरकर्तृकस्य स्वजातीयस्य स्वाभिन्नस्य वा भावस्यापेक्षयैतद्वाच्यस्य भावस्य **भौतिके वा** दिक्कालादिलक्षिते **बौद्धे वा चितिसंस्कारलक्षिते** पश्चाद्भावित्वविशिष्टे सादृश्य-सामीप्याद्यर्थबोधने तात्पर्यमित्येकम् । प्राक्ताविशिष्टस्य भावस्य वा नामीभूतस्य वा तत्कर्तुर्वा तेनाऽनूपसृष्टेनाऽऽख्यातेन कर्मसंबन्धाद् उपसृष्टेस्तस्याः पूर्वमकर्मकस्यापि सतः सकर्मकता भवतीत्यपरम् । एवं च सत्य् अनुश्चेद् उपसर्गः स्यात्तर्हि यजमानकर्तृका देवकर्मिका वा देवोज्जितिकर्मिका वा तदनुपातिन्युज्जितिरवगम्येत । देवाः पूर्वं विजयिनः सन्तो यजमानेन पश्चाज्जिता इत्यर्थः । नचेयमिष्टापत्तिः । तात्पर्यविरोधात् । देवकर्तृकेण विजयेन तत्साधनकस्य तदनुलक्षितस्य वा यजमानकर्तृकस्य विजयस्य प्राधान्येन **विवक्षितत्वात्** । **देवविजयस्य पूर्वसिद्धत्वात्** तत्प्राक्ता **यजमानकर्तृकस्य विजयस्य च पश्चात् तद्द्वारा च सिद्धत्वात्** तदनन्तरता स्वत एव सिद्धा सती शाब्दं वाचनं नापेक्षेत । एवं खलु कर्मप्रवचनीयवाद एवेह सुस्थितः । स एव च सौवरलक्षणानुकूलः (तुटि. मा **२**,१५[२]) ।

[q]) **लक्षणवचनः कप्र. न गतिः** (वैतु. K. **'अनु-** [**तु। उ**]**पयन्ति'** इति) । नाउ. मन्त्रे त्व् **'अनूपयन्ति'**

६, ३¶[a]; ७, २[b]; ८, ३[२]†; ८, ५, १[३c]; १४, २¶[d]; ¶२, १, ४, ५[e]; ५, १[f]; ६[g]; २, १, ४[h]; ५[i]; ९, ५[j]; ३, ३, १[२k]; ५, ३[l]; ७, १[m]; १२, २[m]; ४, २, १[२n]; २[o]; ४[o]; ८, १†; २[p]; ५, ३, २; ३; ४, २[२q]; ५, ३[q]; ६, २[r]; ८, ७[s]; ६, ५, ६[t];

इति गतिर्न कप्र. इति स्वरविवेकेन विज्ञाप्यमानोऽसावुभयोः प्रयोगप्रकारयोर्विषये विवेचनीयः। तद् यत्र लक्षणाद्यर्थः कर्मकारकाद्यनुबद्धतया प्राधान्येन शिश्रावयिष्यते, तत्र तद्वाचकाः प्रातिस्विकस्वराः कप्र. प्रयुज्यन्ते। अथ यत्र त एव नि. अर्थान्तरवाचकाः सन्त आख्याताऽङ्गभूतास्तदर्थविशेषणपरत्वेन शिश्रावयिष्यन्ते, तत्र त उपसर्गधर्मिण आख्यातस्वरभावाभावव्यवस्थितस्वरा भवन्तीति। अन्यथैतावता संनिकर्षेणाऽपार्थस्वरभेदश्रुतेरनुपपत्तेरिति दिक्।

[a]) 'अनु-पर्यावर्तते' इत्येवमत्र प्रथमोत्तमस्वरवत् व्युपसर्गयोगमिवाऽऽतस्थिवान् MW. (तदनु K. च) चिन्त्यः स्याल्लक्षणार्थस्य विस्पष्टं श्राव्यमाणत्वात्।

[b]) तृतीयार्थे कप्र. इति K.। लक्षणेऽपि सुगमः। गतित्वमुशन् भा. त्विह चिन्त्यः। स्वराऽनुपपत्तेः।

[c]) प्रथमो द्वितीयश्चाऽनू इत्थंभूतलक्षणे, तृतीयश्च लक्षण इति विवेकः (तु. ऋ १,८२,३)। 'अनु···प्र···यासि' इति योगे कृताऽऽस्थो भा. चिन्त्यः। वश- शब्देन तत्त्वतोऽपरिचयात्। अथाप्यसाविह मुधैव विकल्पग्रस्तः द्र.।

[d]) गतिरिति भा. K. च। द्वैस्वर्यं त्वनिष्टं तथाऽऽपद्येतेति लक्षणे कप्र. एव द्र.। (तुटि. तै १,६,५,२)।

[e]) 'जघनतः' इत्यर्थे जघने (द्वि२) इत्यनेन सम्बद्धः कप्र. भवति। भा. K. च जघने इति स१ पश्यन्तौ 'अनूदेत्' इति व्युपसृष्टत्वे सति द्विस्वरं योगं ब्रुवाणौ चिन्त्यौ, तन्मतेनैव पश्चादर्थस्य जघन-शब्देनोक्तत्वात्। प्रकरणे तन्मात्रतया संभवस्याऽन्वर्थस्य चारितार्थ्याभावं प्रति, सत्यैकपद्ये द्वैस्वर्यस्याऽपलक्षणतां च प्रति तौ चोद्यतां व्रजतः। ननु जघन- इति प्राति. पुं. श्रूयते (तु. ऋ १, २८,२ प्रभृ.) इति चेत्। सत्यमेतद् अंशत एव। न. अपि श्रुत्युपलम्भात् (तु. तैब्रा २, ४, २, ७ [यच्छाखासाम्याद् नेदिष्ठतया प्रामाण्यमर्हेत्])। नन्वेवमपि मुपा. पपा. च प्रगृह्यत्वलक्षणाऽनुपलम्भश्चोद्यः स्यादिति चेत्। ओमिति ब्रूमः। अस्मद्व्याख्यानेऽस्यांशस्य प्रामादिकविकारतयाऽनभ्युपाये सति मृग्यसमाधानान्तरत्वादिति दिक्।

[f]) लक्षणे कप्र.। 'अनूदायन्' इति गतित्वं मन्वानौ MW.K.च चिन्त्यौ। तथा तु सति स्वराऽनुपपत्तिर् द्र.।

[g]) भा. K. चाऽत्र लक्षणार्थमपश्यन्तौ 'अनुसंतनोति' इति रू. प्रतिपन्नौ न्याय्येतरद्वैस्वर्यपक्षपातिनौ सन्तौ चिन्त्यौ।

[h]) पश्चादर्थे अव्य. (तु. नाउ. स्थ. यत्र 'उपरिष्टात्' इति प्रयुज्यते; वैतु. MW. 'अनुनिर्वपेत्' इति)।

[i]) आनन्तर्यार्थबोधकम् अव्य. क्रिवि. संबन्धश्च (वैतु. मै २, १, १ यत्र समाने प्रकरणेऽनुः पृथग् अव्य. क्रिवि. असन् नाउ. क्रिप. गतिभावेनाऽनुप्रविष्टो भवति [तु. सस्थ. टि. अनु-प्र√२यम्> अनुप्रयच्छति])।

[j]) प्रधानभूतां वाचमनुलक्ष्याऽन्या वाचः प्रवदन्तीति वाक्यार्थप्रतीतेर् अनुः कप्र. (वैतु. MW. अनुप्रवदन्ति' इत्यन्याय्यो योगः)।

[k]) लक्षणार्थस्य प्राधान्येन विवक्षितत्वाद् व्युपसृष्टिश्च तामनु द्विस्वरता चाऽनभीष्टा सुवारा द्र.। प्राक्वेवमेव विक्रवत्स्वपि गतित्वमेवाऽनुमन्वानाःMW.K.प्रभृ.चिन्त्याः।

[l]) आ√प्याय् इत्यस्य शुद्धस्याऽकर्मकत्वाद् भिन्नकर्तृकाऽऽप्यायनयोर्द्वयोर्मध्ये लक्षणलक्षितसंबन्धस्यैवोपपन्नत्वात् कप्र. एव सुवचः।

[m]) लक्षणे कप्र.। अन्यथादर्शी MW. चिन्त्यः।

[n]) लक्षणे (हीने वा तु. भा.) कप्र.। (वैतु. PW. प्रभृ. 'अनु-सम्-आ-रभामहे' इति व्युपसृष्टं द्विस्वरं योगमनुमन्यमानाः सन्तश्चिन्त्यतामुपगताः। तथा हि सति 'गतिर्गतौ' (पा ८, १, ७०) इत्युक्तदिशा निहतः स्याद् अनुः [तु. नाउ. नि. सम् इति; एवमपि तुटि. ऋ १०, १०३,६])।

[o]) अनोः कप्र. सप्तम्या योगः समवधेयः।

[p]) अन्तर् इत्यर्थेऽन्तर्भागानुलक्षणवचनः कप्र. (वैतु. अनुवि√विश् मै २, ४, ७; ८ यत्राऽयं कर्मण्येव कारकान्तरसंबन्धस्याऽन्तर्भावादिव गुणभावाद् गतिभावं प्रापितो भवति)।

[q]) पश्चादर्थे अव्य. द्र.।

[r]) सप्तम्यर्थपर्यवसानकः कप्र. द्र.।

[s]) एपूटिदि.कप्र.द्र.।'अनुप्रपिपते' इति योगम् PW.प्रभृ. आहुः। तन्मन्दम्। ऐकपद्ये स्वरद्वयस्याऽपलक्षणत्वात्।

[t]) तु. तै २, ६, ५, ५ यथा तत्र प्रस्तरस्याऽऽहवनीये प्रहरणं श्रावितं भवति तथाऽत्र तत्सकक्षतया तदुत्तरविधितया च प्रस्तरस्य तदेकांशस्येत्यर्थे बर्हिरनु (बर्हिषि) प्रहरणं श्राव्यते। एवं चेह सप्तम्यर्थपर्यवसानो लक्षणे कप्र. एव वक्तव्यः। गतित्वाऽध्यवसानः MW. विस्पष्टेतरान्वयः K. च चिन्त्यौ भवेताम्।

१०, ४[२a]; १२, २†; ¶३, १, ३, १[b]; ४, २$[c]; ८, ३[४]†; २, १, ३[d]; ४, ५[e]; ५, ५[२f]; ६[२g]; ६, १$[h]; ३, ६, ३[३i]; ७, १[३i]; २[i]; ४, ८, ३[j]; ६[k]; ५, १, ३[d]; ४[d]; २, ३[l]; ४[२l]; ६, २[m]; ३[२m]; ४, १,२, १[d]; २[४n]; ३[n]†; ८, २[o]; १०, ४†; २, १, १[३p]; २[p]; २, ४†; ८, २†; ३[५]†; ९, ५[४]†; ३, १०, ३[q]; ११, १[२r]; ४[२]; ४, ४, ८[s]; ६, ४, २[२]†; ५, १; ६, ३†; ७, ३[४]†; ¶५, १, १, ४[t]; २, ६; ३, १[d]; ७, ४[d]; ८, ६[d]; २, १, ३[२]; ३, ६; ५, ४[४u]; ६, १; ७, ३[v]; ८,

a) हेतुवचनः कप्र. इति भा. अभिप्रैति। तथात्वं लक्षणावाचकताद्वारकमेवाऽनुवेदितव्यम्। पञ्चत्वसंख्यामनुलक्ष्य तत्पूर्त्तिहेतुना प्रायणवत्-समिष्टयजुःसंकलनेनोदयनपञ्चकस्योक्तत्वात्।

b) तुटि. तै २, १, ५, ६।

c) लक्षणे वा तृतीयार्थे वा कप्र.। यत्तु भा. ऐकपद्यमिवोत्तरेण कर्मणि शानजन्तेन कृताऽभ्युवाह 'अनुरज्यमानाः' इत्येवं च व्याचचक्षे, तन्नोपपद्यते। प्रथमा खल्वापत्तिः सौवरी सुविदिता विमृशां भवति। कर्मणि प्रवृत्तिमतः पदस्य कर्त्तरि व्याख्यानं दुर्वचमित्यपरा। उपेक्षिताऽनुपदः K. तूपेक्ष्यः।

d) लक्षणे कप्र. द्र.।

e) यत्तु MW. 'अनुप्रसर्पन्ति' इत्य् आख्यातिकं योगमाह तदसत्। स्वरविरोधात्। अत एवंविधेषु लिङ्गान्तरैः सामान्येन गतितया वा कर्मप्रवचनीयतया वा सुवहेषु स्थलेषु स्वर एव विनिगमकः स्यात्। लक्षणाद्यर्थस्य प्राधान्ये द्वैपद्यं द्वैस्वर्यं च। तस्याऽऽख्यातान्तर्भावेण गौणत्व ऐकपद्यमैकस्वर्यं चेति दिक्।

f) इत्थंभूतलक्षणे कप्र.। यथाऽनु विष्णुं भक्तस्तद्वदित्यर्थः। वस्तुतस्त्व् अनुगतत्वाऽऽदिबोधकाऽऽख्यातस्य गम्यत्वमिह द्र.। एवं च गर्भीकृताऽऽख्यातानुप्राणितार्थवचनसामर्थ्यमित्थंभूतलक्षणार्थ इति सुवचं भवति।

g) हीने कप्र. इति भा. सुवचः।

h) हेत्वर्थानर्थान्तरभूते लक्षणे कप्र.।

i) नापूटिदि. कप्र.। गतित्ववादी MW. चिन्त्यः।

j) इह द्वयोः कल्पनाऽऽख्यभावयोर्मध्ये प्रथमोक्तमनुलक्ष्य पश्चादुक्तस्य संभावितया श्रावितत्वाच्चाऽनुकल्पनाऽऽख्यस्योपसृष्टभावस्याऽप्रासङ्गिकत्वाच्च यथाकथमप्यभ्युगमे सति लक्षणविषयभूतवाचकस्य द्वितीयान्तपदस्याऽन्वयविघातकत्वाच्च गतित्वपक्षपातिनी मतिरर्वाक्तनी (तु. PW. प्रभृ.) नाऽऽद्रियेतेति दिक्।

k) आनन्तर्ये गतित्वकर्मप्रवचनीयत्वव्यतिरिक्तं प्रातिस्विकाऽन्वययोग्यमव्ययमनुमन्तव्यमिति।

l) आनन्तर्य इति भा., तृतीयार्थ इति K.। सप्तम्यर्थसामान्येऽथवा वक्तव्यः कप्र. अनुपदमोषध्यादिषु पश्वादीनां प्रतिष्ठापनात्मकाच्छ्रुतिलिङ्गात्। सर्वथाऽपि कर्मप्रवचनीयतामात्मनस्तु न जहातीति। अनु-सं√तन् इत्येवं वितथाऽनुमानीव प्रतीयमानः MW. चिन्त्य एव स्यात्।

m) लक्षणे कप्र.। अनन्तरपर्यायं स्वतन्त्रम् अव्य. इति भा.।

n) लक्षणे कप्र. (तु. ऋ ८, ४८,१३; तुटि. मा ११, १७[४]; वैतु. सा. अनु'''आततान' इति)।

o) अनु√दद्<√१दा>'अनु'''ददन्ते' इत्यत्र टि. द्र.।

p) तुटि. मा १२, ५[४]; वैतु. अनु-वि√क्रम्>अनुविक्रमस्व मै २,७,८[४]।

q) स्वार्थप्रधानम् अव्य.(वैतु.'अनुव्यायन्' मा१४,३०)।

r) इह 'अनुसंचरन्ती' इति पदं ब्रुवाणः सा. चिन्त्यः। एकस्मिन् पदेऽनेकस्वरानुपपत्तेः। अतः सप्तम्यर्थपर्यवसानके लक्षणे कप्र. एव प्रथमोऽनुः। अथ 'ऋतस्य पन्थामनु' इत्यत्र तृतीयार्थे वा लक्षणे वा द्वितीयोऽनुः कप्र.एव। ऋतस्य मार्गेण वा मार्गमुद्दिश्य वाऽऽगमनमात्रस्योषसां विवक्षितत्वात्। कुतः। उच्यते। अनुपदं ज्योतिषा त्रयाणां घर्माणामन्वागमनस्य श्रूयमाणत्वात्। आगमनमेवान्व् अन्वागमनस्योपपन्नत्वात् (तु. 'रेतः' शौ ८, ९, १३)। एवमस्यां कण्डिकायां त्रयोऽनवो भवन्ति। तेषां द्वौ कर्मप्रवचनीयावादिमौ चरमस्तु गतिरिति विवेकः। अन्यथैवाभिप्रयन्तौ सा.K. चोक्तदिशा चोद्यौ भवतः (तुटि. सस्थ. अन्वा√गा>अनु''''आगुः)।

s) इहेत्थंभूतलक्षणे वा हेत्वात्मकलक्षणे वा कप्र. द्र.। बाह्वृचे तु गतित्वमुपागतः (तु. ऋ १,१२७,१)।

t) तृतीयार्थे वा हेत्वर्थतात्पर्यको वा कप्र. द्र.।

u) लक्षणे कप्र.।'अनूत्सृजति[२]'इति 'अनुपर्यावर्तन्ते[२]' इति च द्व्युपसृष्टं द्विस्वरं च योगं पश्यन्तौ PW. MW. चाऽयथार्थदर्शिनौ भवतः।

v) वैतु. तै ५, २, ७, २ यत्रत्याद् 'अनु-उप√धा' इति योगाद्दिहत्ये पृथक्कृताऽनुके प्रयोगे सूक्ष्मेक्षिकयाऽवश्यं विशेषः कश्चन भवति। तदपश्यन्तःMW.K.प्रभृ.चिन्त्याः।

४[२a]; ७[b]; ९, ५[c]; ३, १, ३[d]; ४, ७[e]; ५, २[f]; ७, ४[g]; ४, २, १; ६, २; ७, १$; ६[h]; १०, ३[i]; ५, २, १[h]; ५, २[j]; ७, ५[i]; १०, ६[i]; ६, ४, १; ७, ४, ४$; ७, १$; ९, २[k]; ¶६, १, ५, ३[l]; ४[२]; ७, ७$; ८, १[m]; ९, ५[n]; ११' २$[o]; ३, ४, ७[p]; ५, ३$[q]; ७, १; ८, ३; ४$; ४, १, २[२]; २, ६[r];

a) एकतरत्र गतिमदङ्गिरोभिःप्रसर्पतः पुरोडाशस्य केवलं गच्छन्तमनुगच्छति इत्याकारकः पौर्वापर्यात्मकोऽनुसार्यानुसरणविशिष्टः संबन्धो न भवति। किन्तु स्वर्गं यतोऽङ्गिरस उद्दिश्य (=तत्-सहभावप्राप्तये) स्वभावतश्चलितुमशक्नुवन्नपि कूर्मत्वमुपगच्छन् पुरोडाश आत्मनः प्रसर्पणमकारयदिति तात्पर्यात् कूर्मीभूतस्य पुरोडाशस्योद्देशविशेषसाधनतामुपगतायाः प्रसर्पणक्रियायाः श्रावणे मन्त्रस्वारस्यात् कप्र. अनुर् न गतिरित्यभिसन्धिः। अन्यत्र लक्षणे कप्र. (तुटि. तै ६,५,११,१)। उभयत्र वैतु. PW. प्रभृ. 'अनु-प्र√सृप्' च 'अनु-परा√भू' च।

b) 'तृतीयार्थे' (पा १, ४, ८५) इति चीयमानाग्नेर्वेदिप्रवेशे करणं समर्पयितुमिष्टं द्र.। उलूखलमुपधेयमिति विधिर्भवति। नाभिर्हि तद् अग्नेश्चीयमानस्य भवति। तदुपधाने सति स्वनाभ्येवासावग्निर्वेदिं प्रविशति। तदनुपधाने स्वनाभिमपश्यन् यजमानस्य प्रामादुकस्य नाभ्या द्वाराऽसौ वेदिप्रवेशं कुर्वाणस्तं विहृणीयात्। मैवं भूदित्युपधेयमुलूखलमिति श्रुत्यर्थो भवति। अथवाऽधिकरणात्मकः सप्तम्यर्थोऽभिप्रेतः स्यात्तद्वचनश्च कप्र. द्र. (तु. मै ३, २, ७; काठ २०, ७; क ३१, ६ यत्र नाभि- इत्यस्य स१ श्रूयते)। उभयथाऽपि नाभिपदार्थस्य मुख्यलक्ष्यत्वेन समर्पणे सति स्पष्टे प्राकरणिके तात्पर्ये यदेतदपश्यन्तः केचिद् 'अनुप्रविशति' इत्येकपदात्मकं द्विस्वरं योगं प्रतिपद्यन्ते (तु. MW. K.) तन्नाऽऽद्रियेतेति दिक्।

c) तुटि. तै ५, २, ५, ४।

d) तृतीयार्थे कप्र. (तु. K.; वैतु. भा. लक्षण इति)।

e) अर्क्यम् (=अर्कभवं) साम शस्त्रं चाऽनुलक्ष्याऽर्के तदाधारेण विधा विधीयत इत्येव श्रुतिस्वारस्यं स्यात् (तु. तै ४,३,८;९ च तदुपरि सा. भाष्यं च [K. टि. च])। गतितया योजयन्तौ MW. K. च चिन्त्यौ भवतः।

f) प्रणुदितान् भ्रातृव्यान् उद्दिश्येत्येवंप्रकारकेऽर्थे कप्र. द्र.।

g) तृतीयार्थे कप्र.।

h) लक्षणे प्रकरणस्य मुख्यं तात्पर्यमिति कृत्वा तदुद्बलनप्रयोजनः कप्र.। ऐकपद्ये सति द्वैस्वर्यानुपपत्तेः। (वैतु. भा. PW. प्रभृ. 'अनुप्राविशत्' इति)।

i) लक्षणे कप्र. द्र.।

j) पश्चादर्थे अव्य. वा लक्षणार्थे कप्र. वा। प्रथमे कल्पे प्रथमायाः स्वयमातृण्णाया उपधानं कृत्वा (पश्चात्) प्राणनक्रियां कुर्यादित्यन्वयः स्यात्। द्वितीये कल्पे प्रथमां स्वयमातृण्णामुपधीयमानामनुलक्ष्य प्राण्यादिति संबन्धः। एवं चाऽन्यतरार्थकोऽनुरुत्तरयोर् उपधानयोरप्यनुवर्तयितव्यो भवति। नन्व् 'अनुप्राण्यात्' इत्येका द्व्युपसृष्टा क्रिया स्यादिति। नेति। कथम्। यावता सकृद् उत्तरे 'व्यन्यात्' इति च 'अपान्यात्' इति चोभे अपि क्रिये अद्व्युपसृष्टे सती 'प्राण्यात्' इति क्रियाऽपि तदन्व् अद्व्युपसृष्टेत्युपक्षिप्तामिति। अन्यथात्व ऐकपद्ये सति द्वैस्वरी नोपपद्येत।

k) लक्षणे कप्र.। यत्राग्निर्भवति तत्रैव पशव उपतिष्ठन्त इत्यर्थः। 'अनूपतिष्ठन्ते' इति सकर्मको द्व्युपसृष्टो योग इति यद् भा. च K. चोष्टस्तन्न। तदभिप्रेतस्य पश्चादर्थस्य प्रकरणेऽनभिप्रेतत्वाद् ऐकपद्ये सति द्वैस्वर्यस्याऽनुपपत्तेश्च (वैतु. मै ३, २, ३; ७; ९, २; ४, ७, ९ यत्र लक्षणार्थस्याऽप्राकरणिकत्वात् साकल्यार्थस्य च स्वारसिकत्वादिहाऽसंगतः पराभिप्रायः संगतो भवति)।

l) तुटि. तै ३, ४, ८, ३।

m) लक्षणे कप्र.। निष्क्रमणक्रिया पदषट्कपरिमितेत्यस्यैवाऽर्थस्य न त्विहाऽनुनिष्क्रमणार्थस्य प्राधान्येन विवक्षितत्वात्। अत एवाऽनौ पृथक् स्वरोऽप्यत्रैव ज्ञापको भवेत्। चिन्त्या अतो गतित्ववादिनो भा. MW. K. प्रभृ. (तुटि. 'अनु-नि√क्रम् >अनुनिष्क्रामति' इति)।

n) सप्तम्यर्थे कप्र. तु. ततः किञ्चिदिव प्राक् श्रूयमाणं 'सर्वासु…उप' इति। एस्थि. भा. प्रभृ. 'अनुसंचरति' इति योगमनुजानानाश्चिन्त्याः स्युः। अपलक्षणद्वैस्वर्यापत्तेः।

o) अन्तरिक्षमुद्दिश्य वाऽन्तरिक्षेण वाऽयनस्य विवक्षितत्वसंभवाल्लक्षणे वा तृतीयार्थे वा कप्र.।

p) आनन्तर्यार्थे स्वार्थप्रधानम् अव्य.।

q) छन्दोभिरेवैनं प्रजनयतीत्यानुपदिकाल्लिङ्गात् तृतीयार्थे कप्र. इति सिद्धमिव। वितथवादी MW. चिन्त्यः।

r) लक्षणे कप्र.। न त्वनुपदम् अनुन्यवचार- इति

५, १[a]; ६, ३[b]; ७, १[c]; १०, ४[a]; ५, ३, ३[२d]; ८, १[२a]; ३[e]; १०, १[f]; ११, १[g]; २[२h]; ६, ४, २[i]; ६, १[२h]; ¶७, १, १, ४[२]; ५[२]; ६[२]; ५, ५[j]; ६, ८[k]; ७, ४[l]; २, ४, १[m]; ७, १[२a]; ८, २; ४; ५; ३, ७, २; ४, ४, १[n]; ८, ३[२]; ९, १[o]; ११, ४[३l]; ५, ६, २[२p]; मै १, १, ७[f]; २, ६[q]; ११†; १५[r]; १६; ३, ११†; ३३†; ३९[s]; ४, ७[२f]; ५, १†; ५[२]†; ६†; ६, २; ८, ५¶[f]; ९[५t];†¶; १०, ३†; १७[२u]¶; ११, २[२]†; २, १, १०¶[v]; २, २[२]¶; ४, ७†; ५, ३¶[v]; ७[२]¶[w]; १०[४]†; ६, ११[f]; ७, २[२s]; ८†; ९†; १५[२];†; १०, ४[२]†; ६; १२, ४[x]; १३, ८[y]; १०[४]; ३, १, ४[२t]; ¶; ५[३z];

शब्दश्रवणादिहाप्य् अनु-अव√चर् इति भ्रमः स्यात्। इह लक्षणार्थस्यैव विवक्षितत्वात्। तस्मिन्न् शब्दे च हेतुमानिति वाऽऽनुषङ्गिक इति वाऽनोरर्थः। विस्तरस्तु वैश. द्र.।

[a]) तृतीयार्थे कप्र.।

[b]) यतः प्राणो न्यृतस्तत एवाऽपानोऽपि 'न्यृच्छेत्' इत्यस्यार्थस्य विवक्षातो लक्षणे कप्र. इत्येव युक्तम्। अतः K. अत्र वैस्पष्ट्यमर्हेत्।

[c]) तृतीयार्थे कप्र. द्र.। वाचमनु वाचा तया सहायभूतयेत्यर्थः। 'अनुप्रयन्ति' इति योगं मन्वानाः K. प्रभृ. तु चिन्त्याः।

[d]) गतित्व कर्मप्रवचनीयत्वाऽन्यतरसद्भावापेक्षया स्वार्थप्रधानम् अव्य. इत्येव साधीयः द्र.।

[e]) सप्तम्यर्थे कप्र. द्र.।

[f]) लक्षणे कप्र.।

[g]) लक्षणार्थस्यैव प्राकरणिकत्वाद् अनुर् अत्र कप्र. भवति। परा√भू इत्यस्य चाऽकर्मकं वृत्तं भवति (वैतु. MW. यः 'अनु-परा√भू' इति कल्पयन् सकर्मकं क्रिप. इच्छति)।

[h]) हेत्वात्मके तृतीयार्थे कप्र. (तु. भा.; वैतु. PW. प्रभृ. 'अनु…पुरा (आ वा) भवन्ति' इति)।

[i]) तुटि. तै ५, ७, ९, २।

[j]) अनुक्रमार्थेऽव्ययमित्यभिप्रैति भा.। अथापि खल्व् अधि-परि-वत् (तु. पा १, ४, ९३) अनुप्रयुक्तविभक्त्यर्थोऽनुवादकतामात्रेण सार्थकोऽप्यनर्थक इव स्याद् अन्यथा सिद्धेः।

[k]) लक्षणे कप्र. द्र.। एनमनुलक्ष्याऽस्य विषय इति यावत्। आनन्तर्यार्थे अव्य. इति भा.।

[l]) तुटि. तै १, ७, ६, ३।

[m]) तुटि. तै ३, ४, ८, ३।

[n]) प्रजापतिकर्तृकस्तुतिप्रयोगाऽभावे देवान्तरकर्तृकतदनुसारित्वप्रयोजितस्तुत्यनुप्रयोगाऽसंभवाच्चाऽपलक्षणाद्वैस्वर्यप्रसङ्गाच्च गतिभावेन अनुर् उत्तरां प्र-पूर्वां क्रियां नानुप्रवेशयितव्य इति।

[o]) तृतीयार्थे कप्र.। तत्र सत्रे केशवपनं सशिखं कुर्यादिति विधेरभिप्रेतत्वात्। अतः सशिख-विशिख-वपनविवेकाऽननुदर्शी K. चिन्त्यः।

[p]) एकतरत्र तृतीयार्थे कप्र.। 'अनुप्राणन्ति' इत्येवं योगमुशन् MW. चिन्त्यः।

[q]) तुटि. मा ४, २८।

[r]) लक्षणे वा तृतीयार्थे वा कप्र.।

[s]) पश्चादर्थे अव्य. द्र.।

[t]) तुटि. मा ११,१२;१७[४]। अन्यत्र 'यज्ञमनुलक्ष्य दम्पती अभ्राताम्' इत्येवं प्रकरणसंगत्या कप्र. द्र. (वैतु. MW. 'अनु…अभ्राताम्' इति)।

[u]) 'तान् अपिपद्यमानान् अन्वपिपद्यते' इत्यत्र तावद् अनुर् 'गतिर्गतौ' (पा ८,१,७०) इति गतिलक्षणं निघातमनुभवन्नपि सजातीयप्रयोगान्तरसाम्येन सस्वरः कप्र. स्यादित्यपेक्षा बलवतीव भवति। कदाचिन्मूलतो विद्यमानः स्वरः प्रमादाच्च्युतिं गमित इतीव चोत्प्रेक्ष्यते। तु. अनुपदमेवोपरिष्टात् 'तान् प्रजायमानान् अनु प्रजायते' यत्र अनुर् इति पृथक् कप्र., 'प्रजायते' इति च पृथक् क्रिप. भवति।

[v]) तुटि. तै १, ७, ४, २।

[w]) एकतरत्र यत्तु सुपा. 'अनुवर्षति' इत्येवमुपसृष्टमाख्यातं शिश्रावयिषितं भवति तदसङ्गतत्वाच्चिन्त्यं द्र.।

[x]) कप्र. यथा भवति तथा 'अनु-सम्-प्र√या>?अनुसम्प्रयात' इत्यत्रत्ये टि. यद्र.।

[y]) तुटि. तै ४, ४, ४, ८।

[z]) सकृद् 'अनुप्रतितिष्ठति' इत्यत्र गतिर्भूत्वाऽथ त्रिः कप्र. द्र.। यदा द्वयोः समानभावयोर्लक्ष्यलक्षणसंबन्धो विवक्षितो भवति पौर्वापर्यप्रकारकस्तदा तद्वचनः अनुः कप्र. वा स्याद् गतिर्वेत्युभयथाश्रुतेर्विकल्पः। यदा चैकस्मिन् वाक्ये प्रयुक्ताया गतिभूताऽनुविशिष्टायाः क्रियाया अर्थो वाक्यान्तरेऽनुपदिन्यनुवर्त्तयितुमिष्टो भवति तदा तदर्थं प्रकारद्वयमुपयुज्यमानं द्र.। तद् यथा।

२, १[२]†; ५¶[a]; ६[२];†¶[b]; १०; ¶३, ५; ६[c]; ८; ४, ५[d]; ६[३]¶; ¶६, ४; ८; ७, १[e]; ६[३]; ७; ८, ४¶; ९, ७[f]; १०, १[२g]; २[h]; ७¶[h]; ११, १०[h]; १६, ३†; ४, १, ७[i]; १०¶[j]; २, १¶[k]; ३, १¶[l]; ३[m]; ४, ५¶; ¶५, १; ३[२i]; ४[६n]; ७; ८[o]; ६, २¶; ३[४i]; ५[i]; ६¶[p]; ७, ४[२i]; ८, ९†; ९, १०[३]¶[i]; १०, २†; ६†; ११, २?[q]; ३†; ४[२]†; ५[२]†; १२, ४[२]†; १४, १२†; १४†; १६[२]†; १८†; काठ १, ६; २, ६[२r]; १२†; १५†; ३, ४[३]; ६[l]; ४, ११†; १३[s]; १६[q]; ६, २[t]; ८[i]; ९†; ११[२]†; ७, ४†: ५†; १३[i]; १४[३t]; ८, ५; ७[२]; ८[२]; १५; १७†; ९, १[२i]; ३; ४; ६[४u]; †; ११[४i]; १४[२i]; १८†; १०, ४[२]; १०[२v]; ११, २; ३[२]; ४[२]; ८; ९†; १०; १२, ५[३]; १३, ८[२]; ९[४]†; १४[२]†; १६†; १५, ७[i]; १६, १; २[४w]; ८[५x]; ९†; १५[५]†; १७, ८†;

अनुः पश्चादर्थकः कप्र. एव पुनः श्राव्येत तस्य चाऽऽक्षेपेणाऽनुवर्तनीयया मूलक्रियया क्रिवि. संबन्धः स्यादिति प्रथमः प्रकारः यथेह । अथ लक्ष्यलक्षणभूतसमानभावाभ्यां कर्तृत्वसंबन्धविशिष्ट-पूर्ववाक्यगतपदद्वयसकक्षतया समर्प्यमाणे स्वं स्वं भावं प्रति कर्तृभूते पदान्तरे एवोत्तरे वाक्ये श्राव्येयाताम् । पश्चादर्थकगतिभूताऽनुसहिता समग्रैव च क्रियाऽऽक्षेप्या स्यादिति द्वितीयः प्रकारो भवति यथा मै ३, ३, १०; काठ २२, २ इत्यत्र ।

[a]) **'हीने'** (पा १, ४, ८६) इति कप्र. । अधिकशक्तिहीनशक्तिभ्रातृव्ययोः प्रणोदनस्य सममभीष्टत्वात् तयोस्तत्ताऽति-अनुभ्यां द्योतिता भवति ।

[b]) तु. नापूटि. । न चेह **'स्यात्'** इत्याख्यातस्य विद्यमानत्वात् तेन गतित्वेन योगः स्यादित्युच्येत । प्रतिवाक्यं क्रियान्तराभावे भ्वस्तिरूपस्य क्रियासामान्यस्य विद्यमानत्वदर्शनान् नेह किमपि विवेकविनिगमकं विशेषान्तरमुत्पश्यामः । पूर्ववदेव च सदृक्-पदस्य **'अति'** इति कप्र. सान्निध्याद् विषयविवेकार्थं हीनार्थवचनोऽयं कप्र. एव द्र. ।

[c]) तृतीयार्थवचनः कप्र. । तादृक्-सकक्षपदसाहचर्यात् ।

[d]) प्रायिकसामान्यवस्तु सत्स्वपि बहुषु स्थ. एष तावत् परस्परं विशेषो भवति यथा कश्चिद् निपातोऽन्यत्र गतिर् भवत्यन्यत्र च कप्र. इति (प्रकृते तु. **अनु-प्रति √स्था>अनुप्रतितिष्ठति** मै ३, ३, १०; ४, ४ यत्र **अनुर्** गतिर्भवति) । एस्थि. यथोपलब्धि सौवरी स्थितिरेवाऽत्र नियामिका स्यादिति दिक् ।

[e]) तुटि. तै ६, १, ५, ३ ।

[f]) तुटि. मै १, २, १५ ।

[g]) एकतरत्र तुटि. तै ३, ३, ११, १ । अन्यत्र लक्षणे कप्र. ।

[h]) लक्षणार्थस्य प्राधान्येन विवक्षितत्वाद् **'अनु… प्रजायन्ते'** इत्येवं योगं पश्यन् तदन्तर्धापकः MW. चिन्त्यः । कप्र. इत्येव साम्प्रतम् ।

[i]) लक्षणे कप्र. द्र. ।

[j]) **'मूलम्'** इत्यनेन सम्बद्धो लक्षणार्थे तृतीयार्थे वा कप्र. द्र. ।

[k]) हेत्वर्थपर्यवसानके लक्षणे कप्र. । वितथदर्शी MW. चिन्त्यः । अकर्मकस्य जागरणस्य कर्माभिसंबन्धनैरपेक्ष्यात् ।

[l]) तृतीयार्थे कप्र. ।

[m]) तुटि. मै २, ५, ७ ।

[n]) चतुर् हीने वारद्वयं तु लक्षणे कप्र. ।

[o]) हीने कप्र. द्र. ।

[p]) आनन्तर्यार्थे अव्य. वा लक्षणे वा कप्र. द्र. ।

[q]) **'नु'** इति मुपा. ? (तु. पपा. संटि. नाउ. काठ ४, १६ च) । लक्षणे कप्र. (तु. **प्रति** तै १, ८, २२, १; २, ५, १२, १; मै ४, १०, १; शौ ७, २९, १; वैतु. SIM. **'अन्व् आचरण्यात्'** इति) ।

[r]) एकतरत्र तुटि. मा ४, २८, अन्यतरत्र लक्षणे कप्र. द्र. ।

[a]) व्यु. तृ१ सत् क्रिवि. भवति (तु. अदुस्- >२अमु-या- इत्यत्रत्यं टिप्पणद्वयम् [वैतु. सा.यः अब्-दु- इतीव प्राति. उपकल्प्य तृ. द्वि. अर्थे श्रूयत इत्याह ; GW. प्रमृ. च यदनु अब्-दा- इत्यस्य स्त्री. प्राति. तृ१ रू. भवति [स्वरतश्च पपा. 'या' इत्यतः पूर्वमवग्रहणतश्च चोद्यास्त्वेवं ते भवेयुः, वैतु. अब्दा->अब्दुया)]) ।

[b]) उस. उप. √१दा+कर्तरि कः प्र.। थाथादि-स्वरः(पा ३,२,३;६,२,१४४)। नापू. चैतच्च प्राति. व्यु.भिन्ने सती अपि समानप्रवृत्तिनी समजनिषातामिति तत्त्वं द्र. (तु. एपू. टि.) ।

[c]) नैप्र. *अ(प्>)ब्-भ्र- इत्येवं सतः पूप. अन्त्यलोपः द्र. । उस. उप. √१भृ+कर्तरि कः प्र. उसं. थाथादि-स्वरश्च (पावा ३, २, ५; पा ६, २, १४४ [तु. श्रुतिलिङ्गोपबृंहितः या ५, ५; शं. छाउ २, १५, १; वैतु. दे. [१, १०] √अभ्र्+अच् प्र. इति वा,< २अप्+√रा इति वा, ६अ+√भ्रंस्>भ्र- [बस.] इति वा, ६अ+√भ्राज्>भ्र- [तस.] इति वेत्येवं नाना व्यु. प्रदर्शुकः सन्नपि मुख्यभूतमिव गुणं तिरस्कारुकः]) ।

[d]) अप्सु-जा- इत्यत्र टि. द्र. ।

[e]) उस. उप. √प्रुष्+क्विप् । कृत्-प्रस्व. (पा ६, २, १३९) ।

[f]) उप. कर्तृ-वचनं वा स्याद् भाव-वचनं वा । प्रथमे, तस. पूप. तृतीयान्तं सत् प्रस्व. भवति (पा ६, २, २) । उत्तरे, बस. पूपप्रस्व. भवति (पा ६, २, १) ।

[g]) उस. इन्नन्त-कृत्-प्रस्व. (पा ३,२,२७;६,१,१९७; २, १३९) ।

[h]) णिजन्ता वृत्तिर् भवति ।

[i]) शतुः स्त्रियां ङीपश्च निघाते धातु-स्वरः(पा६,१,१८६)

[j]) १अभ्रिय- २अभ्रिय- इत्यत्र टि. द्र. ।

-याः ऋ २, ३४, २; -याम् ऋ १, १६८, ८; -$०ये शौ २, २, ४; पै १ ७, ४.

†अप्य,प्या[a]- -प्यः ऋ १, १४५, ५; ९, ८६, ४५; कौ २, ९६६[b]; जै ४, २०, ९; -प्यम् ऋ २, ३८, ७; ८; १०, ८६,१२; तै १, ७, १३,२; काठ ८, १७; शौ २०, १२६, १२; -प्या ऋ १०, १०, ४; ११, २; ९५, १०; शौ १८, १, ४; १९; -प्याः ऋ ३, ५६, ५; ६, ५०, ११; ७, ३५, ११; ९, १०८, ६; मै ४, १४, ११; शौ १९, ११, २; पै १३, ८, १२; -प्यानि ऋ ६, ४९, ६; -प्येभिः ऋ ४, ५५, ६.

‡अपि(य→)या[c]- -याः कौ १, ५८५; जै १, ५९, ८; ३, ४०, २.

१†अपस्[d]- -पः ऋ १,११०,१; २, १४, ११; १७,५; २२, ४; ३२, ४; ३८, ६; ४, ३३, ९; ५,७९, ९; ६, २३, ५; ३०, ३; ७,२०, १; ४०, ४; १०, १२, ४; ३५, १; ५३, ६; ८८, ६; खि ५, ७, १, ९[2]; तै ३, ४, २, २; ३,६$; मै ४, १२, ६; १३, २[2]; काठ १३, ११; १२; १६; १५, १३[2]$; १७, १८; कौ १, ४६६[2]; जै १, ४८, ६; शौ ७, ५०, १$; १८, १, ३१; -पसः ऋ ३, १२, ७; ६, ६९, १; तै ३, २, ११, २; मै ४,१२, ५; काठ १२, १४; कौ २, ९२७; १०४४; जै ४, २, ८; २२, १०; -पसा ऋ १, ५४, ८; ४, २, १४; -पांसि ऋ १, ६८, ३; ७०, ४; ८५, ९; १७४, ३; २, ३, ६; १७, ८; ३, ३, ३; ४, १९, १०; ५, ४७, ६; ७, [(४,१६, ६) २१, ४]; ६३, ४; ८, ९६, १९; २१; काठ १०, १३; [°पस्- तद्°, नर्य°, विघ्नन्°, सु>स्व्°]

१अपस्य[e]- -स्यम् ऋ १०, ८९, २.

?२अपस्य[f]- -स्यः मा १०,७;

[a]) तत्रभवीये यति यतोनावीयः स्वरः (पा ४, ४, ११०; ६, १, २१३)।

[b]) सा. इह 'आप्यः' इति दीर्घादितया पठति (वैतु. पपा. सा. अपि च स्वयं बाह्वृचेऽस्मिन्नेव निगमे)।

[c]) नापू. प्राति. य>इय इत्येवं प्रादेशिकमुच्चारण-मात्रं द्र.। 'इयः' इति भिन्ने प्रत्यये सति अपिय- इति जश्त्व-मध्यस्य मध्यस्वरस्य च प्राति. श्रवणापत्तेः। यथा ध्यच्कत्वविघातेऽपि नाऽऽद्युदात्तत्वविघात इत्यपरश्चायं यत्-प्रत्ययान्तत्वे हेतुः (तु. अम्रिय-, अग्निय-; अप्याः इति ऋ [९,१०८,६] पाभे. च)।

[d]) असुन् प्र.(पाउ ४,२०८)। नित्स्वरः (पा६,१,१९७)।

[e]) तत्रसाधवीये यति तित्-स्वरः (पा ४,४,९८; ६, १, १८५)। यत् PW. प्रभृ. ३अपस्- (<२अप्-) इत्यतः प्र. उत्पत्तिमाहुः, तद् मन्त्रस्वारस्यनिबद्धचेतोभिर् विमृश्यम्।

[f]) यनि. नापू. प्राति. अभिन्नमितीव उ. च म. चाभिप्रयन्ताव् अपां विशेषणतया चाऽन्वयमुशन्तौ जसः सुमादेशमाचक्षाते। का. मै. काठ. इत्यत्र शाखान्तरेष्वपि समानः पा. इति समानो न्यायः प्रवर्तेत। छन्दोऽनुरोधात्तु मा. प्रभृ. यः पा. भवति स एकेनाऽक्षरेणोनः द्र.। यद् माशब्रा. ५,३,५,१९ इत्यत्र व्याचक्षाणः सा. 'अपस्युवः' इत्येवमाकारकं पा. पपाठ, ततः किमेतत् सिद्ध्येद् यथा तादृशस्यैवाऽक्षरपूर्तिकरस्य मूलतः सतः पा. संप्रति मा. प्रभृ. उपलभ्यमानः पा. भ्रेषमात्रमुताहो तै. शाखया विशेषेणाऽभिसंबद्धत्वात् तदीयसंस्कारवशात् सा. उक्तपूर्वं पा. इह पपाठेत्यादिर् विषयो विमृश्यः। 'अपस्युवः' इति पा. मूलतो विद्यमानश्चेत् स्वीक्रियेत तर्ह्ययं शाखासापेक्षो विवेकः द्र.। तै. स्त्रियामिह ऊङ् भवति मा. प्रभृ. शाखान्तरेषु च न भवतीति। तै. अपि न ऊङ्-अन्तं प्राति. इति भा. इत्यपि यस्थ. उक्तपूर्वं समवधेयम्। पाम ४, ४, १४० इत्यत्र 'स्वार्थविज्ञानात् सिद्धम्' इत्युक्तिमुपजीव्य प्रवृत्तम् 'उक्तं वा' (पाम ५, ४, ३०) इत्येतदप्यत्रानुसंधेयम्। तत्र ह्येतदुक्तं भवति। 'अपस्यो वसानाः' इत्यत्र प्रथमं पदम् अपः इत्यस्य स्थाने स्वार्थिकमिति। तथात्वे त्वन्यो दोषः संभवेत्। अपां विशेषणतयाऽन्वयेऽभ्युपगम्यमाने तासां स्वाच्छादकत्वमनुपयुक्तं स्यादिति। अन्यद् हि सदन्यद् वसत इत्यत्र श्रुतिप्रामाण्यमुभिक्षं द्र. (तु. ऋ. १, १६४, ४७; ९,१६,२ प्रभृ.)। यच्चास्माभिरिहैव द्वितीये ब्राह्मणारण्यकीये विभागे प्रथमैकवचनतया वरुणपदेनोत्तरार्धवर्तिना सामानाधिकरण्यमुखेन विचिख्यासितं तदपि मन्त्रपदयुक्तिस्वारस्यविसंवादभिया सुत्यजमिति शोधः द्र.। अत्राऽर्वाक्तनैः (PW.प्रभृ.)?४अपस्य- इत्यतः ?अपसी- इति स्त्रीलिङ्गं शब्दरूपं संभाव्यते। एतच्च ?४अपस्य- इति प्राति. १अपस्य- इत्यतः सर्वथा पृथक् सद् ३अपस्- (<२अप्-) इत्यतो यत्-प्रत्ययान्तं द्र.। तत्र कियत् तत्त्वं भवतीत्यत्र विमर्शे सुधिय एव शरणं स्युः। तथात्वे आपोऽपस्या उक्ता भवेयुरित्ययुक्तोऽन्वयः पूर्ववद् भविष्यतीति दिक्।

का ११, ४, ३; मै २, ६, ८; काठ १५, ६. [°स्य- सु>स्व्°]

√अपस्यु[a], अपस्युात् ऋ १, १२१, ७.

१अपस्या[b]- -स्यया ऋ ५, ४४, ८; -स्याम् ऋ ७, ४५, २.

†अपस्यु[c]- -स्यवः ऋ ९, १४, २; -स्युभिः ऋ ९, ७६, २; कौ २, ५७९; जै ३, ४७, ५.

†अपस्यू[d]- -स्युवः ऋ १, ७९, १; ९, [२, ७; ३८, ३]; ५६, २; १०, १५३, १; तै १, ८, १२, १$[e]; ३, १, ११, ५; कौ १, १७५; २, ३९३; ६२९; जै १, १९, १; ३, ३१, १३; ५२, ६; शौ २०, ९३, ४.

२अपस्[f]- -पसः ऋ १, ७१, ३; ९२, ३; २, २८, ५; ३, २, ७; ८, ५; ६०, ३; ४, ३३, १; ५, ४२, १२; ६, १७, १२; ८, २, १७; ९, ७२, ६; १०७, १३; खि ३, १३, १; ४, ११, २; मा २१, ३७; २८, ८; ३३, ७५†; ३४, २; का २३, ४, ९; ३०, १, ८; ३२, ६, ६†; तै १, २, १०, २; मै १, ९, ४; ३, ११, २; †४, १३, १; १४, ९; काठ ९, ९; क ८, १२; †कौ २, ७०; ११८; ११०७; †जै ३, ७, ८; १२, ५; शौ ६, २३, १; १९, २, ३; २०, १८, २†; पै ८, ८, ९; ९, ११, ९; -†पसम् ऋ १, २, ९; कौ २, १९९; जै ३, १८, ६; -पसा ऋ १, ३१, ८; ६, ६७, ३; १०, १०६, १; तै ७, १, १८, १; †मै ४, ११, १; १४, १०; काठ ४१, ९[६]; -पसाम् ऋ १, ९५, ४; १६०, ४; ३, २, ५; ६, ६१, १३; १०, ५३, ९; ७५, ७; खि ५, ७, १, ९; मै ४, १३, २†; काठ १५, १३; ३५, १२; क ४८, १२; पै ८, १४, ४†; -पसि ऋ ३, १, ३; ११; -प(:>)सु[g] ऋ ८, ४, १४.

अपस्-तम,मा[h]- -मः ऋ १, १६०, ४; १०, ५३, ९; ११५, २; -मा ऋ ६, ६१, १३; १०, ७५, ७; काठ ३५, १२; क ४८, १२; -माः खि ५, ७, १, ९; मै ४, १३, २; काठ १५, १३.

३अपस्-(<२अप्-)[i]

अपस्-व(त्→)ती[j]- -तीः, -तीभ्याम् काठ २२, १.

३अपस्य[k]-

२¶अपस्या[l]- -स्याः तै ५, २, १०, १[३]; ३[२]; ३, १, ४[२]; मै ३, २, ८; ९; काठ २०, ९[७]; १०[५]; क ३१, ११[८]; १२[६].

अपस्य-व(त्→)ती[m]- -तीभ्याम् तै ५, ४, ४, ५.

?४अपस्य[n]- -स्यम् ऋ १०, ८९, २.

?अपसी[o]- -स्यः मां १०, ७; का ११, ४, ३; मै २, ६, ८; काठ १५, ६.

अस- अन्°

अप्स्यु[p]- -प्स्यस्य ऋ १, १२४, ५.

---

[a]) १अपस्- इत्यतः क्यजन्तो नाधा. द्र. ।

[b]) स्त्रियां भावे अः प्र. ततश्च टाप् (पा ३, ३, १०२; ४, १, ४) ।

[c]) उः प्र. (पा ३, २, १७०) । प्रत्यय-स्वरः ।

[d]) 'ऊङुतः' (पा ४, १, ६६) इत्यत्र उसं. स्त्रियाम् ऊङ् प्र. तत्स्वरश्च ।

[e]) छान्दस उवङ् इत्येवं वदन् भा. ह्रस्वान्तं प्राति. मेन इति विमृश्यम् ।

[f]) कर्तर्य् असिः प्र. उसं. (पाउ ४, २२३) । प्रत्यय-स्वरः ।

[g]) अप्- इति प्राति. रू. इदं मन्वानः PW. भ्रान्त इव । तादृश्याः कल्पनाया अनवसरत्वात् (तु. शौप्रा. ३, ११, ४; ORN. 'अंहस्-> अंहसु' प्रमृ. रू.) ।

[h]) आतिशायनिकस्य तमपः पित्त्वान्निघाते स्वरेऽभेदः ।

[i]) ?४अपस्य- → ?अपसी- इत्यत्र द्वयोः प्राति. मूल-शब्दतयाऽभ्युपेतमर्वाक्तनानामिदं भवति । तद् यथायथं विमृश्यम् ।

[j]) आतिशायनिके मतुपि स्त्रियां ङीप् ।

[k]) नाउउ. प्राति. निष्पत्तिप्रदर्शनमात्रप्रयोजनमिदं प्राति. द्र. ।

[l]) असुगन्तत्व-परिणाम्य्-अप्-शब्द-वन्मन्त्रोपधेय-यज्ञियेष्टकाविशेषवचनं स्त्री. प्राति. द्र. (पा ४, ४, १२५; भा. च यद्र.) ।

[m]) २अप्- >-पः[=१अपस्-] तै १, ४, ४५, ३; ४६, २ इत्यत्र भा.द्र.। अत्र पूर्वोक्तं स्वार्थिक-यत्-प्रत्ययव्याख्यानपरं (पाम ४, ४, १४०; ५, ४, ३०) इत्यत्रत्यं व्याख्यानमप्यनु-संधेयम् ।

[n]) नाउ. प्राति. निष्पत्तिसंबन्धविशेषप्रद्योतनार्थं भिन्नमूलजत्वप्रदर्शनार्थं च चपू. पृथगुपात्तं द्र. । १अपस्य- इत्यत्राप्येतदेव प्राति. भवतीत्यत्र तु. MW. ।

[o]) नापू. स्त्रीप्रत्ययान्ततयाभिमतं प्राति. द्र. तु. MW. (तु. ?२अपस्य- इत्यत्र गतं टि. अपि) ।

[p]) चातुरर्थिको यः प्र. उसं. (पा ४, २, ८०) । तत्-स्वरः। व्यु. भूयानपि दुष्कल्पनाविमर्शः वैश. अनुसंधेयः ।

अप्तु[a]– -**प्तुः** मा ५, ३५; का ५, ९, १; तै १, ३, ४, १; ६, ३, २, २; मै १, २, १३; काठ ३, १; २६,२[३]; ३४,१५; क २,८; ४०,५[३]; –**प्तुभिः** मै १, १,१३; ४, १, १४; –¶**प्तुम्** तै ६, ३, २, १; २; मै ३, ६, १[२]; काठ २६, २; क ४०, ५.

¶**अप्तु-म॒(त्→)ती**[b]– -**त्या** मै ३, ९, १[३].

अप्तु-शस्(:)[c] खि ५, ५, १०.

अ॒म[d]-

अम-रा॒ज्[e]– -**राजौ** ऋ १०, १३२, ७.

†**अ॒प्न-वान्**[f]– -**वानः** ऋ ४,७, १; मा ३, १५; १५, २६; ३३, ६; का ३, ३, ५; १६, ५, ७; ३२,१,६; तै १, ५,५,१; मै १, ५,१;५[२]¶; काठ ६,९; क ४,८.

*आप्नवान॒[g]-

अ॒म-वान[h]-

†**अप्नवान-व॒त्**[i] ऋ ८, १०२,४; खि ४, ९,२; तै ३,१, ११,८; मै ४, ११,२; काठ ४०, १४; कौ १, १८; जै १, २, ८.

†**अ॒मस्**[j]– -**मः** ऋ १,११३,९;२०; १०, ३६,१३; १०६, ९; मै ४, १४, ११; –**मस** ऋ १०,८०, २. [°**मस्**- अन्°, दान°, सु>स्व्°]

†**अमः(<स्)-स्थ॒**[k]– -**स्थः** ऋ ६, ६७, ३; मै ४, १४, १०.

†**अ॒मस्-व(त्→)ती**[l]– -**ती** ऋ १०, ४२, ३; शौ २०, ८९, ३; –**तीम्** ऋ १, ११२, २४; मा ३४, २९; का ३१, १,२३; –**तीषु** ऋ १, १२७, ६.

अ॒प ऋ १, ११३, १६[m]; १०, १०५, ३[n]; तै ६, ६, ८, २[o];

---

[a]) कर्तरि **तु** प्र. (तु. पाउ १, ७५)। प्रत्यय-स्वरः।

[b]) '**ह्रस्व-**' (पा ६,१,१७६) इति **मतुप** उदात्तत्वम्। स्त्रीवृत्ते **ङीपः** (पा ४, १,६) पित्त्वान्निघाते स्वरेऽविशेषः।

[c]) '**अस्तुशः**' इति शांश्रौ (८,२४,१) पाठः।

[d]) **नन्** प्र. उसं. (पा ३, ३, ९१ [तु. **अ॒भ्न-**,**शि॒वन-**, **स्व॒प्न-** प्रमृ.])। यत्तु केषांचित् (तु. भा. [तै १,५,५,१]; MW.) **अ॒मस्-** इत्येतदेव लुप्तान्त्यसकारतया श्रूयत इति मतं भवति, तच्चिन्त्यम् (यनि.>√***अप्न्**>**अ॒मस्-** इति वस्तुस्थितेः [पाप्र. कृते तु. **अ॒मस-**])।

[e]) उस. **क्विबन्त-कृत्-प्रस्व**.(पा ३,२,६१;६,२,१३९)।

[f]) बस. पूपप्रस्व. (पा ६, २, १)। उप. √***वान्** (=√**वन्** [तु. √***अप्**, √**आप्** च])+भावे **क्विप्** >***वा॒न्-** इति (तु. उ. म. च [मा ३, १५]; वैतु. भा. [तै १, ५, ५, १] **अ॒मस्-**[>?] **अ॒म-**+मत्वर्थीयः **वनिप्** प्र. (पावा ५, २, १०९) तस्य च पित्त्वाद् निघाते स्वरः प्रकृत्या भवति। **अ॒मवान्नामा** कश्चिद् भृगूणामन्वये जातस् तदवान्तरकुलप्रवर्त्तक ऋषिर् बभूव। तदपत्यभूता बहुषु '(=***आमवान॒-** [=नाउ.]>) **अ॒मवानः**' इत्युच्यन्ते। भृगुत्वसामान्याच्च ते **भृगवः** इत्येवंविशिष्टा अपि श्रूयन्ते (तु. मै १, ५, ५; वैतु. [पक्षे] मा., सा. प्रमृ. च भृगुभ्योऽन्यः कश्चिदृषिर् **अ॒मवानः** [=एउ. >प्र१])।

[g]) **अपत्येऽर्थे अण्** प्र. (पा ४,१,११४)। नापू. यनि. रू. वस्तुतोऽस्य प्राति. द्र. (बहुष्वपत्यार्थकस्य प्र. लुग्विषयत्वात् [तु. पा २, ४, ६५])।

[h]) नाउ. व्यु. औपयिकं भवति। सस्व. एपू. द्र.। उप. √**वन्**+भावे **घञ्**। यद्वा नाउ. स्थ. छन्दोऽनुरुद्धोऽन्त्याऽकारोपजनः द्र. (=एपू. इत्यभिसन्धिः [तु. टि. २अ॒प्->*१अ॒प-, औ॒र्व॒*- (=उ॒रु->औरव॒- इत्येवं सुपठं द्र.])। यत्तु क्वचित् (तु. GW.) **शानजन्त**-प्रकारकतया व्यु. समकेति, तद् √***अप्न्**> ***अ॒ममान-**>यनि. इत्यन्यतो निरवद्यं च √***अप्** > ***अप्नुवान॒-**>यनि. इत्यन्यतः स्वरविसंवादतश्चिन्त्यं च द्र.। सर्वथापि एपू. चैतच्चोभे प्राति. एकार्थवृत्तिनी भवत इति तत्त्वमवधेयम्।

[i]) तुल्यार्थे **वतिः** प्र. (पा ५,१,११५)। तत्-स्वरः।

[j]) पाप्र. **असुन्** प्र. **नुडा**गमो नित्स्वरश्च (पाउ ४, २०८; पा ६, १, १९७ [वस्तुस्थित्यर्थं तु. **अ॒म-**])।

[k]) उस. उप. √**स्था**+**कः** प्र. अन्तोदात्तश्च (पा ३, २, ४; ६, २, १४४)।

[l]) आतिशायनिकस्य **मतुपः**, स्त्रियां **ङीपश्च** (पा ४, १,६) पित्त्वान् निघाते स्वरेऽविशेषः।

[m]) स्वार्थप्रधानम् अव्य. (तु. पपा.; वैतु. सा. प्रमृ. '**अ॒पप्रा॒गात्**' [इति कृत्वाऽनिष्टद्वैस्वर्यं प्रसञ्जुकाः])।

[n]) वर्जने कप्र. '**यो॒ः**' (?**अ॒यो॒ः** [तु. ORN.]) इत्येतदन्वितः। 'यत् तविषीवान् इन्द्र आ-युयुजे, (तद् असौ) **अप योः** पापजे [√**पज्**>**पा॒पज्**+**केन्** प्र.]अभूत्') इति द्र. (वैतु. सा. '**अ॒प-यो॒ः** (=अपयोजिता?) इति व्युत्पत्तितः स्वरतो रूपतश्च मिथ्याभूतं प्राति. प्रतिपादुकः; GW. प्रमृ. च '**अ॒प**···**पा॒पजे**' इत्याख्यातमास्थायुकाः सन्तस्तिङ्स्वरप्रामाण्यं प्रति पर्यनुयोज्याः)।

[o]) वर्जने कप्र. '**तनू॒ः**' (=द्वि. उसं. [पा २, १,१२]) इत्येतदन्वितः (वैतु. भा. '**अ॒पन्यधत्त** [<अप-नि√धा] इति न्याय्येतरद्वैस्वर्यदूषितोऽर्थतोऽसंगतश्च योग इति [देवानामग्रे तस्य तस्य यज्ञस्य निधान एव प्रजापते-

शौ १९, २०, १a; पै १, १०८, १a; २,४१,२b; ३,२९, ४?c; ५, ३४, ४d; ९, ७, १०?c.

अप√कष्, अपाकषन् शौ १०, ७, २०.

अप-काम'- -मम् ऋ ६, ७५, २; मा २९, ३९f; का ३१, २, ३f; तै ४, ६, ६, १f; ५, ६, १, ३g; मै २, १३,१g; ३,१६, ३f; काठ ३९, २g; ४६, १f; शौ ३, १३,३g; पै ३, ४, ३g; १५, १०, २f; -मस्य शौ २, १२, ५; पै २, ५, ५; -मात् शौ ९,१३,८; पै १६, ७४, ८.

अप√कि>√२चि द्र.

अप√कित्<>चित्, अपचिकित्सति शौ १३, २, १५.

अप√कृ, †अप⋯करत् ऋ ८, १८, ७; कौ १, १०२; अप⋯करात् जै १, ११, ६†h.

अपकृणुत>ता शौ ३, ९, १; पै ३, ७, २.

अप-कृत- -तः पै १, ८९, २.

¶**अप-क्रियमा(ण→)णा**- -णा काठ २७, ९.

अप√१कृत्, अपकृन्तत् पै ७, १३, १–१२; ¶अपाकृन्तत् मै २,५, २; ¶अपाकृन्तन् तै २, १, २, २; काठ ११, ६.

अप√क्रम्→क्राम्, ¶अपक्रामति तै २, ३, १३, २; ३, १, १, २; ५, २; ६, ३, १०, ३; मै १,९, ४५; २, ४, ८; काठ ९, १२६; १२, १३२; १३, १२२; २५,१; २९, ४; क ३८, ४; ४५, ५; शौ १२, ५, ६$; ¶अपक्रामति तै २, ३, ३, ४; १३, २; ६,५, १०, ३; मै ४, ८, ६; ¶अप⋯क्रामति तै २, २, १, २; ४; ३, १, १, २; ६, ६, ७, ३; काठ १३, १; २०, ८; ¶अपक्रामतः तै २, १, १, ३२; काठ २७, २; क ४२, २; अपक्रामन्ति ¶तै ५,७,९,२; ६, ४,८,२; ¶मै १, ४, ५; ६; २, १, ३; ४, ८, ६; ¶काठ ७, ७; ८, १३; २९, ४; ३२, ३२; ३४, ७; ¶क ८, १; ४५, ५; शौ १२,६, ५; पै १६, १४१, ५; ¶अपक्रामन्ति मै ४, ५, ६; ¶अप⋯क्रामन्ति तै २, ६, ८, ७; ३, ५, ४, ३; ५, ५, ९, ३; ६, १, ४, ७; अपक्रामः पै ३, ३६,१; अपक्रामतु पै १६, १४०, ६; अपक्राम ऋ १०, १६४,१; शौ १०, १,१४; †२०, ९६,२४; पै १६,३६,४;

स्तत्तद्वधादेशनस्य तात्पर्यस्वाभाव्याद् विचारपूर्वकं कस्यचिद् यज्ञस्य गोपने तदसंभवाच्चेत्यभिसन्धेः]) ।

a) वर्जने कप्र. 'वधम्' इत्येतदन्वितः ('यं [यजमानम्] अग्न्यादयो देवा न्यधुः [=रक्षितवन्तः] स पौरुषेयं वधम् अप [भवति], इति वा. द्र. [तु. WI.; वैतु. सा. अपन्यधुः]) ।

b) तु. ऋ १०, १५९,२ यत्रत्यः 'अनु⋯उपाचरेत्' इति साधुरन्वयः सुलभो भवति । इह त्व् अप इति पदं दुरन्वयं द्र. ।

c) अयं मन्त्रार्धः पै २, ७७, १; ९०, ३ इत्यत्र श्रुतपूर्वो भवति । यत् त्रिष्वपि स्थलेषु मूको. 'अप' इत्येवं समानं श्रूयमाणेऽपि स्थलद्वये शाखान्तराऽनुकृतिमात्रपरेण सं. 'अह' इत्येवमपाठि (तु. शौ १, ३४, ९), यच्चेहाऽन्ते चौर्यभयाक्रान्तेनेव मूको. 'अप' इत्येव पुनः प्रतिष्ठामिवाऽऽपादि, तद् अर्धजरतीयमानं चाऽसच्चेति भूयस्तरामिव विविच्यं खेदकरं द्र. । वस्तुतस्तु सर्वत्रेह 'अपि' इति शोधः द्र. । एवं हि नाम समानश्रुतिमताऽन्तिमेन पादेन सामञ्जस्यं भवेत् । यथा च तत्रापि पादे शोधोऽपेक्षितो भवति तथा चेतस्->-सि इत्यत्रत्ये सस्थ.टि.अद्र.।

d) वर्जनार्थीयः कप्र. (पा १, ४, ८८) ।

e) 'अयम्' इति शोधः सुलभः द्र. ।

f) कतमस्तावदिह समासः ? अर्थाऽभावे अस. इति (तु. सा. [ऋ ६, ७५, २]; उ. म. च. [मा २९, ३९]) । नेति । किमिति । अत्यन्तीयस्य वा संसर्गीयस्य वाऽन्योन्यीयस्य वाऽपि विशिष्टस्य सतोऽभावस्याऽप्राकरणिकत्वात् । न हि प्रकृतायां श्रुतौ शत्रोः कामाऽभावो धनुःसाध्यत्वेन शुश्रावयिष्यते । किं तर्हि, तदीयानां कामानां वैपरीत्यं नाम नैष्फल्यमिति यावत् । न चासावप्यव्ययार्थ एव भवति, अतस्तत्प्राधान्येऽप्य् अस. एवेति कृत्वेष्टापत्तिरिति । तथा स्थिते √कृ इत्यस्य साक्षात् कर्माऽनुपलम्भानुपपत्तेः श्रुत्यन्तरे (शौ २,१२,५) च कर्मषष्ठ्या अमूत्वाऽभावानुपपत्तेश्चेति । एवं तावत् प्रास. स्यादिति (तु.सा.शौ २,१२,५) । नेति । कुतः । तथा सति पूपप्रस्व. स्यात् (पा ६,२,२) । तर्हि का गतिः । विशिष्टप्रकारकोऽव्ययंभविष्णुस् तस. इति कृत्वा वैपरीत्यलक्षणाव्ययार्थप्रधानः सासस्व. इति । भवतु वा विशिष्टप्रकारकः (अपगतं [भावे क्तः] कामात् कामस्य वेति) प्रास. एव यत्र पूप. प्रधानं भवति स्वरश्चान्तोदात्तः उसं. (पा ६, २, १८७ [तु. भङ्ग्यन्तरेणैतदभिप्रयन्तः PW. प्रमृ.]) ।

g) वा. क्रिवि. द्र. ।

h) नापू. बाह्वृचः पाभे. द्र. ।

अपक्रामत पै १३, ४, १२[a];
¶अपाक्रामत् तै १, ४, १, १; २, ३, ७, १[२]; ३, ३, ७, १; ५, ४, १, २; ९, १; ७, ४, १; ६, १, ४, १; ४, ११, २; ७, ५, ८, १; मै १, ९, ४[५]; २, २, १; ४, ८; ५, ५; ३, १, २; ९; ३, १; ६, ६[२]; ८, ५; १०, २[६]; ४, १, १३[२]; ३, ९; ४, २; ५, ९; ६, ४; काठ ८, २[२]; ९, १२[६]; ११,६; १२, ३;५; १९, १; २; २३, ३[३]; २५, ६; २६, १; २७,१;९; ३०,४;३१,१०; १२; ३२, ६; ३६, १; क ६, ७[२]; २९, ८[२]; ३९, ४; ४०, ४; ४२, १; ४६, ७; ४७,१०; ११; ¶अपाक्रामताम् मै ३,१०, ६; काठ २३, ३; २९, १; क ४५, २; ¶अपाक्रामन् तै २,६, ३, २; ३, ३, ७, २; ५, १, १, १; ६, ४, ८, १; मै १, ८, १; २, ३, ७; ३, ६, १०; १०, ६; ४, ५, ८; काठ १०,११[२]; १२, ५; १८, १९; २३. ३; २९,१; ९; ३७, १; क २९, ७; ४५, २; ¶अप···अक्रामन् काठ २७, ४; क ४२, ४; ¶अपक्रामेत् काठ ८, १२; १२, १३; १३, १२; २५,१; क ७, ७; ३८,४.

अपचक्राम पै १६, ७३, १; ¶अप···क्रमिष्यन्ति तै ६,४,८, २; ¶अपक्रमिष्यामि काठ २८. ७; क ४४, ७; अप···अक्रमीत् शौ ८,१,२१; पै २,२७,४;३,२, ६;१६,२,११; अप···अक्रमीत् तै ६, १, ६, ६¶; पै ३, २, ६; अप[२](अक्रमीत्) पै १६, २, ११.

¶अप-क्रम[b]- -मः काठ ८,१२[२]; क ७, ७[२]; -मम् काठ १८, १९; क २९,७; -मात् काठ २९,९.

अप-क्रमिन्- अन°

¶अप-क्रम्य[c] तै २, ४, ३, १; २[२]; ६, १, ३, १; ६, ६; २, ७, १; ३; काठ १८, १९; क २९, ७.

अप-क्रान्त,न्ता[d]- -न्तः खि ५,१८, १; मै २,५,१¶; शौ २०,१३५, २; -न्तम् पै ८, १०,९; -न्ताः काठ १०,११¶; -न्तानि तै २, २,८, ३¶; -न्तायाम् तै ६, ४, ११, २¶.

¶अप-क्रान्ति[e]- -न्तिः मै १, ८,४.

अप-क्रामत्[f]- -मन् शौ ७, ११०, १; -¶मन्तः काठ २३, ७; क ३६, ४. [°मत्- अन°]

¶अपक्रामन्ती[g]- -न्ती मै १,४, १२.

¶अप-क्रामम्[h] मै १, ४, १२[२].

¶अप-क्रामुक[i]- -काः तै ५, ७, ९, २. [°क- अन°]

अप-क्रियमाणा- अप √कृ द्र.

अप √क्री

अप-क्री(त→)ता[j]- -ता पै ३, २२, ६; -ताः शौ ८, ७, ११; पै १६, १३, १.

अ-पक्व- -क्वम् पै ९, २२, २१.

अ-पक्ष[k]- -क्षः तै ५, २, ५, १¶; -क्षाः शौ ११, ७,२१; पै १६, १५५, १.

अप √१क्षि, *क्षी, अपक्षीये[l], अप-(क्षीये) पै ५,१४,६;अपक्षीयेत[m] तै ३, ५,१, ३¶.

¶अप-क्षीयमाण[n]- -णम् तै ३, ५, १, ३.

अपक्षेय-तम- अन°

अप-क्षुध[o]- -धम् पै १६, ९३, १-१०; ९४, १-७; ९५, १-९.

¶अप √क्षै, अपक्षायति मै १, ८, ९[२]; काठ ३५,१७; क ४८,१५; अपक्षायेत् मै १, ८, ९[२]; काठ ३५, १७[२]; क ४८, १५[२].

अप √गम् >गमि, अप···गमेत् शौ ६, ४, २.

अप(गमयन्तु) ऋ ८, १८,९.

अप-ग-, अप-गामिनी- अन°

---

[a]) 'अपधावत' इति शौ (४, ३७, १२) पाभे. ।

[b]) गस. थाथादि-स्वरः । उप. भावे अप् प्र. उसं. । पाप्र. तु. घञि वृद्ध्यभावः (पा ७,३,३४; ६,२,१४४) ।

[c]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९) ।

[d]) प्रास. अव्यय-पूप्रस्व. (पा ६,२,२) । उप. कर्तरि क्ते प्र. उपधाया दीर्घत्वम् (पा ३,४,७२; ६,४,१५) ।

[e]) गस. उप. क्तिन्नन्ते पूपप्रस्व. (पा ६, २, ५०) ।

[f]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९) ।

[g]) स्त्रियां ङीपः (पा ४,१,६)पित्त्वान्निघाते स्वरेऽभेदः ।

[h]) अत्र यनि.णमुलन्तःपाठः समीचीन उत वा 'अप-क्रामम्'इति शत्रन्त इत्यत्र मूलकोशीयविसंवादार्थं यस्थ.संटि.द्र.

[i]) गस.उकञन्त-कृत्-प्रस्व. (पा ६,१,१९७;२,१३९)।

[j]) कर्मणि क्तेऽनन्तरगतिस्वरे प्राप्ते प्रवृद्धादित्वम् उसं. (पा ६, २, १४७) । अथ प्रवृद्धादीनां मूलतो भावे क्ते निष्पन्नानां सतां मतुबर्थकाऽच्-प्रत्ययान्तत्वं संभाव्यमानं भूयोविमर्शसापेक्षमित्यन्यत्राऽनुसंधेयम् ।

[k]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

[l]) लटि उपु१ इति कृत्वा '°क्षीय' इति सुपा.यनि.शोधःद्र.।

[m]) यथेदं रू. च नापू. च नाउ. रू. चाऽस्य धा. कर्तरि श्यन्नन्तत्वमपि विज्ञपयेयुरित्यर्थं मूले धा. पुनरुपादीयमानः यस्थ. द्र. इति दिङ्मात्रम् ।

[n]) गस. शानजन्त-कृत्-प्रस्व. (पा ६, १, १९७; २,१३९; यतु. नापूटिदि. भूयोविमर्शः) ।

[o]) बस. उप. क्षुधा- यद्र. (तु. सस्थ. शत-धार-) ।

अप√गल्भ्

अप-गल्भ[a]- -ल्भः तै २, ५, १, ६; ५,३; -ल्भम् मा ३०, १७; का ३४,३,७; -ल्भाय मा १६, ३२; का १७, ५, १; तै ४, ५, ६, १; मै २, ९, ६; काठ १७, १४; क २७, ४.

अप√गा, अपगातम् शौ ३, ११,६; अपगात मा ३, २१; का ३,३, १३; तै १, ५,६,१;८,२; मै १, ५,२;९; काठ ७,१;७; क ५,१.

अप-गा[b]- -गाः शौ १, ३४,५; २, ३०,१;६,८,१-३.

अप√गुर्, अपगुराते, अपगुरेत ¶तै २, ६, १०, २.

अप-गुरमाण[c]- -णाय तै ४,५,९, २; मै २,९,८; काठ १७, १५; क २७, ५.

¶अप-गूर्ति[d]- -र्तिः मै ४, ६, ८; -र्त्या[e], -र्त्यै काठ ७, १५; क ६, ५.

अप-गूर्य[f] ऋ ५, ३२, ६; तै २,६, २, ५¶.

अप√गुह्→गूह्, ¶अपगूहतः तै २, २,१,१; मै २, १,१; काठ ९, १७; ¶अपगूहन्ति मै २, ५,४; †अपगूहः ऋ ७, १००, ६; १०, २७,२४; तै २, २, १२, ५; मै ४, १०, १; कौ २,९७५; जै ४, २३, ७; अपगूहथाः शौ ४, २०, ५; पै ८, ६, ११; ¶अपागूहताम् तै २, २, १, १; मै २, १, १; काठ ९, १७; अपागूहन् ऋ १०, १७, २; शौ १८, २, ३३.

अप···अघुक्षत् ऋ ५, ४०, ८; ¶अपाघुक्षताम् तै २, २, १, १; काठ ९, १७.

अप-गूळ्ह(ढ)[g]- -ळ्हम् ऋ १, २३, १४; ११६, ११; ४, ५, ३; १०, ३२, ६; ८८, २; -ळ्हा ऋ १, १२३, ६.

अप-गूहमान,ना[h]- -नः शौ १९, ५६,२; पै ३, ८, २; -φना ऋ ७,१०४,१७; शौ ८,४,१७†[i]; पै १६, १०, ७†.

अप-गोह[j]- -हम् ऋ २,१५,७.

अप√२गॄ>जर्गुर्

अप-गर- अभिगर°

अप-जर्गुराण[k]- -णः ऋ ५, २९,४.

¶**अप√ग्रह्>गृह्**, अपगृह्णाति तै ५, १, १, २; ६, ४, ७, ४.

अपाग्रहीत् मै १,६,८; ३,८,९.

अप-ग्रहण- सव्य°

अप-ग्राह- -हम् काठ ११,१; २६, १०; क ४१, ८.

?अपघोरपाउतनद्[l] पै २, ७०,१.

अप-घ्नत्-, अप-घ्नु- अप√हन् द्र.

अप√चत्>चाति, अप[1]···चातयामसि पै ७, ७, ३; अप···चातयात् पै १३, १३, १०.

अप√चाय्<>चि[m]

अप-चित[g]-

¶अपचित-तम[n]- -मौ तै ५,२, २,३; काठ १९,१२; क ३१,२.

अप-चिति[d]- -तिः मा २०, ९; का २१, ७, ८; मै ३, ११, ८; काठ ३८, ४; -तिम् ऋ ४, २८, ४; मा २१, ५८; का २३, ६, ११;

---

a) गस. उप. पचाद्य्-अजन्ते थाथादि-स्वरः (पा ६, २, १४४)। उ. च म. च (मा. १६, ३२) बस. आहतुः, तन्मन्दमिव भवति। पूपप्रस्व. दुर्वारत्वप्रसङ्गाच्चाऽनौचित्याच्च। न चापि यद् उ. उप. गर्भ- शब्दाऽनर्थान्तरत्वेन व्याचष्ट म. च यद् विकल्पतोऽन्वमन्यत तच्छोभनं भवति। गर्भ-शब्दस्याऽऽद्युदात्तत्वादन्त्यस्वरस्य प्राकृतस्याऽसंभवात् (तु. भा. MW. च यावस्मदभिप्रायसमर्थकाविव भवतः)।

b) बस. (=अप[गत]-+गा- इति [पावा २, २, २४]) पूपप्रस्व. (पा ६, २, १)। उप. √गा+भावे क्विप् यद्र.।

c) गस.शानजन्त-विकरणस्वरः(पा६,१,१८६;२,१३९)

d) गस. उप. क्तिन्नन्ते पूपप्रस्व. (पा ६,२,५०)।

e) अत्राऽपि '-र्त्यै' इति संकेतयमानः SIM. चिन्त्यः।

f) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

g) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६,२,४९)।

h) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१८६;२,१३९)।

i) अत्र सा. 'अप' इत्यस्य स्थाने 'उप' इति पपाठ। 'अप' इति वा स्याद् 'उप' इति वोभयथापि नक्तंचारिण्यास्तत्तन्वपगूहनोपगूहनान्यतरसंकेतमुखेन विशेषणतापर्यवसानकत्वाच्छ्रुतितात्पर्यस्य यत् सा. उपसर्गश्रुतेर् गमनार्थं योग्यक्रियान्तराध्याहारं सावसरं पश्यति तद्वस्तुतोऽनवसर आयास इत्युपेक्ष्यम्।

j) गस.उप. घञन्ते थाथादि-स्वरः (पा ६,२,१४४)।

k) गस. शानजन्त-कृत्-प्रस्व. (पा ६, १, १८९; २, १३९)। यत्त्वेह McG. अन्तोदात्तत्वमाह तत् संस्कारमान्यमात्रमिति।

l) भूयसीं विमृष्टिमपेक्षमाणः शोध-सापेक्षः पा. द्र.। तदभावे पदविभागो भयावहः।

m) 'चायश्चिभावो निपात्यते' (पाम ७, २, ३०)। अन्ततो गत्वा यदि √चाय्<√चि इत्येवं रूपान्तरतया संभाव्येत तर्हि अप√चि इत्यस्य निष्ठायां चाय्-भावो विकल्पेन स्यादित्येवं पाप्र. व्यत्यासेन योजनीयम्।

n) तमपः पित्त्वाभिघाते स्वरेऽभेदः।

¶तै ५, १, ३,३; २, २, ३; मै ३, २,२[२]¶; ११,५; काठ १९, ३¶; क ३०, १¶.
¶अपचिति-मत्[a]— -मान् तै ५, १, ३, ३; २, २, ४.
अप √१चि, अप···चये काठ ३८,१३.
अप-चित्[b]— -चित् शौ ६, ८३, ३; पै १, २१, ४; –०चित् पै १, २१,५; –चितः ¶काठ २५,१[c]; ¶क ३८, ४; शौ ७, ८०, २[२]; –०चितः शौ ६, ८३, १; पै १, २१, २; –ताम् शौ ६, २५, १–३[d]; ७, ७८, १.
अप √२चि<>कि,[e] अपचिकीहि[f] शौ १, १०, ४; पै १, ९, ४.
अप···चिकयतुः पै १, २१, ५.
अप √चित्>चेति, अपचेतयाते मा २, १७; का २, ४, ५; तै १, १, १३, २; मै ४, १, १४; काठ १, १२; क १, १२.
अप-चित-, अपचित-तम-, अप-चिति- अप √चाय् द्र.
अप-चिती[g]— -तीम् तै ५,७, ४, ३.
अप √च्यु, †अपच्योष्ठाः ऋ १०, १७३,२; काठ ३५,७; क ४८, ९; शौ ६, ८७, २.
†अपचुच्यवत् ऋ २, ४१,१०; कौ १,२००; जै १, २१,७; शौ २०, २०, ५; ५७, ८.
अप-च्यव[h]— -वम् ऋ १, २८, ३.
अप-च्युत- अन्°
अप-च्छेद- अन्°
अप-जङ्घनत्- अप √हन् द्र.
अप-जगुराण- अप √२गॄ द्र.
अप √जि, अप···जयते पै २,७३,३; ¶अपजयति मै ३, २,३; ४,८, ३; काठ १९, १२; ३०, ९; क ३१, २; ?अप···जयाम[i] पै २, ३८,१; ¶अपाजयत् मै ३, २, २; काठ १९, १२; क ३१, २; ¶अपाजयन् तै ६, ३, १, १; काठ २६, १; २८, ४; ३०, ९; क ४०, ४.
अपाजैत् शौ १२, ३, ५४.
अप-जय्य- अन्°
अप-जिय्य[j] तै ६, ३, १, २.
अप √तक्ष्, अपातक्षन् शौ १०, ७, २०.
अप-तक्षण— -णम् पै ४, १७,१.
¶*अप-तर[k]— -रम् मै १, ४, १२[२]; ६, ८[२]; ३, ८, ६[२].
अप-तस्थिवस्- अप √स्था द्र.
अ-पति[l]— -तिः शौ ८, ६, १६[m]; पै १६, ८०, ७.
अ-पति(हन्>)घ्नी[n]— -घ्नी ऋ १०, ८५, ४४; शौ १४, २, १७†; १८; पै २, ६६, ३; –घ्नीम् शौ १४, १, ६२.
¶अप-तुरीय[o]— -यम् मै ४, ५, ८.
¶अप-तू(ल→)ला[p]— -लया तै ६,१,

[a]) मतुपः पित्त्वान्निघाते स्वरेऽविशेषः।
[b]) उस. कर्मार्थ-क्विबन्त-कृत्-प्रस्व. (पा ६, २,१३९; तु. सा.)। अप √चित् इत्यस्य कृद्वृत्तमिति वदन् MW. चिन्त्यः, रोगविशेषात्मकवाच्यार्थस्वरूपस्याऽपचेतनपेक्षयाऽपचयनेन सन्निहिततरसंबन्धदर्शनादिति।
[c]) 'अपरिचितः' इति मुपा. यनि. शोधमपेक्षमाणः द्र.।
[d]) इह पूजितपर्यायभूतम् आद्युदात्तं प्राति. ब्रुवाणः सा. बभ्राम। अन्यत्र सर्वत्र यथा रोगविशेषवाचकत्वेन<अप √१चि इत्येवं प्राति. सा. व्याचष्ट तेनैष षष्ठकाण्डपूर्वभागस्य भाष्यकारस्तन्मात्राऽपर एव कश्चिदासीदिति संभाव्येत।
[e]) मूलतः कुत्वोर् विवेको विमृश्यः। पाप्र. कुत्वं मौलमभ्यासे चुत्वापत्तिश्चेत्यनवीनो विषयः। यत्तु शौ १,१०,४ इत्यत्र सा. √कित् इत्यनेन योगं वदन्निव प्रादर्शि तत् √कि इत्यस्य स्थाने मुद्रणाऽनवधानमात्रं स्यात्। तथाविधस्यैव धा. जु. दर्शनात् तथात्वेन च तत्र संकेतितत्वात्।
[f]) यदप्य् अत्र सा. अप इति गतिमधिकृत्य योग्यक्रियाध्याहारमाह तद् अनपेक्षितमिव भवति। गतित्वमात्रेण योग्यार्थसंनिवेशपूर्वकमुपसृज्य क्रियया योगाङ्गीकारात्।
[g]) प्रास. पूपप्रस्व. (पा ६, २, २)। 'चिती-' इति उप. बह्वादिष्वन्तर्भाव्य ङीषन्तं (पा ४, १, ४५) यद्र. अनया दिशा यद् भा. वर्णव्यत्ययमात्रतामुपजीव्य दीर्घान्तत्वं व्याख्यातुमुपचक्रमे तदगतिकमात्रगतीयताम्।
[h]) गस. उप. भावे अप् प्र. थाथादि-स्वरश्च (पा ३, ३, ५७; ६, २, १४४)।
[i]) 'अपि···' इति मूको. च मुपा. च यनि. शोधश् चिह्नितभूयोविमृष्ट्यवसरः द्र.।
[j]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।
[k]) १ *अव-तर- इत्यत्र च, २अव-तर्- इत्यत्र च सन्यायानामेतादृशानामपि प्राति. व्यवस्था द्र. (तु. टि. अन्तर-)।
[l]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।
[m]) बस. इति ब्रुवाणः सा. चिन्त्यः। स्वरविरोधात् प्रकरणविरोधाच्च।
[n]) सस्व. नापू. द्र.। उप. कर्मण्युपपदे √हन्+टक् प्र. स्त्रियां ङीप् च (पा ३, २, ५२; ४, १, १५)।
[o]) बस. 'बहुव्रीहौ' (पा ६, २, १६२) इत्यत्रत्येषु पूप. 'अप' इत्यस्यापि उसं. द्र. यथा तस्मादपि परस्य पूरणप्रत्ययान्तस्य उप. अन्त्य उदात्तः स्यादिति।
[p]) बस. पूपप्रस्व. (पा ६,२,१)। उप. यद्र.।

१, ६[२]; मै ३, ६, ३.

अप √तॄ→तिर्, अप…तिर शौ ६, ६, ३‡[a].

¶अप-तेजस्[b]- -जसौ तै २, ५, २, ६.

अ-पत्य[c]- -त्यम् ऋ १, १७४, ६; १७९, ६; ८, ४९, ८; ९, १०, ८; खि ३, १, ८; कौ २, ४७६†; जै ३, ३५, १०†; शौ ७, ११३, १; -त्याय ऋ ७, ५, ७; मा १३, ३५; का १४, ३, ९; मै १, ८, ८; -त्ये ऋ १, ६८, ४. [°त्य- अन्°, सु>स्व्°]

?अपत्य-ता[d]- -ता पै १६, १४९, ७.

अपत्य-वत्[e]- -वत् शौ १२, ४, १. [°वत्- अन्°]

अपत्य-साच्[f]- -चम् ऋ [१, ११७, २३; ६, ७२, ५]; २, ३०, ११.

अप √त्रस्, अप…अत्रसन् ऋ १०, ९५, ८.

अप √त्वर्, अप…त्वरीः पै १, २१, ५.

अ-पथ[g]- -थम् शौ ६, ७३, ३; १०, १, १६; पै १६, ३६, ६; -¶थात् तै २, २, २, १; ७, २, ८, ६; -थेन ¶तै २, २, २, १; ७, २, ८, ५; ३, १, १; शौ ५, ३१, १०.

†अ-पद्[h]- -पदे ऋ १, २४, ८; मा ८, २३; का ९, ४, १; तै १, ४, ४५, १; मै १, ३, ३९; काठ ४, १३; क ३, ११.

†अपदी[i]- -दी ऋ १, १८५, २; १०, २२, १४; मै ४, १४, ७.

अ-पद[j]- -दम् शौ ६, २९, २.

अप √दस्, अपदस्यन्ति ऋ १, १३५, ८.

अप √दह्, अपदह ऋ ७, १, ७.

अप-दग्ध, ग्धा[k]- -ग्धम्, -ग्धाः पै ७, ७, ८.

ϕअप-दृंहत्[l]- -हन् शौ १, २८, १.

अप √दुष्

अप-दोष्य- अन्°

[a]) 'अव…तिर' इति बाह्वृचः (१०, १३३, ५) पाभे.।

[b]) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

[c]) तस. नञ्-स्वरः (पा ६, २, २)। उप. <√१पत्+क्यप् (भोउ २, ३, ४)। यक्-प्रत्ययान्तमिदमित्यपि मतं भवति (तु. पाउना ४, १२१)। उभयथा लक्ष्येऽभेदः। यत्तु पक्षान्तरे या३, १ 'अप' इति पूप. नामीभूतम्, उप. त्य- (<√तन्) इति चेत्याह। तथात्वे तस. अव्यय-पूपप्रस्व. बोध्यः।

[d]) नापू. मन्त्रे 'अपुत्रता' इति श्रवणाच्च नाउ. 'अप-त्रुता' इति श्रुतेश्च 'हपतिता' इति मूको. साद्ध्याच्च श्रुति-स्वारस्यसंवादी 'अपति-ता' इति शोधः द्र.।

[e]) म(>व)तुपः पित्त्वान्निघाते स्वरस्तदवस्थः।

[f]) उस. उप. √सच्+ण्विः प्र. उसं. कृत्-प्रस्व. च (पा ३, २, ६३; ६, २, १३९)।

[g]) तस. नञ्-स्वरः (पा ६, २, २)। पूप. ६अ इति, उप. √पथ्, न्थ्>पँथ्- इत्यत्रावान्तरप्रकृतितया निर्दिश्यमानं पथँ- इति यद्र.। पाप्र. तु तस. पथिन्-इत्यतः अः समासान्तः (पा ५, ४, ७२; ७४) इति कृत्वा सतिशिष्टतया प्रत्यय-स्वरेणान्तोदात्ते प्राप्ते नञ्-स्वरबलीयस्त्वं यथाकथमप्युपपाद्येत (तु. पाम ६, १, १५८)। इह यतरस्यां प्रकृतौ लाघवं स्याद् असावा-स्थेया विविग्भिरिति दिक्। यच्चैतत् न. प्राति. भवति (पा २, ४, ३०) तत्रापि साम्मासिकीयं प्रवृत्तिर्भवति मूलतो नञुत्तरप्रकृतिनिघ्ना वा भवतीत्यपि भूयोविमर्श सहं द्र.।

[h]) बस. अन्तोदात्तः (पा ६, २, १७२)। पद्- इत्येतद् उप. अ-पाद्- इत्यस्य श्रवणात् (तु. यस्थ.) तस्यैव प्रत्यय-विशेषेषु पाप्र. भाऽऽह्वयस्य ह्रस्वीभावात्मकमादेशमात्रं भवति (पा ६, ४, १३०)। अनया दिशा अ-पाद्-इत्येतदेव प्राति. न अ-पद्- इति। नञ्-उत्तरस्य पाद- इत्येतस्य बस. अन्त्यलोपो यद्यपि साक्षान्न शिष्टस्तथापि तथाविधनिगमबलात्तस्य 'संख्या' (पा ५, ४, १४०) इत्यत्र उसं. कर्तव्यम्। अथवा पद्-इत्येतन् मूलतः √पद् इत्यतः करणे क्विबन्तं सद् वर्गीकरण-व्यापृतैर् वैयाकरणैः स्वीयप्रक्रियानुरोधात् पाद्→पाद्→पद्- इत्याकारकपरिणाम-विषयतयान्वशासि। अस्मिन् दर्शने अ-पद्- इत्येतन्मात्रं प्राति. निर्देष्टव्यं भवति। बस. स्वरश्चोक्तपूर्वेण गतार्थ इति पिष्टं मा पेषि। यत्तु भा., सा., उ., म., K. तत्र तत्र स्वव्याख्यातायां शाखायां (यस्थ. द्र.) अ-पद- इत्येवमकारान्तं प्राति. इष्यते बस. इति सप्तमीति च व्याचिख्यास्यते तद् मन्दमिवा-ऽऽपतति। तथात्वेऽन्तोदात्तत्वप्राप्तौ मध्योदात्तत्वानुपपत्तेः। अन्वयपौर्वापर्यानुरोधाच्च 'अपदे' इत्येषा चतुर्थ्याः श्रुतिर् भवतीति दिक्।

[i]) पद्- इत्येतत् क्विबन्तं पाद्-→पाद्- इत्यतः पृथ-गिति दर्शने स्त्रियां ङीपः (पा ४, १, ६) पित्त्वान्निघाते स्वरेऽविशेषः द्र.। पाद्-→पद्- (पा ६, ४, १३०) इति दर्शने तु वैकल्पिके ङीपि (पा ४, १, ८) शेषं पूर्ववद् द्र.।

[j]) तस. नञ्-स्वरः (पा ६, २, २)। उप. <√पद् यद्र.।

[k]) गस. कर्मणि निष्ठान्तं द्र.।

[l]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, १, १८६; २, १३९)।

अप-दुष्पद्[a]- -ष्पदा ऋ १०,९९,३.

अप√दृ>दु, अपदरण[b] पै १५,४,१[c].

φअप-दुद्रेत्[d]- -द्रेत् ऋ ६,१७,५.

अ-पद्यमा(न→)ना- -ना तै ४, १, ६, ३; ५, १, ७, ३.

अप√द्रा, अपद्रान्तु ऋ १०, ८५, ३२; शौ ६, १२९, १-३;१४, २,११†; अपद्राहि शौ ६,१४,३; ?अपद्राः‡[e]

अप√द्रु, अपाद्रवत् मै ३, ८, ६.

अप√धा, अपधामसि पै ७,७,७.

अपधत्से काठ ७, ७; †अप··· दधातु ऋ १०, १६४, ३; शौ ६, ४५, २; अप···धत्स्व पै १०, ४,५; †अप···अधत्त[c] ऋ ८, ९६, १३; शौ २०, १३७, ७; ‡अप···अदधाम्[e] काठ २८, ४; क ४४, ४.

अप···धायि ऋ [४, २८, २; ६, २०, ५]

¶अपधापयते मै ४, ३, ७.

अपधित्सामि[f] पै १६, ५०, ७.

†अप-धा[g]- -धा ऋ २, १२, ३; मै ४, १४, ५; शौ २०, ३४, ३; पै १३, ७, ३.

अप√१धाव्, अपधावत शौ ४,३७, १२; ¶अपाधावन् मै ३, ८, ३.

?अपधुः[h] पै १, ९८, २.

अप√ध्मा>धम, अपधमन्ति ऋ ९, ७३, ५; अप···धमन्तु पै १३, १,१; †अपाधमत् ऋ ८, ८९, २; मा ३३, ९५, अप··· अधमः ऋ ५, ५१, ५.

अप√ध्वंस्

अप-ध्वंस[i]- -सेन शौ ४, ३, ५.

¶अप-ध्वंसमान- -नम् काठ ९, ११.

अप√नम्, अप···अनमत् ऋ ६, १७, ९.

अप-नत- उदीचीन[o]

¶अप-नाभि[j]- -भिम् तै ५, २, ८,७.

अप-नि√धा, अप···निदध्मसि शौ ३, २३, १; १४, २, ६९; पै २, ८१, १; १६, २, ११; अप[2]-···निदध्मसि शौ ८, १, २१; पै १६, ५२, १; ¶अपन्यधत्त काठ २९, ७[2]; क ४५, ८[2]; ¶अपन्यदधाताम् काठ २४,७; क ३७, ८.

¶अपनि-धाय[k] तै ६, १, ३, १.

अप-निर्√णु(<नु)द्, अप··· ?निर्णुद[l] पै ६, २२, १४.

अप-नि√ष(<स)द्

¶अपनि-षादु(क→)का[m]- -काः मै ४, २, १४.

अप√नी, अप(नये) तै १, ३, १३, २; अपनयामसि पै १, २६, ४.

‡अप-नी(त→)ता[n]- -ता शौ ५, १७, ६; पै ९, १५, ६.

अप√नुद्, ¶अपनुदते तै १, ७,४, २; २, ४, १, ४; ५, ७, ३,१; ६, ४, १०, २; मै ४, ६, ३; काठ ६, ४; १०, ७; २०, ६; २१, २; ४; २२, १०; २५,७; २८, १; ३१, ११; क ४, ३; ३१, ८; १७; १९; ३५, ४; ३९, ५; ४४, १; ४७, ११; ¶अपनुदति तै ५, १, ८, ६; अपनुदामः शौ १०, १,१;२; पै १६,३५,१; अप···नुदामः शौ १२, ३, ४३; अपनुदताम् मा २, १५[2]; का २, ४, १[2];

[a]) तस. अव्यय-पूपप्रस्व. पा ६,२,२)। उप. दुस्>ष् √पद्+भावे क्विप्। इह प्रयोगे तृ१ सद् वा.किवि.भवति।

[b]) पाप्र. अत्र श-विकरणोऽपि द्रसं. (पा ३, १,८५)। तथा च विकरणद्वये, आकारलोपे सति इलोंपः (पा ६,४, ११३; १०५)।

[c]) 'अपिश्रण' इति शौ (१९,४५,१) पाभे.।

[d]) गस.शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८९;२,१३९)।

[e]) तु. यस्था. टि. *अधद्राः।

[f]) तु. 'अप···सुवामि' इति शौ (६,११९,३) पाभे.।

[g]) स्त्रियां टाबुत्तरः भावे अङ् प्र. (पा ३,३,१०६)। प्रत्यय-स्वरः। तृ१ आ प्र. रू. द्र. (तु. PW.GW. GG.; वैतु. सा. यस्यैतत् पं१ स्यात्; अप-धि->-धा स१ इति ORN. NW.)। ऐतिहासिकं पक्षमवलम्बमानस्य सा. वलो नाम कश्चिद् गवां निरोद्धाऽसुरो भवतीति कृत्वाऽयं शब्दस् तत्-कर्तृकनिरोधमाह पं.विभ.चेन्द्रकर्तृका मोक्षजनक्रिया भवति तस्या अपादानत्वमात्रमाह। वस्तुतस्तु √२वृ इत्यस्मात् सतो>वल- इत्यस्य निरोधमात्र-स्वरूपत्वात् तन्निवारणमात्रफलस्वरूपत्वाच्चाऽवलक्षणानां गवामुदजनस्य 'इन्द्रो वलस्य निवारणेन गा उदाजत्' इत्यर्थाद् हेतौ सुब् द्र.। एस्थि. इह तृ१ भवति न च पं१। उत्तरस्यां विभ. आ प्र. अप्रसिद्धेरिति यावत्।

[h]) दुष्पठत्वात् संदिग्धम्। अतः अप√धा इत्यतः पृथङ् निर्देश आदृतः। तत् संस्करणान्तरे विमृष्टिः सावसरा स्यात्।

[i]) गस. उप. घञन्ते थाथादि-स्वरः (पा ६,२,१४४)।

[j]) बस. पूपप्रस्व. (पावा २, २, २४; पा ६, २, १)।

[k]) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[l]) '···निम्नुद' इति मुपा. शोधार्हः।

[m]) गस. उप. कर्तरि उकञ् प्र. कृद्-उपप्रस्व. च (पा ३,२, १५४; ६, १, १९७; २, १३९)।

[n]) गस. कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २,४९)। 'उपनीता' इति ऋ (१०, १०९, ४) पाभे.।

अप···नुदताम् मै १,५,१; अप···नुदेताम् काठ ३१,१४; अप···नुदन्ताम् मा २८,१३; का ३०,२,२; अप···नुदन्तु शौ १२,३,४९; †अप···नुदस्व ऋ ३,४७,२; ६,२१,७; १०,१३१,१; मा ७,३७; का ७,२०,१; तै १,४,४२,१; मै १,३,२३; शौ २०,१२५,१; †अप[1](नुदस्व) ऋ १०,१३१,१; शौ २०,१२५,१; अप···नुद मै १,२,९; ¶३,८,७; ¶अपानुदत काठ ८,४; २७,८; क ६,९; ¶अप···अनुदत तै ६,२,७,५; अपानुदत् पै १,७१,२; ¶अपानुदन्त तै १,७,४,२; २,४,१,२; ३; ५,७,३,१; ६,३,१,४; ४,१०,४; ६,४,४; मै १,९,८; ३,६,१०; ८,१०[2]; काठ १०,७[2]; अपनुदन्त ऋ १,१६७,४; †अपानुदः ऋ १०,१८०,३; तै १,६,१२,४; काठ ८,१६; शौ ७,८९,२; पै १,७७,१.

?अपनुद्यतु[a] पै ७,८,१.

अप-नुत्त[b]- -त्तः पै १६,१३१,१-१०; -त्ता काठ २७,८; क ३,३; -त्तौ तै ६,४,१०,२¶; मै १,३,१२; ४,६,३.

¶*अप-नुत्ति[c]- -त्यै काठ ८,४; २७,८; क ६,९. [°त्ति- भ्रातृव्य°]

¶अप-नुद्य[d] तै ६,४,१०,२; मै ४,६,३.

¶अप-नोद्[e]- -देन मै ४,६,३.

*अ-पन्न[f]-

अपन्न-गृह[g]- -हस्य मा ६,२४; का ६,६,२; तै १,१,१३,३; ३,१२,१; मै १,३,१; काठ ३,९; क २,१६.

¶अपन्न-दत्[h]- -दन् मै ३,९,५.

¶अपन्नदती[i]- -ती तै २,१,२,७; मै २,५,२; काठ १२,१३.

अप√पत् >पाति, ?अपपपात[j] पै ५,३६,५.

अपपातय पै ४,१३,५; अप-(पातय) शौ १९,५०,५; पै १४,४,१५[k].

अप√पद्, अपपद्यते शौ ४,२८,५; पै ४,३७,३; ५,२२,३.

अप-परा√जि

ϕअपपरा-जित[l]- -†तासः ऋ १०,८४,७; शौ ४,३१,७.

अप-परे(रा√इ), अप···परेत[m] ऋ १०,६१,८.

¶अप√पश्, अपापश्यन् मै १,१०,१६.

अप-पाप[n]- -पम् शौ १९,८,५.

अप√पि

अप-पित्[o]

अपपित्-त्व[p]- -त्वम् ऋ ३,५३,२४.

---

a) संदिग्धस्थलीयः पा.। 'उपनद्यातु' इत्याकारको मुपा. यनि. वाऽन्यथा वा शोधार्हः द्र.।

b) निष्ठा-तकारस्य न-आदेशाऽभावः (पा ८,२,५६)। शेषम् अप-नीत- इत्यत्र टि. गतं द्र.।

c) गस. उप. क्तिन्नन्ते पूपप्रस्व. (पा ६,२,५०)।

d) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३; २,१३९)।

e) गस.उप. घञन्ते थाथादि-स्वरः (पा ६,२,१४४)।

f) तस. नञ्-स्वरः (पा ६,२,२)। उप. यद्र.। नाउउ. व्युत्पत्तावौपयिकं प्राति. द्र.।

g) बस. पूपप्रस्व. (पा ६,२,१)। उप. यद्र.।

h) सस्व. नापू. द्र.। उप. दन्त→दत्- इति समासान्तः (पा ५,४,१४२ [यस्था. *दत्- इत्यपि द्र.])।

i) स्त्रियां ङीपः (पा ४,१,६) पित्त्वाभिघाते स्वरेऽभेदः।

j) मूको.'(अ)पपापाथ ←(अ)प-पपाथ' (?<त) इति पा.प्रतीयते। तथात्वे √पत् इत्यस्य छान्दसीम् अनिट्ताम् आश्रित्य तस्मिन्लिटि मपु१ स्यात्। संदिग्धस्थलीयत्वाद् भूयसी विमर्शापेक्षापीह द्र.।

k) पूर्वमन्त्रत आख्यातपूर्तिः द्र. (तु. सस्थ. टि. √२वस्>वासस्- >वासः)।

l) वैतु. सा. प्रमृ. 'अपनिलयन्ताम्' इति योगं ब्रुवाणाः सन्तो द्वैस्वर्यं प्रति पर्यनुयोज्याः। अनन्तरगतिस्वरः।

m) आ इत्यस्य परा इत्यस्य च गत्यर्थेन धा. प्रातियोगिकोऽभिसंबन्धः श्रुतिप्रसिद्धः (तु. ऋ १,१२३,१२; १६४,३१; १९१,२)। इह 'अप' इति 'परा' इत्यस्याऽर्थस्य भूयोऽप्य् उपबृंहणं करोतीति विशेषः (तु. GW. यस्य. ए (आ√इ), PW.; वैतु. वें. यः स्मत् (यद्र.) =अस्मत्तः इतीव कृत्वा आ इति पञ्चम्यर्थानुवादी कप्र. इतीवाभिप्रेयात्, सा.च आ-अप-परे(-रा√इ) इति त्र्युपसृष्टः धा.[कथं तस्य आ इति परा इति चाऽव्यवहितावपि गती युगपत् स्वरभाजौ स्यातामिति कृत्वा स्वसावनुयोक्तव्यः स्यात्])।

n) अभावार्थे अस.। वा.किवि.भवति। अत्र 'अप' इति 'पापम्' इति च पृथक् पदद्वयीति सा.कतिपये मूको.च। तथात्वे सा.अन्व् अप इत्युपसर्गश्रुतेर् योग्यक्रियाध्याहारः द्र.। अथवा वर्जने कप्र. तस्य च छान्दसः पापम् इत्यनेन द्वि. योगः।

o) नाउ. व्युत्पत्तावौपयिकं द्र.। गस. क्विबन्त- कृत्-प्रस्व. (पा ६,२,१३९)। अपरे √२पत् इत्यतो निष्पन्नं पश्यन्ति(तु. MW. प्रमृ.)। तद्विमृश्यम् (तु. पित्व-)।

p) भावे त्वः प्र. मध्यतस् तकार-श्लेषश्च (तु. कादा-

अ-पपिवस्[a]- -पुषः शौ ६,१३९,४.

अप √पू, अप…अपुनत पै ५, १९, ७.

अप √पृ→पर्, अपपर्षि ऋ १, १२९, ५.

अप-प्र √गा, अपप्रगाः पै ५, ३६, ४; ८.

अप-प्र √१वह्, अप…प्र…वहन्तु शौ १०,५,२४; पै १६, १३०, २; अप(प्र…वहन्तु) शौ १६,१, १०; (अप)प्र…वहन्तु शौ १६, १,११; (अप)प्र(वहन्तु) शौ १०, ५, २४[2]; १६, १, ११; पै १६, १३०, २.

¶**अप-प्रा(प्र √अ)न्**

अप-प्रा(ण>)णा[b]- -णाःतै५,३,६,२

अप √प्रुथ्, †अपप्रोथ ऋ ६, ४७, १०; मा २९,५६; तै ४, ६, ६, ७; मै ३, १६, ३; काठ ४६,१; पै १५, ११, १०.

अप-प्रोथत्[c]- -थन्तः ऋ ९, ९८, ११.

अप-प्रे(प्र √इ), अप…प्रेयात् ऋ १०, ११७, ४.

¶अपप्रेष्यति मै ३, ६, ७[2].

¶**अप √प्लु>प्लावि**, अपप्लावयति तै ६, ४, ३, ४; मै ४, ५, २[2].

¶**अप-बर्हिस्**[b]- -र्हिषः तै ६, ६, ३, २; मै १, १०, १८; ४, ८, ५; काठ २९, ३; ३६,१२; -र्हिषम् काठ २५, १०; २६,५; क ४०, ३; ४१, ३; -र्हिषौ तै ६, ६, ३, ३.

अप √बाध्>बाधि, अपबाधते पै २, ११, ३; †अप…बाधते ऋ १, ३५, ९; मा ३४. २५; का ३३, १, १९; अप…बाधन्ते ऋ १, ८५, ३; अपबाधे पै ५, २०,१; अपबाधताम् ऋ ७, ५०, २; १०, ३५, ३; मै १, २, ३; शौ ५, २२, १; पै १, ४६, ५; ७, ५, १२; १३, १, १; †अपबाधस्व ऋ १०, ४२, ७; मै ४, १४, ५; शौ २०, ८९, ७; अप…बाधस्व ऋ ६, ६, ६; पै ७, १९, २; अपबाधध्वम् ऋ ७, ५६, २०; अपबाधत[d] पै ७, १९, ७; अपबाधाम पै ५, ४, १४‡[e].

अपबाधय शौ १२, १, ४९.

अप-बाधमान,ना[f]- -†नः ऋ १, ३५, ३φ; ९, ९७, ४३φ; १०, १०३,४; मा १७, ३६; का १८, ४,४; तै ४,६,४,२; मै २,१०,४; काठ १८,५; क २८,५; कौ २, १२०२; शौ १२, ३, १५$; १९, १३,८; पै ७,४,८; १२, ६, ८$; १५, ११, ४‡[g]; -ना ऋ ५, ८०, ५φ; ७, ७८, २φ; तै ४, ३, ४, २φ; मै ४, १४, ६; -φनाः ऋ १, ९०, ३; मा १७, ५४; १९, ८४; का १८, ५,५; २१, ६, ५; तै ४, ६, ३, २; ५, ४, ६,२; मै २, १०, ५; ३, ११, ९; काठ १८, ३; ३८, ३; क २८, ३.

अप √ब्रू, अपब्रवत्[h] शौ ६, ५७, १; ¶अपाब्रुवन् मै १, ५, १२.

अप √भज्, अपभजन् पै ५, २१, २; अप…भजाम ऋ १०, १०८, ९.

अप-भरणी-, **अप-भर्तवै**, **अप-भर्तृ-** अप √२भृ<हृ द्र.

†**अप √भिद्**, अप…भिन्धि ऋ ८, ४५, ४०; कौ १, १३४; २, ४२०; जै १, १४, १०; ३, ३२, १०; शौ २०, ४३, १.

अप √भू, †अप…भवतु ऋ ९, ८५, १; कौ १, ५६१; जै १, ५७, १०; †अपभवन्तु ऋ १०, ६७, ११; शौ २०, ९१, ११; †अप…भवन्तु ऋ १०, १२८, ९; मा ३४, ४६; का ३३, २, ९; तै ४, ७, १४,४; काठ ४०,१०; शौ ४, ३५, ७$; ५, ३, १०; २२, १$; पै २, ३८, १$; ५, ४, १४.

अपभूतु ऋ १, १३१,७[2]; अपभूत ऋ ४, ३५,१; †अपभूतन ऋ ७, ५९, १०; तै ४, ३,१३, ५; मै ४, १०, ५; काठ २१, १३; अपाभूत ऋ ४,३४,११; †अपभूः ऋ ⌊१०, ११, ९[i]; १२, ९⌋; शौ १८, १, २५.

चिल्कं सत्व->सत्व- इति)। प्रत्यय-स्वरः। अप-पित्व- इत्याकारकः पपा. अवग्रहप्रकारः द्र.।

[a]) तस.नञ्-स्वरः (पा ६,२,२)। उप. √१पा+क्वसुः।

[b]) बस.पूपप्रस्व.(पावा २,२,२४ पा ६,२,१)। उप.यद्र.।

[c]) गस.शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

[d]) 'अपबाधथाः पश्यमानः' इत्यस्य मूलतः सतः स्थाने 'अपबाधता पश्यमानः' इति प्रामादिको विभ्रंशः संभाव्यते।

[e]) 'अवबाधामहे' इति ऋ (१०, १२८, ९) पाभे.।

[f]) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१८६;२,१३९)।

[g]) 'परिबाधमानः' इति ऋ (६, ७५, १४) पाभे.।

[h]) लेटय् अड्-आगमे (पा ३, ४,९४) आगमानुदात्तत्वसामान्ये धातुस्वरः। यत्तु सा. 'अपब्रुवत्' इत्येवं पपाठ तच् चिन्त्यम्, उवङोऽसंभाव्यमानत्वात्।

[i]) इह स्वीये भाष्ये कृद्-वृत्तमेतदिति भाषमाणः स्वरशास्त्रं चोपेक्षमाणः सा. अश्रद्धेयः स्यात्।

¶अप-भूत[a]- -तः तै ३, ४, ८, २; ७.
अप-भूति[b]- -तये शौ ५, ८, ५.
अप√२भृ<ह, अप⋯भरताम् ऋ १०, ५९, ८; अपाभरत् ऋ १. १६१, १०.

अप-भर(ण>)णी[c]- -णीः तै ४,४, १०, ३; कठ ३९, १३.
†अप-भर्तवै[d] ऋ १०, १४, २; मै ४, १४, १६; शौ १८, १, ५०.
†अप-भर्तृ[e]- -र्ता ऋ २, ३३, ७; पै १५, २०, ५.

¶अप√भ्रंश्, अपभ्रंशते, अपाभ्रंशन्त, अपाभ्रंशन्त मै १, ६, ९; अप⋯अभ्रंशन्त काठ ९, १६.
१अपम[f]- -मस्य ऋ १०, ३९, ३.
२अप-म- -मा?[g] शौ १०, ४, १; पै १६, १५, १.

a) अन्तर्भावितण्यर्थतया सकर्मकत्वोपाचारादिव कर्मणि निष्ठायामनन्तरगतिस्वरः (पा ६, २, ४९)।

b) क्तिनि 'तादौ' (पा ६, २, ५०) इत्युक्तः स्वरः।

c) गस. ल्युडन्त-कृत्-प्रस्व.(पा ६,१,१९३;२,१३९)। नक्षत्रविशेषस्य संज्ञा भवति। यत्तु कर्तरि ल्युः प्र. ततश्च गौरादित्वाद् ङीष् (पा ४, १, ४१) इति शक. मन्येत, तन्न। अन्तोदात्तत्वप्रसङ्गात्।

d) तवै-प्रत्ययान्तस्य द्वैस्वर्यं भवति (पा ६,२,५१)।

e) गस.तृजन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

f) शौ १०, ४, १; पै १६, १५, १ इत्यत्राप्येतदेव प्राति. -मः इत्याकारकं प्र१ च रूपमिति W. पाण्डु. MW. इत्येतेषां कल्पना साधीयसी न वेत्यत्र भूयसी विमृशां विमृष्टिरपेक्ष्यते (तु. नाउ. टि.)।

g) शौ. मूको. एतदेव शब्दरूपमुपलभ्यते, तदीये पपा. 'अप-मा' इत्याकारकः सावग्रहो विभागश्च प्रदर्श्यते। पै. मूको. 'उपमा' इत्याकारकं च शब्दरूपमुपलभ्यते। तत्रैवं कियानपि विमर्शः सावसरः स्यात्। प्रथमं तावद् यनि. भिन्न-संख्ययोर् अवगृहीताऽनवगृहीतयोः प्राति. मध्ये सूक्ष्मेक्षिकया विवेकः द्र.। प्रथमेऽनवगृहीते प्राति. अप इति निपातोऽनुपसर्गोऽगतिसंज्ञो निकर्षसामान्यवाचकः। तस्मात् तात्रभाविकस्य तद्धितस्य सामान्येन शैषिकस्य वा म-प्रत्ययस्योत्पत्तिः। इत्थं निकर्षे भवो निकृष्ट इत्यार्थोऽस्य प्राति. संजायते। ननु नाम्नस्तद्धितोत्पत्तिः प्रसिद्धा न निपातमात्रादिति चेद् न। नायं नियमो यत् तद्धितो नाम्न एवाऽऽगच्छति न निपातादिति। तद् यथेहैव समानमनवगृहीता बहवः शब्दा म-प्रत्ययान्ताः भवन्ति। तेषु प्रथम- मध्यम- परम- आदिम- प्रभृतयो नामभ्यः प्रत्ययोत्पत्त्या संभूताः। अथान्ये अवम- अपम- संभूताः। अथाप्यु अधम- इति शब्दो नामनिपातोभयेतरभूतादव्ययाद् अधस् इत्यस्मात् प्रत्ययोत्पत्त्या संभूतः। अत आख्यातविलक्षणत्वे सत्यु आख्यातार्थनिर्भरः सत्त्वभूतो मूर्तिमानिव भावः संख्याकालाद्यविविक्तः। तस्मात् सामान्येन नामीभूतेभ्यः शब्दरूपेभ्यः क्वचित् क्वचिद् अव्ययात्मकेभ्यः स्वरादिभ्योऽतिविरलतयोपसर्गप्रतिरूपकेभ्यो निपातेभ्योऽभिव्यक्तिं लभमानात् तद्धितोत्पत्तिर् भवतीत्येवं सुवचम्। तादृशश्चार्थो निकर्षप्रकारक इह 'अप' इति निपातगम्य इति कृत्वा तस्मात् तद्धितोत्पत्तिर् निर्बाधा भवेत्। ननु कैश्चिन्नवीनैरभियुक्तैः (तु. PW. GW. MW. प्रभृ.) एवंविधेषु संकेतितचरेषु स्थलेषु निपातेभ्य एभ्य आतिशायनिकस् तमप् प्र. उच्यते स एव स्वीक्रियताम् इति चेत्। सत्यं, शक्नुयाम चेदवश्यं तद् अङ्ग स्वीकुर्याम। का बाधेति चेद्, उच्यते। नेह कोऽपि नवीनानामेव प्रतिभाया अयं प्रकाशो यन्निपातेभ्य आतिशायनिकः प्र.उच्यते। प्राक्तनैरपि स्वीयया प्रक्रियया सोऽनुमतः। तथाहि अर्थतो निपातविशेषस्य गतित्वेऽध्यवसिते तादृक्कृतप्रयोगबलेनाऽध्याहृतयोग्यक्रियाया निष्ठान्ताया घसंज्ञकस्य प्रत्ययस्योत्पत्तेः सुवचत्वसंभवात्। तेन यथा ऋ (१०,९७,१८) इत्यत्रौषध्यन्तरापेक्षयौषधिविशेषस्य श्रेष्ठत्वापादनार्थम् उत्तमा-इति शब्दः श्रूयते। तत्र 'उद्गततमा उत्तमा' इति मध्यमपदलोपविशिष्टः प्रयोगः द्र.। अनयैव दिशाऽत्र (शौ. आस्थ.) इन्द्रादीनां प्रथमत्वादिविशिष्टेषु त्रिषु रथेषु आवितेष्व् अहीनां चतुर्थस्य रथस्य रथान्तरापेक्षया अपगततमस्य भूयस्तमां निकृष्टस्य श्रुतिर्भवति। तत्र प्रकरणतोऽर्थतो हीनताविशेषप्रद्योतनार्थं तमपः सावकाशता भवति। यथा च उत्तम-शब्दे मध्यमपदस्य गतेत्यस्य लोप उक्त एवमिह तस्य प्रत्ययाद्यक्षरसहितस्य लोपः द्र.। एवम् उपम- शब्देऽपि समानो न्यायः। नन्वेवं निपातेभ्यः स्वीकृत एवाऽऽतिशायनिकः प्र., किमित्यवोचः स्वीकर्तुं न शक्यत इति चेत्। नैतदुक्तं निपातेभ्य आतिशायनिको न भवतीति। एतदेवोक्तं यत् पूर्वोक्तेषूदाहरणेषु सर्वत्राऽऽतिशायनिक एव प्र. इति या केषांचिदभिरुचिः तत्र तत्रैव स सुवचः। अन्यत्र पूर्वोक्तस् तात्रभविकस् तद्धितो म-प्रत्यय इति। प्राक्तनानां पदकाराणां यशोवर्धिन्येषा विवेकदृष्टिर् भवति यत् ते तमबन्तेषु प्रयोगेष्व् अवगृह्णन्ति नाऽवगृह्णन्ति च तदितरया प्रक्रिययाऽवगतेषु प्रयोगेषु। तदवग्रहभावाऽभावाभ्यां शब्दराशिद्वयपार्थक्यं

अप √१मा, अ॒प···मिमीमहे शौ १८, २, ४०.

अप-माय[a] पै ३, ३०, ६.

?अप √१*मि, ?अ॒पमयाः[b] शौ १९, ५७, ५.

अप-मि॒त्य, अप-मि॒त्य- अप √मे द्र.

अप √मृ

*अप-मा॒र्[c]-

¶अप-मारि॒न्[d]- -री तै २, ५, १, ७.

अप-मृत्यु- -त्युः खि ७, ७, १०. [°त्यु- पापक्षुध्°]

अप √मृज्, अ॒पमृज्महे शौ ४, १७, ६; ७; १८, ८; ७, ६७, २; ३; पै ५, २३, ८; अ॒पमार्ष्टु, अ॒प[2] (मार्ष्टु) शौ ४, १८, ७; पै ५, २४, ७; अ॒पमृड्ढि शौ ११, १, २६; पै १६, ९१, ९; अ॒पमृजे-थाम् शौ १८, ४, ४९; ¶अपा-मृष्ट काठ ६, १; क ३, १२.

अप-मृज्य[e], अ॒प(मृज्य) शौ ४, १८, ८.

अ॒प-मृष्ट[f]- -ष्टः मा ७, १२; १७; का ७, ६, २; ७, ३; -ष्टम् शौ ६, ११३, ३.

अ(प>)पा-मार्ग॒[g]- -॒र्गः मा ३५, ११; का ३५, ४, १०; शौ ४, १७, ६; ७; १८, ८; ७, ६७, १-३; पै २, २६, ४; ५, २३, ८; २४, ८; -र्गः शौ ४, १७, ८; १८, ७; १९, ४; पै २, २६, ५; ५, २३, ४; २४, ७; २५, ४; १६, १४७, १-८; १४८, १-१०; १४९, १-१०; -¶र्गान् मै २, ६, ३; ४, ३, ४; काठ १५, २.

?*अप √मृप्[h], अपमृपः[i] पै १, ६४, ३.

अप √मे>२मि[j], अ॒पमयेत मै ४, २, ७.

अप-मि॒त्य शौ ६, ११७, २[k]; पै १६, ५०, १.

संजायते। तेन ऋ (१०,३९,३) इत्यत्राऽऽतिशायनिकार्थ-स्याऽभावे म-प्रत्ययान्तम् अवग्रहनिरपेक्षम् **१अपम॒-** इति प्राति., शौ. आस्थ. चाऽऽतिशायनिकार्थस्य सद्भावे **तमप्**-प्रत्ययान्तं सावग्रहं **२अप-म॒-** इति प्राति. द्र.। एवम् **१उपम॒-** इत्यस्य **२उप-म॒-** इत्यतो विवेकः यस्थ. अद्र.। शौ. पै. च यमु. '**अपम॒ा**' इति दीर्घान्तस्य रूपस्य क्रियाविशेषणतया निर्वाहं यत् W. प्रास्तौत् तन् निर्मूलमिव भवति। साक्षाद् रथविशेषणस्यापेक्षितत्वात् मन्त्रपूर्वार्धपठितरथान्तरविशेषणीभूतप्रथमादिशब्दान्तर-सकक्षत्वापादनत्वस्य युक्ततरत्वादित्यर्थः। अतस् तेनैव पाण्डु. प्रभृ. च प्रस्तावितः '**अपम॒ः**' इत्याकारकः **शोध** एव सुवचः स्यात्।

[a]) **ल्यपि** रू. (तु. नाउ. टि.)।

[b]) द्विधाऽत्र संदेहो भवति। रू. च धा. च। रू. तावत्। यनि. उत '**अप-मा॒य**' इति। कथमिति। मूको. पपा.सा. च यनि. आहुस्तेन पूर्वः कल्पः। यनि. नापू. मन्त्रे श्रूयमा-णस्य '**त्वम**' इत्यामन्त्रितस्याऽऽक्षेपपुरःसरं पूर्वार्धेनैव परिसमाप्यमानस्य वाक्यस्य नापू.मन्त्रेण संनिहिततराभि-संबन्धस्य प्रतीतेश्चोत्तरार्धीयवाक्यमात्रत्वेन पृथक् मन्त्र-स्याऽवस्थितेररुचिरत्वेन प्रतीतेश्च पूर्वार्धोत्तरार्धयोः समान-मन्त्रावयवत्वे मपु. प्रारभ्य उपु. पर्यवसितेरनुपपत्तेश्च पै. अन्यथाश्रुतेश्चोत्तरः कल्पः (तु. पै ३,३०,६; W. च)। **अथ पूर्वे कल्पे** धा. संदेहः। कथमिति। **अप √मय्** (तु. पाधा.) इत्य् उत तन्मूलतया सुकल्पः **अप √१*मि** इतीति। उभयथाऽपि लेटि मपु१ रू.द्र. (यत्तु सा. '**अपसारय**' इति लोटा व्याचष्टे, तल् लेटश्च लोटश्चार्थसंनिकर्षनिघ्नं द्र. [वैतु. पाण्डु.])।

[c]) घञन्तं प्राति. नाउ. व्युत्पत्तावौपयिकं द्र.।

[d]) **इनिः** प्र. मत्वर्थीयः (पा ५,२,११५)। तत्-स्वरः।

[e]) गस. **ल्यबन्त**-कृत्-प्रस्व.(पा ६,१,१९३;२,१३९)।

[f]) कर्मणि **क्तेऽ**नन्तरगतिस्वरः (पा ६, २, ४९)।

[g]) गस. उप. करणे **घञि** पूप. दीर्घत्वं थाथादि-स्वरश्च (यक्र. पा ३,२,१२१; ६, ३,१२२; २,१४४)।

[h]) अश्रुतपूर्वत्वमात्रसमर्पकं प्रश्नचिह्नं न सांशयिकम्। तर्हि कथमयं धा. इति। यथा **√कृप्**, **√तृप्**, **√दृप्**, **√सृप्** इत्येते भवन्तीति। कोऽभिसन्धिः। ऋदन्ते धा. मूले सति **√२पा** इत्येतन्मूलः पकारोपजन इति (यतु. **परा √मृप्**)।

[i]) लुङि मपु१ रू. द्र.। पाप्र. लृदित्कारतः **अङ्** उसं. (पा ३,१,५५)।

[j]) यनि. आत्वं च तत ईत्वं च (यक्र. पा ६,१,४५;४,६६) न प्रादर्शिषाताम्। तद्वच्छ्रुत्यनुपलम्भात्। इत्वमपि यत् प्रदर्शितं भवति, तदप्य् ईत्वविषयभूते हलादौ किति ङिति **ल्यब्**-मात्रे विकल्पितमेव (पा ६, ४, ७०) भवति। ततः किमिति। **ल्यपि** (एउ. द्र.) न्याय्यत्वे संभवति व्यत्ययसाध्यत्वम् इत्वस्य मा भूदिति (वैतु. सा.)।

[k]) गस. **ल्यबन्त**- कृत्- प्रस्व.(पा ६,१,१९३;२,१३९)। अत्र यत् सा. '**उदीचाम्**' (पा ३, ४, १९) इति **क्त्वामाह** तत्र चोद्यं भवति। '**समानकर्तृकयोः**' (पा ३, ४, २१) इत्युक्तदिशा पूर्वकाले यथान्यायं प्रत्ययस्य सुसंगतत्वाच्च न्याय्यपौर्वापर्य्यविपर्ययाऽविषयत्वे सत्य् औदीच्यविकल्पस्याऽवसराभावाच्चेति दिक्।

अप-मित्य[a]– -त्यम् शौ ६, ११७, १; पै १६, ४९, १०.

†**अप √म्यक्ष्**, अप···म्यक्ष ऋ २, २८, ६; मै ४, १४, ९.

अप √म्लुच्

अप-म्लुक्त[b]– -क्तम् ऋ १०,५२,४.

अप √यज्, अपयजामहि पै ४, १८, २.

अप √या, अपयाहि शौ १९, ५६,६; पै ३, ८, ६; अपयात शौ ६, ७३, ३.

अप √यु, अप···युयोति ऋ १, ९२, ११; अप···युयोधि ऋ ९, १०४, ६; अप···युयोधि ऋ ८, ११, ३; अप···युयोतन ऋ ५, ८७,८; अप[२]···युयोतन ऋ १०, ६३, १२; अप(युयुयाताम्) ऋ ८, १८, ८.

१अ-पर,रा[c]– -रः ऋ १, ७४, ८; १२०,२;६,२७,५;१०,१८,४; ५; २७, ७; १३६, ५; मा ३५, १५†; का ३५,४,१६†; ¶तै १, ६,७,२; २, २,२,५;४, ७[२]; ६, १, ३, ६; मै १, ८, ४; ८; ९, ६; ३, ७, ४[२]; ९, १; काठ ६, ६; ८, ३; ४[४]; ९, १४; १३, ४; २३, ४; २५, २[२]; ३[२]; ¶क ४, ५; ६, ८; ९[४]; ३६, १; ३८, ५[२]; ६[२]; शौ ९, ५, २८; १०, १,२७[२]; ४, १; †१२, २, २३; २५; १३, २, १४; १४, २,३‡[d]; पै ५, २०,१; ८, १९,११; १६, १५, १;३७,८[२]; -रम् ऋ १, ३१, ४; १४५,२; ६, ४७, १५; १०, १३९,२; मा १७, ५९†; का १८,५, १०†;

[a]) गस. क्यबन्त-कृत्-प्रस्व. (पा ६, २, १३९)। एपूटिदि. धा. इत्वं न्याय्यं द्र.।

[b]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६,२,४९)।

[c]) प्रथमं प्राति. आद्युदात्तं वि. द्वितीयं च प्राति. अन्तोदात्तं वा. क्रिवि. भवतः। तदिह किमेकमेव शब्दरूपं विशेषणतया क्रियाविशेषणतया वा प्रयोगभेदाद् भिन्नस्वरमुताहो भिन्नव्युत्पत्तिकं सरूपं शब्दद्वयमित्यादिर् विमर्शविशेषापेक्षोऽन्यत्रविस्तरो विषयः द्र.। संक्षेपस्त्वेवमवधेयः। आद्युदात्तं प्रथमं प्राति. पक्षद्वयान्यतरसुसाधं भवति। '१अ+पर-' इत्येवं तस. नञ्-स्वरः (पा ६,२,२) इत्येकः पक्षः। इह पर-शब्दस्य मुख्यतया वर-पर्यायतायां सत्यामवराणां स्वाभाविकीमनुयायिनीं वृत्तिमुपादायाऽवरपर्यायभूतस्याऽपरशब्दस्यापि तथाविधां वृत्तिं कल्पयित्वाऽनुयानं कालिकतया परिणमय्य भाक्त उत्तरभावेऽपि पाश्चिकमर्थपर्यवसानं द्र.। एवं तावन्मुख्यामुख्यार्थद्वयसुनिदर्शनः प्रथमः पक्षः। अथ द्वितीयः। यथा अपम-, अवम-, उपम- प्रभृ. अपाऽऽदिभ्योऽव्ययेभ्यो म-प्रत्ययेन तद्धितेन निष्पन्ना उक्तपूर्वाः (तु. २अप-म-) तथैवेह निकर्षसामान्यवाचिनो ऽपादव्ययात् तद्धितो मत्वर्थीयो रन् प्र. नित्-स्वरेणाद्युदात्तश्च द्र.। कालिकोत्तरभावपरिणामप्रक्रिया चापि प्रथमपक्षवदिहापि प्रवर्तनीया भवति। एतयोर् द्वयोः पक्षयोर् मध्येऽपि किंचित् तारतम्यमिव भवति। तथाहि वैयाकरणकुलाचार्यप्रवृत्तिर् ज्ञापयति यथा द्वितीय एव पक्षः साधीयान् स्यादिति। कथमिति चेद् उच्यते। सर्वादिषु (पा १, १, २७) हि पर-शब्दे पठ्यमाने ततो नञ्-तस. सर्वनामकार्यकलापस्य पूर्ववद् अबाधितत्वात् पुनर् यद् अपर- शब्दः पठितस्तेन ज्ञायते यथाऽयं शब्दो नञ्-पूर्वात् पर-शब्दाद् भिन्न एव स्याद् अत्रोक्तद्वितीय-पक्षगतप्रक्रियया निष्पन्न इति। न च बहुव्रीहौ सर्वनामताया बाधितत्वात् (पा १, १, २९) तस्याः पुनःप्रसवार्थम् अपर- शब्दः पठ्यमानोऽत्र २अपर्- इत्यस्य ग्राहक इति सुवचम्। तस्य क्रियाविशेषणतया प्रयोगभूयस्त्वाद् विशेष्यगर्भतया भविष्यत्सामान्यवाचकत्वात् सर्वनामतयोदाहार्यत्वासंभवात्। अथ तृतीयः पक्षः। अपरः =अपगततर इति कृत्वा 'अप' इत्यव्ययाद् घः स्यादातिशायनिक इत्येवमभिप्रयन्तः PW. प्रभृ. अवग्रहाभावविषये चोद्या भवेयुः। कामं सावग्रहनिदर्शनाभावाच् चोद्यपरिहारे प्रयत्नः क्रियेत न त्वसौ चरितार्थः स्यात्। समानप्रक्रियया घान्ततया व्याख्यातेष्व् १अपम-प्रभृ.शब्देषु सावग्रहत्वस्य विद्यमानत्वादिति दिक्। अथ द्वितीयं प्राति.अन्तोदात्तम्। तत्र विमर्शसंक्षेपः। इह पर-शब्दस्य वर-पर्यायताऽनवकाशा भविष्यदर्थपर्यवसानकालिकविप्रकर्षार्थवाचकता च सावकाशा भवति। किमिति भेदोऽयं विधीयत इति चेत्। नायं विधिरपि तु यथाश्रुत्यन्वाख्यानमात्रमिदं भवतीति। एवं च सति पूर्ववदत्रापि पक्षत्रयमुपस्थाप्य 'न परमुत्तरभवं यतस्तद् यथा स्यात् तथा' इति कृत्वा भविष्यत्-सामान्ये क्रियाविशेषणतया बस.सत्यन्तोदात्ततया च (पा ६,२,१७२) निगमा यथायथं व्याख्येयाः। निकर्षार्थस्य च श्रुतिषु निदर्शनाऽभावाद् द्वितीयस्य तद्धित-र-प्रत्ययान्ततया व्याख्यानवतः पक्षस्य, घान्ताच् छान्दसे अमु-प्रत्ययेऽन्तोदात्ततायां सूपपदायामपि पूर्वोक्तदिशाऽवग्रहाभावाच्च 'अपराय, अपरीभ्यः, अपरीषु' इति निगमानाम् अमन्तघान्ततया व्याख्यातुमलभ्यमानत्वदर्शनात् तत्प्रधानस्य तृतीयस्य चापि पक्षस्य PW. प्रभृ. सुद्धोषितस्य सतः सुत्यजता निर्बाधा द्र.।

[d]) विशिष्ट इह ऋ (१०, ८५, ४०) पाभे.।

¶तै २, ६, २,५; ३,१२,२; ४, ६, ३, ४†; ६, २, ४, १; ¶मै १, ४, १०; ६, १२[2]; ८, ४; ९[2]; २, १,११; ५,४; १०,५$; ३, १, ३[2]; १०, ४; ¶काठ ६, ६[2]; ११, ६; १२, ६[2]; १३, ४; १८, ३†; १९, २; ३२, ७; ¶क ४, ५; २८, ३†; २९, ८; शौ ९, ५, २७; १३, १, ५६; ५७; १४, १, ६४; १८, २, ३८; ४५; ५०; ५१[2]; ४, ४४; पै ५, ३८, ५†[a]; ८, १९, १०; ९, ७, ४; १६, १०३, ७†; १५३, ६; –¶रया काठ ११,६; –¶रस्मात् मै १, ८, ४; –¶रस्मिन् मै १, ८, ४; काठ २३, ६; –¶रस्य मै ४, २, ८; –†रस्याः ऋ १०, २९, २; शौ २०, ७६, २; –¶रस्याम् मै २, ५, ९; –रा ऋ १, १२४, ९; १८५, १; मै ३, ८, ७¶; –राः ऋ ३, ५५, ५; ५, ४८, २; शौ १०, १०, ८; पै १६, १०७, ८; –रान् ऋ ७, ६, ३; शौ १०, ३, १३–१५; पै ३, ३, ३; १६, ६४, ३; ५; –¶राभ्याम् तै ७,५,३,१; काठ ३३,५; –राम् ¶काठ २०, १०; २८,४[2]; ¶क ३१,१२; ४४,४[2]; शौ ६, १८, १; –राय ऋ ७, २०, ७; पै १,१७,४[b]; –†रासः ऋ ५, ४२, ६; शौ १८, १,४६; पै २, ३०, ३; –रे ऋ १०, ४४, ७; शौ ९, ११, ३; १८, ३,७२; २०, ९४, ७†; पै ८, १९, ५; १६, ५२, २[c]; –रेण ऋ २,२९, ३; मै १,८,६¶; क २,१०; ४१, ३; शौ १०, ४, ३; पै १६, १५, ४; –रेभिः ऋ ६, ४७, १७; ¶रौ मै २, ५, १; ३, ९, १; काठ १३, १.

अपर-ज॒[d]– -जः काठ ३६, ७; –जान् तै ३, ५, ३, २; पै १६, १३१, ३–१०; –जाय मा १६, ३२; का १७, ५, १; तै ४, ५, ६, १; मै २, ९, ६; काठ १७, १४; क २७, ४.

¶अपर-पक्ष[e]– -क्षः तै ३, ४, ९, ६; मै १, ५, ७[2]; ९, ३; काठ ९, ११; –क्षाः तै ५, ७, ६, ६; –क्षान् काठ ३४, १३; –क्षाय मै १, ५, ७; काठ ७, ५; क ५, ४; –क्षे काठ ७, ५; क ५, ४.

[e]) लक्षणे कप्र. 'प्रियाणि [नामानि वा द्रोणानि (तु. सा.) वा]' इत्येतदन्वितः [वैतु. GW. 'अभि···पवते' इति। सा. वा. चिन्त्यो भवति। तृतीयपादस्य पूर्वार्धीयायास्तदभिप्रेतायाः संगतेरयुक्तत्वात् (तु. सस्थ. टि. √श्ये >अश्यत)]।

[f]) लक्षणे कप्र. 'वीतिम्' इत्येतदन्वितः (वैतु. सा. GW. 'अभि···अर्ष' इति)।

[g]) लक्षणे कप्र. 'गाः' इत्येतदन्वितः [तु. सा. GW.; वैतु. PW. MW. 'अभि···उष्णन्' इति (चिन्त्यं त्वेतद् भवति। सोम-ज्योतिष्करणकस्य गवायुभयसमानकर्मकस्य दहनस्य प्रसिद्धिप्रयोजनाऽभावात् (तु. सस्थ. टि. √उष् >उष्णन्)]।

[h]) लक्षणे कप्र. 'निम्नम्' इत्येतदन्वितः (वैतु. सा. PW. प्रभृ. 'अभि···अक्षाः' इति)।

[i]) लक्षणे कप्र. 'वायुम्', 'मित्रावरुणा', 'नरम्' 'इन्द्रम्' इत्येतदन्वितः [='तत्तद्देवताया उद्दिष्टायै वीतये' (वैतु. सा. GW. प्रभृ. 'अभि···अर्ष' इति)]।

[j]) लक्षणे कप्र. 'नः (च. न द्वि.)', 'वस्त्रा' 'धेनूः' 'अश्वान्' इत्येतदन्वितः [वैतु. सा. GW. (व्यर्थमन्तर्भावितण्यर्थे) 'अभि···अर्ष' इति)]।

[k]) लक्षणे कप्र. 'वसूनि', 'आर्षेयम्' इत्येतदन्वितः (वैतु. सा. PW. प्रभृ. 'अभि···अर्ष' इति)।

[l]) लक्षणे कप्र. (तु. टि. ऋ ९, ६३, १२)।

[m]) लक्षणे कप्र. 'द्रुणा' (<*द्रुण- <द्रोण- यद्र.) इत्येतदन्वितः [='द्रोणान्यभिलक्ष्य हितः प्रेरितः' (तु. GW.; वैतु. सा. 'अभि···हितः' इति, PW. 'अभि···अक्षाः' इति च)]।

[n]) लक्षणे कप्र. 'वाजान्' इत्येतदन्वितः [तु. सा.; वैतु. PW. प्रभृ. 'अभिप्रगाहते' इति (आख्यातस्याऽकर्मकत्व-संभवे तु. ऋ ९, ८६, ४०)]।

[o]) लक्षणे. कप्र. (तु. टि. ऋ १, ११, २; ८; ५१, १)।

[p]) 'तिष्ठति' इत्याक्षेपमुखेन युयोजयिषन्तौ वें. सा. भवतः। तस्मिन् दर्शने 'य ओजिष्ठः सन्' इति कर्तुर् विशेषणतामात्रम्। कप्र. कल्पे तु 'ओजिष्ठो भवति' इत्यस्य विधेयत्वमिति विवेकः द्र.।

[q]) 'यज्ञे प्राणाऽञ्जनः सोम उभे अपि द्यावापृथिव्यौ व्याप्नोति' इत्यर्थस्य स्वारसिकत्वेन प्रतीतेरभिव्याप्यस्य प्रामुख्यवचनः कप्र. द्र. (वैतु. सा. गतित्वपरः 'गच्छति' इत्याक्षेपुकः)।

[r]) लक्षणे कप्र. 'ईम्' इत्येतदन्वितः (तु. GW.; वैतु. सा. 'अभि·· सृजत' इति)।

[s]) लक्षणे कप्र. 'त्रिपृष्ठम्' इत्येतदन्वितः (वैतु. सा. PW. प्रभृ. 'अभि···समस्वरन्' इति)।

[t]) 'अभि···असर्जि' इति योगं पश्यन् MW. अपश्यो भवति। तथात्वेऽलंकृतिमुद्दिश्योपमामुखेन समर्पयितुमिष्टस्य वस्तुनः पङ्गुभावप्रसङ्गात्। मीळ्हु-सकक्षस्योपमेयभूतस्य कलश-पदार्थस्य लक्षणे कप्र. अभिना प्राधान्येनाऽभिलक्षितत्वे त्वालङ्कारिक्याकाङ्क्षा सम्यक् पूर्त्तिमियादित्यसावेव पन्था अभ्युपेयः (तु. सा. GW.)।

[u]) लक्षणे कप्र. (तु. टि. ऋ ९, २३, ४)।

[v]) लक्षणे कप्र. '(अस्मभ्यं) रयिम्' इत्येतदन्वितः (वैतु. सा. PW. प्रभृ. 'अभ्यर्षसि' इति योग इति कृत्वा अभ्य(भि √अ)र्ष् इत्यस्योपरि अभि √क्षर् इत्यस्यार्थं मिथ्याऽऽरोपुकाः)।

[w]) लक्षणे कप्र. (तु. टि. ऋ ९, ६२, २५)।

[x]) लक्षणे कप्र. 'धाम' इत्येतदन्वितः (तु. वें. सा.; वैतु. GW. 'अभि···पवस्व' इति)।

[y]) लक्षणे कप्र. 'वाजान्' इत्येतदन्वितः (तु. टि. ऋ ९, ९९, २; सा. च; वैतु. PW. प्रभृ. 'अभि···प्रगाहसे' इति)।

[z]) भाव-लक्षण-प्रधानः कप्र. द्र. (तु. सा. MW.; वैतु. GW. 'अभि···समस्वरन्' इति)।

९[a]; १०, १, ३[b]; ४, २[c]; १७, ६; १८ ८[2d]; २५, ३[e]; २९, ३[f]; ३२, १[g]; ३७, १२[h]; ४३,	७[i]; ४५, ९; ५३, ७; ८[j]; ११[k]; ६४, १[l]; ३[b]; ६५, १५[m]; ६६, ९; ६८, १[n]; ७१, ३[b]; ७५, ४[o];	८३, ६[p]; ७[q]; ८४, १[r]; ८७, ९[s]; १४; ९०, ४[t]; ९२, १३[b]; ९६, २[u]; ९८, २[v]; ५[w]; १०३,

a) समर्थ्यर्थपर्यवसायिनीत्थंभूतलक्षणे कप्र. 'रोदसी', 'भुवना' इत्येतदुभयान्वितः (वैतु. सा. गतित्वाऽभिसंबन्धेनैव चरितार्थशक्तीनि सन्ति पूर्वार्धीयानि पदानि दार्ष्टान्तविरचनपरः पुनरपि योगान्तरेणोपयुयोजयिषुः सन् असमर्थभाषीति पर्यनुयोज्यः)।

b) लक्षणे कप्र.(तु.टि.ऋ १,११,२;८;५१,१;१६४,३)।

c) लक्षणे कप्र. 'त्वा' इत्येतदन्वितः (तु. टि. ऋ ८, ४८, १; वैतु. सा. GW. 'अभिसंचरन्ति' इति)।

d) उभयत्र लक्षणे कप्र. 'जीवलोकम्', 'जनित्वम्' (द्वि१) इत्येतदन्वितः [तु. सा.; वैतु.सा. (शौ १८,३,२), PW. प्रभृ. च 'अभिसंबभूथ' इति (='जनित्वम्' इति प्रदर्शुकाः)]।

e) स्वार्थप्रधानम् अव्य.। चित्->'चित्' इत्येतत् नाउ. पदं बस. उप. इव निहतं द्र. (तु. टि. ऋ ६, १७, ९)। वा. 'वधात्' इत्येतेन (क्रिप. अपेक्षया) नेदीयानिवाऽभिसंबन्धः [तु. सा.; वैतु. GW. 'अभि···मृळा' इति योगं चिकीर्षुः (तदर्थं व्यर्थं वाक्यद्वयमिति कृत्वा क्रिप. आवर्तयंश्च 'नः' इति च३ सत् द्वि३ इत्युपगमयंश्च [तु. सा. अपि])]।

f) लक्षणे कप्र. 'गिरः' इत्येतदन्वितः ('यत इमाः स्तुतयस्तत्रत्या एव दुरो विधाव यथा रन्त्यं मदं प्राप्नुया इति'। वैतु. सा. प्रभृ. 'अभि···विधाव' इति)।

g) लक्षणे कप्र. 'वरान्' इत्येतदन्वितः (तु. टि. ऋ ४, १, १३, सा. च; वैतु. GW. प्रभृ. 'अभि···प्रसीदतः' इति)।

h) लक्षणे कप्र. 'नः' इत्येतदन्वितः (तु. सा. प्रभृ.)।

i) लक्षणे कप्र. 'इन्द्रम्' इत्येतदन्वितः [अपां च सिन्धुं कुल्यानां च ह्रदमभिलक्ष्येव सोमानामिन्द्रमभिलक्ष्य संक्षरण उपमाया ह्रदयं भवति। न तु तत्तदभिलक्षितस्याऽभिसंक्षर्यमाणत्व इत्यभिसंधिः (वैतु.सा. 'अभि···समक्षरन्' इति)]।

j) लक्षणे कप्र. 'वाजान्' इत्येतदन्वितः [तु. सा. 'प्राप्तुम् उत्तरेम' इति (नदीम् इति शेषस्तस्याः कर्मतया प्रकृतत्वात्)। एवम् अपश्यन्तो दयनीयाः स्युः W. बिरहय्य PW. प्रभृ. 'अभि···उत्तरेम' इति योगमुशन्तः]।

k) लक्षणे कप्र. 'योन्याः' इत्येतदन्वितः (तु. GW. प्रभृ.; वैतु. वें. सा. च 'अभि···वनते' इति)।

l) स्वार्थप्रधानम् अव्य. (तु. पपा.; वैतु. सा. PW. प्रभृ. 'अभ्या(भि-आ)ववर्तति' इति)। यद्वा कप्र. 'ऊती' [=ऊतीर् (=सांहितिको यतिविशेषितप्रवृत्तिकोऽजमध्यस्थरेफलोपः नैप्र. द्र. [वैतु. सा.=ऊत्यै])] इत्येतदन्वितः।

m) लक्षणे कप्र. 'भुवना' इत्येतदन्वितः (तु. टि. ऋ २, १५, ५)।

n) लक्षणे कप्र. 'बृहस्पतिम्' इत्येतदन्वितः [तु. टि. ऋ १,११,२;८;५१,१; वैतु. सा. प्रभृ. 'अभि···अनावन्' इति कृत्वोपमानांशीयस्वारस्यं प्रतिघातुकाः (तु. सस्थ. टि. उद-प्रुत्->तः, वि->वयः, √वद् >वावदत्-> -दतः)]।

o) लक्षणे कप्र. 'त्वा' इत्येतदन्वितः (वैतु. सा. PW. प्रभृ. 'अभि···अर्षति' इति)।

p) लक्षणे कप्र. 'माम्' इत्येतदन्वितः (तु. टि. ऋ २, १६, ८)।

q) स्वार्थप्रधानम् अव्य. [वैतु. सा. PW. प्रभृ. 'अभिप्रेहि' इति; सस्थ. शौ (४, ३२, ७) इत्यत्र सा. च 'नः' इत्याक्षिप्तेन सता कप्र. इति, W. WI. च 'तान्' इत्याक्षिप्तेन सता कप्र. इति]।

r) स्वार्थप्रधानम् अव्य. द्र. (वैतु. सा. GW. 'अभिप्रयन्तु' इति)।

s) लक्षणे कप्र. प्रथमे स्थ. 'रक्षांसि' इत्येतदन्वितः। द्वितीये स्थ. एतदन्वयार्थं 'तान्' इत्येतदाक्षेप्यम् [वैतु. सा. (प्रथमे स्थ. एव स्पष्टं भाषते), PW.प्रभृ. 'अभिशोशुचानम्' इति)]।

t) चेतनाचेतनाभिव्याप्तिपूर्वकं विक्रमणे तात्पर्ये लक्षणे कप्र. द्र.।

u) लक्षणे कप्र. 'योनिम्' इत्येतदन्वितः (तु. ऋ ९, १०६, ११; वैतु. सा. प्रभृ. 'अभि···समस्वरन्' इति)।

v) अस्मद्-वाच्यस्य प्राधान्येन समर्पयितुमिष्टत्वात् तत्-साधनभूतोऽभिः कप्र. द्र. [वैतु. PW. GW. 'अभि···अगच्छत्' इति, सा. 'अभि···आ···अगच्छत्' इति (तु. टि. सस्थ. आ√गम्>आगच्छत्)]।

w) सप्तमीवचनः कप्र. (तु. दु. सा.; वैतु. PW. प्रभृ. 'अभि···असृजत्' इति)।

१२[a]; ११३, ४[b]; ११५, ७[c]; १२३,२[d]; १३२,१[e]; १३४,७[f]; १४८,३[d]; १६०,३[g]; १८७,४[h]; खि १, ६, ३; २, ८, ३; ११, २; ३, २२, ४[२]; ४, ५, २१[f]; ३५; १०, १; ५, ४, ५; ५, १०; मा ३, ३८[२]–४०[२i]; ४, २५[२d]; ३४[j]; ७, ४५[k]; ११, ४७; ७१†; १२, २६†; ५७[l]; ७०[m]; १०३[n]; †१७, ४४; ९७; ९८; १८, ४५[२o]; ७४†; २०, ५४†; ६९[d]; २५, ३४†; †२६, ११; २६; २७, ३५†; २९, ६[p]; ३१, ४†; ३२, ११[q]; †३३, ३५; ८१; ३५, १०†; ३६, ७†; का ३, ४, ३[२]; ४[४]; ९, १[r]; ४, ८, ३[२]; १०, ५; ९, २, ५; १२, ४, ११; ७, ६†; १३, २, ९†; ४, १३; ५, ९; ७, २; १८, ४, १२†; †१९, १, १०; ११; २०, २, ८[३]; ५, ७†; २२, ५, ८†; ७, ३; २७, १३, ३†; २९, ५, ४†; ३१, १, ६†; †३२, ३, ६; ६, १२; ३५, १, ४†; ३, ८; ४, ९†; ३६, १, ७†; तै १, १, ४, २[s]; २, ३, २; ३[t]; ६, १; ९, १; ३, ४, ३; १४, ३†; ४, ४३, २[u]; ४६, २†; ५, ९, ३¶; ६, ३, १¶; १२, ४†; ७, ६, ७¶[v];

[a]) लक्षणे कप्र. 'अमित्रान्' इत्याक्षिप्तेनाऽन्वितः (तु. म.; वैतु. सा. उ. PW. प्रमृ. 'अभिप्रेहि' इति (ग्रुदात्तमेकं पदं ब्रुवाणाश्चिन्त्याः)।

[b]) लक्षणे कप्र. 'पौंस्यम्' इत्येतदन्वितः (तु. ऋ ७, ३०, १; ८, ९६, १६; वैतु. सा. 'रणम्' इत्यनेनाऽस्याऽन्वयं पश्यन् यत् साधनं तत् साध्यतया प्रतिपादुकः, PW.प्रमृ.च 'पौंस्यम्' इति संप.इह न भवति। किं तर्हि। 'रणम्' इत्यस्य वि. इतीवाऽभिमन्यमानाः 'अभि···प्रापयत्' इति योजुकाः)।

[c]) लक्षणे वेत्थंभूतलक्षणे वा कप्र. 'मानुषान्' इत्येतदन्वितः [=तानभिलक्ष्येति वा तानभित इति वा (वैतु. सा. PW. प्रमृ. 'अभिसन्ति' इत्येवं योजुकाः सन्तः स्वरतश्च षत्वाऽभावतश्च पर्यनुयोज्याः [तु. टि. ऋ २, ४, ९; २३, ९; ७, ३९, ४])]।

[d]) लक्षणे कप्र. (तु. टि. ऋ १,११,२; ८; ५१,१)।

[e]) लक्षणे कप्र. 'ईजानम्' इत्येतदन्वितः (वैतु. वें. सा. च आक्षेपमुखौ 'अभि-वर्धयति' इति, PW. प्रमृ. च 'अभिप्रभूषणि' इति)।

[f]) स्वार्थ-प्रधानम् अव्य. [वैतु. PW. प्रमृ. 'अभिसंरभामहे' इति वदन्तः (अव्ययार्थस्य प्राधान्येन विवक्षितत्वाद् गतिभावे तदलाभाद् अनिष्टद्वैस्वर्यस्य दुष्परिहरत्वाच्च चिन्त्याः)]।

[g]) लक्षणे कप्र. 'क्षत्रम्' इत्येतदन्वितः (तु.सा.GW.)।

[h]) लक्षणे कप्र. (वैतु.सा. स्वार्थप्रधानम् अव्य., GW. 'अभिविपश्यति' इति च)।

[i]) लक्षणे कप्र. 'द्युम्नम्', 'सहः' इत्येतदन्वितः (वैतु. PW. प्रमृ. 'अभि···आयच्छस्व' इति, उ. म. च 'अभि' इत्य् अपि ग. अपि कप्र. इति च 'यच्छस्व' इति √१,यम् इत्युभयथा व्याचक्षाणौ च विकल्पप्रस्ताविव)।

[j]) लक्षणे कप्र.'धामानि' इत्येतदन्वितः (तु. उ.म., टि. तै ६,१,११,५; मै ३,७,८ इत्यत्र सश्रु.ब्राह्मणभागे'अभिप्रच्यवते' इति; वैतु.PW. प्रमृ. 'अभिप्रच्यवस्व' इति)।

[k]) लक्षणे कप्र.'रूपम्'इत्येतदन्वितः(तु.पपा.,टि. तै १, २,३,३; वैतु. उ. म. च 'अभ्या(भि-आ-अ)गाम्' इति)।

[l]) स्वार्थ-प्रधानम् अव्य. [तु. पपा.; वैतु. उ. म. 'अभिसंवसानौ' इति (अनिष्ट-द्वैस्वर्यप्रसङ्गादुपेक्ष्यौ)]।

[m]) लक्षणे कप्र. 'अस्मान्' इत्येतदन्वितः [तु. पपा. म. च; वैतु. उ. 'अभ्या(भि-आ)ववृत्स्व' (तु. तै. पपा. ४, २, ५, ६, यत्रैकस्वर्यं श्रूयते) इति]।

[n]) मा. पपा. 'अभि आवर्तस्व' इत्युभयत्र स्वरदर्शनात् 'अभि' इति स्वार्थ-प्रधानम् अव्य. तदभिमतमिति द्र.। का. अपि तथैव स्यादिति च मतं भवति। (वैतु. PW. प्रमृ. [द्वैस्वर्यदोषात् चिन्त्याः] सश्रु. तै ४, २,७,१ 'अभ्या(भि-आ) वर्तस्व' इति तु. नापूटि.)।

[o]) लक्षणे कप्र. 'मा' इत्येतदन्वितः [तु. सा. तै (४, ७, १२, ३), उ. च; वैतु. म. 'अभि···बाहि' इति]।

[p]) इत्थंभूतलक्षणे कप्र.'मुखं यज्ञानाम्' इत्येतदन्वितः [तु. पपा.; वैतु. उ. म. PW. प्रमृ. 'अभिसंविदाने' इति (अनिष्ट-द्वैस्वर्यं प्रति चोद्याः)]।

[q]) स्वार्थ-प्रधानम् अव्य.। यद्वा 'आत्मानम्' इत्येतदन्वितः कप्र.धा.चाऽकर्मकत्वेन वृत्तिः द्र.[तु.पपा.; वैतु.उ.म. PW.प्रमृ. 'अभिसंविवेश' इति (नापूटिदि. चिन्त्याः)]।

[r]) लक्षणे कप्र. 'यद् (रेतः)' इत्येतदन्वितः (तु. सा.)।

[s]) लक्षणे कप्र. 'सुवः' इत्येतदन्वितः (वैतु. भा. सा. स्वार्थ-प्रधानम् अव्य., PW.प्रमृ.'अभिविख्येषम्'इति)।

[t]) लक्षणे. कप्र. 'श्रेयः' इत्येतदन्वितः (वैतु. भा. सा. 'अभि···प्रेहि' इति योगं मन्वाना उपेक्ष्यौ)।

[u]) लक्षणे कप्र.'रूपम्' इत्येतदन्वितः [वैतु.भा.सा.PW. प्रमृ. 'अभ्यै-(भि-आ-ए)मि' इति (द्वैस्वर्यं प्रति चोद्याः)]।

[v]) प्रत्यर्थः कप्र. इति सा.। 'तदाभिमुख्येन' इति भा.

८,७,२[a]; २,१,११,३[b]; ¶२, २,४[c]; ४,७[2d]; ८[e]; ६,४[f]; ७,४[2g]; ११,६[2h]; ३,१,३[i]; ६,१[2]¶[j]; १४,६[k]; ४,१,१¶[l]; १२,२¶[m]; १४,२†; ¶५,२,२[m]; ३[n]; ३,१[o];

अपि क्रिवि. सत् कप्र. इत्यभिप्रैतीति प्रतीयते। इष्टमपि चैतत्। तथाहि, अनुवाद्यप्रधानांऽशभाजि यज्ञनिवर्तनपुनरालम्भविदि यजिकर्तर्येव विधेयप्रधानांऽशस्याऽपि समावेशनस्य साधीयस्त्वम्। तस्य च यथा कप्र. निगदविस्पष्टत्वं स्यान् न तथा गतित्वेन योगेऽभ्युपगते कर्मकारकमात्रतया गुणभूते तत्पदे संभवेदिति विवेकोऽवधेयः। अस्मिन् कल्पे च द्वैस्वर्यादिविप्रतिपत्तयोऽप्यनवकाशत्वात् पुरस्तादेव बाध्येरन्। एरिथ. K. कृतेऽप्युनुवादे 'to' इत्यस्य स्थाने 'towards' इत्येव सुवचमिति दिक्।

[a]) स्वार्थप्रधानम् अव्य. अर्थतः 'अहम्' इति कर्तृपदं नेदीय इव, 'रक्षः' इति कर्मपदं च परंपरयैव स्पृशति [=अभिमुखंभावुकोऽहं यथा स्यां तथा भूत्वा रक्षः संदहामि (तु. तत्रैव श्रूयमाणं 'संदग्धं रक्षः' इत्यश्रूयमाणं च 'अभिसंदग्धं रक्षः' इति; वैतु. सा. 'अभि' इति कप्र. 'रक्षः' इत्येतदन्वितः इति कृत्वा सकर्मिकायाः क्रियायाः कर्माऽऽकाङ्क्षायाः पूर्त्यर्थमपार्थाऽध्याहारप्रदर्शितकौशलः, भा. K. च 'अभिसंदहामि' इति योगमातिष्ठमानौ सन्तौ सुवचेऽपि गपू. गत्यन्तरेऽपलक्षणाद्वैस्वर्यमेव परिपोषुकौ)]।

[b]) स्वार्थप्रधानम् अव्य. (तु. टि. ऋ ८,५९,३; कौ २,१००५; वैतु. भा. सा. 'अभिसमजानत' इति)।

[c]) लक्षणे कप्र. 'पुरान्' इत्येतदन्वितः [तु. पपा.; वैतु. भा. प्रमृ. 'अभिनिर्दिशति' इत्येवं योजुकाः सन्तोऽपार्थाऽपलक्षणाद्वैस्वर्यपक्ष्या उपेक्ष्याः (यदेव 'शमयित्वा' इत्यस्य कर्म भवति तदेव 'निर्दिशति' इत्यस्येति च तच्च तदभिलक्ष्यत्वेनेष्टात् पृथग्भूतमिति चाऽभिसंधिः)]।

[d]) लक्षणे कप्र.। एकत्र 'यजमानम्' इत्येतदन्वितः [तु. मै ३,७,८, इत्यत्र 'अभिसंभवतः' प्रमृ. (यद्र.) यत्र समानप्रकरणे शाखाभेदेन प्रयोगवैशिष्ट्यं निदर्शयन्निव गतित्वमुपलभ्यते (वैतु. K. 'अभिसंभवतः' इति। तन्न। अपलक्षणद्वैस्वर्यप्रसंगः स्यादित्येको हेतुः। गतित्वाऽभ्युपगमेऽपि लक्षणविशिष्टसायुज्यार्थस्याऽभिव्याप्त्यनर्थान्तरस्यैव संगतत्वात् तदुक्तस्याऽभिभवनाऽऽख्यस्याऽर्थस्य न कोऽपि प्रसंग इति चाऽप्यपरो हेतुः)]। अन्यत्र 'भागधेयम्' इत्येतदन्वितः (तु. भा.; वैतु. MW. प्रमृ. 'अभि··· उद्यूयुते' इति)।

[e]) लक्षणे कप्र. 'किम्' (=भागम्) इत्येतदन्वितः। शेषं नापूटि. चरमे भागे द्र.।

[f]) लक्षणे कप्र. (तु. टि. मा ४, ३४)।

[g]) इत्थंभूतलक्षणे कप्र. 'राष्ट्राणि', 'यम्' इत्येतदन्वितः [वैतु. भा. PW. प्रमृ. 'अभिसमियुः' इति 'अभिप्रवेपेरन्' इति च (निर्दिष्टस्यार्थस्य प्राधान्येन विवक्षितस्य सामान्यकर्मतामापादयन्तोऽन्याय्य-द्वैस्वर्यप्रसङ्गवादिनश्चिन्त्याः)]।

[h]) लक्षणे कप्र. 'एनम्', 'इन्द्रम्' इत्येतदन्वितः ['=अस्मै ज्यैष्ठ्याय समानाः संजानते यथेन्द्राय ज्यैष्ठ्याय देवा समजानत' (तु. नापू. कण्डिकायां 'अन्योन्यस्मै ज्यैष्ठ्याय' इति; वैतु. मै २,२,६ 'अन्योन्यस्य श्रैष्ठे' (?=श्रैष्ठ्ये यद्र.)] यत्त्वत्र 'अभिसंजानते', 'अभिसमजानत' इति योग इति भा. PW. प्रमृ. समर्पितवन्तः, तन्न। अन्याय्यद्वैस्वर्यप्रसङ्गाच्च श्रुतिस्वारस्यविघाताच्चेति दिक्।

[i]) लक्षणे कप्र. 'अमुम्' इत्येतदन्वितः ['हे मरुतः उप (इत) (च) एना (एनम्) विश्पतिनाऽमुं शत्रुभूतमभिलक्ष्य प्रेत च' इति वा. द्र. (वैतु. भा. अविस्पष्टयोगः)]।

[j]) लक्षणे कप्र. 'लोकान्' इत्येतदन्वितः [तु. भा. सा. (लोकाऽपेक्षया पृथग्भूतस्याऽतिरिक्तवस्तुनः श्रावणे तात्पर्यम्); वैतु. PW. प्रमृ. 'अभ्यतिरिच्याते' इति 'अभ्यु-(भि-अ)त्यरिच्यत' इति च)]।

[k]) लक्षणे कप्र. (तु. सा.; वैतु. भा. 'अभिप्रतस्थौ' इति)।

[l]) 'तेषु देवेषु मृतेषु (रात्रिः) व्यौच्छत्' इत्यभिः सप्तम्यनुवादी वाऽऽनन्तर्यवचनो वा कप्र. द्र.। प्रथमे कल्पेऽपि सप्तमीह भावान्तराऽपेक्षया तत्प्राग्वर्तिभाववचना द्र.। न च तान् मृतान् अभिलक्ष्य (तु. सा.) विशेषतो रात्रिः प्रभाता। तस्याः प्रभातभावस्य सामान्येन सर्वमृताऽमृतलोकेनाऽभिसंबद्धत्वात्। अतो नैवाऽभिलक्षणाऽऽभिमुख्यादिप्रकारको कोऽप्यर्थो गतित्वमनुप्रविष्ट इह लब्धाऽवकाशो भवितुमुपकल्पेत।

[m]) लक्षणे कप्र. (तु. टि. तै २,२,४,७)।

[n]) लक्षणे कप्र. 'माम्' इत्येतदन्वितः (तु. सा.)।

[o]) लक्षणे कप्र. 'इन्द्रम्' इत्येतदन्वितः (='तमभिलक्ष्य प्रद्रवणलक्षणप्रवेपनयुक्ता आसन् तु. टि. तै २,२,७,४; वैतु. भा. सा. PW. प्रमृ. 'अभिप्रावेपन्त' इत्यलाभविशेषकं योगमनुजानन्तः स्वरतश्चोद्यतां गताः)।

६[a]; ७[2a]; ५, २[b]; ४[b]; ६, ५[c]; ८, ५[d]; ६, ८, ३¶[a]; ११, ४†; ३, १, १, ४[e]; ९, २[f]; २, ३, ३[2]; ४; ¶९, १[g]; ७[g];

३, ४, ३¶[h]; ४, १, ३¶[i]; ११, ३†; ४, १, ४, ४; ८, २¶[j]; ९, ३; २, २, ३†; ५, १[k]; ३, ११, ४; १३, ७†; ४, ११, २[2l]; ६,

२, १[m]; ४, २†; ८, ४†; ७, १२, ३[1]; ५, १, ५, ९¶[n]; ११, २[o]; ¶२, १, ३[p]; ४, ३[q]; १०, २[r]; ३, १, ३¶[s]; ¶४, ९, ३[t];

[a]) लक्षणे कप्र. 'तुम्', 'भागधेयम्' इत्येतदन्वितः (तु. भा. सा.; वैतु. PW. प्रभृ. 'अभिसमगच्छन्त' इति)।

[b]) चन्द्रस्य निरुप्तं 'हविः'वा 'ईजानम्' वाऽभिलक्ष्योदये वैशेष्याऽभावात् सप्तम्यनुवादी वाऽऽनन्तर्यवचनो वा कप्र. (तु. K.; वैतु. PW. प्रभृ. 'अभ्युदेति' इति)।

[c]) स्वार्थप्रधानम् अव्य. [वैतु. भा. PW. प्रभृ. 'अभिसमनंश्येताम्'इति (अनिष्टद्वैस्वर्यस्य व्यर्थाऽभ्युपगमप्रसङ्गादुपेक्ष्याः)]।

[d]) लक्षणे कप्र.'अग्निं दूतं वृणीमहे' इत्येतन्मन्त्रगतविषयेण युक्तः (तु.भा.;वैतु.PW.प्रभृ.'अभिपर्यावर्तत' इति)।

[e]) लक्षणे कप्र. (तु. टि. तै १, २, ३, ३)।

[f]) लक्षणे कप्र. 'वसीयः' इत्येतदन्वितः।

[g]) लक्षणे कप्र. 'एनम्' इत्येतदन्वितः [तु. भा. K.; वैतु. PW. MW. 'अभिप्रवर्तयति' इति (द्वैस्वर्यदोषप्रसङ्गादुपेक्ष्यौ)]।

[h]) लक्षणे कप्र. 'हिरण्यम्' इत्येतदन्वितः [तु. K; वैतु. भा. सा. प्रभृ. 'अभिव्यनिति' इति (स्वरत उक्तलक्षणं योजुकाः [वैतु. माशब्रा (४,१,२,२७) 'अभिव्युनिति' इति यत्रासावेव योगो द्व्युपसृष्टः सन् साधुर्धातुमात्रस्वरः])]।

[i]) स्वार्थप्रधानम् अव्य. [वैतु. PW. MW. 'अभिसमूहति' इति (द्वैस्वर्यदोषदुष्टत्वाच्चिन्त्यौ)]।

[j]) सप्तम्यनुवादी कप्र. वा. द्र.। अग्निजिह्वाऽभिगतमग्निजिह्वायां वा वर्तमानमित्यध्वरविशेषणेऽभिप्रायः। मै २, १२, ६ काठ १८, १७ इत्यत्र तु जिह्वायाः करणत्वेन श्रवणात् तद्-गतत्वमध्वरस्याऽऽक्षेपात् द्र.। एवं च श्रावितात्क्षिप्तविषयविवेकात् समस्तस्य अभि√१गृ इत्यस्य तत्रैवाऽऽक्षेपश्रुत्योः सावकाशत्वं स्यात्। न त्विह यथाऽऽह K. तद्दृष्टोऽध्वरस्याऽग्निजिह्वात्वाऽऽरोपश्चाऽप्रसिद्ध इत्यधिकं च।

[k]) लक्षणे कप्र. (तु. टि. मा १२, ५७)।

[l]) प्रथमः सप्तम्यनुवादी वा लक्षणार्थो वा कप्र. 'शैशिरात्' इत्येतदन्वितः। यच्च शाखान्तरे 'अभिकल्पमानाः' इत्येकपदश्रुतिर् भवति (मा १३, २५), तदपि गत्यंशे स्वराऽभावात् सूपपदमित्यतिरोहितमिव। तत्र च ऋतुपदे द्वितीयायाः कालात्यन्तसंयोगे योगो वक्तव्यः। द्वितीयोऽप्यभिः(तेऽग्नयः शैशिरादृतू) अभि (कल्पमाना एतत्कर्मेष्टकादिपदार्थविशेषं वा देवा इन्द्रमिव संविशन्तु) इति सामर्थ्यात् पूरयित्वाऽऽक्षेप्यस्य वाक्यस्याऽवशेषमात्रमिति द्र.। अथवा द्वितीयोऽयमभिः शाखाविशेषायत्तद्वैस्वर्यवैशेष्योपाश्रयेण गतिरेव कामं भवतु, न तु तथा सत्यपि प्रथमस्याऽभेस्तथात्वं सुवचम्। अपेक्षाविरहात् (तु. K. सा. च)।

[m]) लक्षणे कप्र.'नः' (=अस्मान्) सतः(=लब्धजनुषः) इत्येतदन्वितः [अस्मन्मनोरथपूर्त्यर्थम् इति यावत् (तु. पपा.; वैतु.सा. 'अभ्या [भि-आ]····जजान' इति)] षष्ठीति सा.। तथात्वेऽभिरनभिसम्बद्ध इव भवेत्। तस्य पञ्चमीयोगाऽप्रसिद्धेः। गतित्वे च तस्य द्वैस्वर्यस्याऽनुपपन्नस्य दुर्वारत्वात्। यद्यपि 'नः' इति द्वि३ इति K. आह, तथाऽप्यसावभेर्गतित्व एव कृतास्थो भवति। तेन चोक्ता स्वराऽपत्तिस्तदवस्था भवति। 'सत्' इति पदस्य 'नः' इत्यनेन सामानाधिकरण्यं वदतश्च तस्य वचनव्यत्ययो दुर्वारः स्यात्। विशिष्टस्य पाभे. कृते ऋ १०,८१,१ द्र.।

[n]) लक्षणे कप्र. 'यजमानम्' इत्येतदन्वितः।

[o]) इत्थंभूतलक्षणे कप्र. (तु. टि. मा २९, ६)।

[p]) सप्तम्यर्थे वा लक्षणार्थे वा कप्र. द्र.। (वैतु. भा. 'अभिपर्यावर्तते' इति)।

[q]) समीपवचनः कप्र. इति भा.। इष्टकाऽऽधानस्य प्रकृतत्वात्, तस्य च शिक्याऽधिकरणतयाऽविवक्षितत्वादित्यर्थः। आधानस्य शिक्याऽधिकरणकत्वे सप्तम्यनुवादित्वं सुवचं स्यात् [वैतु. MW. 'अभ्यु(भि-उ) पदधाति' इति (शिक्य-कर्मकत्वाऽभावात्त्वाऽऽधानस्य गतित्वाऽसंगतेः)]।

[r]) लक्षणे कप्र. 'स्वम् आयतनम्' इत्येतदन्वितः [तु. भा. K.; वैतु. MW. 'अभिपर्यूहते' इति (द्वैस्वरीपुरस्सर ऐकपद्ये य आग्रहः स दुराग्रह इति) तु. अभ्यू(भि√१ऊ)ह् यद्र.)]।

[s]) लक्षणे कप्र. 'अपः' इत्येतदन्वितः।

[t]) लक्षणवचन उद्देशवचनो वा कप्र. 'अन्नाद्यम्' इत्येतदन्वितः [तु. पपा.; वैतु. भा. PW. प्रभृ. 'अभ्युपावर्तते' इति (श्रुतिस्वारस्यमवहेलयन्तो द्वैस्वर्यं प्रति पर्यनुयोज्याः)]।

४[a]; ५, १, ३¶[b]; ७, ४, ३[c]; ४[c]; ¶६, १, १, ७[d]; २, २[e]; ४, ४[f]; ७[२g]; ५, ५[h]; ९, ४; ११, ५[३i];

$; ६[j]; २, ६, १[k]; ३, ३, ५; ५, ४[j]; १०, २[l]; ४, १, ५[m]; २, १[n]; ३[d]; ३,

२[f]; ४, १[o]; ११, ४[p]; ५, ७, २[q]; ६, १, १[r]; २[२s]; ७, ३; १०, २[t]; ११, १; ५[२u];

[a]) लक्षणे कप्र. '**एनम्**' इत्येतदन्वितः (वैतु. सस्थ. टि. '**अभिपवते**' इति)।

[b]) लक्षणे वा विषयसप्तम्यनुवादे वा कप्र. द्र.। पशूनां नानारूपत्वेऽपि वायव्यत्वविशिष्टत्वाद् वायुमेव सन्तं पुरोडाशमभिलक्ष्य तद्विषय इति यावत् तेषां संज्ञानमेकीभावो भवतीति श्रौतोऽभिप्रायः। तदेवमेकीभावं संप्राप्ताः पशव उपतिष्ठन्त इत्युक्तं भवति। अभेः 'संजानानाः' इत्युत्तरेण स्वरवता कृदन्तेन गतित्वेन योग इति भा.। तन्न। स्वराऽऽपत्तेरेव। '**अभि**···**उपतिष्ठन्ते**' इति चाऽभिप्रैति K. एवं तु सति '**एतम्**' इति च '**एनम्**' इति चैतद्द्विरुक्तिरसम्यग् व्याख्याता स्यात् (तु. टि. तै २, २, ११, ६)। विस्तरस्त्वत्र वैश. द्र.।

[c]) लक्षणे. कप्र. (तु. टि. ऋ १,५,१;११,२;५१,१)।

[d]) सप्तम्यनुवाद्युपर्यर्थः कप्र. '**अपः**' इत्येतदन्वितः [तु. भा. K.; वैतु. PW. MW. आशौचप्रसङ्गात् '**अभ्यंम्रियत**' इति योगं मन्वानौ (तादृशस्याऽऽशौचस्यानुवादमात्रत्वेन संकेतने श्रौताऽभिप्रायाच्चिन्त्यौ)]।

[e]) लक्षणे कप्र. '**यज्ञम्**' इत्येतदन्वितः (वैतु. भा. PW. प्रभृ. '**अभिप्रयुङ्क्ते**' इति)।

[f]) लक्षणे कप्र. '**यज्ञम्**' इत्येतदन्वितः (तु. भा.)।

[g]) लक्षणे कप्र. एकत्र '**पशून्**' इत्येतदन्वितः [तु. भा. K.; वैतु. MW. (ब्राह्मणान्तरीये समानप्रकरणे) '**अभिदीक्षेत**' इति (द्वैस्वर्याऽऽपत्तेश्चिन्त्यः)]। अन्यत्र '**माम्**' इत्येतदन्वितः।

[h]) लक्षणे कप्र. '**उदयनीयम्**' इत्येतदन्वितः [तु. भा.; वैतु. MW. K. **अभिनिर्वपति**' इति (अनिष्टद्वैस्वर्यप्रसङ्गादुपेक्ष्यौ)]।

[i]) लक्षणे कप्र. द्वयोःस्थ.। '**धामानि**' उद्दिश्य '**प्रच्यवते**' इत्यभिप्रायवती श्रुतिः (तु. मै ३, ७,८; टि. मा ४,३४)। एकत्र च यत् क्रीत उपनद्धः सोमो (ह्रियते) यजमानमभि-लक्ष्य वरुण एवैतीत्य् अभिप्रायवती श्रुतिः। तेन वरुणेन यजमानस्याऽऽशङ्कितस्य ग्रहणस्य निवारणार्थमेवाऽनुपदं शान्तिः श्राव्यते '**नमो मित्रस्य**' इति।

[j]) लक्षणे कप्र. '**यजमानम्**' इत्येतदन्वितः (तु. टि. तै २, २, ४, ७)। अनुपदं यत्तस्य निष्क्रयणं श्रूयते तदेवेहाऽभिना संकेत्यते। '**अभिसंभवतः**' इति योगं व्याचक्षाणः K. चिन्त्यः। द्वैस्वर्याऽऽपत्तेः। न चाऽग्नीषोमकर्तृकस्य यजमानाऽभिभवस्येह कश्चिदवकाशः। भा. अपि कल्पद्वयमाह। तच्च चिन्त्यम्। तत्राऽपि हि चोद्यमुक्तम्।

[k]) लक्षणे कप्र. '**अग्निम्**', '**अपः**', '**आदित्यम्**' इत्येतदन्वितः [वैतु. भा. **अभिविपश्यति**' इति (द्वैस्वर्यदोषाच्चिन्त्यः)]।

[l]) लक्षणे कप्र. '**हृदयम्**' इत्येतदन्वितः। '**समेति**' इत्यस्य 'लीयते' इत्यर्थात् अकर्मकता च द्र. [तु. K.; वैतु. भा. '**अभिसमेति**' इति (अपलक्षणाद्वैस्वर्यप्रसङ्गाच्चिन्त्यः)]।

[m]) नापूटि. तै. शाब्दप्रवृत्ति-विशेषस्य शाखा-विशेषगतस्येदमपरमुदाहरणं द्र.। शाखान्तरे समान-प्रकरणे गतित्वयोगदर्शनात् (तु. मै ३, १०, ७)।

[n]) सप्तम्यनुवादी कप्र. '**यस्य** (वसतीवरीषु) अगृहीतासु (सूर्यः) **निम्रोचेत्**' इत्यर्थात् (तु. भा. 'अभिलक्ष्य' इति, K. च वसतीवरीरगृहीतवन्तमभीत्यादिव्याचक्षाणस्तात्पर्यबद्धदृष्टिरिति; वैतु. PW. प्रभृ. '**अभिनिम्रोचेत्**' इति)।

[o]) लक्षणे कप्र. '**उपांशुसवनम्**' इत्येतदन्वितः (तु. भा.)।

[p]) लक्षणे कप्र. '**वत्सम्**' इत्येतदन्वितः [तु. पपा. K.; वैतु. भा. प्रभृ. '**अभिनिवर्तते**' इति चिन्त्ययोगाः (भा. 'यत्र यत्र···तत्र तत्र' इत्यनेनैवाऽभ्यर्थस्य परिसमाप्तत्वेऽपि पुनस्तदाख्याताऽनुप्रवेशोऽर्थान्तरनिर्देशश्च दुर्वच इत्यभिसंधेः)]।

[q]) लक्षणे कप्र. '**तृतीयसवनम्**' इत्येतदन्वितः। गतित्वोपाश्रयः K. प्रतिभाति। तेन तु तस्य द्वैस्वर्याऽऽपत्तेर्मोक्षो दुष्करः स्यात्। सप्तम्यनुवादिनि कप्र. '**सवितारम्**' इत्येतदन्विते सति तु सुश्लिष्टोऽन्वयो द्र.।

[r]) लक्षणे कप्र. '**सदः**' इत्येतदन्वितः (वैतु. भा.)।

[s]) लक्षणे कप्र. '**रूपम्**' इत्येतदन्वितः (तु. टि. मा ७,४५)।

[t]) लक्षणे कप्र. (तु. टि. तै ३, ३, ४, ३)।

[u]) ज्यायश्छन्दोऽभिलक्ष्य तद्विषये वा कनीयसा छन्दसा व्यशंसन् (=विहृतं शंसनमकुर्वन्) इति लक्षणार्थे वा विषयसप्तम्यनुवादे वा कप्र. द्र. (एकेन छन्दसा छन्दोन्तरस्य विहरणप्रकारार्थं तु. आश्रौ ६, ३, १२; १३)। यत्तु भा. PW. प्रभृ. **अभिव्य** (वि-अ) **शंसन्**, **अभिविशंसति**' इत्याख्यातिकौ योगावाहुस्तच्चिन्त्यम्। द्विस्वराऽऽपत्तेः। द्वितीये प्रयोगे चाभेश्च वेश्च पपा. भेदतो निर्देशोप्यस्मदभिमतं द्रढयेत्। गतित्वे हि नामोदात्तवति तिङि वि-वद् अभेरपि निघातप्रसङ्गात्। अपवादाऽभावात्। यच्च शस्त्रे

६[a]; ¶७, १, १, १[b]; २, १[c]; ७, ४[d]; २, ७, ४†; ३, ११, १[२]$[d]; ४, ८, ३[e]; १०, २[f]; ११, २[f]; ५, ५, २[g]; मै १, २, ५[२h]; ६[i]; ३, ३९; ४, ३[j]; २, २, १; ७, ५; ७†; ९†; ११[k]; १०, ३‡[l]; १२, ३[२]; १३, ८; ९†; ३, १, ९¶[d]; २, ९¶; ७, ४; ८[२i]; ¶; ¶८, ३[२]; ४[५h]; १०[i]; ११, ४[h]; १६, १†; २[m]; ४, २, ५[२]; १०[n]; ¶३, ६[o]; ८; ६, ९¶[d]; ७, ८¶[d]; ८, ६¶[m]; १०, ५†; †११, २; ४; †१२, ३; ४; ६; †१४, ३; ५; १०; १२; १६; काठ २, ६[b]; ७[i]; ४, ९[p]; १३[q]; ५, ६[j]; ७, १६†; ८, २¶[r]; ५¶[d]; ७¶; ९¶[d]; १०[७s]; १६[२]†; १०, ४¶[t]; १३[u]; ११, ३¶[u]; ५¶[t]; ६[u]; ¶१२, ८[v]; १३[t]; १५†; १६, ४; ७†; ९†; ११[k]; १७, १८†; १८, १; १४[३]; १९, ५; ८[u]; ¶२०[d], ३; ७[u]; १०; २१, ६¶[d]; ९[u]; १३†; २३, ६¶[k]; ९¶[w]; ११†; १२†; २४, ५; ७[२i]; २५, ७[ix]; ९¶[y]; १०¶[t]; ¶२६, २[२z];

ज्यायश्छन्दोऽभितः कनीयसोश्छन्दसोर्दर्शनात् कनीयसी छन्दसी अभितः कृत्वा ज्यायश्छन्दो विशंसतीति K. व्याचष्टे, तन्मन्दमिव भवति। विहरणप्रकारस्य तथात्वाऽभावात्। तत्र हि कनीयसैकेन च्छन्दसाऽपरस्यैकस्य ज्यायसश्छन्दसो विहरणं भवति। तयोः पच्छो व्यत्यासपूर्वकं शंसनं विशंसनं भवतीति भावः। विस्तरस्तु वैश. द्र.।

[a]) लक्षणे कप्र. (तु. भा.; वैतु. K. '**अभिसंपादयति**' इत्यानुष्टुभेन शस्त्रसंपत्तौ तात्पर्याद् अनुष्टुप्संपत्तिमात्रपर्यवसितो गतित्वदर्शी चिन्त्यः)।

[b]) नापूटि. दि. लक्षणे कप्र. द्र.।

[c]) स्वार्थप्रधानम् अव्य. द्र.।

[d]) लक्षणे कप्र.।

[e]) सप्तम्यनुवादी कप्र. द्र. (तु. तत्रैव '**पूर्वपक्षे**' इति)।

[f]) लक्षणे वा सप्तम्यनुवादे वा कप्र. द्र.। विराजमभिलक्ष्य विराजि वा संपद्यन्ते संपूर्णा दशत्वसंख्या विभज्यत्वविशिष्टा भवन्ति, विराट्तया परिणता भवन्तीति भावः। K. तु '**अभि-सं√पादि**' इति ण्यर्थे सकर्मकतया व्याचक्षाणोऽप्रमाणः स्वरदोषश्चोक्तदिशा द्र.। सा. अपि शुद्धां सकर्मकतां समर्थयंस्तद्दिशैवाऽनुयोक्तव्यः।

[g]) लक्षणे वोद्देशवचने वा कप्र. (तु. भा. K. च)।

[h]) लक्षणे कप्र. (तु. टि. ऋ १, ५१, १)।

[i]) लक्षणे कप्र. (तु. टि. मा ४, ३४)।

[j]) उत्तरेणाऽऽख्यातेन स्वरवता गतित्वेन योग इति MW. यदाह तच्च् चोद्यम्।

[k]) स्वार्थ-प्रधानम् अव्य. (तु. टि. मा १२, ५७)।

[l]) लक्षणे कप्र. '**सत्**' इत्येतदन्वितः (तु. टि. तै ४, ६, २, १)।

[m]) इत्थंभूतलक्षणे कप्र. (तु. टि. मा २९, ६)।

[n]) सप्तम्यनुवादे कप्र. द्र.। अनुपदम् '**स्वे कुलाये संवेशयति**' इति श्रौताल्लिङ्गादिति दिक्।

[o]) प्रजापत्युद्देशेन पशूनां प्रतिष्ठात्मना सृष्टेर् अहेतुत्वेनोपन्यासाद् उद्देशार्थस्य प्राधान्येन समर्पकः कप्र. द्र.।

[p]) लक्षणे कप्र. (तु. टि. मा. ७, ४५)।

[q]) लक्षणे कप्र. भवति। यदपि माशब्रा ४, २, १, २९; ३१ इत्यत्र चाऽन्यत्र च समाने प्रकरणे **अभ्युद्√नी** इति द्व्युपसृष्टो धातुरस्माभिरुक्तचरो भवति (वैप २, १२०) तत्राऽयं शोधः समर्पितो भवति यथा कप्र. एवाऽभिः स्यादिति।

[r]) द्यावापृथिव्योर्विभागे प्रकृते पृथिव्या दिव्ययज्ञियसृष्ट्यभिलक्ष्यत्वेन श्रवणात् तत्प्रवचनः कप्र. द्र.।

[s]) लक्षणे कप्र. (तु. टि. ऋ १, ११, २; ८; ५१, १; वैतु. SIM. '**अभि√नम्**' इति (एकत्र तस्य '**अधि… अभिनमतु**' इति द्व्युपसर्गयोगो नितरां चिन्तनीयः)।

[t]) सप्तम्यनुवादी कप्र. द्र.।

[u]) लक्षणे कप्र. (तु. टि. तै २, २, ११, ६)।

[v]) तु. मै. ४, ३, ६ यत्-संवादत इह हेरश्रुतावपि तदर्थो गम्य इति सुवचम्।

[w]) लक्षणे कप्र. '**पत्नीम्**' इत्येतदन्वितः (वैतु. SIM. '**अभिप्रतितिष्ठति**' इति)।

[x]) लक्षणे कप्र. '**देवताः**' इत्येतदन्वितः (वैतु. SIM. '**अभिप्रच्यावयति**' इति)।

[y]) वीप्सायां कप्र. '**एतावत्**' इत्येतदन्वितः [तु. संटि. यदनु क. कप्र. अभावः स्यात् (वैतु. क. सुपा. च संटि. च)]।

[z]) लक्षणे कप्र. (वैतु. SIM. '**अभिप्रयन्ति**' '**अभिप्रतितिष्ठति**' इति)।

३[२a]; २७, ९¶[b]; २८, १¶[c]; २¶; ४[२d]; ¶३०, १[e]; २[f]; ३†; ४[g]; ५[२h]; ६$; ७; ¶३४, ७[३i]; १७[३j]; ३५, १६¶[k]; ३६, १[l]; ३७, ९[m]; ३८, ९; १३†; ३९, १०; ११; १२†; ४०, ७[२]†; ४३, १[२]; ४६, २[n]; ५†; क १, १९; २, १; ३, ७; ११; ६, ७¶; ¶७, १; ४; ५; ६[o]; २५, २; २८, २‡; ५†; २९, ३[३]; ३०, ३; ३१, ५; ९; १२; २१; ३७, ६; ८; ३९, ५; ¶४०, २; ३[२]; ५[२]; ¶४१, १[२]; ४४, ४; ४६, ४; ५¶; ६†; ७; ४८, १४; १८[३]¶; †कौ १, १२५; १२६; १३२; १४६; १५५; १६१; १६४; १६८; २००; २३३; २३६; २५०; २६५; ३०९; ३२०; ३४४; ३४९; ३७४; ३७६; ३८२; ४०७; ४२९; ४३२; ४६४[२]$; ५०३; ५०९; ५१७; ५२१; ५२२; ५२३; ५२८; ५३५;

५४९; ५५०, ५५४; ५५६; ५६९; ५७५–५७७; २, २७; ३०; ३५; ४०; ५०; ५२; ६३; ८१; ९०; १२५; १६१; १७०; १७८; १८०; २०६; २२०; २७१; २९१; २९२; २९९; ३२१; ३४१; ३४४; ३७१; ४०३; ४०४; ४१२; ४२९; ४४८; ४८०; ४९१; ४९२; ५०३; ५०८; ५१८; ५२८; ५३८; ५४३; ५४७; ५५४; ५८८; ५९१; ६०२; ६०६; ६२८; ६४३; ६६७[o]; ६६८; ६७५; ७०९; ७१६; ७३४; ७५८; ७६९; ७७६[२]; ७७७[२]; ७७८[२]; ८००; ८३९; ८४०; ८४४; ८४५; ८४६; ९३६; ९५७; ९८१; ९८३; १००५$[p]; १०४९; १११२; ११९३[q]; ११९६; १२१०; १२११; १२१५$[q]; ३, ३, ५; ४, ४; ४, ५; †जै १, १४, १; २; ८; १६, २; १७,

१; ७; १०; १८, ४; २१, ७; २५, १; ३; ४; २६, ८; २८, ३; ३२, ७; ३३, ८; ३६, ३; ८; ३९, ५; ७; ४२, ३; ६; ४३, २; ४५, ९; ४८, ५$[२]; ५२, ७; १३; ५३, ७; ८; १०; ५४, ६; १०; ५५, ३; ५६, ८; ५७, १; ३; ७; ५८, ४; १०; ११; १२; २, १, ७; ३, ७; ७, २$; ३, ३, ६; ४, १; ६; ५, २; ८$; ९; ११; ७, १; ८, ७; ९, ४, १३, १; १५, ९; १६, ८; १६; १७, १; १९, १; २०, २; २३, ३; २४, ७; ८; १५; २६, ७; २८, १३; २९, १; ३०, १४; ३१, २३; २४; ३२; ३२, ३; ३३, ४; ३४, ६; ३६, ५; ३८, ५; ६; ३९, २; ४०, ४; ४१, ४; ४२, ४; ९; ४३, ३; १०; ४८, ४; ७; ४९, ४; ५२, १; ८; ५३, १; ५५, ८; ९; ५६, ३; ७; ५८, १; ३; ६; ५९, ८; ४, २, ३; ७, ६; ८, ७; १७, १०$; २१, ८; २०, ६;

---

a) लक्षणे कप्र. (तु. सश्रु. तै ६, ३, ३, ५)।

b) लक्षणे कप्र. (तु. टि. तै ६, ४, ११, ४)।

c) लक्षणे कप्र. 'भागधेयम्' इत्येतदन्वितः।

d) एकत्र लक्षणे कप्र. (तु. टि. मा ७, ४५)।

e) सप्तम्यनुवादी कप्र. (तु. टि. तै ५, २, ४, ३ यत्रत्या सौवरी स्थितिर् विनिगमिका)।

f) कर्मविशेषस्य पर्यवसानसांयोगिकम् उदूहनं श्रूयते। तेन पर्यवसानवाचिनोऽन्त-शब्दस्य कप्र. योगेन प्राधान्येन निर्देश उचितो भवति। एवं समानप्रकरणे ऐब्रा ३, १३, इत्यत्राऽप्यस्मदीये पूर्वोक्ते (वैप २, १२०) शोधः सुलभो भवति (तु. गतित्व-दर्शी MW.)।

g) लक्षणे कप्र. (वैतु. SIM. 'अभि···वर्षति' इति)।

h) लक्षणे कप्र.'वंशम्','दिवाकीर्त्यम्' इत्येतदन्वितः [वैतु. भा. (सश्रु. 'अभिसमायच्छति' 'अभिसंतन्वन्ति' तैब्रा १, २, ३, १), PW. प्रभृ. च]।

i) छन्दसां यज्ञस्वाराज्यान्यतरविषयत्वेन सृष्टेर्विविच्य श्राव्यमाणत्वात् प्राधान्येन तद्विवेकोऽवगमकरः कप्र.।

j) लक्षणे कप्र.'तन्वम्', 'अरम्' इत्येतदन्वितः (वैतु. SIM. 'अभिप्रतितिष्ठन्' इति)।

k) लक्षणे कप्र. (तु. टि. काठ ४, १३)।

l) लक्षणे कप्र.।

m) स्वार्थप्रधानम् अव्य. द्र.।

n) लक्षणे कप्र. (तु. टि. मा २, ६)।

o) लक्षणे कप्र. 'गाः' इत्येतदन्वितः (तु. GW. वैतु. सा. PW. प्रभृ. 'अभि···असरन्' इति)।

p) प्रथमपादतात्पर्याऽनुबन्धात्मको द्वितीयः पादोऽत्र भवतीति कृत्वोपसर्गश्रुतेर् 'योजय' इति योग्यक्रियापदस्याऽध्याहारः स्यात्। संगत्यन्तराऽदर्शनादित्यभिसन्धेः [वैतु सा. अविस्पष्टयोगः (मुपा. अन्व् इन्द्रकर्तृकाऽश्व-कर्मकाऽभ्यागमनस्याऽऽशंसनाऽविषयत्वादिति भावः)] इति प्रथमः कल्पः। अथ द्वितीयः।'२अभि-' इत्यस्याऽयं निगमो न यनि. इति प्रत्येकधुर्यस्याऽपेक्षयाऽन्यस्य भृतिर्यथा स्यात्तथा(=सायुज्यविशिष्टतया)'उपसर्पतः' इत्युत्तरत्राऽभि-संबन्ध इति।

q) लक्षणे कप्र. (तु. टि. शौ ३, १, १)।

२३, ३; २४, २; ४; २८, ९; शौ १, १, ३[a]; २, १, १[b]; ३, १, २[c]; १[d]; २, ५†; २१, ५[e]; ४, १, ३[f]; ८, २[g]; १४, ६[h]; २१, ४; २७, ४[i]; †३२, ६; ७; ५, १, ५[j]; ११, ७[k]; १९, ४[l]; ६, २५, १-३[m]; ३४, ४†; ४७, ३[n]; ९९, १; १०२, १[o]; ७, १०, १[p]; १५, १[2q]; ८७, १[q]; ८९, २†; ८, २, ४[r]; १४[s]; १५[t]; ३, ९†; ४, २†; ७, २६[u]; ९, ६[v]; १५[u]; ९, १, ८†, १४, ३†; १५, ६[2];†; ‡; ११, १, ३७[h]; २, १९[w];

[a]) स्वार्थप्रधानम् अव्य. [तु. सा. WI.; वैतु. PW. 'अभिवितनु' इति (द्विस्वरं द्व्युपसृष्टं योगमातिष्ठमानः उपेक्ष्यः)]।

[b]) लक्षणे कप्र. (तु. टि. ऋ १, ११,२;८; ५१,१)।

[c]) अत्र तिङ्-त्रयं भवति, अभिश्च वा. प्रत्येकं क्रिवि. भवति (तु. WI.; वैतु. PW. 'अभिप्रेत' इति)।

[d]) 'गच्छ' इति योग्यक्रियापदाऽध्याहारमुशन् सा. √शत्रूय इत्यस्य 'उपमानादाचारे' (पा ३, १, १०) इति क्यजन्तस्याऽकर्मकतां प्रत्यवस्थाप्य 'पुत्रीयति माणवकम्' इत्यस्य निदर्शनेन पाम. (३. १,८) उक्तदिशा सकर्मकतां समर्थयति। एवं तावदसावनुयोक्तव्यो भवति 'अस्मान् अमित्रसेना शत्रूयति' इति तदभिमते वाक्ये किमुपमानं किञ्चाऽप्युपमेयमिति। यथा तेनैव स्वयमुक्तमिह शत्रुलक्षणमुपमानकर्म क्यजन्ते धात्वर्थेऽन्तर्भूतं भवति। न च तदभिमतप्रकारेणाऽनभिहितोपमेयकर्माऽपेक्षया सकर्मकत्वमुपपद्येत। इच्छायां क्यचि पुत्रमाणवकवदुपमानोपमेयभावेन स्थितयोः कर्मणोः प्रथमस्याऽन्तर्भावे द्वितीयाऽपेक्षया कामं क्यजन्तस्य सकर्मकताऽभिनिष्पद्यतां न तु खल्वाचार उपमानात् क्यचि तत्संभवः। उपमेयस्य कर्तृत्वेनोपस्थानाद् उपमेयकर्मणोऽविद्यमानत्वात् तदाश्रयेणोक्तसकर्मकत्वस्य च नितरां खपुष्पायितत्वादिति दिक्। न चाऽत्र 'अस्मान्' इति पदमुपमेयकर्मतया नेतुं शक्यम्। तस्य क्यजन्ताऽपेक्षयोपमानोपमेयोभयाऽनभिसंबन्धात्। अतो विषयसप्तम्यनुवादिनाऽभिना तस्य क्यजन्तलक्षितशत्रुक्रियाविषयत्वमुपस्थाप्यते।

[e]) स्वार्थप्रधानम् अव्य. [तु. WI.; वैतु. सा. PW. 'अभिसंविदुः' इति (द्विस्वर्यादुपेक्ष्यौ)]।

[f]) लक्षणे कप्र. 'स्वधाः' इत्येतदन्वितः [तु. सा. WI.; वैतु. PW. MW. 'अभिप्रतस्थौ' इति (द्विस्वर्यं प्रत्यनुयोक्तव्यौ)]।

[g]) स्वार्थप्रधानम् अव्य. (तु. WI.; वैतु. PW. 'अभिप्रेहि' इति)।

[h]) लक्षणे कप्र. 'नाकम्' इत्येतदन्वितः।

[i]) सप्तम्यनुवादी कप्र. 'पृथिवीम्' इत्येतदन्वितः (वैतु. PW. 'अभि√सृज्' इति)।

[j]) 'against' इति विरोधपरमर्थं यत् W. आह तदभेः सप्तम्यनुवादकतां विस्मरन्नेवाऽऽह।

[k]) सप्तमीवचनः कप्र. 'पणीन्' इत्येतदन्वितः ['एतावत्सु बहुषु पणिषु सु भूद् इत्येवं मा वोचन्' इत्यादिप्रकारकः वा. द्र. (वैतु. W. अभि√भू इत्यस्याऽर्थमनर्थीकुर्वंश्च व्यर्थं पुरुषव्यत्ययमिच्छंश्च नितरां दयनीयो भवति)]।

[l]) लक्षणे कप्र. 'यावत्' इत्येतदन्वितः [तु.WI.; वैतु. PW.MW. 'अभिविजङ्घ्हे' इति (अनिष्टद्विस्वर्याच्चिन्त्यौ)]।

[m]) परस्पराऽभिलक्ष्यविवेकस्य विवक्षितस्य तन्मात्रविनिगम्यत्वाद् अभिलक्ष्यस्य प्राधान्येन लक्षणे कप्र. द्र. (तु. WI.; वैतु. सा.PW.MW.'अभि···संयन्ति' इति)।

[n]) लक्षणे कप्र. 'वस्यः' इत्येतदन्वितः।

[o]) लक्षणे कप्र. 'माम्' इत्येतदन्वितः [तु. सा. WI; वैतु. PW. MW. 'अभि···समैतु' इति (मन्त्रस्वारस्यप्रातिकूल्याद् विमृश्यौ)]।

[p]) लक्षणार्थो वा सप्तम्यर्थो वा कप्र. 'उभे' इत्येतदन्वितः (तु. सा. W. WI.)।

[q]) लक्षणे कप्र. (तु. टि. ऋ १, ५१, १)।

[r]) लक्षणे कप्र. 'जातम्' इत्येतदन्वितः [तु.WI.; वैतु. PW.MW.'अभिसंधमामि'इति (अभिलक्ष्यस्य प्राधान्येन निर्देष्टव्यत्वाद् द्विस्वर्यस्याऽपलक्षणस्याऽभ्युपगमस्याऽन्याय्यत्वाच्चिन्त्यौ)]।

[s]) लक्षणे कप्र. 'त्वा' (='ते' पूर्वार्धे) इत्येतदन्वितः (वैतु. PW. WI. 'अभिक्षरन्तु' इति)।

[t]) उद्धरणक्रियाया उद्धर्तृभूम्यवधिकत्वं स्वतः सिद्धम्। अत इह भूमिद्वयपक्ष उत्तरभूम्या अधिकरणता द्र.। भूमित्रयपक्षे च सामर्थ्याद् मध्यभूम्यवधिकत्वमुद्धरणस्य भूम्या उत्तरस्या (=उत्तमाया)श्च तदभिलक्ष्यत्वं द्र.।

[u]) लक्षणे कप्र. (तु. WI.)।

[v]) आपाततः सप्तमीवचनः कप्र. सप्तम्यन्वयतः =आ षष्ठादिति प्रतीयते। तद्विमर्शापेक्षा भवति। साऽन्यतोऽनुसंधेया।

[w]) लक्षणे कप्र. 'नः' इत्येतदन्वितः [तु. सा. W.; वैतु. PW. WI. MW. 'अभिज्ञाः' (प्र१) <अभि√ज्ञा

१२, १, १२[a]; २९[b]; ३३[c]; ३४; २, २६†; २७; ३, ८[d२]; १२[c]; १६[f]; १७[f]; २६[f]; ३०[g]; ५२[h]; ४, १५; १३, १, ३३[i]; ३, २३[j]; १४, २, ३४[k]; ३५[k]; १८, ३, २[२]†; ४०‡[l]; ७३[m]; ४, १०[n]; १३[o]; †२०, ५, १: ७, १; ८, ३; ९, १; १२, ६;

१६, १; १७, ७; १८, ४; २०, ५; २२, १; ४; ५; ३०, २; ३५, १०; ३६, १; २; ४८, १[२]$[p]; ४९, ४; ५१, १; ५७, ८; ६१, ४; ६२, ८; ६८, ११; ७६, ३; ९२, १; २; ८; १०४, १; ११२, १; १२१, १; पै १, ४१, १; ४५, ३[g]; ५१, ३[q];

७६, ३; ७७, १†; ८६, ३[r]; ९१, १–३[s]; ९७, २[t]; ३[t]; २, ६, १; २०, ५[u]; ३५, ३; ६५, १; ३, ५, ५†; ६, २; ३[v]; १२, ५[g]; १९, ६; २०, १[w]; २७, ३[x]; ४, २, २; ३२, ७; ५, २, ३; १२, ५; १९, १[y]; २१, ३; ३४, ८; ६, १०, २?[z]; १७, ९†;

(तु. MW.; <अभि√सृज् इत्यन्ये (द्विकर्मकत्वाऽभावाच्चिन्त्या इति)]।

[a]) लक्षणे कप्र. 'नः' इत्येतदन्वितः (तु. W.; वैतु. PW. WI. 'अभि···पवस्व' इति)।

[b]) सप्तम्यर्थानुवादी कप्र. (तु. टि. ऋ ७, १५, २)।

[c]) कुत्राऽभिर् उपसर्गः कुत्र च गतिर् विवक्षित इत्यत्र विवेक इह मन्त्रे विशेषेण सुकरः द्र.।

[d]) एकत्र सप्तमीवचनः कप्र. 'पात्रम्' इत्येतदन्वितः (तु. W. WI.; वैतु. PW. MW. 'अभि···पर्यावर्तेथाम्' इति)। अन्यत्र च 'दिशम्' इत्येतदन्वितः[वैतु. PW. WI. MW. 'अभिनक्षमाणौ' इति (अनिष्टद्वैस्वर्याच्चिन्त्याः)]।

[e]) स्वार्थ-प्रधानम् अव्य. [तु. WI.; वैतु. PW. MW. 'अभिसंस्वजस्व' इति, W. (अपि व्याहतः)]।

[f]) लक्षणे कप्र. 'स्वर्गं लोकम्' इत्येतदन्वितः (तु. W.; वैतु. PW. WI. 'अभि√नी' इति)।

[g]) स्वार्थ-प्रधानम् अव्य.।

[h]) लक्षणे कप्र. (तु. टि. मा १२, ५७; वैतु. PW. प्रभृ. अभिसंवसानौ इति)।

[i]) लक्षणे कप्र. (तु. टि. ऋ १, ५१, १)।

[j]) PW. संख्या-संकेतः शोधनीयः। शेषं नापूटि. द्र.।

[k]) लक्षणे कप्र. (तु. W. WI.; वैतु. PW. 'अभि···परेहि' इति)।

[l]) 'अधि' इति बाह्वृचः (१०, १३, ३) पाभे.। अनर्थक इति W. WI. च। अधि-वत् सप्तम्यर्थानुवादी वा [वैतु. सा. 'अभिसंपुनाति' इति (द्वैस्वर्यदोषादसौ चिन्त्यः)]।

[m]) स्वार्थ-प्रधानम् अव्य.(वैतु.PW.'अभिप्रेहि' इति)।

[n]) लक्षणे कप्र. 'लोकम्' इत्येतदन्वितः (तु. WI.; वैतु. सा. 'अभि···वहाथ' इति)।

[o]) लक्षणे कप्र. 'ईजानम्' इत्येतदन्वितः [वैतु. सा. (व्यर्थे) 'अभि···एति' इति]।

[p]) लक्षणे कप्र.'त्वा', 'वत्सम्' इत्येतदन्वितः। (नाउ. मन्त्रेण युग्मकं द्र., तद्गतम् 'अर्षन्ति' इति समानं क्रिप. च)।

[q]) लक्षणे कप्र. 'गोत्रम्' इत्येतदन्वितः।

[r]) करवाणि पापान्य् अभिलक्ष्येति कृत्वा कप्र. द्र.।

[s]) लक्षणे कप्र. यदोपवर्णितस्य प्राधान्येन शिश्रावयिषितत्वात् तत्-समर्पकेन 'तद्' इत्यनेनाऽन्वितः (तु. टि. अभि सं√१गृ>गृ)।

[t]) लक्षणे कप्र. 'आतुम् (<आतु- यद्र.) आनम् (<आन- <आ√३*अन्), इत्येतदन्वितः (मुपा. सुवारप्रश्नचिह्ननिवारः शोधः द्र.)।

[u]) मुपा. अर्थवैशद्येतरकरत्वाच् चिन्त्यो भवति। 'अरुन्धति त्वाम् अभि(-लक्ष्य) सर्वं जीवम् आयुषम्' इत्याकारकश्चेदन्वयः सार्थकः संगतश्च, तर्हि अभिः कप्र. स्यात्। अन्यथाऽन्वयान्तरं प्रदर्श्यं भवति। तदेतत् सर्वं विमृशां कृते समंकेति।

[v]) तु. टि. शौ ३, १, ३।

[w]) लक्षणे कप्र. 'त्वा' इत्येतदन्वितः [तु. 'उप' इति शौ (३, १२, १) पाभे.]।

[x]) लक्षणे कप्र. 'वसु', 'गव्यूतिम्' इत्येतदन्वितः।

[y]) 'अभी' इति दीर्घात्मकः शोधः द्र. [तु. मूक 'अभिन्नुत' यत्रत्योऽभ्युत्तरः संयोग एतत्-परायां मौस्थि. ज्ञापकः स्यात् (तु. सस्थ. टि. √नु >नवत)]।

[z]) पाठो वैकृतभूयिष्ठोऽतो भूयोविमर्शोऽपेक्ष्यः।

७, ६, ५[a]; ९[a]; †८, १३, ९; १०; ९, १९, १[b]; १३, १, ११; १४, १, ८[c]; ११[d]; ३, १५; १६; १५, २, ५[e]; १६, ३, ४[f]; ४, ४; ५[f]; ६, ९†; ९, २†; ११, १†; १४, ४[g]; १८, ६; १९, ५; ९[h]; ३२, ८†; ४१, ३; ६६, ३†; ६८, ६[i]†; ‡[i]; ७३, २[j]; ९०, ९; १०५, ९; १३२, ९.

(*अभि-अअक)- नाउ. टि. द्र.

¶अभि°-क[k]- -काः काठ ७, ७; ८.

*अभि-तर-

¶अभितरम्[l] मै १, ४, १२[२].

अभि-तस्(>:)[m] ऋ १, ५३, ३; ८३, १; १०५, ८; १८२, ४; २, १३, ७; ४, १, १४; ५०, ३; ५, १५, ३; ३०, १०; ७, ५५, ५; ५९, ७; ९८, ६; ९९, ३; १०१, ४; १०३, ७; ८, ५, ३८; १०१, १४; ९, १०१, ११; १०, २७, ८; ५३, ७; ७६, ६; ८१, ६; १३३, ४; १३४, ५; मा ५, १६†; ११, २९; १३, २; १६, ६; १७, २२†; २०, ४०; का ५, ५, ३†; ८, २०, १†; १२, ३, २; १४, १, २; १७, १, ६; १८, २, ८†; २२, ४, ५; तै १, २, १३, २†; ¶५, २, ३; ४, ४; ७, ७, २; ¶२, १, २, ९; ३, ८, २[२]; ४, १, ३; ३, १, ५, २¶; ४, २, ८, १; ५, १, २; ६, २, ६†; ५, ७, १, २¶; ६, ४, १०, ३[२]¶; ¶७, २, ५, ६; ६, ३; ३, ४, २; ५, ३; ६, २; ७, ४; ८, २; ९, ३; १०, २[२]; ३[२]; ५; ४, १, ३; २, ५; ३, ६; ४, ३; ५, ४; ६, ३; ७, ३; ११, २; ५, १, ५; २५, २; ¶मै १, २, ९†; ८, ५; २, ३, ६; ७, ३$; ९, २$; १०, २†; ३, २, ७; ९[२]; ३, ५[२]; ११, १$; ४, ३, ९; ४, ७; ६, ८; ७, ९; १४, ५†; काठ ६, ६[n]; १०, १; ७; ११, १[२]; १२, ५; १३, ३; १६, ३; १५; १७, ११; १८, २; २०, १०; २१, १३; २२, ८; २५, ८; २७, ३; ६; ८[३]; २८, १; २९, १०; ३३, ३; ३७, ११; ३८, ६; ¶क २, ४†; ४, ५; २७, १$; २८, २†; ३१, १२; ३५, २; ४०, १; ४२, ३; ६; ४४, १; ४६, ३; †कौ २, ४५३; ९३९; †जै ३, ३४, ११; शौ १, २७, ३; ३, ५, ६; ७; ३०, ६; ४, ५, ६†; १०, ८, ३†; १७; १२, ३, ४२; १३, १, ३५; १४, १, ४५; १९, १६, २; २७, १५; †२०, २१, ३; २५, १; ८७, ६; ८८, ३; १३६, १५$; पै २, ७२, ४; १०, ८, ५; १३, ३, १६; १०, ९; १४, २, ९; १५, ५, ६; १६, ६७, ६‡[o]; १०१, ६†; १०३, ८.

अभि-कनिक्रदत्- अभि√क्रन्द् द्र.

¶अभि√कम्>कामि, अभि[२]...कामयते काठ २९, ५; क ४५, ६; अभिकामयन्ते मै ४, २, १; अभ्यकामयत मै ३, ६, ८; ४, २, १; १२; ५, ७; काठ ७, ५; ८, ५; १३, ३; १९, ३; २३, ४; क ५, ४; ७, १; ३०, १; ३६, १; अभ्यकामयन्त मै १, १०, ६; काठ ८, ५; २८, २; ३६, १; क ७, १; ४४, २.

अभि-कल्पमान- अभि√१कृप् द्र.

अभि√काश्>चाकश्[p], †अभिचाकशीति ऋ १, १६४, २०; शौ ९, १४, २०; पै ८, १३, ९‡[q]; १६, ६७, १०; †अभिचाकशीमि ऋ ४, ५८, ५; ९; मा १३, ३८; १७, ९३; ९७; का १४, ४, १; १९, १, ७; १०; तै ४, २, ९, ६; मै २, ७, १७; काठ १६, १६; ४०, ७[२]; पै ८, १३, ५; अभिचाकशीहि मा १६, २; का १७, १, २; तै ४, ५, १, १; मै २, ९, २; काठ १७, ११; क २७, १; पै १४, २, ८; अभ्यचाकशम् ऋ १०, १३५, २; †अभि...अचाकशम् ऋ १०, ८६, १९; शौ २०, १२६, १९.

अभि√कृ, अभि[३]...कृणोमि पै ८, १०, ६; अभिकृणुत>ता पै २, ६४, १.

---

a) तु. टि. पै ३, २०, १.
b) तु. टि. शौ ५, १९, ४.
c) तु. टि. शौ ४, २७, ४.
d) तु. टि. ऋ १, ५१, १.
e) तु. टि. तै ४, ६, २, १.
f) तु. टि. शौ ८, २, ४; १५.
g) तु. टि. शौ ८, ७, २६.
h) तु. टि. शौ १८, ४, १३.
i) 'अनु' इति ऋ (१, १६४, २८) पामे.।
j) संहितेह तुष्पठा भूयोविमर्शापेक्षा द्र.।
k) 'अभि-गत-' इत्यतो मूलभूतात् प्रास. पूपप्रस्र. सतः प्राति. स्वार्थे कपि प्र. सत्यू *अभि-गतक->*अभि-अअक-> यनि. इति नैप्र. द्र. [वैतु. पा ५, ३, ७४; यदनु 'अभि' इत्यतः कनि प्र. आद्युदात्तं प्राति. निर्देष्टव्यं स्यात् (किमिति तत्तु नाऽऽस्थायीत्यत्र तु.टि.अभीक-)]।
l) तु. यस्था. टि. *अव-तर->अवतरम्, अन्तर-।
m) तसिल् प्र. लित्स्वरश्च (पा ५, ३, ७; ६, १, १९३)।
n) 'अभितस्थौ' इति मुपा. भ्रष्टः (तु. सश्रु. क ४, ५, SIM. च 'अभितः। तौ' इति)।
o) 'न वि' इति ऋ (१, १६४, १६) विशिष्टः पामे.।
p) यङ्लुकि रूपं भवति।
q) ऋ ४, ५८, ९ यत्र प्रपु. स्थाने उपु. श्रूयते।

अभिचक्रु शौ ३,९,१; पै २, ६४,१; ३,७,२.

अभि-कूल्वर[a]- -राणाम् पै १६, ७०,६.

अभि-कूल्वरी- -रीः शौ २,८,२.

अभि√१कृप्>क्लप्

अभि-कृल्पमान[b]- -ф्नः पै १६, ७२,४; -नाः मा १३, २५; १४, ६; १५; १६; २७; १५, ५७; का १४, २, ११; १५, १, ५; ४, ३[2]; ८, ५;१६, ७, १; काठ १७, १०[2]; क २६, ९[2]; -नौ मै २, ८, १२[2].

¶अभि-क्लृप्ति- -प्त्यै क ३९,१.

†अभि-क्रतु[c]- -तूनाम् ऋ ३, ३४, १०; मै ४, १४,५; १३; शौ २०, ११, १०.

अभि√क्रन्द् >क्रन्दि, अभिक्रन्दति शौ ८, ७, २१; ११, ६,३;४; पै १६,१३,११‡[d];२१,३;४;अभिक्रन्दन्ति ऋ १०, ९४, २; पै ६, १०,३; अभिक्रन्दसि पै १४,३, २६; अभिक्रन्द ऋ ५,८३,७;तै ३, १,११,६†; काठ ११,१३†; शौ ४, १५,६;५,२०, ७;२१, ४-६; पै ५,७, ३; ९, २४, ८; अभ्य(भि-अ)क्रन्दत् काठ १३, १२¶; शौ १९, ३०, ५; पै १३, ११, २३.

अभि···चक्रन्द पै १, ५५, १;

अभ्यक्रन्दीत् पै १६, २१, ५;

अभिक्रन् ऋ ७ ५, ७.

†अभि···अचिक्रदत् ऋ ९, ६८,२; ८२,१; कौ १,५६२;२, ६६६; जै १,५७,७; ३, ५५,७.

†अभि-कनिक्रदत्[e]- -दत् ऋ ९, ९७, १३; १०, ६७, ३; तै ३, ४, ११, ३; मै ४, १२, ६; काठ २३, १२; कौ २, १५६; जै ३, १५,४; शौ २०, ९१,३.

अभि-क्रन्द[f]- -न्दः पै २, ७०, ४.

अभि-क्रन्दत्[g]- -न्दन् ऋ ९, ८६, ११;१०,२१,८; कौ २,३८२†; जै ३, ३१, २†; शौ ५, २०, २; ११, ७, १२; पै ९,२४,२; ११, १, १०‡[h]; १६, १५४,२.

अभि-क्रन्दम्[i] पै ७, १, ९.

अभि√क्रम् > क्राम्, क्रमि,

अभि···क्रमते ऋ १, १४४,१;

¶अभिक्रामति मै १,७,३; काठ ९,१;१८,१९; क ८,४;२९,७;

अभि···क्रमाम ऋ ६,४९,१५.

†अभ्यक्रमीत् ऋ ९, ८६, १४; १०८, २; काठ ४५, १६$; कौ २, ४३; जै ३, ५९, २;

†अभि···अक्रमीत् ऋ ९,४०, १; मै २, २, १३¶; कौ १, ४८८; २, २७४; जै १, ५१, २; ३, २३, ६.

¶अभिक्रमयति तै ५, १, १,२.

¶अभि-क्रम[j]- -मम् काठ १८, १९[2]; क २९, ७[2].

अभि-क्रम्य[k] ऋ १, ८०, ५; तै ३, १, २,३¶; काठ १८,१९¶; क २९, ७¶. [°म्य अन्°]

अभि-क्रम्य[l]- -म्यम् मै ३, ६,७.

¶अभि-क्रान्त- -न्तेन काठ ६, ५; ८, ५; क ४, ४; ७, १.

¶अभि-क्रान्ति[m]- -न्तिः तै५,१,१, २; -न्त्या मै ३, १, १; -न्त्यै तै ५, ४, ८,५; मै १, ८, ४[2]; ५[2]; काठ ८, ५; क ७, १.

¶अभि क्राम(त्>)न्ती[g]- -न्ती मै १, ४, १२[2].

¶अभि-क्रामम्[n] तै २,६,१,४;मै १, ४,१२[2]; काठ ६, ५[2]; क ४,४[2].

अभि√क्रुश्,अभिक्रोशन्तु शौ५,२१, ९; ¶अभ्यक्रोशन् तै २,५,१,२.

अभि-क्रोशक[o]- -कम् मा ३०,२०; का ३४, ४, २.

अभि√क्षद्[p]

अभि-क्षत्तृ[q]- -त्तारः ऋ २,२९,२; -त्तुः ऋ ७, २१, ८.

?अभि-क्षदृ[r]- -दान्? ऋ ६,५०,१.

a) गस.उप.क्वरप् प्र. उसं.। कृत्-प्रस्व.(पा ३,२,१६३; ६, २, १३९)।

b) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१८६;२,१३९)।

c) 'अभिगामी क्रतुरस्य' इति कृत्वा बस. पूपप्रस्व. च (पावा २, २ २४; पा ६, २, १)।

d) विशिष्ट इह ऋ (५, ८३, ४) पाभे.।

e) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८९;२,१३९)।

f) गस. उप. भावे घञ् प्र. (पा ३, ३, १८)।

g) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

h) 'अभिक्रन्द' इति ऋ (५, ८३, ७) पाभे.।

i) णमुल् प्र. (पा ३, ४,२२)। 'अभिस्कन्दम्' इति शौ (५, १४, ११) पाभे. द्र.।

j) उप.भावे घञ् वृद्धयभावश्च(पा ३,३,१८;७,३,३४)।

k) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

l) 'अनूतु- > -तु' इत्यत्र टि. द्र.।

m) गस. उप. भावे क्तिनि पूपप्रस्व. (पा ६,२,५०)।

n) गस.णमुलन्त-कृत्-प्रस्व.(पा ६,१,१९३;२,१३९)।

o) गस.ण्वुलन्त-कृत्-प्रस्व. शेषं नापूटि. द्र.।

p) √क्षद् इत्यस्याऽर्थवैमत्यस्य कृते यस्था. टि. द्र.।

q) गस. तृजन्त-कृत्-प्रस्व. (पा ६,१,१६३;२,१३९)।

r) गस. उप. कर्तर्य् अच् प्र. थाथादि-स्वरश्च (पा ३, १, १३४; ६, २, १४४)। रू. च 'यः···आतृन् देवान्' इत्येतत्-समानाधिकरणं सन् नकारान्तं च द्विः च द्र. [वैतु. संपा. '-न्' इति पपा. '-न्' इति, सा.-

अभि √क्षम्, अभिक्षमध्वम् ऋ २, २८, ३; अभि···क्षमध्वम् ऋ २, २९, २; †अभि···क्षमेत ऋ २, ३३, १; पै ७, ३, १०.
अभि···चक्षमीथाः ऋ २, ३३, ७.
अभि √क्षर्, †अभिक्षरन्ति ऋ ९, ६१, ५; कौ २, १३८; जै ३, १३, १४; पै २, ३९, ६; अभिक्षर शौ ७, ११४, ४[a]; †अभि···अक्षरन् ऋ ९, ३३, २[b]; कौ २,११५; जै ३,१२,२.
अभि √क्षिप्
अभि-क्षिपत्°- -पन् ऋ ५,८३,३.
अभि √ख्या, अभि···ख्यत् ऋ १०, ५३, २; अभि···अख्यन् तै ३, २, ८,३; अभिख्यः ऋ ६, ४८, १९; अभि···ख्यः ऋ ६, १५, १५; अभिख्यम् ऋ ७, ८६, २.
अभि-ख्या[d]- -ख्या ऋ १, १४८, ५[e]; ८, २३, ५; १०, ११२, १०.
अभि-ख्यातृ[f]- -ता ऋ ४, १७, १७.
†अभि-ख्याय[g] ऋ १, १५५,५; २, ३०, ९; खि १, ११, ८.
अभि √गम् > गच्छ्, गमि, अभिगच्छति ऋ १०, १४६, ५; ¶तै ५, १, ३, २; ३; ६, १, २, २; ४, २; ७,४; ३, १०,४; ¶मै ३, ६, ८; ७,५; ¶काठ २१, ७; २३, २; ¶क ३५, ८; अभिगच्छतः[h] शौ ४, ११, १०; अभिगच्छन्ति का ४०, १, ३; अभिगच्छामि शौ १६, ७, ११; अभिगच्छात् पै १०, १. ९; अभ्युगच्छन् शौ १६, ७, ९.
अभि···जग्मुः ऋ ३, ६०, १; ¶अभ्यगन् मै १, ६, १३[1].
अभि-गत[i]- -तः खि ५, १८, १; शौ २०, १३५, १. [°त-अन्°]
(*अभि-गतक-) अभि॑-क- टि. द्र.
¶अभि-गन्तृ- -न्ता काठ २५, ७[2]; क ३९, ५[2].
अभि-गमन- दार>रा°
¶अभि-गमयत्°- -यन् तै २, ३, ६, २; ४, ११, ५.
अभि-गर- अभि √१गॄ द्र.
अभि √गा, †अभि···जिगाति ऋ ७, ७१, ४; १०, १२३, ८; कौ २,११९८; †अभि···अजिगात् ऋ १, ३३, १३; मै ४, १४, १३.
†अभि···गात् ऋ १०, ५, ६; शौ ५, १, ६[j]; पै ६, २, ६; अभिगुः मै ४, ९, १२; अभ्यगाम पै १, ५१, २.
अभि √गाह्
†ϕअभि-गाहमान[k]- -मानः ऋ १०,१०३,७; मा १७,३९; का १८,४,७; तै ४, ६,४,२[l]; मै २, १०,४;४,१४,१२[m]; काठ १८, ५; क २८, ५; कौ २, १२०५; शौ १९, १३, ७; पै ७, ४, ७.
अभि-गीत- अभि √गै द्र.
अभि √गुप्, अभ्यगोपायन् पै ९, ११, २.
अभि √गुर्, अभि···जुगुरत् ऋ ८, ८१, ५; अभि···जुगुर्याः ऋ १, १४०, १३.
†अभि-गूर्त[n]- -र्तम् ऋ १, १६२, १५; मा २५,३७; का २७,१३, ६; तै ४,६,९,२; मै ३,१६,१;

'-द्वा-' इत्याकारान्तं प्राति. इति कृत्वा तस्य पुं. द्वि१ सद् मकारान्तं चैतत् रू. इति प्रतिपत्नध्विन्त्यः (व्यु. प्र. प्रति पर्यनुयोक्तव्यत्वादित्यभिसंधेः), PW. प्रभृ. 'अ-भिक्ष-द्वा-' (पूप. क्रिवि. इति कृत्वा उस. इत्यभिसंधिः) इति प्राति. इति यदाहुस्तद् व्यर्थमिव पपा. विरुध्येतेति कृत्वा सुकल्पितं सदप्युपेक्ष्यम्]।

[a]) तु. PW. WI.; वैतु. W. पूप. कप्र. इतीव कृत्वाऽन्वाचक्षाणा उपेक्ष्यः।

[b]) 'द्रोणानि' इत्यत्यन्तसंयोगे द्वि. इति कृत्वा तदधिकरणक-गोमद्वाजस्य बभ्रुकर्तृके धारयाऽभिक्षरणे तात्पर्यं द्र. (तु. सा.; वैतु. GW. अभिः कप्र. इति)।

[c]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

[d]) गस. उप. भावे अङ् प्र.। ततस् स्त्रियां टाप् प्र. कृत्-प्रस्व. च (पा ३,३,१०६; ४,१,४; ६,२,१३९)।

[e]) तृ१ रू. स्यात् (वैतु. सा. द्वि१ इति)।

[f]) गस. तृजन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[g]) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[h]) अत्र मूको. च सा. च मन्त्रान्ते 'कीनाशस्याभिगच्छतः' इति पाभे. द्र.। तथात्वे 'अभि-गच्छतः' इत्येवं शत्रन्तस्य ष१ स्यात्। न तु स्वरतस्तादृशे पा. प्रमाणमुपलभ्येत।

[i]) सस्व. कृते तु. टि. १अति-क्रान्त-, अभि॑-क-।

[j]) इह विरोधपर्यवसिताऽऽभिमुख्याऽर्थस्याऽऽख्यातान्तर्भावेन मन्त्राऽर्थस्वारस्याऽनुकूलत्वाद् अभेर्गतित्वेन योगः (तु. PW. WI.; वैतु. W. अभिः कप्र. इति)।

[k]) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१८६;२,१३९)।

[l]) 'अभिगोत्राणि' इत्येकपदतया व्याचक्षाणः सा. चिन्त्यः। तथा सति द्वैस्वर्यानुपपत्तेरेवेति दिक्।

[m]) उपसर्गश्रुतेःप्रतीकमात्रेऽपठितेन शानजन्तेन संबन्धः।

[n]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४८)।

काठ ४६, ५. [°र्ते- सु>स्व्°, स्वयम्°]

†अभि-गूर्ति[a]- -र्तिः ऋ १, १६२, ६; १२; मा २५, २९; ३५; का २७, १२, ६; १३, ४; तै ४, ६, ८, ३; ९, १; मै ३, १६, १[२]; काठ ४६, ४; ५.

अभि-गूर्य[b] ऋ २, ३७, ३.

अभि√१गृ→गृ, ¶अभिगृणाति तै ५, १, ४, ४; अभिगृणाति ऋ १, ५४, ७; अभि···गृणाति ऋ ५, २७, ३; ७, ३८, ४; अभि···गृणीतः ऋ ३, ६, १०; अभिगृणन्ति ऋ १, १००, १७; २, ४३, १; १०, ७, २; अभि-···गृणन्ति ऋ १०, ४९, ११; अभि···गृणन्ति ऋ ५, ७९, ४; अभि[२]···गृणन्ति ऋ ७, ३८, ४; अभिगृणीमसि ऋ १, ४२, १०; अभि···गृणातु ऋ ५, ४१, १९; १०, १३९, ५; †अभि···गृणीताम् ऋ १०, ४७, ८; पै ७, ६, १; अभिगृणन्तु मा १४, ४; १५, ३; का १५, १, ४; १६, १, ३; तै ४, ३, ४, २; मै २, ८, १; ७; काठ १७, १; ६; क २६, ५; शौ १८, १, ५२‡[c]; पै १५, २, ४; अभि···गृणन्तु मा १४, २; का १५, १, २; तै ४, ४, १२, ५; मै २, ८, १; ३, १६, ४; काठ १७, १; २२, १४; क २५, १०[२]; अभि-गृणीहि ऋ १, १०, ४; ४८, १४; २, ९, ४; पै १५, २, १; अभि···गृणीहि ऋ १, १५, ३; मा २६, २११; तै ४, ४, १२, ५; मै ३, १६, ४; काठ २, १५; २२, १४; अभिगृणीतम् मा २७, १८; का २९, २, ८; मै २, १२, ६; काठ १८, १७; क २९, ५; पै ९, १, ८; अभिगृणत शौ ५, २७, ९; †अभिगृणीत ऋ १०, १५, ६; मा १९, ६२; का २१, ४, १२.

अभि-गर[d]- -रः मा ८, ४७; का ८, २२, १; -¶रौ मै १, ९, १[e]; ५; काठ ९, ९; १२; क ८, १२.

¶अभिगरा(र-अ)पगर- -रौ काठ ३४, ५.

ϕअभि-गृणत्[f]- -णन्तः मा २, १८; का २, ४, ६; तै १, १, १३, ३; मै १, १, १३.

अभि√गै

अभि-गीत[g]- -तः ऋ ९, ९६, २३.

अभि√ग्र(>ग्र)ह्, ¶अभिगृह्णीते क ३७, ५; ¶अभिगृह्णाति तै ६, ४, ११, ४; ५, ७, ३; ६, ११, ३; मै ४, ५, १; ३; ७, १; काठ २४, ४; २७, ९[२]; २८, ७[२]; क ४४, ७[२]; ¶अभिगृह्णाति तै ६, ५, ७, ३; मै १, ६, ९[२]; अभि···गृह्णाति तै १, ६, ९, ४¶; ¶अभ्यगृह्णात् तै २, १, ७, २; मै २, ५, ७; काठ १३, ८.

अभिजग्रहः पै १६, ४६, १-१०; ४७, १-१०; ४८, १-५[h].

अभि-ग्रहीतृ[i]- -तारः मै १, ३, १२.

अभि-घातम् अभि√हन् द्र.

अभि√घृ>घारि, ¶अभिजिघर्ति मै १, १०, ७; ४, ६, ९; काठ ३६, २.

¶अभिघारयति तै २, ६, १, ६; ६, ३, १०, २; मै ३, १०, १; ४, १, ११; ¶अभिघारयति तै २, ६, १, ६; ६, ६; ८, ४; ६, ३, ९, ६; मै ३, १०, २; ४, १, ९; काठ ३१, ७; क ४७, ७; ¶अभि···घारयति मै १, ८, ४; ३, ६, २; काठ २३, १; २५, ८; क ३५, ७; ४०, १; ¶अभिघारयन्ति मै ४, १, १२; ¶अभिघारयन्ति तै २, ६, ३, १; ¶अभि···घारयन्ति मै ३, १०, ५; ४, ५, २; ७, ४; अभिघारयामि तै १, ६, १, २; मै १, १, ११; ४, १, १२¶; काठ १, १०¶; ¶अभिघारयात् तै २, ६, ३, १; अभिघारय शौ १२, ३, ३७; ¶अभिघारयेत् मै १, १०, ७[२]; ४, ४, ९; काठ ३६, २[२]; १४; ¶अभिघारयेत् मै १, १०, २०; ३, १०, १; ¶अभि···घारयेत् तै २, ६, ८, ४.

अभि-घारित[g]- -तः शौ ५, २१, ३; पै ६, ९, १२; -तौ शौ १०, ९, २५; पै १६, १३८, ६. [°त-अन्°]

¶अभि-घार्य[b] तै २, ६, ३, ५; ६, ३, ९, ६; मै १, १०, ७; ३, १०, १[२].

---

a) गस. भावे क्तिनि पूपप्रस्व. (पा ६, २, ५०)।

b) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९)।

c) 'अभिगृणीत' इति ऋ (१०, १५, ७) पाभे.।

d) गस. उप. आ. का. इत्यत्र भावे अप् प्र.। अन्यत्र कर्तर्यु अच् प्र. इत्याकरतो विवेच्यम्। उभयथाऽपि थाथादि-स्वरः (पा ६, २, १४४)।

e) '¶अभिगरः' इति पपा.।

f) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

g) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

h) 'अभिजिग्रह' इति मुपा. प्रमादजः द्र.।

i) गस. तृजन्त-कृत्-प्रस्व. (पा ६, १, १६३; २, १३९)।

¶अभि-घार्य[a]- -र्याः मै १,१०,२०; काठ ३६, १४[2]; -¶र्या३ः मै १, १०, २०[2]; काठ ३६, १४[2].

¶अभि-घृत,ता[b]- -तम् मै ३,९,२; ४,१,१२; -ताः मै ४, ५, २; -तानाम् तै ६, ४, ३, ३. [°त-अन्°, सत्यं]

अभि-घ्नत्-, ?अभिघ्नन् अभि-√हन् द्र.

¶अभि√घ्रा>जिघ्र, अभिजिघ्रति तै ६, ४, ११, ४[2]; मै ४, ६,४.

अभि-जिघ्र(त्>)न्ती[c]- -न्ती ऋ १,१८५,५.

अभि√चक्ष्, †अभिचष्टे ऋ १,१६४, ४४; ३, ५९, १; ६, ५१,२; १०, १३९,२; ३; मा १२, ६६; १७,५९; का १३,५,५; १८, ५, १०; तै ३, ४, ११, ५; ४, २,५, ४; ६, ३, ४; मै २,७, १२; १०, ५; काठ १६, १२; १८, ३; २३, १२; ३५, १९; क २५, ३; २८, ३; ४८, १७; पै १६, १०३, ७; †अभिचष्टे ऋ ७, १०४, ८; १०, ८५,१८; खि ३, २२, १०; शौ ८,४, ८; ९, १५, २६; पै १६, ९, ८; अभि···चष्टे ऋ १, १०८, १; ७, ६१, १; †अभिचक्षते ऋ ८, १०१, ६; शौ १८, ४, २९; अभि···चक्षते ऋ १०, १०७, ४; अभि···चक्षते ऋ १,१९०, ६; अभिचक्षसे ऋ ५, ३, ९; अभि· चक्षाथे ऋ ७, ७०,५[d]; अभि···अचष्ट ऋ ३, ५४, ६; अभ्यचक्षत शौ १८, ३, ६६; अभिचक्षुः[e] ऋ १०, ९२,१५.

अभि-चक्षण[f]- -णम् शौ ६, १२७, २; पै १, ९०, २.

अभि-चक्षणा[g]- -णाः शौ ९, २, २१; पै १६, ७८, ५.

†अभि-चक्षाण[h]- -णः ऋ २, ४०, ५; मै ४, १४, १.

†अभि-चक्षे[i] ऋ १,१०२,२;११५, ५; ५, ३१, १२; खि ३, २२, ९; मा ३३, ३८; का ३२, ३,९; मै ४, १४, ४; शौ २०, १२३,२.

अभि-चक्ष्य ऋ १, ९२, ९; ८, १, ३४.

†अभि-चक्ष्य[j]- -क्ष्यम् ऋ ८,४,७; कौ २, ९५५; जै ४,२०,१.

अभि√१चर्, ¶अभिचरति तै २,२, ९,१[3];४,११,३; मै २,४,५; ५, ७;९; काठ १०,६; २७,१[2]; क ४२, १[2]; ¶अभिचरति मै ३,८, ४; ¶अभिचरन्ति काठ १०, ७; अभिचर शौ २, ११, ३; पै १, ५७, ३; अभि···चरत ऋ १०, ३४,१४; ¶अभिचरेत् तै ६, ४, ५, ६[2]; मै ३, ३, ५[2]; ४,५,५[2]; ६,४; ६; ७, ९; ८, ७; ९; काठ २१, ७; २७, १; २९, ८[2]; ३०, ९; ३७, ११; क ४२, १.
अभिचेरुः शौ ५, ३०, २; १०, १, १८; पै ९, १३, २; १६, ३६, ८.

¶अभि-चर- -रः काठ ३७, १४.

अभि-चरण- प्रति>त्यु°

¶अभि-चरणीय,या[k]- -यम् मै २, ५, ८; -याः काठ २१, २; ६; २२, ६; क ३१, १७; २१; ३४,१; -याम् काठ १९, ६; क ३०,४.

¶अभि-चरत्[c]- -रतः तै ५, १, ६, ४; काठ २०, ४; क ३१, ६; -रता तै ३, ४, ८, ५; -रते काठ १०, ४; १३, ३; -रन् तै २, १, ५, ७; ७, ७; ८, २; २, २, ३; ३, २; ९, १; २; १०, ४; ४, ११, २; ३; ३, २, ३, ४; ७, २, ५, ३; ७, ३; मै २, १, ६; ७; ९[2]; ४, ५; ५, ६; ७; ९; ११; ३, १, ९; ८, ४; ४, ५, ५; काठ ९, १६; १०, १[2]; ६; ७; ११, ५; १२, ३; १३, २; ४; ८; २१, ४; ३०, ३; क ३१, १९; ४६, ६; -रन्तम् तै २, २, ९, २. [°रत्-अन्°]

¶अभि-चरित[b]- -तम् मै ३, ८, ८; काठ २५, ९; ३७, १४; क ४०, २.

¶अभि-चरितवै[l] तै ५, ६, ३,१.

---

a) गस. यदन्त-कृत्-प्रस्व.(पा ६, १,२१३,२,१३९)।

b) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

c) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

d) तु. सा. PW. च; वैतु. GW. 'अभि' इति पृथग् अव्य. इतीवाऽभिप्रयन् उपेक्ष्यः।

e) अभ्यस्ताज् झि>जुस् (पा ३, ४, १०९)।

f) गस. ल्युडन्त-कृत्-प्रस्व. (पा ६, १,१९३;२,१३९)।

g) गस. उप. स्त्रियां ल्यु>अनः प्र. उसं.। लित्स्वरः (पा ३,३,१०७; ६, १, १९३,२,१३९)।

h) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१८९;२,१३९)।

i) गस.केनन्त-कृत्-प्रस्व.(पा ६, १,१९७; २,१३९)।

अ(भि>)भी-वर्ग[c]- -र्गात् शौ ११, २, ४; पै १६, १०४, ४; —र्गे शौ ३, ५, २; ६, ५४, २; पै ३, १३, २.

अभि √वृत् >वर्ति, अभि···वर्तते ऋ १, १८३, २[d]; अभिवर्तस्व खि ४, ५, ४; †अभ्युवर्तन्त ऋ ५, ३१, ५; तै १, ६,१२, ६; मै ४, १२, २; काठ ८, १६. अभिवावृते ऋ १०, १७४, १; पै १, ११, १[e].

†अभि···वर्तय ऋ १०,१७४, १; पै १,११,१[f]; अभि···वर्तयत ऋ २, ३४, ९; अभ्युवर्तयन् मै ४, १४, ११; शौ १२, १, ५.

†अभि[२]...अवीवृतत् ऋ १०, १७४, ३; पै १, ११, ३[g].

१अभि,>भी-वर्त[h]- -र्तः मा १४, २३; का १५, ७, १; तै ४, ३, ८, १; ¶५, ३,३,३[२]; ¶७, ५, १, ६; ७, ४[२]; मै २, ८,४; काठ १७, ४; २०, १३; ३३, ७[१]¶; क २६, ३.

¶अभि-वर्तयत्[i]- -यन्तः तै ७, ५, ७, ४; काठ ३३, ७.

¶अभि-वृत्त[b]- -त्ते मै ३, ८, ७.

¶अभि-वृत्ति[j]- -त्यै तै ७,५,१,६.

†अभि-वृत्य[k] ऋ १०,१७४,२; शौ १, २९, २.

२†अ(भि>)भी-वर्त[l]- -र्तः ऋ १०, १७४,३; शौ १, २९,३;४$; पै १,११,३; —र्तेन ऋ १०,१७४, १; शौ १, २९,१; पै १,११,१.

अभि √वृध् >वर्धि, अभि···वर्धसे ऋ ३, ४४, २; अभिवर्धताम् शौ ६, ७८, १; २; अभि··· वर्धताम् शौ ६, ७८, २; अभि-वर्धस्व पै ४, २७, ४; ६; अभि···वर्धस्व ऋ ५, ४४, ५; अभि(वर्धस्व) पै ४, २७, ४; अभ्यु(भि-अ)वर्धत ऋ २, १७, ४; अभ्य(भि-अ)वर्धत ऋ ९, ४७, १; अभि(अवर्धत) ऋ २, १७, ४; अभि[m]···अवर्धताम् ऋ १०,१३२,१;‡अभ्यवर्धथाः[n] कौ १, ५०७; जै १, ५२, ११.

अभिवावृधे शौ १, २९, १‡[o]; †अभि···वावृधे ऋ १०, २९, ७[p]; शौ २०, ७६, ७.

अभि····वर्धय शौ १,२९,१‡[q].

अभि[२]···अवीवृधत् शौ १, २९, ३‡[r].

अभि,>भी-वर्ध- -र्धः पै ४, २७, ४; —र्धम् पै ४, २७, ५; १३, ३, ११.

अभि √वृष्, अभिवर्षति तै ३, १, १, २¶; अभिवर्षति शौ ५, १९, १५; पै ९, १६, २; ¶अभि···वर्षति काठ ३०, ४; क ४६, ७; अभिवर्षतु खि २, १३, ६; मा ३६, १०; का ३६, १, १०; पै ११, ७, ३; ¶अभि-वर्षत् मै ४, २, १०.

अभ्यु(भि-अ)वर्षीत् ऋ ७, १०३, ३; शौ ११, ६, ५; १७; पै १६, २२, ७.

अभि-वर्षत्[i]- -र्षते तै ७, ५, ११, १; काठ ४५, २.

अभि-वीवृषत्- -वृषत् पै ८, १८, २.

अभि-वृष्ट,ष्टा[b]- -ष्टः ऋ ७, १०३, ४; —ष्टाः शौ ११, ६, ६; पै १६, २१, ६.

---

[a]) तु. टि. यस्था. '?अभीवार' इति ।

[b]) कर्मणि क्तेऽनन्तरगति-स्वरः । पूप. दीर्घत्वम् उसं. (पा ६, २, ४९; ३, १२२) ।

[c]) गस. उप. घञि थाथादि-स्वरः । पूप. दीर्घत्वम् (पा ६, २, १४४; ३, १२२) ।

[d]) अभिः कप्र. इति मन्यमानाः PW. प्रभृ. विमृश्याः ।

[e]) 'अभिवावृधे' इति शौ (१, २९,१) पाभे. ।

[f]) 'अभि···वर्धय' इति शौ (१, २९,१) पाभे. ।

[g]) 'अभि····अवीवृधत्' इति शौ (१,२९,३) पाभे. ।

[h]) गस. उप. घञ् प्र. । थाथादि-स्वरः । तै. विरहय्य पूप. दीर्घत्वम् (पा ६, २, १४४; ३, १२२) ।

[i]) गस.शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९) ।

[j]) गस. उप. भावे क्तिनि पूपप्रस्व. (पा ६, २, ५०) ।

[k]) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[l]) गस. उप. अचि पूप. दीर्घत्वम् उसं. थाथादि-स्वरश्च (यक. पा ३,१,१३४; ६,३,१२२; २,१४४) ।

[m]) अगतितयाऽभिमातिष्ठमानौ PW.WI.च चिन्त्यौ।

[n]) 'अभ्यवर्धत' इति ऋ (९, ४७, १) पाभे. ।

[o]) 'अभिवावृते' इति ऋ (१०, १७४, १) पाभे. ।

[p]) अभिं गतिमवदन्तौ PW. GW. च चिन्त्यौ ।

[q]) 'अभि···वर्तय' इति ऋ (१०,१७४,१) पाभे. ।

[r]) अभि···अवीवृतत्' इति ऋ (१०,१७४,३) पाभे. ।

अभि-वेगु- अभि√विज् द्र.

अभि√वेन्

φअभि-वेनत्[a]- -नन्तः ऋ १०, १२३, ६.

अभि√व्यध्>विध्, ¶अभिविध्येत् तै २, ६, ८, ४.

अभि-विद्ध- अन्°

अभि-व्याधिन्[b]- -धिनः शौ १, १९, १; पै १, २०, १.

¶अभि-व्य(वि√अ)न्, अभिव्यनिति काठ २९,६; ३७,१४; क ४५, ७; अभिव्यन्यात् काठ ३७, १४.

अभिव्यानीत् काठ ३७, १४.

¶अभि-व्या(वि-आ)√१दा, अभिव्याददात् काठ ३७, १४.

¶अभि-व्या(वि-आ)√हृ, अभिव्याहरति तै ६, ४, ३, २.

¶अभि-व्यु(वि√वश्>उ)च्छ्, अभिव्यौच्छत् काठ १०, ६; ७.

अभि√व्ये, अभिव्ययस्व ऋ ३,५३, १९.

अभि√व्रज्

अभि-व्रजत्[c]- -जद्भिः ऋ १,१४४, ५; -जन् ऋ १, ५८, ५; ९, ६८, ३.

अभि√व्लङ्ग्

अभि-व्लग्य>ग्या[d] ऋ १, १३३, १; २.

अभि-व्लङ्ग[e]- -ङ्गैः ऋ १, १३३,४.

अभि√शंस्, ¶अभिशंसति मै २, ५, २; ¶अभिशंसन्ति तै २, १, १०, २[2]; मै २, १, ३[2]; ५, २[2]; ५[2]; ३, ८, ४; ¶अभिशंसन्ति मै २, ५, २[2]; काठ १०, ६; १२, ५; १३, ६; ¶अभ्यशंसन् मै २, १, ३; ¶अभिशंसेयुः तै २, १, १०, २; मै २, १, ३; काठ १०, ६; १२, ५[2]; १३, ६.

अभि-शस्[f]- -शसा ऋ १०, १६४, ३.

¶१अभि-शस्त[g]- -स्तः तै २,५,१, ६¶; पै ९,१७,९[h].[°स्त-अन्°]

२अभि-शस्त[i]-

अभिशस्तेन्य- अन्°

अभि-शस्ति[j]- -†स्तये ऋ ५, ३, १२[k]; ७, ९४,३; ८, १९, २६; कौ २, २६८; जै ३, २२, १५; -स्तिम् ऋ ३, ३०, १; ५, ३, ७; मा ३४, १८†; का ३३, १, १२†; शौ ३, १,१; २,१; पै ३, ५, १; ६,१; -स्तीः ऋ ८,८९, २; मा ३३, ९५†; काठ १९, १२[2]¶; क ३१, २[2]¶; -स्तेः ऋ १, ७१, १०; ९१,१५;९३, ५; ६, ४२, ४; ७, १३, २; ८, ६६, १४; १०, ३०, ७; ३९, ६; १०४, ९; मा २७, ९; का २९, १, ९; तै १, ५, ११,२†; २, ३, १४, २†; ४, १, ७, ४; मै २, १२, ५; ३, ४, ६; १६, ५†;४, १०,१†; काठ ४,१६†; १८, १६; क २९, ४; कौ २, ७९३†; शौ ७, ५५, १; -स्त्या शौ ६,१२०,२;१२,१०,१२; पै १५, ५, ५[l]; -स्त्याः तै १, १, ११, २; ३, १, ७, १; मै १, १, १२; ५, २;८[3]; काठ १,११; ६, ९; ७, ६; ३७, १५; १६; क १, ११; ४, ८; ५, ५; पै ६, १२, ८; १६, ५०, १०; -स्त्यै मा २, ५; का २, १, ६. [°स्ति-अन्°]

¶अभिशस्ति-कृत्[m]- -ते मै १, ४, १४.

अभिशस्ति-चातन[n]- -नः ऋ ३, ३, ६.

१अभिशस्ति-पा[o]- -पाः ऋ ९, २३, ५; ९६, १०; मै १, २,९; शौ २, १३, ३; ४, ३९, ९; ५, १८, ६; ८, ७, १४; १९, २४, ५; ६; पै ९, १७, ८; १५, ६, २; ३; १६, १३, ४; -पाम् ऋ ६, ५२, ३.

२अभिशस्ति-पा[p]- -पाः मा ५, ५; का ५,२,२; तै १,२,१०,२;

a) वैतु. वें. सा. अभ्य(भि-अ)चक्षत। शेषम् एउटि.द्र.।

b) गस. णिन्यन्त-कृत्-प्रस्व. (पा ६, २,१३९)।

c) गस.शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६; २,१३९)।

d) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

e) गस. उप. घञि थाथादि-स्वरः (पा ६, २,१४४)।

f) गस.उप. भावे क्विप्। कृत्-प्रस्व. (पा ६,२,१३९)।

g) कर्मणि क्ते प्रवृद्धादित्वादन्तोदात्तः(पा ६,२,१४७)।

h) 'अभिशस्ता' इति शौ (५, १८, १४) पाभे.।

i) उप. भावे. क्तः। स्वरस्य कृते एपूटि. द्र.।

j) गस. उप. भावे क्तिनि पूपप्रस्व. (पा ६,२,५०)।

k) कर्त्रर्थतया व्याचक्षाणः सा. चिन्त्यः। तथात्वेऽन्तोदात्तत्वप्रसङ्गादिति।

l) दुरूहः खलु पा. भूयोविमर्शसापेक्षः।

m) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

n) तु. टि. 'अमीव-चातन-'।

o) उस.विजन्त-कृत्-प्रस्व. (पा ६,२,१३९)।

p) पंतस. सासस्व. (पा ६, १, २२३)। उप. भावे विच् प्र. इत्येतावानेव नापू. सरूपादस्य विशेषः द्र.। एवं तावद् 'भवान् शरणम्' इत्यादि-साम्येनाऽस्यौपचारिकी वृत्तिश्च द्र. नियतलिङ्गता च (वैतु. भा. प्रभृ. यनि. एतदीयेषु स्थ. अप्य् १अभिशस्ति-पा- इत्येतदेव वर्त्तयितुकामा लिङ्गव्यत्ययं शरणायमाणाः)।

६, २, २, ४[3]¶; मै १, २, ७; काठ २, ८; क २, २.
अभिशस्ति-पावन्[a]- -वा ऋ १, ७६, ३; ७, ११, ३; मा ५, ४; का ५, १, ४; मै ४, १४, ६.
अभिशस्ति-हन्[b]- -हा मा ३३, ९५; तै १, ६, ५, २; ४, २, १, १.
अभि-शस्तृ[c]- -शस्ता शौ ५, १८, १४.
¶अभि-शस्यमान[d]- -नः तै २, २, ५, १; ३, ७, ४; -नम् मै २, १, ३; ३, ७; ५, २; ५; ३, ८, ४.
अभि √शास्, अभिशासति ऋ ६, ५४, २.
?‡अभिशिषः[e] मै ४, ९, १२.
?अभिशिष्यतम्[f] पै ६, ६, ४.
अभि √१शुच्>शोचि, अभिशोचति तै ४, ७, १५, ५; मै ३, १६, ५; शौ ४, २६, ७; पै ४, ३६, ७; अभिशोचतु पै ९, २५, ६; ८; †अभि…शोचतु ऋ ६, ५२, २; पै २, ५, ६; अभिशोच तै १, ३, ११, १.
अभिशुचः काठ १६, ४; १९, ५; क ३०, ३; अभिशोचः ऋ १०, १६, १; काठ १६, ८;
अभिशोचीः मा ११, ४५; १२, १५; का १२, ४, ८; १३, १, १६; मै २, ७, ८; १७.
¶अभि…शोचयति काठ १९, ५; १२; क ३०, ३; ३१, २; अभिशोचय पै १३, १, १६; अभिशूशुचन् मा ३५, ८; का ३५, ४, ७; अभिशूशुचः तै ४, १, ४, ३; ९, ३; २, १, ५; ५, १, ५, ६; शौ १८, २, ४†[g].
अभि-शोक[h]- -कः शौ १, २५, ३.
अभि-शोच[i]- -चान् शौ ४, ३७, १०; पै १३, ४, १४.
अभि-शोचन[j]- -नम् शौ ४, ९, ५; पै ५, ३४, १-४; ८, ३, ५; -नात् शौ २, ४, २.
¶अभि-शोचयत्- -यन् काठ १०, ३.
अभि-शोचयन्ती- -न्तीः पै १३, ४, १५.
अभि-शोचयिष्णु[k]- -ष्णुः शौ ६, २०, ३; पै १३, १, २.
अभि √शुष्, ?अभिशुष्यत[l] खि ४, ७[2], ९[m].
अभि √श्नथ्
अभि-श्नथ्[n]- -श्नथः[o] ऋ १०, १३८, ५.
अभि √श्रा(<श्रै), ?अभिश्राप्येताम्[f] पै १६, ७१, १.
अभि-श्राव- अभि √श्रु द्र.
अभि √श्रि, अभि…अश्रैत् शौ १३, २, ९.
१†अभि-श्री[p]- -श्रियः ऋ १०, ६६, ८; -श्रियम् ऋ ८, ४४, ७; ७२, १३; मा ३३, २१; का ३२, २, ४; कौ २, ८३०; -श्रिया ऋ १, १४४, ६; ६, ७०, १; मा ३४, ४५; का ३३, २, ८; मै ४, ११, १; काठ १३, १५; कौ १, ३७८; जै १, ३९, ९; -श्रियौ शौ ८, २, १४$; -श्रीः ऋ १, ९८, १; ७, ९१, ३; १०, १३०, ५; मा २६, ७; २७, २३; का २८, ७, १; २९, ३, १; तै १, ५, ११, ३; मै ४, ११, १; १४, २; काठ ४, १६.

---

[a]) उप. कर्तरि वनिप् प्र.। सस्व. कृते नाउटि. द्र.।
[b]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।
[c]) गस. उप. तृनि प्र. अनन्तर-गति-स्वरः (पा ६, २, ५०)। अत्र कथम् इन्द्रोऽभिशस्तिपा अपि सन् स्वयम् अभिशस्तिकारकः स्याद् इत्यापातिकं विरोधं परिजिहीर्षवः केचिदभियुक्ताः 'अभि-शास्तिम्' इति PW. च, 'अभि-शस्तम्' इति Z. च, 'अभि-शस्त्याः' इति यद्वा 'अभिशस्तिपाः' इति W. च पाठं यथाक्रमं परिवर्त्तयितुमनसो भवन्ति, तद् अकल्पमिव भवति। परकृताऽभिशस्तिहरत्वेऽपि परकर्मकाऽऽत्मकर्तृकाऽभिशस्तिकरत्वेऽस्य विरोधाऽभावात्।
[d]) गस. कर्मणि शानच् प्र.। कृत्-प्रस्व. (पा ६, २, १३९)।
[e]) एवं खलु नितान्तविकृतमूलः मुपा. भवति [तु. संटि., ऋ ८, १, १२ अनु अभि √श्रिष् >अभि-श्रिष्- >-श्रिषः इति शोधः (तु. यस्था. ऋ. टि.)]।
[f]) संदिग्धः संस्करणाऽन्तरसापेक्षः पा.।
[g]) 'अभिशोचः' इति ऋ (१०, १६, १) पाभे.।
[h]) गस. उप. घञन्ते थाथादि-स्वरः (पा ६, २, १४४)।
[i]) गस. उप. कर्तर्य् अच् प्र.। नापूटिदि. स्वरः द्र.।
[j]) गस. ल्युडन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९)।
[k]) गस. उप. इष्णुच् प्र.। कृत्-प्रस्व. (पा ६, १, १६३; २, १३९)।
[l]) पा. विकृत इव स्यात् [तु. 'अभिलिष्यदे' इति शौ (५, ५, ९) पाभे.]।
[m]) पै ६, ४, ९ इत्यत्राऽपि मूको. अयं पा. द्र.।
[n]) गस. क्विबन्त-कृत्-प्रस्व. [पा ६, २, १३९ (तु. सा. GW.; वैतु. PW. MW. च उप. भावे कसुन् इति)]।
[o]) पं१ (वैतु. वें. प्र३ इति)।
[p]) गस. क्विबन्त-कृत्-प्रस्व. (पावा ३, २, १७८; पा ६, २, १३९)।

अभि √श्रिष्

†अभि-श्रिष्[a]- -श्रिषः ऋ ८, १, १२; कौ १, २४४; जै १, २६, २; शौ १४, २, ४७.

अभि √श्री, †अभिश्रीणन्ति ऋ ९, ९३, ३; कौ २,७७०; अभि···श्रीणन्ति ऋ ९,८४,५; †अभि··· श्रीणन्ति ऋ ९, १, ९; जै ४, ४, ९; †अभि[b]··· श्रीणीतन ऋ ९, ११, ६; कौ २, ७९६.

अभ्यशिश्रयुः[c] ऋ ९, ८६, १७; †अभि···अशिश्रयुः ऋ ९, ११, २; कौ २, २;५०३; जै ३, १, ४; ३९, २.

२अभि-श्री[d]- -श्रियः ऋ ९, ७९, ५; ८६, २७.

अभि-श्रीणत्[e]- -णन् ऋ ९, ९७, ४३[f].

अभि √श्रु > श्रृ, अभि···श्रृण्वन्तु पै ५, ११, ४.

†अभि-श्राव[g]- -वाय ऋ १, १८५, १०; -वे ऋ १०, १२, १; शौ १८, १, २९.

अभि-श्रु(त>)ता[h]- -ता शौ ६, १३८, १; पै १, ६८, २.

अभि √श्वस्

अभि-श्वसत्[e]- -सन् ऋ १, १४०, ५.

अभि-श्वसस्(>:)[i] ऋ १०, ९२, ८.

अभि √ष(<स)च्, अभि···सचते ऋ ९, ७४, ७; अभिसचन्ते ऋ १, ७१,७; †अभि···सचन्ते ऋ ३, ४०, ७; ४, ४४, २; ७, ७२, १; ९०, ५; शौ २०, ६, ७; १४३, २; अभि···सचताम् शौ ९, ४, २२; अभि···सचन्ताम् ऋ १, २२, ११; अभि···सचस्व ऋ ३, ५३, १७; ५, ३१, २; अभि···सच काठ ४०, ३; अभिसचध्वम् पै १६, २६, ३; अभि···सचध्वम् शौ ६, ४१, ३; ९, ४, २४; १८, ४, ६२; अभि···असचन्त ऋ ३, ३१, ४.

अभि···सिषक्ति ऋ ७, ६७, ३.

†अभि-षाच्[j]- -षाचः ऋ ६, ६३, ९; ७, ३५, ११; १०, ६५, १४; खि ५, ५, ७; मै ४, १४, ११; शौ १८, ४, ४४$[k]; १९, ११, २; पै १३, ८, १२; -षाचम् ऋ ३, ५१, २.

अभि √ष(<स)द् > षीद, ¶अभिषीदति काठ ३२, ५; †अभि····सीदति ऋ ९, ७,५; कौ २, ४८२; जै ३, ३६, ७; ¶अभिषीदेत् क ३८, ३.

¶अभि-षण्ण[l]- -ण्णः तै २, ४, २, ३; काठ १०, १०; -ण्णाः काठ १०, १०.

अभि √ष(<स)न्

अभि-षात[l]- -ताः ऋ ५, ४१,१४.

अभि-षवणी- अभि √१षु द्र.

अभि √ष(<स)ह्, षाह्, †अभि[m] ···ससाहे[n] ऋ ८, ९६, १५; शौ २०, १३७, ९; †अभि··· सासहत् ऋ ५, २३, १; तै १, ३, १४, ७.

अभि···सासहीष्ठाः ऋ ६, ४५, १८; †अभ्यसाक्षि ऋ १०, १५९, १; पै २, ४१, १.

अभि-षाह्[o]- -षाट् मै ४, १२, ३; -षाहे मै ३, १२, ११.

---

a) गस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)। यत्तु भा. (तैआ ४, २०, १) लुङि मपु१ इदं रू. इति व्याख्यत्, तन्मन्दम्। तथा सत्य् अडः स्वरस्य प्राप्तौ धा. तदनुपपत्तेरिति दिक्।

b) कप्र. इति मन्वानः GW. पर्यनुयोक्तव्यः।

c) PW. अभि √श्रि इत्यस्य रू. आह तद् विमृश्यम्।

d) गस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

e) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

f) एकतरस्योपसर्गश्रुतेः शत्रन्तस्याऽध्याहारः। अभ्यर्थस्य भूयोऽपि श्रपणविशेषणत्वेन योगे श्रुतिस्वरस इत्यभिप्रायः (वैतु. वें. सा. '···अभिगच्छसि' इत्याक्षेपपरः)।

g) गस. उप. घञ् प्र. उसं., थाथादि-स्वरश्च (पा ३, ३, २५; ६, २, १४४)।

h) कर्मणि क्तेऽनन्तरगति-स्वरे प्राप्ते प्रवृद्धादित्वादन्तोदात्तः (पा ६, २, ४९; १४७)।

i) गस. कसुन्नन्त-कृत्-प्रस्व. (पा ६, १, १९७; २, १३९)। GW. अदन्तं प्राति. इति संकेतयमानश् चिन्त्यः।

j) गस. उप. ण्विः प्र. उसं.। कृत्-प्रस्व. (पा ३, २, ६३; ६, २, १३९)।

k) 'अभिशाचः' इति मुपा. प्रमादजः द्र.।

l) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

m) तु. सा.; वैतु. GW. अभिः कप्र. 'विशः' इत्येतदन्वित इति; PW. MW. च 'अभ्याचरन्ती- > न्तीः' इति (न्याय्येतरद्वैस्वर्य-दूषितं योगं प्रयोजुकौ चिन्त्यौ)।

n) पपा. 'ससहे' इति धा. उपधायां वृद्ध्यभावः प्रादर्शि [तु. √सह् इत्यस्य समानकार्याणि रूपान्तराण्यपि यत्र सर्वत्र पपा. समानी विधा भवति। वस्तुतस्तु √सह् इत्येतत्-सजातः √साह् अपि मूलतः द्र. (तु. टि. यस्था.)।

o) गस. उप. ण्विः प्र.। कृत्-प्रस्व. (पा ३,२,६३;६, २,१३९)। यच्च 'सहेः' (पा ८, ३,५६) इत्यत्रोक्तं भवति तदल्पमेव [तु. पृतनाषाहम् ऋ (६,७२,५) एउ. रूपं च]।

ϕअभि-षाहुस्[a]- -†ह्वान्[b] ऋ ९, २०,१;कौ २,३१८;जै ३,२६,४.

ϕअभि-षेहान[c]- -नः ऋ ८,३७,२.

¶अ(भि>)भी-षह्[d]- -षहा तै २, ३,२, ६; ६,१,१०,३;४;५, ११,३.

अ(भि>)भी-षाह्[e]- -षाद् ऋ ७,४,८; काठ ३९, ११; शौ १२,१, ५४; १३, १, २८; -षाहे मै २, १३, १७; ३, १२, १४.

अभी-षाह्य[f]- -ह्यः काठ ३९,११:

अभि-षाच्- अभि√षच् द्र.

अभि-षात- अभि√षन् द्र.

?अभि√षि(<सि),अभि···षिनन्ति[g] पै २,५७,३.

अभि√षि(<सि)च्,ञ्च्, ¶अभिषिञ्चते मै २, ४, १; ४, ३, १[५]; ४;४, ९[३]; ¶अभिषिञ्चति मै ३, १०, १; ४, ३, १०; ४, ३; ¶अभिषिञ्चति तै ५, ६, ३, २[४]; ३[२]; मै ४, ४, २[४]; ५; काठ २५, ७; ३७, १; क ३९, ५; ¶अभिषिञ्चन्ति मै ४, ३, ९; ४, २; ¶अभिषिञ्चन्ति तै ५, ६, २, २; मै ४,३, ९; १०[४]; अभिषिञ्चामि शौ ६, १२२, ५; १०, ९, २७; ११, १, २७; अभिषिञ्चामि मा ९, ३०; १०, १७; १८, ३७; २०, ३[३]; का १०, ५, ८[२]; ११, ६, १; २०, १, ७; २१, ७, २[३]; तै १, ७, १०, ३[२]; ८, १४, १; ५, ६, ३, ३[१]; मै १, ११, ४[२]; २, ६, ११; ३,४, ३[२]; ११, ८[३]; ४, ४, ५; काठ १४, २[२]; ८; १५, ७; ३६, १५[५]; ३७, ९; ३८, ४[३]; ४०, ९[२]; शौ ३, २२, ६; ४, ८,५; ६, १३६, ३; पै १, ६७, ३; ४, २, ६; १०, ७; ८, १०, १-५; १६, ९१, ७; १३८, ८; अभिषिञ्चतु खि ७, ७, ५; काठ ४०, ९; अभिषिञ्चताम् पै २, ७९, २; ६, ७,२; अभिषिञ्चन्तु मै ३, ११, ८[२]; ‡[h]अभिषिञ्च शौ ४, १५, १६; पै ५, ७,१४; अभि···सिञ्च शौ १९, ३१, १२; पै १०, ५, १२; अभिषिञ्चत शौ ६, ५७, २; अभ्युषिञ्चन् मा १०, १; का ११, २, १; तै १, ८, ११, १; मै २, ६, ८; काठ १५, ६; ३७, ४; पै १४, १, ६; १४; अभि···असिञ्चन् शौ ४, ८, ६; अभिषिञ्चेत् शौ ८, १५, १; अभिषिञ्चेत् मै ३,४,३[३]¶; शौ १६, १, ९; पै १६, १३५, ९; ¶अभिषिञ्चेयुः मै ४, ४, २. अभि···असिचम् काठ ३६, १५; ३७, ९. ¶अभिषिच्यते मै ४,३,२; काठ १२, ७; १०; १४, १०; ३७, १; २[३]; ३[५]; ४[५]; ५[५]; ६[४]; ७[४]; ८[४]; अभ्युषिच्यन्त शौ १४,१, ३६; पै ४, १०, ७; १४, १,१; अभ्यषिक्षि मै ४, ४, ९.

अभि-षिक्त[i]- -क्तः ¶तै ५, ४, ९, २; ¶मै ४, ३, ७[२]; १०; ¶काठ ३७, ५; शौ १९, ३१, १२; पै १०, ५, १२; -क्ते पै ५, २९, ३. [°क्त- उद°, धारा°, राजसूय°]

अभि-षिच्यमान[j]- -नस्य मै ४, ३, ९; ४, ४; ५.

ϕअभि-षिञ्चत्[k]- -ञ्चन् ऋ ,१, १२१, ६.

¶अभि-षिषिचान[c]- -नम् मै २, ४, १; ४, ३, ५.

¶अभि-षेक[l]- -कः तै ५, ४, ९,१; मै ३, ४, ३; काठ २१, १२; १४.

---

a) गस. उप. शतृ>वसुः प्र. उसं. । कृत्-प्रस्व. (पा ७, १, ३६; ६, २, १३९) ।

b) तु. PW. प्रभृ.; वैतु. वें. सा. यनि. स्वारसिकं योगमनीक्षमाणा इवाऽऽक्षेपमुखेन 'अभि(भवति)'इति भाषुकौ ।

c) गस.कानजन्त-कृत्-प्रस्व.(पा ६,१,१६३;२,१३९)।

d) गस. उप. क्विप् प्र. । पूप. दीर्घत्वम् । कृत्-प्रस्व. (पा ६, ३,११६; २, १३९) ।

e) गस. उप. पाप्र. ण्विः प्र. [पा ३, २, ६३ (वस्तुतस्तु √*साह् इत्यस्याऽभ्युपगमे (यस्था. टि. द्र.) प्र. णित्वं नैवाऽपेक्ष्येतेति दिक्)] कृत्-प्रस्व. पूप. दीर्घत्वम् उसं. (पा ६, २, १३९; ३, ११६)। पपा. पूप., दीर्घत्वमन्याय्यमिति कृत्वाऽवग्रहाऽभावादेव तदभ्युपगतस्य उप. दीर्घाऽभावतो निर्देशस्येहाऽभावः द्र. ।

f) सस्व. नापूटि. द्र. । उप. कृते तु. टि. अभिमाति-षाह्-, पृतना-साह्- ।

g) संदिग्ध-स्थलीयः पा. भवति । यनि. अभिप्रेतं भवत्युत √खिन्द्>खिन्दति >*खिनन्ति> खिनन्ति इति वेति विमर्शसहं भवति । उभयथाऽपि नतिरप्रमाणं द्र. ।

h) 'निषिञ्च' इति ऋ (५, ८३, ८) पाभे. ।

i) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६,२,४९) ।

j) गस. कर्मणि शानच् प्र. । कृत्-प्रस्व. (पा ६, १, १८६; २, १३९) ।

k) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९; तु. PW. MW.; वैतु. सा. अभिः कप्र. इति, GW. 'अभि···आष्ट' इति योगं ब्रुवाणश्च) ।

l) गस. उप. घञि थाथादि-स्वरः (पा ६, २, १४४) ।

अभि-षेक्तृ[a]- -क्तारम् मा ३०, १२; का ३४, २, ४.

अभि-षेचन[b]-

¶अभि-षेचनीय[c]- -यस्य मै ४, ४, १०[2]; काठ १५, १०.

अभि √१षु(<सु), ¶अभिषुणोति तै ३,२,२,१; मै ४,७,७; ¶अभिषुणोति तै ३, १, ८, २; ६, ४, ५, १; मै ३, ७, ८; ४, ५, ५[2]; ६; काठ २६, १०; क ४१, ८; ¶अभिषुण्वन्ति तै ६, ४, ४, ४; ६, ७, १; ९, २; मै ४, ५, ६; ७, २; ७; ८, ३; अभिषुण्वन्ति ¶तै ६, १, ६, ४; ¶काठ २३, १०; २६, १; २९, २; ३०, ७; ३४, ३[2]; ¶क ३७, १; ४०, ४; ४५, ३; पै ५, ३६, ६[d]; १६, १५१, १; ¶अभ्यषुण्वन् काठ २६, १०; क ४१, ८; अभिषुणुयात् तै ३, २, २, १; काठ २६, १०; क ४१, ८; ¶अभिषुणुयुः काठ ३४, ३.

¶अभ्यसुषुवुः मै ४, ७, २.

अभि-षवणी[b]- -णीः शौ ९, ६, १६; पै १६, ११२, ३.

¶अभि-षुण्वत्- -ण्वन्तः काठ २७, ४; क ४२, ४.

अभि-षुत[e]- -तः तै ४, ४, ९, १; काठ ३४, १५; -¶तस्य काठ २९, ६; क ४५, ७; -¶ताय काठ २७, २; ३०, ७; क ४२, २. [°त- अन्°, सकृत्°]

¶अभि-षुत्य[f] तै ६, २, ११, ४.

¶अभि-षुत्य[g]- -त्यः मै ४,५,६; काठ ३४,३[2]; -त्यम् तै ६,४,५,३.

¶अभि-षूयमाण[h]- -णस्य तै ३,१, ८, २.

¶अभि-षोतोस्(>:) काठ २७, १; ३०, ७; क ४२, १.

अभि √१षू(<सू), ¶अभिषुवति मै २, ५, ६; काठ १३, २.

अभि-षेक- अभि √षिच् द्र.

अभि √षेणि(<सेना)[i]

अभि-षेण[j]- -णान् ऋ ६,४४,१७.

अ(भि>)भी-षेण[k]- -णम् पै ४,२७,५

अभि-षेहान- अभि √षह् द्र.

अभि √षो(<सो), अभिष्यामि शौ ४, १६, ९.

अभि √ष्ट(<स्त)न्>स्तनि, तंस्तन्, अभिष्टन[l] शौ ६, १२६, २‡[m]. ¶अभ्यस्तनयन्[n] तै १,६,११,४. अभितंस्तनीति[o] पै ९, २४, १; अभितंस्तनीहि शौ ५, २०, १.

अभि-ष्टन[p]- -ने ऋ १, ८०, १४.

१अभि*-ष्टि[q]- -ष्टयः ऋ १, ५२, ४; ११९,८; ४,३१,१०; १०,२२, १२; -ष्टये ऋ १, १२९, १; २, ३४, १४; ५, १७, ५; ३८, ३; ८, ८, १७; १२, ४; २७, १३; ५०, १; ६७, १; १०; ६८, ५; १०१, १; ९, ८४, २; १०, ९, ४; ४९, ४; ९३, ११[2]; खि ३, २, १; ४, २, १३; ५, ६, २; मा ४, ११; ३३, ८७†; ९१†; ३६, १२; का ४, ५, २; ३६, १, १२; तै १, २, ३, १;

---

[a]) गस. तृजन्त-कृत्-प्रस्व. (पा ६,१,१९३; २,१३९)।

[b]) गस. ल्युडन्त-कृत्-प्रस्व. (पा ६,१,१९३; २,१३९)।

[c]) तु. टि. अभि √चर्>अभिचरणीय-।

[d]) मुपा. नकारोऽपलक्षणः।

[e]) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

[f]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३; २,१३९)।

[g]) गस. क्यबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

[h]) गस. कर्मणि शानच् प्र.। कृत्-प्रस्व. (पा ६, १, १८६; २, १३९)।

[i]) णिजन्तो नाधा. (पा ३, १, २५)।

[j]) गस. कर्तर्य् अच् प्र. थाथादि-स्वरश्च (पा ६,२,१४४)। यत्तु सा. बस. इति कृत्वा व्याचष्टे, तन्न। तथात्वेऽन्तोदात्त्वाऽनुपपत्तेः, अभेः उप. प्रति गतित्वाऽभावाद् नतितज्जणत्वाऽप्रसक्तेश्चेति दिक्।

[k]) नापू. एव रूपान्तरं भवति। अत्र पूप. दीर्घत्वं विशिष्यते (तु. पा ६, ३, ११६)।

[l]) षत्वम् उसं. (पा ८,३,६५)। यत्तु सा. पा ८,३,८६ इत्यनेन षत्वमाह, तच्चिन्त्यम्। तस्य सति सामान्यपरे विशेषपरकत्वादिति।

[m]) 'निः ष्टनिहि' इति ऋ (६, ४७, ३०) पाभे.।

[n]) अड्व्यवायेऽपि षत्वाभावमुपलक्ष्य 'प्राक्-' (पा ८,३, ६३) इत्युक्तदिशा सिताद् उत्तरवर्तिताऽस्य धा. उसं.।

[o]) प्रागुक्तदिशा सितोत्तरवर्तित्वेऽस्य धा. 'स्थादिषु' (पा ८,३,६४) इत्येतद्-विषयत्वाभावः सुगमः। अत्र मूको. '°नयति' इति पा.। एवं तु. '°नीहि' (शौ ५, २०, १) इति। अभ्यासे नलोपाऽभावो विमृश्यः।

[p]) गस. उप. अप् प्र. उसं.। थाथादि-स्वरः (पा ३, ३, ५८; ६, २, १४४)।

[q]) प्रास. उप. √स्था+भावे क्तिः प्र. पूपप्रस्व. (पा ३,३, ९२; ६,२,२)। नैप्र. ठकारस्य टकाराऽऽपत्तिः। पपा. अवग्रहाभावोऽन्याय्यवर्णपरिणामस्य वाऽस्पष्टाऽवयवविभागस्य वा सूचकः द्र.। भूयस्यो ह्यत्र कल्पना भवन्ति। तथाहि। उप. क्तिनि <√यज् इति वा (तु. सा. ऋ १,१२९,९; भा. तै १,२,३,१), √१,२इष् इति वा (तु. सा. यक्ष. ऋ १,५२,४; ४७,५), √१अस् इति वा [तु. PW. GW. प्रमृ., WW १,१६१, (तु. १उप-स्ति-, परि-ष्टि-, स्ति-)]।

२, १, ११, ५†; मै १, २, ३; ४, १२, १†; काठ २, ४; १३, १६†; ३८, १३†; क १, १६; कौ १, ३३†; २, ११०‡[a]; †जै १, ३, १३; ३, ५६, १७‡[a]; ४, २८, १०; शौ १, ६, १†; ६, ३, २; २०, ५१, ३†; –†ष्टिभिः ऋ १, ४७, ५; १२९, ९[2]; ४, ४६, २; ५, ३८, ५; ८, ३, २; १९, २०; ५३, ५; खि २, १३, ५; ३, ५, ५; ५, ४, २; मा १५, ४०; का १६, ५, २२; कौ १, २८२; २, ७७२; ४, २$; जै १, २९, १०; २, ७, १; –†ष्टौ ऋ १, १५८, १; ४, १६, ४; ९; ५, ४१, ९; ६, ३३, ५; ६७, ११; ७, १९, ८; ९; १०, ६, १; ६१, २२; मै ४, १४, १५; शौ २०, ३७, ८; ९; ७७, ४. [°ष्टि-सु>स्व्°]

†अभिष्टि-कृ॒त्[b]- -कृत् ऋ ४, ११, ४; २०, १; ९, ४८, ५; मा २०, ४८; का २२, ५, २; कौ २, १८९; जै ३, १७, ११.

अभिष्टि-पा॒°- -?पा(ः) ऋ २, २०, २.

अभि॒ष्टि-शवस्[d]- -वसे ऋ ३, ५९, ८.

अभिष्टि- सु>स्व्°

२अभि-*ष्टि॒°- -ष्टिः ऋ १, ९, १; ३, ३४, ४; १०, १००, १२; १०४, १०; खि ४, ६, ४; मा २०, ३८; ३३, २५†; का २२, ४, ३; ३२, २, ८†; मै ३, ११, १; ४, १२, ३; काठ ३८, ६; †कौ १, १८०; †जै १, १९, ६; †शौ २०, ११, ४; ७१, ७; –ष्टीः तै २, ४, १४, २.

अभिष्टि॒-द्यु(म्न>)म्ना[f]- -म्नाः ऋ ५, ५१, ७.

अभिष्टि-म॒त्[g]- -मत् ऋ १, ११६, ११.

अभि √ष्टु(<स्तु), ¶अभि॒ष्टुवन्ति मै ४, ६, २; अभि॒ष्टुहि ऋ १, ५४, २; मै ४, ९, २; शौ २०, ४९, २; ३[h]; अभि॒ष्टवाम ऋ ८, १००, ३.

अभि॒-ष्टुत,ता[i]- -तः ऋ ९, ३, ६; २७, १; ६७, १९; २०; †कौ २, ६०७; ६३६; †जै ३, ४९, ९; ५१, २; शौ ९, २, १; पै १६, ७६, १; –तम् पै १०, ३, २; –ताः शौ ८, ७, ११; पै १६, १३, १; –ते ऋ ७, ३९, ७.

?अभिष्ठताम्[j] पै ६, ७, १.

अभि √ष्ठा(<स्था)>तिष्ठ, अभि॒तिष्ठते[k] शौ १९, ४९, २; ¶अभिति॒ष्ठति तै ५, ४, ३, ५; ¶अभि॒तिष्ठति तै ६, ६, ३, २; मै ३, १, ४[2]; अभितिष्ठसि खि ४, ७, १, ६; अभि॒तिष्ठामि मा ६, १६; का ६, ३, ६; शौ ६, ४२, ३; अभि॒ ··· ति॒ष्ठन् ऋ १०, १२३, ३[l]; अभितिष्ठः पै ७, १८, ८; अभितिष्ठतु पै १६, ७३, ४; अभि ··· तिष्ठतु पै १, ९४, ३; अभि॒तिष्ठ>ष्ठा ऋ १, ४२, ४; ५, २८, ३; १०, ६९, १२; मा ११, २०; ३३, १३†; का १२, २, ९; ३२, १, १२†;

---

[a]) 'अभि॒ष्टिभिः' इति ऋ (८, १९, २०) पाभे. ।

[b]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[c]) तस. सासस्व., उस. इति कृत्वा वा कृत्-प्रस्व. द्र. (पा ६, १, २२३; २, १३९) । पूप. क्रिवि. इति कृत्वा न. द्वि१ इति वर्तयित्वा योजनीयम् । उप. √२पा+विच् प्र. । एस्थि. संपा. प्रथमपादान्ते 'त्वायतो॒'>'*त्वायतॉँ॒' इति च द्वितीयपादान्ते 'जना॒न् >*जना॒म्'(=ष३) इति च द्वि>ष. इति प्रकृतिप्रत्या-पत्त्यात्मकः शोधः द्र. । 'अभिष्टिपा॒ असि' इत्यत्र विसंधिश्च [तु. समाननिष्पत्तिकस्य 'स्ति-पा॒ः' इत्यस्य च (ऋ १०, ६९, ४) 'पा॒-' इत्येतदुत्तरपदाना-मन्येषामपि प्राति. तत्र तत्र वा.; वैतु. पपा. अविसर्ज-नीयान्तं चिन्त्यं स्. (तु. टि. ?अनेहा॒), सा. पूप. शत्रु-पर्याय इति समग्रश्रौतप्रसिद्धिविरुद्धमशुद्धं भाषमाणः पंतस. इति कृत्वा व्याचक्षाणः; GW. LUD. च अभि-ष्टिपासि>'अभि॒ष्टि(<अभि॒ष्टी<अभि॒ष्ट्या) । पासि' इति पदविभाग इति (न त्वेवं पाद ऊनाक्षरताया अप-हतिरिव स्यादिति चिन्त्यम् [तु. L ४४ एतत्कल्पप्रवण-त्वेऽप्यनध्यवसितः])] । GG. १अभि॒ष्टि- इति पूप. इति कृत्वा तृतस. इतीव विवृणोति ।

[d]) व्यधिकरणे बस. पूपप्रस्व. (पा ६, २, १) । उप. यद्र. ।

[e]) गस. उप. √स्था+कर्तरि वा भावे वा किः प्र. कृत्-प्रस्व. (पा ३, ३, ९२; ६, २, १३९; तु. २उप-स्ति॒-) । नैप्र. ठस्य टः ।

[f]) समानाधिकरणः बस. । शेषम् एपूटि. द्र. ।

[g]) 'ह्रस्व-' (पा ६, १, १७६) इति मतुबुदात्तः ।

[h]) एवं किल WR. शिश्रावयिषतः (वैतु. मूको. अ॒धृ-ष्णुहि?) । वस्तुतस्तु 'उरूवाचो [='उरु॒ । उवाच । उ' ('शक्रो॒ वा॒चम्)] अ॒-धृष्णु॒हि॑' इति शोधः स्वारसिकश्च सुलभश्च द्र. ।

[i]) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९) ।

[j]) संस्कर्त्रोपेक्षितः संदिग्धः पा. द्र. (तु. √स्था इत्यत्र अ॒तिष्ठताम् इत्यत्रत्यं सस्थ. टि.) ।

[k]) सा. W. च 'वि॒तिष्ठते' इति पा. आहतुः ।

[l]) पूर्वस्या ऋचो 'यो॒निम्' इत्यस्याऽध्याहारः द्र. 'सु॒नीळाः' इति साक्षाच्छ्रुतेश्च (तु. वें.; वैतु. सा. PW. MW. 'अभि॒वावशा॒नाः' इत्यन्याप्यत्वैस्वर्यप्रसक्त्योगाः) ।

तै ४,१,२,३; मै २,७,२; ३,१, ४[2]; ४,११,१†; १२,३; काठ २, १५†; १६,२; शौ ५, ८,९; ७, ७७, १०†; १९, ४६,५; पै ३, ३, ३; २१, ६; ४, २३, ४; अभि···तिष्ठ ऋ ६, २१, ७; †अभि[2]···तिष्ठ ऋ १०, १७४, २; शौ १, २९, २; पै १, ११, २; अभितिष्ठेम ऋ १, ११०, ७; अभि···तिष्ठेम ऋ ८, २१,१२. अभि···तस्थौ ऋ ४, ५०, ७; †अभि···तस्थौ ऋ ६, २०, १; ७,८,४; मा १२, ३४; का १३, ३, ५; तै २, ५, १२, ४; ४, २, ३, २; मै २, ७, १०; काठ १६, १०; क २५, १: अभितस्थ पै ९, २२, १५; अभ्यंस्थात् तै ४, २, ८, १; काठ ३९,१; †अभि-···अस्थात् ऋ १, १४९, ४[a]; १०,३,३; कौ २,८९८; ११२५; जै ४, १३,११; अभ्यंष्ठाम्[b] शौ १०, ५, ३६; १६, ९, १; पै १६, १३२, १; अभ्यंस्थाम् मै १, ५, ३; ६, २.

ϕअभि-तस्थिवस्[c]– -†वांसः ऋ ४, ४, ९; तै १, २, १४, ४; मै ४, ११, ५; काठ ६, ११.

अभि-ष्ठित[d]– -तः खि ५, १८, १; मा ८, २३; का ९, ४, १; तै १, ४, ४५, १; ६, ६, ३, २; काठ ४, १३; २९,३; क ३,११; शौ ५, १४, १०; २०, १३५, ३; पै ७, १, ८; –†ताः ऋ १०, १६६, २; पै १३, ३, ११.

अभि√ष्य(<स्य)न्द्, अभिसिष्यदे शौ ५, ५, ९; पै ६, ४, ९.

¶अभि-सं√या, अभिसंयाति काठ २२, ६; क ३४, १.

¶अभि-सं√युज्, अभिसंयुङ्क्ते मै २, ३, २; ७; अभिसमयुङ्क्त मै २, ३, ७.

अभि-सं√विश्, अभिसंविशन्ति शौ १५, १७, ९; पै ९, १२,१; अभिसंविशन्तु मा १३, २५; १४, ६; १५; १६; २७; १५, ५७; का १४, २, ११; १५, १, ५; ४, ३[2]; ८, ५; १६, ७, १; मै २, ५, ६; ८, १२[2]; १३, २२; ४, ६, ६; काठ १३, २; १७, १०[2]; ४०, १२; क २६, ९[2]; अभिसंविशस्व शौ ९, २, २५; अभिसंविशध्वम् शौ ३, ३, ४; ६, ६४, २‡[e]; ८, ५, २०; २१; पै २, ७४, ४; १६, २८, ९; १०.

¶अभि-सं√शंस्, अभिसंशंसति मै ४, ७, ५.

¶अभि-सं√श्रि, अभिसंश्रयति काठ १०, ४.

अभिसं-श्रित– -ताः काठ १०, ४[3].

¶अभि-सं√श्लिष् >श्लेषि, अभिसंश्लेषयन्ति मै २, ४, ६.

अभि-सं√स्वृ, †अभि···समस्वरन् ऋ ८,३,७[f]; ९,६७,९[f]; कौ १, २५६[f]; २, ९२३[f]; जै १, २७, ४[f]; शौ २०,९९,1; ‡[g]अभि··· समस्वरन् पै ६, ११, ४?.

अभि-सं√हन्

अभिसं-हत्य पै १६, ९०, ६[h].

¶अभि-सं√हृ, अभिसंहरति काठ २७, ५; क ४२, ५.

¶अभि-सं√क्रम्, अभिसंक्रामन्ति, अभिसंक्रामन्ति मै ४, २,६.

¶अभि-सं√गम्>च्छ्, अभिसंगच्छन्ते, अभिसमगच्छन्त मै २, १, ४; ३, ६, ५.

अभिसं-गत्य[i] शौ ११, १, १६.

¶अभि-सं√ज्ञा>जा, अभिसंजानते मै २, २, ६[j]; ३, २, ३[2]; काठ २६, १; क ४०, ४; अभिसमजानत मै २, २, ६[2j].

†अभि-स(>ष[k])त्वन्[l]– -त्वा ऋ १०, १०३, ५; मा १७, ३७; का १८,४, ५; तै ४, ६,४,२; मै २, १०, ४; काठ १८, ५; क २८, ५; कौ २, १२०३; शौ १९, १३, ५; पै ७, ४, ५.

¶अभि-सं√तन्, अभिसंतनोति मै १, ११, ९; ४, ४, ३; ८, १०; काठ १४, १०; २७, १०; २८, १; क ४४, १; अभिसंतन्वन्ति काठ ३०, ५.

अभिसं-तत– -तः काठ २७,१०[2].

---

[a]) एवं किल वें. अर्वाग्भक्ष । सा. तु सर्वलोकाऽभिष्ठितौ हेतुभूतदीप्त्यर्थानुवादकेन 'शुशुचानः' इति पदेन योगं वदन् लोकविलक्षणमिव किंचिच्चिकीर्षति । तदलक्षणं त्विति तेन मर्षणीयम् ।

[b]) षत्वं तदभावश्च शाखाभेदेन द्र.(तु. एपू. च नाउ. च रू.)।

[c]) गस. क्वस्वन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[d]) सस्व. कृते तु. टि. अभिनि-षण्ण- ।

[e]) विशिष्ट इह ऋ (१०, १९१, ३) पाभे. ।

[f]) √स्वृ इत्यस्य √गै इत्येतत्-पर्यायतयैतत्-प्रकारकेषु स्थ. 'अभि' इति कप्र. अपि सुवचः(तु. टि. ऋ १,५१,१)।

[g]) 'अव···समस्वरन्' इति ऋ (९, ७३, ४) पाभे. (तु. टि. अव-सं√स्वृ) ।

[h]) 'अभिसं-गत्य' इति शौ (११, १, १६) पाभे. ।

[i]) गस. ल्यबन्त-कृत् प्रस्व.(पा ६,१,१९३; २,१३९)।

[j]) भङ्ग्यन्तरेणाऽन्यत्र अभिः कप्र. भवति नोपसर्गः (तु. तै २, २, ११, ६) ।

[k]) काठ. षत्वं भवतीति विशेषः ।

[l]) बस. पूपप्रस्व. (पा ६, २, १) । उप. यद्र. ।

अभिसं-तत्य काठ २३, ५.

अभि-सं√तप्>तापि, अभिसंतपाति शौ २,१२,६‡[a]; अभि… संतपताम् पै १०, १२, ८.

अभिसंतापय शौ १९, २८, २.

¶अभि-सं√तॄ>तर्, अभिसंतरति काठ २३, ६.

अभि-सं√धा, ¶अभिसंधत्ते मै ४, ४, ५; ¶अभिसंधत्तः मै २, ४, २; काठ १२, १२; २४, ७; २६, ७; क ३७, ८; ४१, ५; †अभि…संधेहि ऋ १०, ८७, ३; शौ ८,३,३[b]; पै १६,६,३.

अभि…समधात् शौ १०, ५, ४३[c].

¶अभिसंधीयते मै ३, ७, २.

अभि√सप्, अभि…सपन्ते[d] ऋ ७, ३८, ५.

¶अभि-समा(म्-आ)√गम्, अभिसमागच्छन्ति मै ४, ८, १०; अभिसमागच्छान् मै १, १०, १७.

¶अभि-समा(म्-आ)√वृत्, अभिसमावर्तते मै ३, ८, ९; अभिसमावर्तन्ते मै १, ६, ६; २, २, ६; काठ ३७,१; अभिसमावर्तन्त मै १, ६, ६[४]; २, २,६[२]; काठ ३७, १.

अभि-समि(म्√इ), अभिसमेति मै ३, १०,७¶; अभिसंयन्ति शौ ११, ७, ३; अभिसंयन्तु मै १,६,२[२]; काठ ७, १४; क ६, ३; पै १६, १५३, २[e]; ¶अभिसमियात् काठ २४, ५; क ३७,६.

अभि-समू(म्√१ऊ)ह्, अभिसमूहामि मै २, ६, ३; ४, ३, ४[f]; काठ १५, २.

अभि-समृ(म्√ऋ>अर्पि), अभि… समरीत[g] ऋ ९,७९,३.

अभिसमर्पय पै ४, १६, ८.

अभि-समे(म्-आ√इ)

φअभिसमे(मा-इ)त्य[h] शौ१२,३,४.

¶अभि-सं√पद्>पादि, अभिसंपद्यन्ते काठ ३३, २-४.

अभिसंपादयते काठ २७, ९;

अभिसंपादयति मै ४, ५, ३[३]; काठ २५, ४; क ३९, १.

अभिसं-पन्न- -न्नः काठ ३३, २;३.

अभि-सं√पश्, अभिसंपश्य पै १, ९७, ४.

¶अभि-सं√बन्धू, अभिसमबध्नीत मै ४, ७, ८[५].

अभि-सं√भू, अभिसंभवतः मै ३,७, ८¶; अभिसंभव पै १६,७२,१; ¶अभिसमभवताम् मै २,४,३; ¶अभिसंभवेताम् मै ३, ७, ८. अभिसंबभूव शौ ३, २८, ५; ६; अभिसंबभूवुः काठ ५, ६; ३९, २.

अभिसं-भूय[i] शौ ५, २८, ८; पै २, ५९, ६.

¶अभि-संमु(ख>)खा- -खाः काठ २५, १०; २६, ६.

¶अभि-संमु(ख>)खी- -खीः क ४१, ४.

¶अभि-सं√मिल्, अभिसममिलत् मै १, ५, १२.

¶अभि-सं√मृश्, अभिसममृशन् मै २, १,११.

अभि√साध्>साधि, अभिसाधय>या पै ५, १०, १०.

अभि√सृ

अभि-सर्तृ[j]- -र्तारम् मा ३०, १४; का ३४,३, १.

अभि√सृज्, अभि…सृजन्ति पै ४, ३५, ४; ¶अभ्यसृजत् काठ १३, २; ¶अभ्यसृजन्त काठ ३५, २०; अभि…असृजम्

a) 'अभि…शोचतु' इति ऋ (६, ५२, २) पाभे.।

b) मूको. 'अभि' इत्यस्य स्थाने 'अपि' इति श्रूयते (तु. W.)। यत्त्वाह WI. अभिः कप्र. इति, तच्चिन्त्यम्।

c) शौ ८, ३, ३ इत्यनेन समर्थ्यं च चोद्यं च प्रति सविषयता द्र.।

d) लक्षणे कप्र. इति मन्वानः सा. चिन्त्यः (तु. वें.)।

e) 'अभिसंयन्ति' इति शौ (११,७,३) पाभे.।

f) मुपा. सविसर्गस्याऽभेः स्थाने 'अभि' इति शोधः द्र.।

g) तु. वें. PW. प्रभृ.; वैतु. सा. तृतीयपादीयं 'तान्' इति पदं तुरीयपादीयवाक्यान्तर्गतं प्रकुर्वाणः 'अभि' इत्यस्य वा. स्थितिं प्रति प्रमादुकः।

h) 'अभि-संविशध्वम्' इति योग इति यत् MW. अभिमानुकस्तन्न। स्वरतश्चाऽर्थतश्चोभयथाऽप्यसंगतेः। यदपि 'अभि' इति स. अर्थे कप्र. 'आपः' (=द्वि३ <२अप्-) इत्येतदन्वित इति W. उल्लेखुकस्तदपि न। एवंविधे वा. अभ्युपसृष्टस्याऽऽख्यातस्य सकर्मकत्वाऽव्यभिचाराद् 'आपः' इत्यस्य द्वि३ सतः कर्मतयैव सूपयोगात् स. अर्थे कप्र. प्रयोजकत्वस्याऽप्रसङ्गात्। तथा चासन्नलक्षणद्विस्वरत्वात्मकस्य चोद्यस्य दुष्परिहरत्वाच्च। का तावदत्र गतिरिति। उच्यते। वा. समवबोध इति। कथमिति। शृणु। नेह 'आपः' इति प्र३ वा द्वि३ वा भवति। किन्तर्हि। सं३ इति। 'पुत्रासः' 'जीवधन्याः' इत्युभे च 'आपः' इत्येतत्-समानाधिकरणे वि. भवतः [तु. शौ १२, ३, २५ उ (पुत्रत्वस्य चेह प्रियत्वोपलक्षकमात्रत्वात् पुंस्त्वमतन्त्रं द्र.)]। एस्थि. 'आपो जीवमभिसमेत्य संविशन्तु' इति वा. तात्पर्यं भवतीति दिक्।

i) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

j) गस. तृजन्त-कृत्-प्रस्व. (पा ६,१,१६३;२,१३९)।

पै ४, २, ७![a]; ८, १०,१०![a].

¶अभ्यवसृज्यन्त मै १, १०, ५.

¶अभि-सृज्य[b] मै ४, २, ७.

¶अभि-सृज्यमा(न>)ना[c]- -ना मै ४, ६, ८.

†अभि-सृष्ट[d]- -ष्टः ऋ ३, ३५, १; १०, ९१, ५; कौ २, ३३२; जै ३, २८, ४.

अभि√सृप्, ¶अभिसर्पति काठ २८, ८; क ४४, ८; ¶अभिसर्पन्ति मै १, ४, ५; ८, २; अभिसर्प शौ ३, २५, ४.

¶अभि-सृप्य[e]- -प्यम् मै ४,६,२.

अभि√स्कन्द्, अभिचस्कुन्द शौ ७, १२०, २.

अभि-स्कन्दम्[f] शौ ५, १४, ११.

†अभि√स्रु, अभिस्रवन्तु ऋ १०, ९, ४; मा ३६, १२; का ३६, १, १२; काठ १३, १६; ३८, १३; कौ १, ३३; जै १, ३, १३; ४, २८, १०; शौ १, ६, १.

अभि√स्फूर्ज्, अभिस्फूर्जति शौ १२, ७, ९.

†अभि√स्वृ, अभिस्वरन्ति ऋ १, १६४, २१; शौ ९, १४, २२; पै १६, ६७, १२; अभिस्वरन्ति ऋ ९, ८५, ३; अभिस्वरन्तु ऋ ८, १३, २८; अभिस्वर ऋ १, १०, ४; ८, १३, २७; ९, ९७, ३; कौ २, ७५१.

अभि-स्वर्[g]- -स्वरा ऋ २, २१, ५; ८, ९७, १२; शौ २०, ५४, ३.

अभि-स्वर[h]- -रे[i] ऋ ३, ४५, २; १०, ११७, ८; कौ २, २८१‡[j]; १०६९; जै ३, २३, १३‡[j]; शौ १३, ३, २५.

अभि-स्वर्तृ[k]- -र्तारः ऋ १०, ७८, ४.

अभि√हन्>जिघांस, †अभिजहि ऋ ७,१०४,१९; शौ ८, ४,१९; पै १६, १०, १०; अभि····जहि[l] ऋ ९, ८५, २; अभि····हन् ऋ ५, २९, २.

†अभि····जघन्थ ऋ ३, ३०, ८; मा १८, ६९; का २०, ५, २.

†अभि····जिघांसति ऋ ७,५९, ८; मै ४, १०, ५; ¶अभिजिघांसन् क ३५, ५.

¶अभि-घातम् काठ १२, ४.

अभि-घ्नत्[m]- -घ्नते मा १६, ४६; का १७, ७, ५; तै ४, ५,९,२; मै २, ९, ८; काठ १७, १५; क २७, ५.

?अभिघ्नन्[n] खि १,२, २.

अभि-हत[d]- -तः शौ ११,१२,२२; -?तम् शौ १९,९,९[o]; -¶तस्य मै ३, ९, ३. [°त-उल्का°]

अभि√हर्य्, अभिहर्यन्ति ऋ १०, ११२, ६; अभिहर्यत शौ ३, ३०, १.

अभि√हस्,

अभि-हस्य[p]- -स्यम् शौ ६, ३०,२.

¶अभि√२हा

अभि-हाय[b] मै२,५,७;काठ१३,२[q].

अभि√हि, अभि>भी····हिन्वन्ति[r]

---

[a]) 'अभि···असृजन्' (प्रपु३) इति मुपा. शोधार्हः द्र. । मूको. विरोधाचाऽन्यथासिद्धत्वाच [तु. नापू. मन्त्रे च तैब्रा. २, ७, १५, ५ च उपु१ एव श्रुतिः (यदनुरोधादिहापि अभि√सिच्, ञ्च् इत्यस्यैव निगमस्य सतः [तु. शौ ४, ८, ६] यनि. विकारमात्रं संभाव्येत)] ।

[b]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९) ।

[c]) तु. टि. 'अति√दह्>अति-दह्यमान-' इति. ।

[d]) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६,२,४९) ।

[e]) गस. क्यबन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[f]) गस. णमुलन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९) ।

[g]) गस. विजन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[h]) गस. घान्त-कृत्-प्रस्व. (पा ३, ३, ११८; ६, २, १३९) तु. विव. ।

[i]) सा. PW.नापू. प्राति. च१ रू.; MW. तुमर्थीयं रू. इत्याहुः । तद् विमृश्यम् ।

[j]) 'अभिस्वरा' इति ऋ (८, ९७, १२) पाभे. ।

[k]) गस. तृजन्त-कृत्-प्रस्व. (पा ६,१,१६३;२,१३९)।

[l]) वैतु. सा. 'अभ्या (गच्छ)' इत्येवं व्यर्थं द्विस्वरं च क्रियाध्याहारवन्तं च योगं मन्यमानः; PW. प्रभृ. च 'अभ्या···जहि' इत्यातिष्ठमानाः । अत्र 'आ···पिब' इति योगः द्र. ।

[m]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[n]) यद्यपि यमु. यद्-योगीय-स्वरं लङि प्र३ रूपं भवति, तथापि मूलतः 'अभिहनम्' इत्यस्य सतोऽयं विकार इति सुकल्पम् (तु. संटि., ऋ १, ११६, ६; ११७, ९ प्रभृ. च) ।

[o]) 'उल्काभिहतम्' इति मुपा. स्थाने 'उल्का-भिहतम्' इति प्रकरणानुरोधाच् शोधः WR. संमतः । सा. स्वीये भाष्ये, कैश्चित् मूको. स्वीकृतश्च द्र. ।

[p]) गस. उप. यत् प्र. उसं. । कृत्-प्रस्व. (पा ३, १, ९९; ६, १, २१३; २, १३९) ।

[q]) 'अतिहाय' इति मूको. पा. ।

[r]) अभिम् कप्र. वदन्तः PW. प्रभृ. विमृश्याः ।

ऋ ९,१०१,३; अभि(हिन्वन्ति) कौ २, ४९.

अभि-हिं√कृ, अभिहिंकृणोत शौ १२, ३, ३७.

अभिहिंकरोति, अभिहिङ्कुकरोत् काठ २७, ९.

अभि-हित- अभि√धा द्र.

अभि√हु, ¶अभिजुहोति तै ३, १,५, २; ६, ६, ३, २; मै ३, २, ८; ९, ५; ४, १, १४; काठ ६,८[2]; २५, १०; ३१, ११; क ४,७[2]; ४०,३; ४७, ११; अभिजुहोमि तै १, ३, २,२; अभि···जुहोमि पै २, ६६, ४; ¶अभिजुहुयात् तै २, ६, ६, ६; ३, ४, ८, ३; काठ ३५,१९; क ४८, १७.

अभि-हुत,ता[a]- -ता शौ ६, १३३, २; पै ५, ३३, २; -¶तौ काठ ६, ८; क ४, ७.

¶अभि-होतवै[b] मै १, ८, ६.

अभि√हृ, अभिहरन्तु शौ १९,४५, ४; पै १५, ४, ४.

¶अभि-हृत्य[c] मै २, ५, ७.

अभि√ह्रु

अभि-ह्रुत्[d]- -ह्रुतः ऋ १, १२८, ५[2]; १०, ६३, ११; शौ ६, ४, २; -ह्रुताम् ऋ १, १८९, ६.

अभि-ह्रुति[e]- -ती शौ ६, ३, ३[f]; -तेः ऋ १, १६६, ८.

अभि√ह्वृ

अभि-ह्वार[g]- -रे शौ ६, ७६, ३.

१अभी(भि√इ), ¶अभ्यायत तै २, ५, २, २;५; अभ्यायत[h] शौ ४, २४, ६; पै ४, ३९, ६; अभि-···आयत ऋ १, ८०, १२; ‡अभ्ययत्[i] कौ २,१८८; जै ३, १७,९; ¶अभ्यायन्त तै ६, २, ७, ४; ४, ६, १.

अभ्येति कौ २, १२१०; शौ १, २५, ४; ७, १२१, २; ९, १, ८; अभ्येति ऋ १, ११५, २; १२४, ९; १४०, ६; ९, ९७, ७; १०१, १६; १०, ३, ३; ११७,८; †मै ४, १४,४; ¶काठ २४, ७; ¶क ३७, ८; †कौ १, ५२४; २, ४६६; ८९८; †जै १, ५४, २; ३, ३५, १; ४, १३, ११; शौ ८, ९, ९; †१३, २, २७; ३, २५; †२०, १०७,१५; पै २,६५,१; १६, १८, ९; अभि···एति ऋ १, १२३, ७; ७, १०४, २१; ९, ९६, २२; १०, ६३, १६; शौ ८, ९, २१; १३, २, ४३[j]; अभियन्ति शौ १०, ७, ४; ६; अभि···यन्ति ऋ ८, १००,१; शौ ५, ४, २; अभि···यन्ति[k] ऋ १,१९०,४; अभ्येषि पै १६, १४९, १०; अभ्येमि मै १, ३, ३७; ४, ८, २; अभ्येतु मै २, ७, १२‡[l]; शौ ५, १३, ४; ७, १२१, २; १३, १, १०; पै ८, २,३; ‡अभि···एतु[m] शौ ८,४, २१; पै १६, ११, १; †अभियन्तु ऋ ४, ५७, ८; मा १२, ६९; का १३, ५, ८; तै ४, २, ५, ६; काठ १६, १२; क २५, ३; पै १५, ५, ६$; †अभीहि ऋ १, ८०, ३; १०, ८३, ३; कौ १, ४१३; जै १,४०, ५; शौ ४, ३२, ३; पै ४, ३२, ३; †अभि···इहि ऋ ९, ६४,१३; कौ १, ५०५; २, १९१; जै १, ५२, ९; ३, १७, १२;

[a]) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

[b]) तवै-प्रत्ययान्तस्य द्वैस्वर्यं द्र. (पा ६, २, ५१)।

[c]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[d]) गस. क्विबन्त-कृत्-प्रस्व.(पा ६,१,१६२;२,१३९)।

[e]) गस. क्तिनि पूपप्रस्व. (पा ६, २, ५०)। सात. पाण्डु. WR. तु 'अभि°' इत्येवं पा. आहुस्तत्सून्तन्त्रं द्र.।

[f]) 'अभि-ह्रुतः'इति F. प्रस्तावितं पा.W. अनुमुमोदयिषति, तत्र को लाभः यनि. च का क्षतिर् इति विमृश्यं विविग्भिः।

[g]) गस. घञन्ते कृति थाथादि-स्वरः (पा ६,२,१४४)।

[h]) अभ्या√१यम् इत्यस्य रू. इति ब्रुवाणः सा. चिन्त्यः।

[i]) 'अभि' इति ऋ (९, ४८, ३) पाभे.।

[j]) शौच. १, १५, अनु 'अभ्युत्' इत्यस्मात् तिङो निघाताऽभावे 'एति' इति स्यात्। पा ८, १, ६५ अनु स एव निघाताऽभावो वैकल्पिक इत्य् एतत्सर्वं शाखाभेदेनोह्यम्।

[k]) 'मृगाणामिव बृहस्पतेर्हेतयोऽहिमायान् यून् (<*यु-यद्र.)' इति संबन्धः द्र.। च- योगे तिङ् नानुदात्तः [पा ८, १, ५८ (वैतु. सा. मृषैव च-लोपमुपस्थाप्य 'यन्ति' इति प्रथमा तिङ्-विभक्तिरिति कृत्वा नानुदात्तेति च, 'अभि' इत्येतदुपसर्ग्याऽऽख्यातान्तरमध्याहार्यमिति च भावुकः; GW. 'अभि' कप्र. यून् <१यु- ⌊यद्र.⌋ इत्येतदन्वित इति, VVS १८१, [तु. GVS ३, १३८⌋) *अभि√यु>*अभि-यु->अभियून्>(शोधपूर्वकम्) अभियून् इति स्यादिति]।

[l]) 'अभियन्तु' इति ऋ (४, ५७, ८) पाभे.।

[m]) 'अभि···एति' इति ऋ (७, १०४, २१) पाभे.।

अभीतम् पै १३,५,८‡[a]; ¶अभ्यैताम् काठ २७, ८; अभ्यायन् ¶काठ २९,१; ¶क ४५,२; पै ५, २६,५; अभि ... आयन् ऋ १०, २८,८; अभि ... आयन् ऋ ७, १०३,२; ¶अभीयात मै ४,६,७.

अभि ... ईयुः ऋ ७, १८, १०.

अभि-यत्[b]- -यन्ती शौ ५, १, ५.

अभियन्ती- -न्ती शौ ७,४८,३.

अभी(भि-इ)ति[c]- -तिम् ऋ ७,२१, ९; खि २, ६[3], २९; पै १०, ५, ११[d]; -तीः ऋ २, ३३, ३; पै १५, २०, ३.

अभी(भि-इ)त्य[e] ऋ ४, ३२, १०; ९, ५५, ४; १०,९९,५; ¶काठ २६, १; ९[3]; ३६, ८; ¶क ४०, ४; ४१, ७[3]; कौ २, ३२८†; जै ३, २७, ४†.

अभी(भि-इ)त्व(र>)री[f]- -रीः मा ११, ७७; का १२, ७, १२; तै ४, १, १०, २; मै २, ७, ७; ३, १, ९; काठ १६, ७; १९, १०[2]; क ३०, ८[2]; पै १, ४२, १.

¶अभ्या(भि-आ)युक- -कः काठ २८, २; क ४४, २.

२अभी(भि√ई), †अभि ... ईमहे ऋ १, २४,३; तै ३, ५, ११,३; मै ४, १०, ३; काठ १५, १२; †अभि(ईमहे) मै ४, ११, १; काठ २८, ७; क ४४, ७.

(*अभीअअक-,*अभीक्क-) नाउ.टि.द्र.

†अभीक[g]- -कम् ऋ ९, ९२,५; -के ऋ १, ७१, ८; ११६, १४; ११८,५; ११९, ८; १२१,१४; १७४,५; १८५, १०; ३, ३९, ७; ५६, ४; ४, १२, ५; १६, १२; २४,४; २८, ३; ४३, ४; ६, २४, १०; ५०, १०; ७, १८, २४; ८५, १; १०, ३८, ४; ५५, १; ६१, ६; १३३, १; खि १, ८, ३; मा ३३, ११; का ३२, १, ११; तै १, ३, १४, ६; ७, १३, ५; मै ४, ११, १; २‡[h]; १२, ४; १४, १५; काठ २, १५; कौ २, ११५१; जै ४, १, ४; शौ २०, ९५, ३.

अभी(भि√ई)क्ष्, †अभ्यैक्षेताम् ऋ १०, १२१, ६; मा ३२, ७; का २९, ४, २; तै ४, १, ८, ५; अभ्यैक्षन्त तै ३, १, ४,२.

(*अभीगत-,*अभीगतक-) एपू.टि.द्र.

अभीच्छत्- अभी(भि√इ)ष् द्र.

‡अभीत्सम्[i] पै ९, ६, ६.

अभी(भि√इ)ध्, न्ध्, ¶अभी(भि-इ)न्धे तै ५,१,७,२; अभीन्धे मै ३, १,८; काठ १९,७; क ३०,५; शौ ११,३,१८; पै १६,५३,७; अभी(भि-इ)न्धते तै ७,४,९,१; अभीन्द्वाम् मै २,७,६; अभीन्धाताम् मै ३,१,८; अभीन्धताम् मा ११, ६१; का १२,६,२; अभी(भि-इ)न्धताम् तै ४,१,६,२; काठ १६,६.

१अभी(भि-इ)द्ध[j]- -द्धः ऋ १,१६४, २६; ¶मै ३,१,८; ३,६[k]; शौ ७, ७७,७†; ९,१५,४; पै १६,६८, ४; -द्धात् ऋ १०, १९०, १.

---

[a]) 'दुदेषि' इति ऋ (१, १६२, २१) पाभे. ।

[b]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

[c]) गस. उप. क्तिनि पूपप्रस्व. (पा ६, २, ५०)।

[d]) मूको. 'अभिति(मू)' इति । शौ (१९, ३१, ११) 'अमतिम्' इति वा (तु. सा.), 'अमितम्' इति वा (तु. मूको.), 'अवर्तिम्' इति वा (तु. WR.) पाभे. द्र. ।

[e]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३; २,१३९)।

[f]) गस. क्वरबन्त-कृत्-प्रस्व. (पा ३, २, १६३; ६,२, १३९) । 'अग्रेत्वरी-', 'अतीत्वरी-' इत्यत्र (पृ. ४२;८९) यथायथं शोधः द्र. ।

[g]) 'अभितो गतम् (भावे क्तः)' इति कृत्वा *अभी(<भि)-गत- इत्यतः प्रास. पूपप्रस्व. सतः प्राति. कपि प्र. सत्य् *अभीगतक->*अभी अ अक->यनि. इति वा, 'अभितः ईर्- (भावे <√ईर् <√ऋ)' इति कृत्वा *अभीर्- [भि-ईर्- (वैतु. पपा.)] इत्यतः पूर्ववत् कपि प्र. सत्य् '*अभीर्क->*अभीक्क->यनि. इति वा नैप्र. द्र. [वैतु. पा (५, २, ७४) यदनु अ(भि>)भी+कन् इति व्यु. आद्युदात्तः (पा ६,१,१९७), कमितृत्वाऽप्रसङ्गाद् अर्थतो विरोधश्च प्रसज्येत (प्रकामं श्रौतसरूपाभ्यां भिन्ने एव सती *अभिक- इत्य् *अभीक- इति च प्राति. उपकल्प्यमाने आचार्याऽनुशासनस्य विषयीक्रियेयातामित्यभिसंधेः [तु. टि. अभि-क-]; या. (३, २०) '=अभ्यक्त-' इति यदनु अभि+*अक- (=√अञ्ज्+भावे कः) इति गस. वा स्यात् प्रास. वा बस. वा (सर्वथाऽपि तु मिथ्यास्वर एव प्रसज्येत । गस. थाथीयोऽन्तोदात्तश्चाऽन्यथा पूपप्रस्व. स्यादित्य् *अभ्यक- इति मध्यस्वरित इत्यभिसंधेः); दे. (२, १७) अभि√इ+ईकः प्र. (तु. पाउ ४, २६; सा. ऋ ९, ९२, ५) इति धातुलोपनिर्भरः पक्षो वा, २अ+भी- (<√भी) इत्यतः बस. सतः कप् प्र. इति वा (तु. टि. अनूक- यदनु उप.<√अञ्च् इति वादोऽप्यकिञ्चित्करः स्यात्) इति दिक् (तु. दि. प्रतीक-, समीक-)]।

[h]) विशिष्ट इह ऋ (६, ७४, ४) पाभे. ।

[i]) संदिग्ध-स्थलीयः संस्कारान्तरापेक्षः पा. ।

[j]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९)।

[k]) 'आभीद्धः' इति दीर्घादिः मुपा. चिन्त्यः । आङ्पूर्वत्वस्य प्रसिद्ध्यभावादित्यभिसंधेः ।

२¶अभी(भि-इद्ध>)द्धा[a]- -द्धा तै ५, १, ७, ३; काठ १९, ७; क ३०, ५.

*अभी(भि-इ)धू[b]- -भीत् शौ १९, २८, २[c]; पै १३, ११, २[d].

अभी(भि√इ)न्व्, अभि…इन्वतः, अभि…इन्वतु पै १२, ६, १२.

अभीपु[e]-

अभीप-तस्[f](>:) ऋ१, १६४, ५२; तै ३, १, ११, ३†; ¶मै ३, २, ८; ४, ८, ५; काठ १९, १४†; २०, ९¶; २९, ३¶; ¶क ३१, ११; ४५, ४; शौ ७, ४०, १†.

अभीप्सत्- अभ्या(भि√आ)प् द्र.

अभीमोद-मुद्- अभि√मुद् द्र.

अभी(भि√ई)र्, अभ्यैरयन्त खि ४, १०, १, ३.

(*अभीर्-, *अभीर्क-) अभीक-टि.द्र.

†अ-भीरु[g]- -रवः ऋ १, ८७, ६; ८, ४६, ७; तै २, १, ११, २; ४, २, ११, २; मै ४, ११, २; काठ ८, १७; -रुः ऋ ४, २९, २; -र्वम्[h] ऋ ८, ४६, ६.

?‡अ-भीरुण[i], ?अभीरुण- -णम् मा ६, १७; शौ ७, ९४, ३; पै १, ३३, ३.

अभीलाप-लुप्- अभि√लप् द्र.

अभी-वर्ग- अभि√वृज् द्र.

१,२अभी-वर्त- अभि√वृत् द्र.

अभी-वर्ध- अभि√वृध् द्र.

अभीवार(भि-इव√*अर्)[j], ?अभी-वार[k] शौ १, ३२, ४.

अभी-वृत- अभि√२वृ द्र.

---

a) १संख्याकादभेदेऽपि स्वरितत्वाऽभावः तै. द्र. नान्यत्र [तु. अभी(भि√इ)धू इत्यस्य तिङ्न्तम्]।

b) गस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)। 'धर्मः' इत्यस्य वि. द्र.।

c) 'अभीन् [पपा.; ६अ+भी-(<√भी)]' इति 'दुर्हार्दः' इत्येतद्गामि वि. इति सा. [तु. नाउ. टि. यदनु पै. मूको. विज्ञापितं भवेद् यथेहाऽन्त्यस्य तकारस्य मूलतः सतः 'न्त्' इतीव विकारः समजनि (तकारस्य नकारसकारयोर्मध्ये व्यञ्जनभक्तिमात्रतया मिथ्याऽऽभासादित्यभिसंधेः)]। एस्थि. 'अभिसंतापय' इति वा (तु. WR.), 'अभिन्' इति वा (तु.सात.) यत् पिपठिषितं भवति, तदपुष्टमिति चालक्षणमिति च कृत्वा दुर्ग्रहं द्र.।

d) 'अभीन्' इति मुपा. यनि. मूको. संगमय्य प्रकृतिप्रत्यापत्तितया सुशोधः द्र. [विकृतस्य सतः शौ. (तु. नापूटि.) तस्योच्छिष्टमात्रत्वाऽभिसंधेः]।

e) तु. टि. अन्वीप-।

f) तसिः प्र. तत्-स्वरश्च [वैतु. सा. शौ (७, ४०, १) अभि√पत्+क्विप् इति व्युत्पादुकः]।

g) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

h) अमि पूर्वरूपैकादेशाभावः। 'अभीरुअम्' इत्यभिसंधेः पाद ऊनाक्षरताया अपहतिः द्र. (तु. L ४०७)।

i) 'युद्धा शेप उतानृतम्' इति बाह्वृचः (१, २३, २२) पादो भवति। तस्य 'युच्च शेपे अभीरुणम्' इति रूपान्तरं भवति (तु. यनि. मा.), तत्राप्युत्तरः पादार्धः 'अभीरुणम्' इति शाखान्तरे (तु. यनि. शौ.) स्वरभेदेन श्रूयते। अत्रोभयी दृष्टिर्भवति। एकं पदमिति च द्वे पदे इति च। प्रथमे कल्पे गस. उपप्रस्व. इति। को धा. कश्च प्र. इति। अभी(भि√ई)र्+(मा.) उनः प्र. उसं. प्र. स्वरश्च चेति वा (शौ.) उनन् प्र. उसं. नित्स्वरश्चेति वा [तु.यक. धरुण- इति च वरुण- इति च; वैतु.उ.म.PW. प्रभृ.च तस. ६अ+?भीरुण- (=भीरु-) इति (उप.का व्यु. कथं च नञ्-स्वराऽप्रवृत्तिरिति त्वस्पृष्टं भवति); उ. अभि√लू>रू इत्यपि विकल्पयति (पूप.दीर्घत्वम् इत्यभिसंधिः)]। अथ द्वितीयः कल्पो द्वे पदे इति। के ते इति 'भीरु (क्रिवि.) -ऋणम्'>*भीरु रुणम्>*भीरुणम्> अ° (यनि.) इति वा 'शेपे अभीरु ऋणम्'>°पे अभीरु (क्रिवि.)रुणम्>°पे अभीरुणम्> इति वा वर्णागमापत्तिलोपानुपातिसौवरसंक्रमश्च पक्षे छन्दोनुरोधप्रयोजितो मिथ्याप्रत्यायितपूर्वसवर्णैकादेशादिव बिसर्ज्यमानोऽकारोपजनश्च द्र. (वैतु. सा. [शौ] अभि रुणँम् (ऋणम्) इत्युपसर्गभूतस्य प्रथमस्य पदस्य दीर्घभावश्चाऽध्याहृतयोग्यक्रियायोगश्च)। एस्थि. भूयोविमर्शसहताऽस्य विषयस्य सुस्पष्टेति दिङ्मात्रम्।

j) अभ्युपचयभूतस्य 'इव' इत्यस्य तदङ्गत्वेनोपसर्गवदुपचारः द्र. (यनि. सत्तात आलोचनार्थं तु. नाउ. टि.)।

k) =अभि-इव-आर (तिङो निघाताऽभावे तु. पा ८, १, ६५; वैतु. ?WI. 'अभि-इव-आर' इति)। एवं तावत् यनि. इवोपचिताऽभ्युपसृष्टत्वेन निष्पन्नमिदं क्रिप. स्यात्। न त्वेषा पा. वस्तुस्थितिः स्यात्। कथमिति। स्वारसिकार्थविघाताच्च शाखान्तरीयसंकेतान्तराच्चेति। कथं तावत् स्वारसिकार्थविघात इति। यद् विश्वं द्यौरभ्यवृधद् इति वा [तु. तैब्रा ३, ७, १०, ३); अभ्यवारीद् इति वा (तु. पै १, २३, ४)], तत् [विश्वं (कर्तृ)] पृथिव्यामधिश्रितम् इति हि यः स्वारसिकोऽर्थः प्रतीयेत, प्रथमे पादे 'विश्वम्' इत्यस्य कर्मतयाऽनुजिगमयिष्यमाणस्य सतः कर्तृतयोपगमात् तस्य विघातः स्यादिति। शाखान्तरीयाच्च संकेतात् (गपू. पै.) 'विश्वमन्याऽभिववार' (<अभि√२वृ यद्र.) इति प्रथमस्य पादस्य मूलभूतः

अभी(भि√ई)शु

अभी(भि-ई)शु[a]- -शवः ऋ १,३८, १२; ५, ६१,२; ८, ३३,११; जै ४, २०,४†; शौ ८, ८,२२; २०, १३१,४; पै १५, १२, ८; १६, ३१, २; -शुना शौ ६, १३७,२; पै १,६७,४; -शुभिः ऋ ५, ४४, ४; खि ४, ११, ६; ५, १५, ११; मा ३४, ६; -शुम् खि १, १२, ५; -शून् ऋ ६, ५७, ६; -†शूनाम् ऋ ६, ७५, ६; मा २९, ४३; का ३१,.२, १०; तै ४, ६, ६, २; मै ३, १६, ३; काठ ४६, १; पै १५,१०, ६. [°शु- अन्°, दशन्>श°, स्मत्°, सु>स्व्° हिरण्य°]

अभी(भि√२इ)षू>च्छ्, अभीच्छात्[b] शौ १२, ३, ३४;४१; अभि··· इच्छात् शौ १२, ३, ४२.

ϕअभी(भि-इ)च्छु(त्>)न्ती°- -न्ती ऋ १, १६४, २७.

१¶अभी(भि-इ)ष्ट,ष्टा[d]- -ष्टः मै १, १०,१७; २०; काठ ८,७; ३६, ११; १४; क७, ४; -ष्टम् काठ २८, ५; क ४४, ५[२]; -ष्टाः मै १, १०, १७[४]; २०[२]; ३, ४, २; ४[२]; ८, १०; ९, ४; १०, ४; ४, ४, ८; १०; ८,३[२]; काठ ८, ५; ११, १०; २८,५[२]; ३६, ११[४]; १४[२]; क ७, १; ४४, ५[२]; -ष्टे मै ३, ४, २; ४.

२¶अभी(भि-इ)ष्ट[d]- -ष्टाः तै २, ४, १०, ३. [°ष्ट- अन्°]

¶अभी(भि-इ)ष्टि- -ष्ट्यै काठ ८, ८; २८, ३;४; क ७,२; ४४,३;४.

अभी-षुह्-,अभी-षाह्-, अभी-षाह्य-, अभि√षह्, षाह् द्र.

अभी-षेण-, अभि√षेणि द्र.

अ-भुज्[e]- -भुक् ऋ १०, ९५, ११.

*अ-भुजिष्ठ्य[f]- -ष्ठ्यः शौ २०, १२८, ४.

*अ-भुजिष्य[g]- -ष्यः खि ५,१२,४[h].

अ-भुञ्जत्[g]- -†ञ्जतः ऋ १, १२०, १२; ८, १, ६; कौ १, २९२; जै १, ३०, १०; -¶ञ्जन्तः तै ६, ५, ९, ४; मै १, १०, ७; काठ ३६, १; क ४४, ९.

अ-भूति[g]- -तिः शौ ११, १०, २१; १२,८,८; पै १६,८७,१; -तिम् खि २, ६,१,८; ¶मै ४,२, १३; -त्या शौ १६,७,१; -त्याः शौ ७, १०५, १; १६,५,५; ८,६; -त्यै मा ३०,१७; का ३४,३,४.

¶अ-भूत्वा[g] तै ५, ५, १, ६.

?अभेद्या[i] पै १३, ४, १३.

*अ-भोज्[g]-

अभोग्घ्(ज्-ह)न्[j]- -घ्नः ऋ १, ६४, ३.

(*अभ्यक्त-) अभीक- टि. द्र.

अभ्यक्त- अभ्य(भि√अ)ञ्ज् द्र.

?अभ्यगौः[k] पै ५, ९, ५.

अभ्य(भि√अ)घायु, अभ्यघायति शौ ७, ७३, ३; १९, ५०, ४; पै १४, ४, १४; अभ्यघायन्ति शौ ५, ६,९; पै ६, ११, ११.

आथर्वणिकः पा. सन् काले विकारमुपागमदिति संभाव्यते (वैतु. गपू. तैब्रा. 'अभिवाकूभे' इति)। यत्तु सा. अभीवारः (<अभि √१,२ वृ) इति प्र१ इति कृत्वा पठत्यस्य प्राति. सतो धातुविकल्पेन घञि प्र. निष्पत्तिमभिसंधाय वर्णकत्रयेण विभक्तिपरिणामादिप्रपञ्चं रचयेत्, तन्निता-न्तमत्त्वोदात्तममिव स्यात्। थाथीय-स्वरे प्राप्ते उप. आद्युदात्तस्याऽसंभवादिति दिक्। विस्तरस्तु कुतूहलिभि-राकरतोऽन्वेष्यः।

[a]) गस. उपप्रस्व. (पा ६, २, १३९)। उप. उन् प्र. उसं. नित्स्वरश्च [पाउ १, १०; पा ६, १, १९७ (तु. दे १, ५; वैतु. या ३, ९; दे १, ५; PW. प्रभृ. च अभ्य [भि√१अ]श्+शुण् प्र. इति)]।

[b]) 'अभि' इति कप्र. इतीव योजुकः W. चिन्त्यः (तु. सस्थ. टि. 'निधिपा- >पाः)'।

[c]) गस. ञान्त-कृत्-प्रस्व. (पा ६, २, १३९)। यनि. योगस्य कृते तु. पपा.; वैतु. सा. PW. प्रभृ च 'अभ्या(भि-आ)नात्' इति (द्वैस्वर्ययोगाच् चिन्त्याः)।

[d]) सस्व.कृते १अभीद्ध- २अभीद्ध- इत्यत्र यक.टि.द्र.।

[e]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. भावे क्विप् द्र. (वैतु. सा. कर्तरि प्र. इति कृत्वाऽनुपपन्नस्वरं तस. ब्रुवाणः)।

[f]) तस. नञ्-स्वरः (पा ६, २, २)। उप. √भुज् >*भुजिष्ठि->*भुजिष्ठ्य- इति तादर्थ्ये यता प्र.निष्पन्नं द्र. [तु.नाउ. (पाभे.) च WR.'अ-भुजिष्ठ-' इति शोधश्च; वैतु. मूको. अघुलिष्ठ्य- (यदनु '√*घुज् >घुजिष्ठि->*घुजि-ष्ठ्य-' इति कल्प्यमानम्)। एस्थि. अपि यत् पाण्डु. तदनु सात. चाऽन्याय्यद्वैस्वर्यदूषितमपि मूको. मुपा. प्रामाण्यं प्रापयत् तन्नाद्रियेत]।

[g]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[h]) मुपा. उत्तरादिस्वरः शोधार्हः द्र.। अलक्षणत्वाच् श्रुत्यन्तरसंकेतविरोधाच्च (तु. नापू. पाभे.)।

[i]) 'अभेध्यान्' इति शोधसापेक्षः मुपा.। 'हविर्धान्' इति शौ (४, ३७, ८) पाभे.।

[j]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

[k]) संदिग्धः संस्करणान्तरापेक्षो मुपा.।

अभ्य(भि√अ)ञ्च्

अभ्य(भि-अ)ञ्च्- -भ्यञ्चः पै६,२,५.

अभ्य(भि√अ)ञ्ज्, ¶अभ्यङ्क्ते तै २, ५,१,७; ६, १,१,५; काठ २३, १; ¶अभ्यंङ्क्ते तै ६, १, १, ५; मै ३, ६, २[३]; काठ २२, १३; क ३५,७; ¶अभ्यनक्ति तै ५,२, ८, ६; काठ २०, ७[३]; २३, १; २५, ८; क ३१, ९[३]; ३५, ७; ४०, १; ¶अभ्यंनक्ति तै २, ५, ११, ३; ५, २, ८, ६; ?अभ्य-नुक्ति खि ४, १०[२], १; †अभ्यं-अते ऋ ९, ८६, ४३; कौ १, ५६४; २, ९६४; जै १, ५७, ११; ४,२०,८; शौ १८,३,१८.

अभ्यं(भि-अ)क्त,क्ता[a]- -क्तः मै ४,९, १९; –क्ता शौ १०, १, २५; पै १६, ३७,५; –क्ताः खि ४, ५, ३०[b]. [°क्त- अन्°, सु>स्व्°]

अभ्यु(भि-अ)अन[c]- -०न पै ७,१५, ८; –नम् ऋ ८, ३, २४; ७८, २; १०, ८५, ७; ¶तै २, ५, १, ६[२]; ¶मै ३, १, २; शौ ६, १२४, ३; १४, १, ६†; पै १६, १११, १२†; –नस्य पै ४,१०, ८. [°न- आञ्जन°]

φअभ्य(भि-अ)आन[d]- -नः ऋ २, ८, ४; ¶मै ३, ६, ६.

¶अभ्य(भि-अ)ति√क्षर्, अभ्युतिक्षरन्ति मै ४, ४, ४[२].

¶अभ्य(भि-अ)ति√मुच्, अभ्यतिमुच्यते काठ ३०, ७.

¶अभ्य(भि-अ)ति√रिच्, अभ्युतिरिच्यते तै ७, १, ५, ६; मै १, ११, ९; २,२, १३; ४, ७,६[२]; काठ १४, १०; २६, ४; २८, ९; ३४, ४; क ४१, २; ४४, ९; अभ्युतिरिच्यन्ते मै ४,७,४.

¶अभ्य(भि-अ)ति√ष(<स)ज्,ञ्ज्, अभ्यतिषजति काठ १२, ५.

अभ्य(भि-अ)ति√सृज्, अभ्युतिसृजामः शौ १०, ५, १५–२१; १६, १, ५; ¶अभ्यत्यसृजन्त काठ २४, ७; क ३७, ८.

¶अभ्य(भि-अ)त्यू(ति√१ऊ)ह्, अभ्युत्यूहति मै २, ३,७; अभ्यत्यूहत् काठ १२, ५.

अभ्य(भि-अ)ध्व[e]- -ध्वे शौ ४, २८, २; पै ४, ३७, २.

अभ्य(भि-अ)नु√दिश्, अभ्यनुदेष्टु पै ५, ११,५; ९.

¶अभ्य(भि-अ)नु√वच्, अभ्युनूवाच तै ५, ६, ६, ३; काठ २८, ४; क ४४, ४.

अभ्युनूच्यते तै ७, १, ५, ५.

अभ्य(भि-अ)प√क्रम्, अभ्युपक्रमीः शौ १२, २, १८.

अभ्यपा(प√अ)न्

अभ्य(भि-अ)पान- -नम् पै ८,९,७.

अभ्यपे(भि-अप√इ), अभ्युपेहि शौ ७, ९३, १.

?अभ्यप्रयुक्त[f] पै २, ६५, ३.

अभ्य(भि√अ)म्,अभ्यंमीति[g] मा २२, ५; का २४,१,५; तै ७, ४,१५, १; मै ३,१२,१; काठ ४४, ४; †अभ्यंमीषि ऋ १०,८६,८; शौ २०,१२६,८; अभि ··· अमुन्ति ऋ ७, २५, २[h]; अभ्युमन्त ऋ १, १८९, ३; मै ४, १४, ३†.

अभ्य(भि√अ)य्

¶अभ्य(भि-अ)य्य काठ १३,८.

अभ्य(भि√*अ)र्घ्

*अभ्य(भि-अ)र्घ-

अभ्यर्घ-युज्वन्[i]- -ज्वा ऋ ६, ५०, ५.

¶अभ्य(भि-अ)र्घस्[j]- -र्घः तै २,३, ७, १; मै २, ५,४[३]; ३, ६, ६; ८, ३; काठ १०, ११; १३, ३.

?अभ्यर्भवम्[k] पै १, २६, ५.

†अभ्य(भि√अ)र्ष्, अभ्यंर्षति ऋ ९, ६६, २२; अभ्यंर्षन्ति ऋ ९, ६२, ३; ६३, ६; ८५, ७; कौ २, १८२; जै ३, १७, ३; अभ्यर्षसि ऋ ९, ६४, ८; कौ २, ३०९; जै ३,२५,५; अभ्यंर्ष ऋ ९, ८५, ४; ८.

†अभ्यु(भि-अ)र्षत्[l]- -र्षन् ऋ ९,

---

a) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

b) मुपा. स्वर-भ्रेषः द्र.।

c) गस.ल्युडन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

d) गस.शानजन्त-कृत्-प्रस्व.(पा ६,१,१६३;२,१३९)। क्रियाफलस्य कर्त्राऽऽत्मगामित्वेनैव सुसंगतत्वात्तथा न पश्यन् अभिं पृथक् अव्य. इतीव क्विप. चान्तर्भावित-ण्यर्थमितीव कृत्वा व्याचक्षाणः सा. चिन्त्यः।

e) प्रास. समासान्तः अच् प्र. चित्-स्वरश्च (पा ५, ४, ८५; ६, १, १६३)।

f) अकिंचित्-करः संस्कारान्तरापेक्षः पा.।

g) उ.अभि√मी इत्यस्य रू.इति। तच् चिन्त्यं भवति।

h) 'अभि'इति स्वाप्र.अव्य.इतीव कृत्वा यत् सा.'मुर्तासः' इत्येतत्-समानाधिकरणतया निनीषति, तदप्रमाणम्।

i) उस. क्वनिबन्त-कृत्-प्रस्व.। अत्र नाउ. एव पूप. इत्यैकदेशिकं मतम् (तु. MVG २४७) अपुष्टमिव द्र.।

j) गस. उप. असुच् प्र. कृत्-प्रस्व. च [पा ६, १, १६३; २, १३९; वैतु. भा. अकारान्तस्य प्राति. प्र१ इत्यभिवादुकः]। वा. क्रिवि. भवति।

k) शोध-सापेक्षः मुपा. चिन्त्यः [तु. 'अध्युकृता' इति शौ (१, २४, ४) पामे.]।

l) गस. शत्रन्त-कृत्-प्रस्व. [पा ६,१,१८६; २,१३९ (तु. वें. सा.; वैतु. PW. प्रमृ. अगतिं मन्यमानाः)]।

१६,६०;६२,१९०; १०६,१३: कौ १, ४८९०; जै १,५१, ३०; ३,५,५; १२, ७.

अभ्य(भि√अ)र्ह्, **अभि····अर्हत्**[a] पै १४, ४, २.

†**अभ्य(भि√अ)व्**, **अभि····आवीत्** ऋ ९, ९७, ३९; कौ २, ७०९; जै ३, ५८, ६.

¶**अभ्य(भि-अ)व√क्रन्द्**, **अभ्यवक्रन्दति** काठ २५,७; क ३९,५.

अभ्य(भि-अ)व√२क्षि, **अभि····अव····क्षेषि** ऋ ७, १८, २?[b].

अभ्य(भि-अ)व√चक्ष्

अभ्यव-चक्षाण– -णौ पै १२,३,४.

¶**अभ्य(भि-अ)व√चर्**, **अभ्यवचरति** काठ ३६, १४.

अभ्यव-चारम् अनु >न्व्°

अभ्यव-चारक- अन्°

अभ्य(भि-अ)व√तन्, **अभ्यवतनोमि** शौ ८, ८, २४.

¶**अभ्य(भि-अ)व√दह्**, **अभ्यवदहेत्** मै १, ६, ६.

अभ्य(भि-अ)व√निज्, **अभ्यवनिक्षि** शौ १०, ५, १५–२१; १६, १, ४; पै १६, १२९, १–१०.

¶**अभ्य(भि-अ)व√नी**, **अभ्यवनयेत्** काठ ३५, १६; क ४८, १४.

अभ्य(भि-अ)व√पश्, **अभ्यवपश्यसि**, **अभ्यवपश्य** पै ८,२०,७.

अभ्यवर- कुशिक°

¶**अभ्य(भि-अ)व√रुह्**, **अभ्यवरोहति** मै १, ११, ८[२]; ४, ४,६[२]; काठ १४, ८[३].

अभ्यव-रोहत्[c]– -हन् मै ४, ४,६.

अभ्य(भि-अ)व√सृज्, ¶**अभ्यवसृजन्ति** काठ २१, ४; ९; क ३१, १९; **अभ्यवसृजामि** शौ १६, १, ६.

अभ्य(भि-अ)व√स्ना

अभ्यव-स्नात– -तेन पै ९,२२,१८.

अभ्य(भि-अ)व√हृ, ¶**अभ्यवहरति** मै ४, ४, ६[२].

अभ्य(भि-अ)व-ह्रियमाण[d]– -णः मा ८, ५९; का ९, ७, ७.

¶**अभ्यवे(भि-अव√इ)**, **अभ्यवैति** मै ३,६,२;७;८,४; **अभ्यवयन्ति** मै १,१०,१३[२]; मै ४,८,५[२]; **अभ्यवयन्ति** मै ४, ८,५[४]; काठ २९, ३; क ४५, ४; **अभ्यवैत्** काठ ८, १०; क ७, ६; **अभ्यवायन्** तै २, ६, ३, २; काठ २४, ७; क ३७, ८; **अभ्यवेयात्** मै ३, ८, ४; **अभ्यवेयुः** मै ४, ८, ५[२]; काठ २९, ३[३]; क ४५, ४[३].

अभ्यवा(व-आ)यन[e]– -नम् मै ३,८, १०.

अभ्यवे(व-इ)त्य[f] तै १, ५, ४, ४.

अभ्यवे(व-इ)त्य[g]– -त्यम् तै ३, १, ९, ६.

अभ्य(भि√१अ)श्, **अभ्यश्नुते**, **अभ्यश्नुते** तै ७, १, १, २¶; †**अभि····अश्नोति** ऋ ३, ११, ७; कौ २, ९०७; जै ४, १५, ३; **अभ्यश्नवातै** शौ १२, ३, ३४; **अभ्यश्नुवातै** पै १, ७०, १; **अभ्यश्नवाव** ऋ १, १७९, ३.

अभ्यानशे पै ३, २, ५[h]; **अभि····आनशुः** ऋ २, २४, ६; **अभ्यानश्म** ऋ १०, ३१, ३; **अभि····अश्याः** ऋ ४, ५, ७; †**अभि····अश्याम्** ऋ १, १५४, ५; १६६,१४; ६,१३,६; मै ४, १२,१; **अभ्यश्याम** ऋ ७, ९३, ८; **अभि····आष्ट** तै १, ३, १४, ६[२i]; काठ १०, १३[j]; **अभि····आष्ट्र** शौ ४, १, ५[k]; पै ५, २, ४[l].

---

a) '**अति····अरुहत्**' इति शौ (१९, ४९, २) पाभे. ।

b) विमर्शसहं स्थ. द्र. [=जनिभी राजेव द्युभिस्त्वम् (अस्माकं स्तुतीरिव)विदुर् अभ्यवक्षेषि(=दिव अवेत्याऽस्मदभिमुखीभूयेहैव निवससि);तु.वें.'अभ्युपगच्छसि'इति; वैतु. सा.(मुपा.?) अभि√अव्>'**अभि····अव**'(=लोटि मपु१) इतीव पृथक् कुर्वाणः; ORN. सा. कल्पं कर्माश्रुतेरवगणयन् समानमप्योदत्तममपि सद् असत्-कल्पान्तरत्रयमपरमुपदर्शुकश्च ऋ १,७१,१०; ७, ६४, २ इत्यत्रत्यन्यायमनुसिसीर्षुरपि संस्तमन्याय्यमिवाऽऽभासुकश्च '**धु-**' इति दिनपर्यायीकृत्य **अव** >**उप** इति पा. परिवर्तुकश्च] ।

c) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

d) उप. कर्मणि शानच् प्र. । शेषं नापूटि. द्र. ।

e) गस.ल्युडन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

f) सस्व. नापूटि. दिशा द्र. । उप. ल्यप् प्र. ।

g) गस.क्यबन्त-कृत्-प्रस्व (पा ३,१,१०९;६,२,१३९)।

h) °**श्यानशे** इति (शौ ३, ७, ६) पाभे. ।

i) एकतरत्र तु. अनुपदमेव याज्यात्वेन श्रूयमाणं '**बुध्नाद् यो अग्रमभ्यार्ति**' इति यदनु यनि. √**१अश्** इत्यस्य योगेन कर्माकाङ्क्षापूर्त्तेरपरिहार्यत्वेनौचित्यदर्शनाद् '**अभि**' इति तद्युक्तः ग. इत्येव साधु द्र. [वैतु. भा. सा. K. च '**अभि**' इति कप्र. '**अग्रम्**' इत्येतदन्वित इति] ।

j) नापूटिदि. भा. प्रभृ. समानपक्षत्वेन '**अभि**' कप्र. इत्यातिष्ठमानः SIM. उपेक्ष्यः ।

k) आख्याते रेफोपजनः प्रामाणिकः द्र. [तु. मूको. पपा. च; वैतु. सा., WR., शाखान्तरीयः पाभे. च (=नापू. रू.)] । अभेर्गतित्वे एपूटि. एव प्रमाणं स्यात् । आलोच्यश्रुत्यभेदात् (वैतु. सा. W. चासौ कप्र. इति) ।

l) नापू. स्थ. आलोच्यविषयस्य साम्यं द्र. ।

१अभ्य(भि√१अ)स्, †अभ्यस्ति ऋ ४, २१, ७; ८, २४, १९; २१; कौ १, १८७; जै १, ४३, ७; ४, १७, ७; ९; शौ २०, ६५, १; ३; अभि···अस्ति ऋ ८, १, २७[a]; अभि···सन्ति ऋ ३, १६, २; अभ्यसि ऋ ६, २५, ५; †अभि···असि ऋ ८, ९९, ५; ९, ५९, ४; मा ३३, ६६; का ३२, ५, १२; कौ १, ३११; २, १८७; जै १, ३२, ९; शौ ११, १, ६; २०, १०५, १; पै १६, ८९, ६$; अभ्यस्मि ऋ ८, १००, ४; अभि[२]···अस्मि ऋ १०, ४८, ७; अभिष्मः ऋ ८, १०२, ३; ¶अभिस्मः मै १, १०, १८; काठ ३६, १३; अभ्यसत् ऋ १, १५६, २; २, २६, १; †अभ्यस्तु ऋ १, ९४, ८; २, ४, २; २८, १; ४, १२, १; ८, १, ३२; पै १२, १, ८; अभिसन्तु ऋ ७, १, १०; अभि···असानि शौ ६, ९७, १; अभि···असाम ऋ १०, ५३, ४; अभिष्यात् ऋ १०, ११७, ७; अभिष्युः ऋ १०, ९९, १५; अभिष्याः ऋ १०, ६९, ६; काठ २, १५; अभिष्याम् ऋ ७, १, १३; अभिष्याम ऋ १, १०५, १९; १७८, ५; २, ८, ६; ३, १, १६; ५, ४, १; ९, ३५, ३; १०, १३२, २; खि ५, ७, ३, १०; †तै १, ४, ४६, ३; मै १, ४, १४¶; ४, १२, ४†[b]; १३, ८†; काठ ७, १६†; १२, १४†; १९, १३; कौ १, ३३६; जै १, ३५, ५; शौ ७, ९८, १; १३, १, २२; †अभि···स्याम ऋ ७, ४८, २; ५६, २४; काठ २३, ११.

अभि···आस ऋ ४, २७, २.

¶२अभ्य(भि√२अ)स्, अभ्यस्येत् काठ २१, ७.

अभ्य(भि-अ)स्त- हस्त°

?अभ्यस्यनहमि[c] पै ३, २८, २.

?अभ्या[d] पै १, ८६, ७.

अभ्या(भि-आ)√क्रम्

अभ्या-क्रामम्[e] शौ १०, ७, ४२.

अभ्या(भि-आ)√गा, अभ्या(भि-आ) गात्‡[f] शौ ९, १५, ५; पै १६, ६८, ५.

अभ्या(भि-आ)√चर्

अभ्या-चार[g]- -रम् शौ १०, ३, २; पै १६, ६३, २.

अभ्या(भि-आ√अ)ज्, अभ्याजति खि ३, ७, १[h]; ¶अभ्याजन् मै १, ६, ३.

¶अभ्या(भि-आ)√तञ्च्, अभ्यातनक्ति तै २, ५, ३, ६.

¶अभ्या(भि-आ)√तन्, अभ्यातनुते तै ३, ४, ६, २; अभ्यातन्वत तै ३, ४, ६, १; २[२].

अभ्या-तान[g]- -नाः, -नान् तै ३, ४, ६, १; -नानाम् तै ३, ४, ६, ३; -नैः तै ३, ४, ६, २[३].

अभ्यातान-त्व- -त्वम् तै ३, ४, ६, २.

¶अभ्या(भि-आ)√२तु

अभ्या-दाव्य[i]- -व्यः, -व्येन मै १, ८, ९.

¶अभ्या(भि-आ)√द्रु, अभ्याद्रवति मै ४, ६, १[२].

अभ्या(भि-आ)√धा > दधा, ¶अभ्यादधाति मै ३, ४, ५; काठ २२, २; ६; क ३४, १; अभ्यादधामि?[j] मा २०, २४; का २२, २, १; ¶अभ्यादध्यात् तै २, २, १०, ५; ५, ८, ६.

अभि···आधित खि ५, ७, २, ८.

¶अभ्याधीयते मै १, ८, ७.

अभ्या (भि√आ)प् > अभी (भि√ई) प्स,

¶अभीप्स(त्>)न्ती- -न्तीः काठ २७, १; क ४२, १.

---

[a]) √१वा २वा दंसु(यद्र.) > १वा २वा दंसन-(यद्र.) > -ना (न.द्वि ३) इत्यत्र कर्म द्र. [वैतु. सा. कर्माकाङ्क्षापूर्त्यर्थं शत्रु-शब्दमाक्षिपँश्च 'दंसना' (तृ १) < √१दंस् इत्येवं वदंश्च; GW. चानुपसृष्टं क्विप. इति संगिरमाणोऽवशिष्टांऽशे सा. समानः]।

[b]) 'अचिष्याम' इति मुपा. ? (तु. ऋ १, १०५, १९)।

[c]) संदिग्ध-स्थलीयः पा. भवति संस्करणान्तरसापेक्षः।

[d]) मुपा. अभ्य् आ > अभ्या इति शोधः द्र.। [तु. मौलिकतरः मूको. (√मृड् इत्यस्य लक्षणार्थया 'नः' इति च विभक्त्या योगे सति निराकाङ्क्षत्वे स्वतः सिध्यमाने 'नः' इति द्वि. स्यात्। तद्योगार्हतया 'अभ्या' > 'अभ्या' इति मूको. प्रान्तीयः शोधश्चाऽऽस्थीयेत, मुपा. अभित्यस्याऽन्यथासिद्धत्वात्, आ√मृड् इत्यस्य निगमान्तराऽश्रुतपूर्वत्वादप्रमाणत्वाच्चेत्यभिसंधेः)]।

[e]) गस. णमुलन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९)।

[f]) 'अभि। आ। अगात्' इति ऋ (१, १६४, २७) पाभे.। तथात्वेऽभिः स्वाप्र. अभ्य. द्र.।

[g]) गस. घञन्ते कृति थाथादि-स्वरः (पा ६, २, १४४)।

[h]) 'अभ्यायति' इति मूको. पाभे.।

[i]) गस. ण्यदन्त-कृत्-प्रस्व. (पा ६, १, १८५; २, १३९)।

[j]) पपा. यद् अभेः स्वरः प्रादर्शि, तदतन्त्रं द्र. (तु. उ. PW. प्रभृ. 'अभि-आदधामि' इतीव निनीषवः)। यद्वा इभ+(√भी>) भी- (बस.) > अभि (न. द्वि १ =अभीरहं यथा स्यां तथेति कर्तृविशेषणपरम्परितं क्रिवि. स्यादिति विमर्शविषयतां भजेत)।

अभ्या(भि-आ)√पृ, अभि(*आपप्रिथ)[a] ऋ ३, १०, ११.

¶**अभ्या**(भि-आ)√प्लु

अभ्या-प्लवमान- -नात् काठ ७, ६; क ५, ५.

?अ···**भ्याम्**[b] पै १, ७६, ३.

अभ्या(भि-आ)√१यम्, ¶अभ्याय-च्छति मै २,१,८; काठ १०,११; २१,१; ¶अभ्यायच्छन्ति मै २, १,८: काठ १०, ११; ¶अभ्या-यच्छन् मै ४, ६, ८.

अभि···आयमत्‡[c] कौ १, १२८; जै १, १४, ४; अभि···आयमन् ऋ ८, ९२, ३१.

अभ्या(भि-आ)**यंसेन्य**[d]- -न्या ऋ १, ३४, १.

¶**अभ्या-युत्य**[e] मै ३, ८, ३; ४, २, १२.

अभ्या(भि-आ) √या, अभि···आ-याहि ऋ ५, ५१, ५[f]; अभि[२] (आयाहि) ऋ ५, ५१, ६; ७.

¶**अभ्या**(भि-आ)√यु, अभ्यायुवते मै ४, ५, ६.

अभ्यायुक- १अभी द्र.

अभ्यारम् अभ्यृ(भि√ऋ) द्र.

¶**अभ्या**(भि-आ)√रुध्, अभ्यारुणत् काठ २३, १०; क ३७, १.

¶**अभ्या** (भि-आ) √रुह् > रोहि, अभ्यारोहति तै २, ५, ५, ६; अभ्यारोहति तै २, ५, ५, ५; ५,६,६,४[२]; ८,३[२]; ६,२,३,३; मै १, ९,८; ३,३,९;४,६;६,१; ६; ८,१०; ४,‡३,१;४,९; १०; काठ ९, १५; २३, ३; शौ ३, २९, ३$; अभि···आरोहति तै १, ५, ९,५; अभि[२]···आरो-हति मै १, ९, ८; काठ ९, १५; अभ्यारोहन्ति तै ७, २, १, १; ३, ५, २; ३; ७,‡३; ४; ९, २; ३[२]; १०, ३; ४, १, २[२]; ५; ३, ५; ४, २[२]; ३; ५, ३.

अभ्यारोक्ष्यति मै ३, ४, ६.

अभ्यारोहयति काठ २४, ६; २६, ४; २७, ६; क ३७, ७; ४१, २; ४२, ६.

अभ्या-रुह्य[e] तै ७, ४, ४, १.

अभ्या-रूढ[g]- -ढः तै १, ५, ९, ५; २, ५, ५, ६; ७, ४, ५, १. [°ढ-अन्°]

अभ्या-रोह- अन्°

अभ्या-रोहत्[h]- -हन् मै ४, ४, ४; -हन्तः तै ७, ५, १, ६; काठ ३३,७[२]; ८; $शौ ४, १४, ६φ[i]; -हन्तम् काठ २४, ६.

अभ्या-रोढु(क>)**का**[j]- -का मै ३, ८, ७; १०.

अभ्या(भि-आ)√वह्

अभ्या-वोढृ- -ढा पै ८, ११, २.

अभ्या(भि-आ)√वृत्>वर्ति, अभ्या-वर्तते,अभ्यावर्तते मै ३, २, १¶; अभ्यावर्ते शौ १०, ५,३८-४१; अभ्यावर्तस्व तै ४, २, ७,१; मै २, ७, १४; काठ १६, १४; क २५,५; शौ ७,११०,१; ११,१, २२; पै १५, २,६; १६,१०,९; अभि···आवर्तस्व[k] तै ४,२,१, २; मै १, ७, १; अभ्यावर्तध्वम् तै ५, ७, ४, ४; ¶अभ्यावर्तन्त मै ३, २, ४.

अभि···आ(आ-अ)वर्त् ऋ ७, ५९, ४.

अभ्याववृत्स्व तै ४, २, ५, ६[l]; मै २, ७, १२; काठ १६, १२; क २५, ३; शौ ३, १७, ९.

---

[a]) 'नः (=अस्मान्) इषश्च वाजांश्चाभ्यापप्रिथ' इति स्वारसिकं वा. अनभिरोचयन् 'अस्माकं समीके त्वम् इषः (=निष्ठासुः ?) सन् वाजान् (=अश्वान् ?) अभिप्रेरय' इत्येवमप्रसिद्धं चाऽसमर्थं च वा. ब्रुवाणः सा. चिन्त्यः ।

[b]) त्रुटितमध्यशरीरं पदं भवति ।

[c]) बाहुचस्य पाभे. कृते तु. नाउ. रू. ।

[d]) गस. उप. एन्यः प्र. सकारोपजनः कृत्-प्रस्व. च (तु. पाउ ३, ९८; ६, २, १३९) ।

[e]) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[f]) तिसृष्वप्यृक्षु गायत्रीमानादतिरिच्यमाने'अभि।प्रयः' इति पदे मन्त्रगतार्थस्यानुवादकतया च तत्परिणतार्थ-तया च देवताप्रेरणात्मकेऽर्थे पर्यवस्यतः । अतः 'अभ्या-याहि' 'अभ्यागच्छतम्' इत्याद्याकारकोऽन्वयो द्र. । सम-न्यामृचि 'प्रयः' इति कर्मपदं कर्तृविशेषणतया नियुञ्जानो 'यन्ति' इति क्रियया चाऽभेयोगं पश्यन् सा.नितरामुपेक्ष्यः ।

[g]) सस्व. कृते तु. टि. अभिनिषण्ण- ।

[h]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

[i]) 'नाकम् (=दिवम्) अभ्यारोहेम ततश्च सुकृतलोक-भूतं स्वर् गच्छेम' वा.द्र.(तु.एपू.मन्त्रो यत्र दिवो नाकस्य पृष्ठात् [=पृष्ठं प्राप्य] स्वर्गमनं साक्षाच्छ्रावितं भवति; वैतु. सा. 'स्वर्' इत्यस्य 'नाकम्' इत्यनेन सामाना-धिकरण्यं दर्शुकः; PW. प्रभृ. च अभिः कप्र. इति कृत्वा 'नाकम्' इत्यनेनैनमभिसंबन्धुकाः) ।

[j]) गस.उकञन्त-कृत्-प्रस्व. (पा ६,१,१९७;२,१३९)।

[k]) अभिः कप्र. अभिलक्षणार्थ इति यथा सा. आह, तथ । तथा सत्य् आभिमुख्यविशिष्टाऽऽवर्तन-स्याऽऽशंसनविषयत्वे घटकतया सहश्रुतिमतः 'अभ्या-वर्तिन्-' इत्यस्य वि. वैयर्थ्याऽऽपत्तेरिति यावत् ।

[l]) पपा. स्वरसंबी शाखाभेदो भवति [तु. टि. २अभि (मा १२, ७०)] ।

¶अभ्यावर्तयन्ति मै ३, २, ५; काठ ८, ५[२]; क ७, १[२]; अभ्यावर्तये[a] पै १६, १३२, २.

अभ्या-वर्तिन्[b]- -०र्तिन् मा १२, ७; का १३, १, ८; तै ४, २, १, २; मै १, ७, १; २, ७, ८; काठ १६, ८; १९, ११; २२, १२; क ३१, १; पै १, ४१, १; -र्तिने ऋ ६, २७, ५; -र्ती ऋ ६, २७, ८.

अभ्या-वृत्त[c]- -त्तः मा ८, ५८; का ९, ७, ७; काठ ३४, १६.

¶अभ्या-वृत्य[d] तै ६,२,५,५[२]; काठ ८, ४[२]; २३, ५[२]; क ६, २.

¶अभ्या(भि-आ)√शंस्, अभ्याशंसेत काठ ११, २.

अभ्या(भि-आ)√सृ

अभ्या-सरि(न्>)णी- -णीः काठ २५, ५.

¶अभ्या(भि-आ)√स्था>तिष्ठ, अभ्यातिष्ठति मै १, ११, ७[२]; ४, ४,५; काठ ८, ८; १४, ७; २३, ९; क ७, २; ३६, ६.

¶अभ्या(भि-आ)√ह्वे, अभ्याहुयते तै ३, २, ९, १; ४; ७.

¶अभ्यु(भि√उ)च्, अभ्युच्यति मै १, ८, ९; अभि···उच्यति तै २, २, २, ५[२].

¶अभ्यु(भि-उद्>)त्√क्रम्, अभ्युत्क्रामति काठ ६, ४; ८, ७; क ४, ३; ७, ४; अभ्युदक्रामन् काठ ८, ७[४]; क ७, ४[४].

अभ्युत्था (भि-उद्√स्था) >तिष्ठ, अभ्युत्तिष्ठति काठ ३४,९¶; अभ्युदतिष्ठत् शौ १५,८,२; अभ्युदतिष्ठन् काठ ३४, ९¶.

अभ्यु(भि-उद्>)त्√ सद् > सीद, सादि, अभ्युत्सीदति मै १, ७, २; ३[२].

*अभ्युत्-सादया[e]-

*अभ्युत्सादयां √कृ[f], अभ्युत्सादयामकः मै १, ६, ५.

¶अभ्यु(भि-उद्>)त्√सृज्, अभ्युत्सर्जेत् तै ६, २, ९, १. अभ्युत्सृजति काठ २०, ३[२]; क ३१, ५[२].

अभ्युदि(भि-उद्√इ), ¶अभ्युदेति मै १, ८,९; २, २,१३; ४, १,९; अभ्युदिहि शौ ३,२०,१०;१७, १, ६; ७; ¶अभ्युदेत् मै २, ५, ३; ¶अभ्युदियात् मै १, ८,७[२]; ९[३]; २, २, १३; ¶अभ्युदियात् मै ३, ६, ९; काठ २३, २; क ३५, ८.

अभ्यु(भि-उ)दित- अन्°, सूर्य°

अभ्युदे(भि-उद्-आ√इ), ¶अभ्युदैति मै ३, ९, १.

अभ्युदे(दा-इ)त्य[d] शौ १५, ११,२; १२, २.

अभ्यु(भि-उ)द् √वस् > वासि, अभ्युदवीवसः मै १, ८, ४.

¶अभ्युद्धृ(भि-उद्√हृ), अभ्युद्धरन्ति मै १, ८, ८; अभ्युद्धरेयुः तै २, २,४,६; अभ्युद्धरेयुः मै १,८,८.

अभ्यु(भि√उ)द्,न्द्, अभि···उनत्त ऋ ५, ४२, ३.

अभ्यु(भि-उ)त्स[g]-

*अभ्युत्सि(न्>)नी[h]- -नी पै १२, ३, ५.

†अभ्यु(भि-उ)न्दत्[i]- -न्दतः[j] ऋ ९, ६१,४; कौ २,१३७; जै ३, १३, १३.

¶अभ्यु(भि-उ)प√क्रम्, अभ्युपक्रामति मै ३, ९, ७.

¶अभ्यु(भि-उ)प√धाव्, अभ्युपधावेम मै १, ७, २; काठ ८, १५; क ८, ३.

¶अभ्युपा(भि-उप-आ)√कृ, अभ्युपाकुर्यात्, अभ्युपाकुर्यात् मै४,८,८.

अभ्युपा(भि-उप-अ)व√हृ, अभ्युपावहरामि मा १०, २५.

¶अभ्युपा(भि-उप-आ)वृत्, अभ्युपावर्तते मै १, ४, ७; अभ्युपावर्तेमहि मै १, ७, २.

---

a) 'त्वमभ्यावर्तये' इति मौलिकस्य मकारस्य च्युतस्य सतः पुनः पा. शोधः द्र.।

b) गस. णिन्यन्त-कृत्-प्रस्व. (पा ६, २,१३९)।

c) कर्मणि क्तेऽनन्तरगति-स्वरः (पा ६, २, ४९)।

d) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

e) गस. ण्यन्तात् स्त्रियां भावे शः प्र. उसं. [पा ३,३, १०७ ('णेः शश्च' इत्यभिनवं शिष्येतेत्यभिसंधिः) तु. नाउ. टि.]। कृत्-प्रस्व. (पा ६, २, १३९)।

f) गस. उसं. [नापू. समाननिष्पत्तिकस्य शब्दजातस्य परिग्रहार्थमभिनवगतिसंज्ञाविधानार्थं च 'अभ्युत्सादयादयश्च द्वितीयान्ता विभक्तेरलुक् च' इति 'ते प्राग् धातोः' (पा १, ४, ८०) इत्यतः प्रागनुशिष्यमित्यभिसंधिः]। किमिति प्रागभिमतं निपातनम् (पा ३,१, ४२) नोक्तमिति। यनि. लक्षणासंभवादिति। एस्थि. अपि 'आम्' इत्यस्य कृञनुप्रयोगस्य चैव लिटोऽन्यत्र उसं. स्यादित्येवं किमिति नोक्तं भवतीति। लाघवात् यनि. एव मौस्थि. नेदीय इव स्पर्शुकं स्यादिति दिङ्मात्रम् (तु. टि. √गम् >गमि >*गमया √कृ)।

g) कर्तरि सः प्र. (तु. पाउ ३, ६९)।

h) मत्वर्थीयः इनिः प्र.। ततश्च स्त्री. ङीप् (पा ५,२, ११५; ४,१,६)। एवं सति विगतसंदेहं स्थलं स्यात्।

i) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

j) विभक्तिरुदात्ता (पा ६, १, १७३)।

†अभ्युपे(भि-उप√इ), अभि···उपयन्ति ऋ ६, २८,४; काठ १३, १६; शौ ४, २१, ४[a].

अभ्युप्य अभि√वप् द्र.

¶अभ्यु(भि√उ)ष्

अभ्युषस्(>:)[b] काठ २६, १; क ४०, ४.

अभ्यूढ- अभि√वह् द्र.

अभ्यू(भि√ऊ)र्णु, अभ्यूर्णुते शौ १४, १,२७‡[c]; अभ्यूर्णोति ऋ ८,७९, २; अभि···ऊर्णोमि शौ १८,२, ५२; †अभि···ऊर्णुहि ऋ १०, १८, ११; शौ १८, २, ५०; ५१; ३, ५०; ४, ६६.

अभ्यूर्ण्वा(न>)ना[d]- -ना ऋ ५, ४१, १९.

¶अभ्यू(भि√१ऊ)ह्[e], अभ्यूहति तै ५,२,३,७[2]; मै ३, ४,५[3]; ७,४; ४, १, ९; काठ २२, २[3]; ३१, ७; क ४७, ७; अभ्यूहति मै ३, ७, ४[2]; काठ २०, १; क ३१, ३; अभ्यौहताम् काठ ३६, १०.

अभ्यृ(भि√ऋ>√*अर्), अभ्यर्ति तै २, ३, १४, ६; पै ५, २, ८. †अभि···ऋणोति ऋ १,३५,९; मा ३४, २५; का ३३, १, १९; अभ्यृणोः पै १३, १, १५. अभ्य॑रुः ऋ ३, १, ४.

†अभ्यारम्[f] ऋ ८, ७२, ११; खि २, १३, १; कौ २, ९५३.

¶अभ्यृ(भि- २ऋ)ति- √अभ्यृतीय, अभ्यार्तीयत काठ १०, ११.

अभ्यृ(भि√ऋ)ञ्ज्, अभि···ऋज्यते ऋ १, १४०, २.

अभ्ये(भि-आ√इ), अभ्यैति खि ३, २१,१; मा १७, ४७[g]; का १८, ४, १५; ¶काठ २४, ६; २८, ४[h]; ३२,२; ¶क ३७,७; ४४, ४; पै ३, ५, ६; अभि···एति शौ ३, २, ६; अभ्येमि शौ ६, ११८, ३; पै १६, ५०, ५; अभ्येहि शौ ८, २, २; पै १६, ३, २; अभि···एहि पै २, २३, १.

?¶अभ्योपदधाति[i] काठ २०, ७; क ३१, ९.

अभ्र- √*अप् >२अप्- द्र.

अ-भ्रातृ[j]- -तरः ऋ ४, ५,५; शौ १, १७, १; -ता ऋ १, १२४, ७.

१अ-भ्रातृव्य,व्या[j]- -†व्यः ऋ८,२१, १३; कौ १,३९९; २, ७३९; जै १, ४५, १; शौ २०, ११४,१; -¶व्याः काठ २१,२; क३१,१७.

¶२अ-भ्रातृव्य[k]- -व्यः तै २, ४, २, ४; मै १, २, १०.

*अ-भ्रातृहन्-

अभ्रातृघ्नी[l]- -घ्नीम् शौ १४,१, ६२.

अभ्रि[m]- -भ्रिः मा ११,१०; का १२,

---

[a]) वेतु. सा. अभिः कप्र. इति कृत्वाऽपार्थम् उप+√इ इत्यस्य दुष्पूरकर्मसाकाङ्क्ष्यमुत्पादुकः।

[b]) गस. कसुअन्त-कृत्-प्रस्व. (पा ६,१,१९७;२,१३९)।

[c]) 'अभिधित्सते' इति ऋ (१०, ८५, ३०) पामे.।

[d]) गस. शानजन्त-कृत्-प्रस्व. (पा ६,१,१६३;२,१३९)।

[e]) रू. द्विविधः स्वरः श्रूयते। यदा गत्यंशे स्वरो निहतश्च तिङ् भवति, तदा 'उदात्त-' (पा ८, २,४) इति स्वरितो भवति। यदा चाऽनिहतत्वात् तिङो गत्यंशे निघातः (पा ८, १, ७१), तदा त्वनुदात्तयण उत्तरः स्वरस्तदवस्थ एव भवतीति।

[f]) गस. णमुलन्त-कृत-प्रस्व. (पा ६,१,१९३;२,१३९)। यत्तु आर- इत्यनेन विभक्त्यर्थ इवाऽव्ययीभाव इतीवाऽभिप्रेतः PW. MW. च, तन्मन्दम्। तथा सत्यन्तोदात्तस्य (पा ६, १, २२३) दुर्वारत्वप्रसङ्गात्।

[g]) 'अभि। आ। एति' इति पपा. चिन्त्यः। यद्योगीयनिघाताऽभाववति तिङि गतिद्वन्द्वनिघातस्य न्याय्यत्वात् (पा ८, १, ७१)। 'अभि' इति 'मः' इत्येतदन्वितः कप्र. अप्यभ्युपगतश्चेत् स्यात्तदप्य् 'आ' इत्यस्याऽन्वयान्तराभावाद्वरं तेन निघातेन भाव्यम् (तु. पपा. शौ ३,२,६)।

[h]) 'अभ्येति' इति मुपा. मु-शोधः द्र. (तु. संटि. क ४४, ४)।

[i]) यनि. रूपमवास्तविकं संभाव्यते। काठ. च क. च पा. संस्करणान्तरसापेक्षतयोपलम्भात्। तथाहि। काठ. संस्कर्तुः यस्थ. टि. 'कर्मण्यभ्योप°' इति 'कर्मण्यस्वाप°' इति च क. मूको. पा. इत्युक्तं भवति। तेनैतत् संभाव्यते यदत्र मूलतः 'कर्मण्यस्वाप्योप°' इत्येवं सतः पा. उभयत्र वैकृतमुक्तस्वरं समजनीति। क. मूको. पा. यत् संस्कर्त्रा न प्रादर्शि, काठ. पा. एव च तत्रस्थं टि. अप्यनवलोकयता स्वकीये संस्करणे संन्यवेशि, तद् रुचिरेतरं भवतीति दिक्।

[j]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[k]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[l]) सस्व. नापू द्र.। स्त्रियां ङीप् प्र., हन उपधालोपश्च (पा ४, १, ४; ६, ४, ९८)।

[m]) व्यु.?। (√*घृ>) *घ्रा- >घ्राम्+*भ्रि- (कर्तरि वा करणे वा <√*भृ) कस्यचित् पृथिव्यादेः पदार्थस्य शरीर आत्मानं प्रवेश्य तदीयस्य प्रच्छिद्यमानस्यांशस्य भर्त्री भरणसाधनभूता वेति कृत्वा खनित्रकविशेषसंज्ञा [*घ्राम्भ्रि- (उस. कृत्-प्रस्व.) >*हम्भ्रि- >*अम्भ्रि- >यनि. (तु. पंजा. (ह्)रम्बा-; हिं. खुर्पि- इति

१, १०; तै १, ३, १, १; ४, १, १, ३; ५, १, १, ४¶; ६, २, १०, १²¶; मै १, २, १०; २, ७, १; ३, १, २¶; ८, ८²; ¶; ४, ९, १; काठ १६, १; –भ्रिभिः शौ १०, ४, १४; पै ५, ९, २; १६, १६, ४; –भ्रिम् मा ११, ११; का १२, १, ११; तै ४, १, १, ४; ५, १, १, ४¶; ६, २, १०, १; मै २, ७, १; ¶३, १, २; ४; ¶काठ १६, १$; १९, १; २५, ९; १०; २६, ५; ¶क २९, ८; ४०, २; ३; ४१, ३. [°भ्रि- अन्°]

?अभ्रिया[a] पै ९, ३, ३.

अँभ्रि-खा(त>)ता[b]– -०ते शौ ४, ७, ५; ६[c]; पै २, १, ४; ५; ४, २१, २. [°ता- अन्°]

√अभ्रि, १अभ्रियु-, २अभ्रिय- √*अप्>२अप्- >अभ्र- द्र.

१अभ्व[d]– -भ्वः ऋ १, ३९, ८; –भ्वम् ऋ १, २४, ६; ९२, ५; १४०, ५; १६८, ९; १६९, ३; २, ४, ५; ३३, १०; ४, ५१, ९; ५, ४९, ५; ६, ४, ३; ७१, ५; –भ्वा° ऋ १, ६३, १; –¦भ्वात् ऋ १, १८५, २–८; मै ४, १४, ७².

२अभ्व[f]– -भ्वम् शौ ४, १७, ५; ७, २४, १; १३, ६, ४; पै ५, २३, ७.

√१अम्, अमीष्व तै २, ३, ५, १. आमीव् तै २, ३, ५, १. [अभि° सम्°]

१अम[g]– -मः ऋ ५, ५६, ३; ६, ६१, ८; ८, ९३, १४; मा १८, ४[h]; का १९, २, ४; तै ४, ७, २, १; मै २, ११, २; काठ १८, ७; क २८, ७; शौ १३, ८, ५; –मम् ऋ १, ६६, ४; –¦मात् ऋ ५, ५९, २; ८, १२, २४[i]; कौ २, ४६७; जै ३, ३४, २; –माय ऋ ८, २०, ६; –मे ऋ १, ६३, १; ६७, २; ४, १७, ७; ८, ५३, ८; खि ३, ५, ८; –मेन ऋ ४, २२, ३; ९, ९०, ६; –मेभिः ऋ ७, ३४, १९; –¦मैः ऋ ८, ७५, १०; तै २, ६, ११, २; मै ४, ११, ६; काठ ७, १७; कौ १, ११; २, ९९८; जै १, २, १. [°म- स्तनयत्°]

¦अम-वत्[j]– -वत् ऋ १, ५२, ९; ४, ५५, ४; ५, ३४, ९; ५८, १; ८६, ३; ८, ७५, १२; तै २, ६, ११, ३; मै ४, ११, ६; –वत्सु ऋ ६, ६६, ६; –वन्तः ऋ १, ३६, २०; ३८, ७; ८, २०, ७; जै ४, ८, ६; –वान् ऋ १, ५२, १०; ४, ४, १; ५, ८७, ५; १०, ११, ७; मा १३, ९; का १४, १, ९; तै १, २, १४, १; मै २, ७, १५; काठ १६, १५; क २५, ६; शौ १८, १, २४:

अमवती[k]– -ती ऋ १, १६८, ७.

अमवत्-तर[l]– -रेभ्यः ऋ १०, ७६, ५.

१अमति[m]– -तिः ऋ १, ६४, ९; ७३, २; खि ३, २२, ४; मा ४, २५;

साजात्यसंकेतदिङ्मात्रम्; वैतु. भा. तै (१, ३, १, १) √अभ्+इन् प्र.इति च, २अप्-+√१भृ+इः प्र.इति च)]।

[a]) 'अभ्रिया। अखनम्' इति पद-विभागोऽत्र भवतीति कृत्वा तादृशो निर्देश एवेहाऽकारि। तत्-साधुता तावत् परीक्षकाणां दिष्टिमनुसरेत्।

[b]) तृतस. उप. कर्मणि क्ते पूपप्रस्व. (पा ६, २, ४८)।

[c]) इह सा. '-षाते' इति यत् पठन्निव प्रादर्शि, तन् मूर्धन्यकण्ठ्ययोरुच्चारणसांकर्येण व्यामोहितस्य लिपिकृत एव प्रमाद इति संभाव्यते।

[d]) व्यु.?। भावार्थप्राधान्ये सति *१आ-भू- (प्रास. वा बस. वा)>*१आभूक->*१अभूभ->यनि.इत्येवमाद्या-न्त्योपान्त्यवर्णातत्तत्परिणामाः नैप्र. द्र. (प्रकृतिसंवादार्थं तु. वे १, १२; ३, ३; सा. यस्थ.; PW. प्रभृ.)। न. वृत्तोपलब्धिः द्र. (तु. एउदि.)।

[e]) यद् 'अभ्वाः' इति PW. GW. आहतुः, तन्न (तु. ORN.)।

[f]) कर्त्रर्थपरत्वेन भापू. भेदे सति *२आ-भू- (गस.) >*२आभूक->*२अभूभ->यनि.इत्युदात्तयणोऽनुदात्त-स्वरितपर्यवसाना नैप्र. द्र.।

[g]) अप् प्र. डसं. (पा ३, ३, ५८)। प्र.पित्त्वाभिघाते धास्व.।

[h]) म. ६अ+कर्मणि *२म- (<√१मा) इति कृत्वा तस. नञ्-स्वर इति [पा ६, २, २ तु. सा. तै (७, ४, २, १)]। एस्थि. वा. 'माम-' इत्यस्य वि. एवैतद् न 'अम्मः' इत्येतत्-सकक्षं सत् तद्वत् कर्तृपदमिति यद-भिप्रेतं भवति, तन् मन्त्रपदस्वारस्यविघातप्रसङ्गाच्चिन्त्यम्।

[i]) सा. √?२अम् इत्यतो निष्पत्तिमाह।

[j]) म(>व) तुपः पित्त्वाभिघाते स्वरः पूर्वाऽवस्थः।

[k]) ङीपः (पा ४, १, ६) पित्त्वाभिघाते स्वरेऽभेदः।

[l]) तरपः पित्त्वाभिघाते स्वरेऽभेदः।

[m]) पाप्र. अतिः प्र. (पाउ ४, ६१), तत्-स्वरश्च [वैतु. या ६, १२ (मुपा. तदुपरि स्क. च दु. च दे. च विकल्पेन तति- इत्यपि उप. अभिप्रेतमित्युपकल्पयमानाः द्रु-कोषाः द्र.) <*अमा-मति- वा <*आत्म-मति- वा; म. (मा ४, २५) ६अ+मति- (<√१मा); RJ ३१९ ६अ+मति- (बस.)]।

का ४, ८, ३; तै १, २, ६, १; मै १, २, ५; काठ २, ६; क १, १९; कौ १, ४६४; जै १, ४८, ५; शौ ७, १५, २; पै १६, १४४, २; –तिम् ऋ ३, ३८, ८; ५, ४५, २; ६२, ५; ६९, १; ७, ३८, १; २; ४५, ३. [°ति- हत°]

†१अमत्र[a]– -त्रः ऋ १, ६१, ९; ३, ३६, ४; तै २, ४, १४, २; मै ४, १२, २; काठ ८, १७; शौ २०, ३५, ९; –त्रम् ऋ ४, २३, ६.

†२अमत्र[b]– -त्रम् ऋ १०, २९, ७; शौ २०, ७६, ७; –त्रे ऋ ५, ५१, ४; त्रेभिः ऋ २, १४, १; ६, ४२, २; कौ २, ७९१.

अमत्रि॑न्[c]– -०त्रिन् ऋ ६, २४, ९.

अममान- सम्°

*अमस्[d]-

अमस्-व(र>)री[e]– -०रीः मै २, ४, ७; ८.

√?२अम्[f]

√*३अम् २अमत्र- टि. द्र.

*१,२अम्- ?२अम-, अमिन-, अम्भस्-, अम्भृण- टि. द्र.

१अम- √१अम् द्र.

?२अम[g]-

अमा ऋ [१, १२४, १२; ६, ६४, ६]; २, ३६, ३; ३८. ६; ६, २४, १०; ५१, १५; १०, २७, २; ६३, १६; १२८, ६; १८५,

---

[a]) अत्रन् प्र. नित्स्वरश्च (पाउ ३, १०५; पा ६, १, १९७)। मौस्थि. त्व् अम- +*त्र-(<√त्रा) इति कृत्वा बस. पूपप्रस्व. इतीव संभाव्येत [तु. WW १, १७८; वैतु. या ६, २३ (तु. दे ४, ३) अमात्रतया व्यु. विकल्पयंश्चिन्त्यः, 'अविद्यमाना मात्रा यस्य' इति कृत्वा बस. अन्तोदात्तप्रसङ्गात् (पा ६, २, १७२) इत्यभिसंधेः; RJ ३११, २अमत्र- इत्यतोऽपि लिङ्ग-भेदनिप्रवृत्तिवैशिष्ट्यमात्रतयाऽपि विकल्पेन निर्भुवाणश्च]।

[b]) व्यु.?। आ+*मत्र- इति कृत्वा बस. (पावा २, २, २४) पूपप्रस्व. स्यात् पूप. नैप्र. ह्रस्वत्वञ्च। *मत्र- इति पुनः सेचनार्थात् √*मर् इत्यतो वा √मद् इत्यतो वा कर्मणि त्रनि प्र. द्र. (*मर्त्र- इत्यत्र वा *मत्त्र- इत्यत्र वा नैप्र. संयोगादेर् हलो लोप इत्यभिसंधिः)। अथ *४अ-म- +१अत्र- (<√अद् यद्र.) इति बस. पूपप्रस्व. इतीव कृत्वा शकन्ध्वादित्वपरः या ५, १ द्र. [=अमानां मानमकुर्वताम् (६अ+कर्तरि *३म- [<√१मा] इति कृत्वा तस. नञ्-स्वर इत्यभि-संधिः। 'अनिर्मितं भवति' इति यदुक्तं भवति तत् एस्थि. पर्यायान्तरेण व्याख्यानमात्रं स्यान् न वैयाकरणं प्रदर्शनम् (=अमा अमिन्वन्तः सन्तो येऽद्युस्तेऽनिर्मितम् अनिःशिष्टमानं यथा स्यात् तथैवाऽद्युः। स्थिरपीतानां सतां शरावादिलघुपात्रमानैरतृप्यतां घटादिबृहत्पात्रसंलग्न-मुखत्वपरजनोक्तिप्रसिद्धेरिति यावत्); वैतु. GW. मौस्थि. अमात्र- (यद्र.) इत्येतेन योजयन् नैप्र. तत एव निष्पादुकः; WW १, ५२, √*३अम् इत्यतो धारणार्थविशिष्टवृत्तेः प्रसाधुकश्च]।

[c]) मत्वर्थे इनिः प्र. तत्स्वरश्च।

[d]) असुन् प्र. नित्स्वरश्च। नाउ. व्यु. औपयिको निर्देशः द्र.।

[e]) मत्वर्थे क्वरप् प्र. उसं., स्त्री. ङीपः पित्स्वाभिघाते स्वरस्तदवस्थ इत्येवं सुवचं द्र. (पावा ५, २, १०९; पा ४, १, १५)। वनन्ताद् रादेशे गौरवादित्यभिसंधेः।

[f]) संदिग्धसत्त्वोऽयं धा. द्र. [तु. यस्था. टि. आम-> √*१आमि (यत्रैवैतदीयतयाऽभिप्रेयमाणानि रू. अपि द्र.); वैतु. पाधा. चु.]।

[g]) नाउ. व्यु. औपयिकतयोपकल्प्यत्वे सिद्धेऽपि स्वरू-पतः संदिग्धनिर्देशं प्राति. द्र.। कः संदेह इति। '*अम्-' इति स्यात् यनि. वेति। कथमिति। 'अमा' इति रू. हि द्वयोरर्थप्रवृत्त्योः स्थानं भवति। सामीप्यसा-युज्यप्रकारिकैका च गृहाभिप्रायिकाऽपरा च। ततः प्रथमां प्रवृत्तिमभिलक्ष्य '*सम्-(>सम् इति क्रिवि. इति कृत्वा न. द्वि१ इत्युच्यमानं यद्र.)>*हम्->*अम्->अमा (=तृ१ तु. पार. 'हमा') इत्युच्येत (यतु. सम<>सम् इति सानाभ्यप्रकारविवेकः)। अथ द्वितीयां प्रवृत्तिमादाय *घर्म- (तु. ग्राम-)>*हर्म- (तु. हर्म्य-)>हम्म->*हम- (तु. जल्प->*जप्प->जप-; eng. 'home')>यनि.>अमा (=तृ१ क्रिवि. वृत्तेः स्वरप्रक्रमः) इत्युच्येत। '?अमात्'(यद्र.) इत्यपि संदेहविषयतामुपैति। कथमिति। एकं पदमित्येवं विप्रतिपत्त्यन्तरे सत्यपि पपा. प्रभृ. सर्वैर्दृष्टत्वाच्च प्रकरणा-ऽनुसंधानतस्तु 'अमा। आत्' इत्येवं द्वैपद्यस्य सुविभजत्वौ-चित्याच्च। तथाहि। प्रथमे निगमे ऋ (५, ५३, ८) मरुतां संभूय [=यथा न तेषां कश्चनापि परावतोऽवतिष्ठते (तु. तृतीयः पादः)] दिवश्चाऽन्तरिक्षाच्च सपद्य् आयानमाशं-सितं भवति (=सामीप्यजुषां सतामायानाऽऽशंसनस्याऽनव-सरप्राप्तत्वाभिसंधिः)। द्वितीयेऽपि स्थ. ऋ (९, ९७, ८) हंसानां संभूयैवाऽस्तम् (=सोमगृहम्) प्रति प्रयाणम् (तत्र प्राप्य च) साकं सोमं प्रति प्रवदनं श्रावितं भवति (=गृहाद् गृहगमनस्याऽविस्पष्टतात्पर्यकत्वाभिसंधिश्च निगमस्य गृहाऽर्थत्वाभ्युपगमे सत्युत्तरार्धे 'साकम्' इत्यस्य क्रिवि. पुष्टिलाघवाऽभिसंधिश्च [वैतु. सा. १अम- इत्यस्य रू. इत्यसंगतवचनश्चाऽवमतस्वरसंस्कारश्च, PW. प्रभृ. गपू.

२; मा ३, ३२†; २६, २४; का ३, ३, २४†; तै २, ५, ३, ६; ४, ७, १४, ३†; ६, १, ९, ३¶; मै १,५,४†; काठ ७,२†; १०[२]¶; ४०, १०†; क ५, २†; ९[२]¶; शौ ४, १८, ३; ५, ३, २†; ११, ७,१५; १२, ४,३८; ५३; २०, १२७, ५[२]; पै ५, ४,२†; २४,३; १६, १५४, ५.

अमा-जुर्[a]– -जुरः ऋ ८,२१,१५; १०,३९,३; –जूः ऋ २,१७,७.

अमा-त्य[b]– -त्यः मा ५,२३; का ५, ६,२; तै १,२, ६, १; ६, १, ९, ३; -†त्यम् ऋ ७, १५, ३; कौ २, ७३१.

*अमा-मति– १अमति- टि. द्र.

¶अमा-वस्या[c]– -स्या काठ ७, ५; १०; ९, १३[२]; १४; १०, ५[२]; १२, ८; ३९, ८; क ५, ४; ९; पै १, १०३, ४$; –स्याम् काठ ६, ६; १०, ५[२]; ११, ३[२]; क ४,५; पै १,१०३,१$;–स्यायाः काठ १२, ८; –स्यायाम् काठ ८, १[२]; १०; ९, १४; १०, ५; ३१, १५; ३३,७; क ६, ६[२].

अमा-वास्या[c]– -¶स्यया तै ७, ५, ६,१[२]; –स्या ¶तै १, ६, ९,१; २, ५, ४, १; ३, ४, ९, ६; ५, १, ४[२]; ¶मै १, ४, १५; ६,९[२]; ९,५; ४, ३,५; शौ ७, ८४,२; १५, २, १४; १६, ३; –स्याम् ¶तै १, ६, ९,१;२; २, २, २, १[२]; ५, ४[२]; ५, ३,६; ४,३; ६, ४; ¶मै १,६,१०; २,२,१३:४, २,१२; शौ १,१६,१;१५,१७, ९; पै १, १०, ३; –¶स्यायाः तै २, ५, ३, ७; ३, ५, १, ३; मै ४, ३,५; –¶स्यायाम् तै १, ६,७,२; २,३, ५,३; ५, २,५[२]; ३, १; २; ४, १; ५, ४[२]; ५; ६, ४; ६; ६, ३, ३; ७, १,४, ३; ५, ७, १; मै १, ४, ५; ६, ९[२]; २, २, ७[२]; ३, ६, १०; –स्यायै शौ ७, ८४, ३; –स्ये शौ ४, ३६, ३; –०स्ये तै ३, ५, १,१¶; शौ ७, ८४,१;४‡[d].

¶अमावास्य-त्व[e]– -त्वम् तै २, ५, ३, ७.

अमे(मा-२इ)ष्टु[f]– -ष्टम् मा १०, २०; का ११, ६, ६.

अमो(मा-उ)त[g]– -तम् मै ४, ५, ७¶; शौ ९,५,१४; १२,३, ५१; पै १६, ९८, ४.

३अम[h]– -मः काठ ३५, १८[२]; क ४८, १६[२]; शौ १४, २, ७१.

*४अ-म- २अमत्र- टि. द्र.

अ-मज्जक[i]– -काय तै ७, ५, १२, २; काठ ४५, ३.

अ-मणि[j]– -णिः खि ५, १३, १; शौ २०, १२८, ६.

उभौ निगमौ <३अम- द्र. (तु. यस्था. टि.)]।

[a]) उस. उप. √जॄ>जुर्+क्विप् प्र.। कृत्-प्रस्व. (पा ६, २, १३९)।

[b]) त्यपः (पा ४,२,१०४) पित्त्वाभिघाते स्वरेऽभेदः।

[c]) उस. उप.√१वस्+ण्यत् प्र. वृद्धिभावाऽभावौ च द्र.। कृत्-प्रस्व.(पा ३,१,१२२; ६,१,१८५;२,१३९)।

[d]) 'प्रजापते' इति विशिष्टः ऋ(१०,१२१,१०)पाभे.।

[e]) भावे त्वः प्रत्ययस्तत्-स्वरश्च (पा ५, १, ११९)।

[f]) उस. थाथादि-स्वरः (पा ६, २, १४४)।

[g]) उप. √वे+क्तः प्र.। सस्व. कृते नापूटि. द्र.।

[h]) 'सामन्'>'साम' इत्यत्र 'सा' इति 'अम' इति चेत्येवं विभजनपुरस्सरम्'अम' इत्यस्योत्तरांऽशस्य शब्दाऽनुकृतिमात्रस्वरूपस्य सतोऽपि तत्तत्प्रकरणार्थसांगत्यचमत्कारयिषामात्रप्रयोजितं तत्र तत्र यनि. प्राति. पुं. प्र१ इति कृत्वा भाक्ती श्रुतिरनुमता भवति [तु. वैप २, १२१ (अम- इत्यत्र टि. च); वैतु. PW. प्रभृ. इदमर्थीयम् सना. इति निष्प्रमाणमुपकल्पयन्तः (तु. !WW २,२३६) 'अमा' '!अमात्' इति निगमयोस्तदाधारेण सायुज्यगृहप्रकारकोभयार्थयोरुपपत्तिं विदर्शयिषवो भवन्तश्चिन्त्याः। तद् यथा। यनि. याजुषयोः शौ. च स्थ. विवाहप्रकरणे पत्न्याः 'सा' इत्येतद्वाच्यः पत्युश्च 'अमः' इत्येतद्वाच्य इत्युपचारः श्रूयते। तथाऽयं परमतेनोपपद्येत। पुरोवर्तिसंनिहिताऽर्थकतयाऽभिप्रेयमाणस्य 'अमः' इत्युक्तस्याऽपुरोवर्तिपरोक्षाऽर्थकतया प्रसिद्धस्य (तद्->) 'सा' इत्युक्तस्य च वैवाहिकोपचारस्याऽसंभवात् (तु. ऐब्रा ३, २३ यत्र पराभिमतस्य 'सा' इत्येवं स्त्रीत्वसामान्यश्रुतेः पत्न्या विषये कथमप्यभिमतस्य सतोऽप्युपचारस्य पुंसः सतो राज्ञो विषये नितरामसंगतिः सुस्पष्टा द्र.; माशब्रा १४, ४,१, २४ यत्र प्राणस्य सामोपचार-श्रुतिः गपू. सामेतिशब्दानुकृतिमात्रानुप्राणितया विभजनशैल्या विशदय्यते)]। एतावता तावत् यनि. प्राति. नितान्तम् सना.न संभवतीति नेह प्रतिपाद्यते। किंतर्हि। गपू. स्थ. एव तादृशस्य व्याख्यानस्य निवर्तनमिष्यते। किमत इति। 'अमु-' 'अमी-' इत्यादिवत् '१अम-' इत्यस्याऽपि कस्यचिद् अदसीयपरिवाराद्भिन्नस्य सतः १अ+अस्मदर्थे *१म- इत्यादिप्रकारिका सामासिकी वृत्तिः कामं संभाव्येत, तदुपाश्रयेण च 'अमा' इत्यस्याऽर्थसंगतिरपीष्येत। एस्थ. 'अमा' इति शब्दरूपमथाऽपि भूयोविमर्शसहं भवतीति।

[i]) सस्व. कृते तु. टि. 'अ-चर्मक-'।

[j]) अत्र कौन्तापसामान्यसुलभं वैकृतं भवति। तद्

१अमति- √१अम् द्र.

२अ-मति[a]— -तये ऋ ३,१६,५;७,१, १९; —तिः ऋ १०,३३,२;३९, ६; शौ १०,२,१०; पै १६,६०, २; —तिम् ऋ १,५३,४; ३,८, २;५३,१५; ४,११,६; ८,१८, ११; १०,[४२,१०; ४३, १०; ४४,१०];७६,४; मा १७, ५४; १९, ८४; का १८,५,५; २१, ६,५: तै ४, ३, ४, २; ६, ३, २; ५, ४, ६, २; मै २, १०, ५; ३, ११, ९; †४, १३, १; १४, ६; काठ १५,१२†;१८,३; ३८, ३; क २८, ३: शौ ४, १०, ३; ७, ५२,७†; १२, २,४८; १९, ३१, ११; ३४, ३; २०, १७, १०; २१,४; ८९, १०; ९४, १०; पै ११, ३, ३; —तीः तै ४, १, ४, ४; ५, १, ५, ९; —†तेः ऋ ५, ३६, ३; ८, ६६, १४; १०, ४३, ३; शौ २०, १७, ३.

[*अमतिर्-, *अमती- √*अमतीय[b] *अमतीया-, *अमतीया-वन्-] नाउ. टि. द्र.

?अमती-वन्[c]— -वा ऋ ८, १९, २६.

¶अ-मत्त— -त्तः काठ १४, ५.

?अमत्यु[d]— -त्युः पै ५, १४, ३.

१,२अमत्र-, अमत्रिन्- √१अम् द्र.

अ-मध्यम[e]— -मासः ऋ ५,५९, ६.

¶अ-मनस्[f]— -नसः मै २, ३, २[२]; काठ ११, ६; —नसे तै ७, ५, १२, २$; —नाः काठ १२, २.

¶अमनस्-तर— -राः काठ १२, २.

अ-मनस्क[g]— -स्काय काठ ४५, ३.

†अ-मन्तु[f]— -न्तवः ऋ १०,१२५,४; शौ४,३०,४;-न्तुः ऋ१०,२२,८.

अ-मन्त्र— -न्त्रम् खि ३, १०[२], ७.

अ-मन्द[e]— -न्दान् ऋ १, १२६, १.

†अ-मन्यमान[e]— -नान् ऋ १,३३,९; २, १२, १०; शौ २०,३४,१०.

?अ-मन्युता[h]— -ताः शौ १२, ३, ३१.

अममान- √१अम् द्र.

अ-मन्त्रि[i]— -न्त्रिः शौ ८, २, २६; पै १६, ५, ६.

*अमर-

*अमर-वल्लभ— -०भ खि ७, २, २.

¶अ-मरुत्वतीय— -यान् काठ २८,३; क ४४, ३.

अ-मर्त[e]— -र्तः ऋ ५, ३०, ६.

अ-मर्त्य,र्त्या— -†०र्त्य ऋ १, ४४,१; १२९, १०, ५, १८, २; ८,४, १८; १०, २१, ४; १४०, ४; मा १२, १०९; का १३, ७, ८; तै ४, २, ७, २; मै २, ७, १४; काठ १६, १४; क २५, ५; कौ १, ४०; २, ११३०; ११६९; जै ४,११,८; $शौ ११, २, ३; १३, १, ४४; $पै १६, १०४, ३; —र्त्यः ऋ १, [३०, १८; ५, ७५, ९]; ५८, ३; १६४. [३०; ३८]; १७५, २; ३, [२, ११; २७,५]; ११, २; २४, २; [७; ८, १९, २४]; ४, ९, २; ५, १८, १; ६, ३, ६; ९, ४; ७; १२, ३; १६, ६; ७, १५, १०; ८, १९, २५; [४८, १२; (४, ५८, ३)]; ९, ३, १; ९, ६; २८, ३; ६८, ८; ६९, ५; ८४, २; १०३, ५; १०८, १२; १०, ८७, २१, १२२, ३; १४४, १[j]; मा २१, १४;१५; २२,१६†; ३७,१६;

यथा । 'अमणिः, अमणिवः, अमणिवः' इत्येवं पाभे. उपलभ्यन्ते (तु. पाएडु.) ।

[a]) व्यु. कृते तु. टि. यस्था. 'आम-' ।

[b]) नाउउ. व्यु. औपयिकः संकेतः द्र. ।

[c]) व्यु.? । *अमती- इति दीर्घान्त उपपदे √वन्+ कर्तरि क्विप् प्र. (पा ३, २, ७६), उस. उपप्रस्व. (पा ६, २, १३९) इति प्रथमः कल्पः । √*अमतीय् > *अमतीया- (पा ३, ३, १०२) इत्युपपदे पूर्ववत् उस. कृते सति नैप्र. *अमतीया-वन्- > यनि. इत्यन्तोदात्त-प्रयोजिततत्पूर्वलोपाऽऽत्मकः परिणाम इति द्वितीयः कल्पः । अथ पाप्र. √*अमतीय्+वन् प्र. डस. (पा ३,२,७५)। ततोऽकारयकारयोर्लोपः (यक. पा ६, ४,४८; १, ६६) इति वा । *अमतीया- +वन् प्र. तद्धितः डस. (पावा ५, २, १०९) इति कृत्वा भत्वे डस. (पा १, ४, २०) अवर्णलोपे (पा ६, ४, १४८) पूर्ववद् यलोप इति वा । *अमतिर्- +वन् प्र. (गपू.) इत्येवं वा कल्पपञ्चतयं समूढं द्र. । तत्राऽपि द्वितीये कल्प आस्थाविशेषश्चेति दिक् (तु. अराती-वन्-; वैतु. पपा. W. प्रभृ. च अमति-वन्- इत्यव-ग्रहमुखा भवन्तो मध्ये दीर्घ नोपपादुकाः; सा. उत्तरांऽशं वनिप् प्र. इति वचनतः पित्-स्वरतः प्रसज्यमान-लक्ष्यविघातं प्रति पर्यनुयोज्य इत्यपरो विशेषः) ।

[d]) 'अ-मृत्यु-' इति शोधो विमृश्यः ।

[e]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[f]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

[g]) तु. टि. अ-च्छन्दुस्क- ।

[h]) सस्व. कृते एपूटि. द्र. । उप. मन्यु- +ता- [<√तन्+विट् प्र.; वैतु.PW.प्रभृ.मन्यु-(त>)ता-] ।

[i]) सस्व. कृते द्विपू. टि. द्र. । उप. √मृ+क्रिः प्र. लिड्वद्भावश्च (पा ३, २, १७१) ।

[j]) सं१ एतदिति GW. बभाम ।

का २३, २, ३; ४; २४, ४, ८†; ३७, ३, ३; तै ४, १, ११, ४†; ५, ७, ९, १; मै १, ६, १; ३, ११, ११[2]; ४, ९, ६; १०, १[2]†; ११, ५; १४, १५†; काठ २, १४†; ७, १२; १९, १४†; ३८, १०[2]; ४०, १४[2]†; क ६, २; †कौ २, ६०६; ६३२; ७८३; ८२७; †जै ३, ४९, ४; ५१, १०; ४, २६, ८; शौ ६, २६, ३: ७, ८९, १; †८, ३, २०; २६; †९, १५, ८; १६; पै ३, १०, ४; ५, २१, ७; १३, १, १४; १६, ७, १०; ८, ४†; ३७, ७; ६८, ९†; ६९, ७†; –र्त्यम् ऋ १, ४४, ११; ८४, ४; १३९, ८; २, ११, २; ३७, ४; ३, [१०, ९; ४, ८, १; ८, १०२, १७]; ५१, १; ४, १, १; ५, ४, १०; १४, १; २; ८, १९, ३; १०, ११८, ६; खि ५, ७, ५, १०; मा २२, १५; २८, ३; २७; ३३, ६०; का २४, ४; ७; ३०, १, ३; ३, ४; ३२, ५, ६; तै १, ४, ४६, १†; ४, १, ११, ४†; ६, २, ६; ५, ५, ४, ३¶; †मै २, १३, ५; ४, १०, १; १२, ३; †काठ १२, १५; १९, १४; †कौ १, १२; ११२; ३४४, ३७४; २, २९९; ७६३; †जै १, २, २; ४, ६‡[a]; १२, ६; ३६, ३; ३९, ५; ३, २४, १५: ४, १९, ५; शौ १८, ४, ४१; १९, ८, ३[b]; २०, ६७, २†; पै १३, ३, ४; –र्त्यस्य ऋ ८, ११, ५; १०, ७९, १; १४९, ३; तै १, ६, २, २; –र्त्या ऋ ३, ६१, २; ७, ७३, १; १०, १२७, २; काठ १७, १८; –०र्त्या ऋ ८, ५, ३१; २६, १७; खि १, १२, ८; –र्त्याः ऋ १, १६८, ४; ६, १८, १५; ९, २२, ४; मा २१, १७; का २३, २, ६: मै ३, ११, ११; ४, १२, ३†; काठ ८, १६†; ३८, १०; शौ ६, ४१, ३; १२, १, २४; पै १३, ४, ४; १२; –०र्त्याः शौ ४, ३७, १२; –र्त्यान् शौ ७, ५, ३; –र्त्यें ऋ ७, १, २३; कौ १, ८५‡[c]; जै १, ९, ५‡[c]; –०र्त्यें ऋ १, ३०, २०; –र्त्येन ऋ ६, १८, ७; [१०, ६३, १७; ६४, १७]; शौ ७, ५, ३; –र्त्येषु ऋ १, ११०, ५; –र्त्यौ शौ ८, ७, २०; पै १६, १३, १०.

अमर्त्य-जा– -जाः पै १६, १५१, ९.

†अ-मर्धत्[d]– -र्धन्तः ऋ ७, ७६, २; ५; –र्धन्ता ऋ ३, २५, ४; मै ४, १२, ६.

अमर्धन्ती– -न्तीः ऋ ५, ४३, १.

अ-मर्मन्[e]– -र्मणः ऋ [३, ३२, ४; ५, ३२, ५]; ६, २६, ३.

अम-यत्- √१अम् द्र.

अ-मविष्णु[f]– -ष्णवः ऋ १०, ९४, ११.

अमस्-, अमस्वरी- √१अम् द्र.

अ-महीयमा(न>)ना[g]– -नाम् ऋ ४, १८, १३.

अमा ?२अम- द्र.

*अ-मा- २अमत्र- टि. द्र.

अ-मांसक[g]– -काय तै ७, ५, १२, २; काठ ४५, ३.

अमा-जुर्- अमा-स्य- अमा- द्र.

?अमात्[h] ऋ ५, ५३, ८; ९, ९७, ८.

अ-मात्र[i]– -त्रम् ऋ १, १०२, ७.

अ-मानुष[d]– -षः ऋ १०, २२, ८; –षम् ऋ २, ११, १०; ८, ७०, ११; १०, २२, ७; खि ५, १४, १[j]; शौ २०, १२८, १२[j].

अमानुषी– -षीषु ऋ १०, ९५, ८.

अमा-वस्य-, °वास्या- ?२अम- द्र.

अ-मित[d]– -तम् ऋ ४, १६, ५; कौ ३, ४, ८; जै २, २, १; शौ १०, ७, ३९; २०, ७७, ५†; –ता ऋ ५, ३४, १; ६, ६२, २; ७, ८४, ४; १०, ५६, ५; शौ ४, २६, १; पै ४, ३६, १; –ताः ऋ १, ११९, ३; ५, ५८, २; –†तानि ऋ ८, २४, २१; जै ४, १७, ९; शौ २०, ६५, ३; –तेभिः तै ४, ७, १५, ६;

---

[a]) 'अमर्त्यं' इति ऋ (१, ४४, १) पाभे. ।

[b]) अस्मिन् मन्त्रे भूयिष्ठ-विकारः पा. भवति । अर्थं छन्दश्च समवधाय '....अमर्त्य मर्त्यं....' इत्याकारकः पाभे. (तु. सात.) अभिरुचितो भवति । यमु. त्व् अमर्त्यम् इत्यत्र स्वरोऽपलक्षण इति सुस्पष्टम् ।

[c]) 'अमर्त्यः' इति ऋ (५, १८, १) पाभे. ।

[d]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[e]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

[f]) सस्व. कृते तु. टि. 'अनतिवादुक-' । उप. √मू +इष्णुच् प्र. । 'अम-विष्णु-' इत्येवमवग्रहं कामुकः GW. उपेक्षाविषयो भवति ।

[g]) बस. समासान्ते कपि ह्रस्वान्तेऽन्त्यात् पूर्वं स्वरे प्राप्ते कपिपूर्वीयः स्वरः उसं. (पा ६, २, १७४; १७३) ।

[h]) तु.टि. ?२अम->अमा, यदत्तु नैतत् पं१ भवति । किंतर्हि । 'अमा । आत्' इति पदद्वयीति ।

[i]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. मात्रा- यद्र. । वा.क्रिवि.इति यत् PW.NW. आहतुस्तद्विमृश्यम् ।

[j]) अत्र मानुषम् इति पाभे. अप्यनुसंधेयः (तु.सात.)।

मै ३, १६, ५; काठ २२, १५; –तैः ऋ ७, १, ७.

अमित-क्रतु^a– -तुः ऋ १, १०२, ६.

अमित-वीर्य^a– -र्ये शौ १९, ३४, ८; पै ११, ३, ८.

†अमितौ(त-ओ)जस्^a– -जाः ऋ १, ११, ४; कौ १, ३५९; २, ६००; जै १,३७,८; ३,४८,१६.

अमिति– -तिः पै १६, ४६, ६.

(√अमित्र) अमित्रायत्- टि. द्र.

१?अ-मित्र^b– -त्रः ¶मै ४, २,१४.

२अ-मित्र^c– -त्रः शौ ४,२२,२; ६,६७, ३; ११,११,१९; १२,२२; २६; पै १,२०,३; ३,२१,३; –†त्रम् ऋ ६,७३,३; [७, ७७,४; (७८, ५)]; ८, ७५, १०; तै २,६,११, ३; मै ४, ११, ६; काठ ४, १६; ७, १७; ४०, ११; कौ १, ११; २, ९९८; जै १, २, १; शौ २०, ९०, ३; $पै १०, ४, १२; –†त्रस्य ऋ ६, २५, २; १०, १५२, ३; तै १, ६, १२, ५; मै ४, १४, १२; कौ २, १२१७; शौ १, २१, ३; पै २, ८८, २; –त्राः ऋ १, १३३, १; २,१२, ८; [१०, ८९, १५; १०३, १२]; खि ३, २१, २; †मा १७, ४४; †का १८, ४, १२; †कौ २, १२११; शौ ३, २८, ३; ५, २१, २; ८; ६, ६७, २^d; १०४, २; ८, ८, २; ११, १२, २१; २३; २०, ३४, ८†; पै १, १२, ४; ९, ४, ९; १३, ७, ८†; –०त्राः कौ २, १२२१; शौ ८, ८, १९; पै १६, ३०, ९; –त्राणाम् खि ५, ९, १; ¶तै ३, ४, ८, ४; ¶काठ २१, १०; शौ ३, १, ५; ५, २१, ९; ६, ६७, १; ८, ८, १; ११, ११, ३; ५; १८; २०; २३; १२, १६; २०^२; पै १६, २९, १; –त्रात् शौ १९, १५, ६; पै ३, ३५, ६; –त्रान् ऋ १, ६३, २; ५; १००, ५; ३, १८, २; ४, ४, ४; १२, २; ६, ३३, १; ३; ४४, १७; ४६, ६; ८; ७३, २; ७५, ४; ७; १६; ७, [१८, ९; २५, २; [(६, ४६, ४; ४८, १५;) ३२, २५]; ८५, २; ९२, ४; ८, १६, १०; ९, ९७, ५४; १०, १०३, ४; १३१, १; खि ५, २, ३; †मा ११, ८२$; १३, १२; १७, ३६; ४५; २९, ४१; ४४; †का १२, ७, १७$; १४, १, १२; १८, ४, ४; १३; ३१, २, ४; †तै १, २, १४, २; ४, १, १०, ३$; ६, ४, २; ४; ६, २; ३; †मै २, ७, ७$; १५; १०, ४; ३, १६, ३^२; †काठ ४, १६; १६, ७$; १५; १८, ५; १९, १०$; ३५, १४; ४६, १^२; †क २५, ६; २८, ५; ३०, ८$; ४८, १२; †कौ २, ४५६; १२०२; १२१३; †जै ३, ३४, १४; ४, ५, ३; शौ १, १९, २; ३; ३, २, ५; १९, ३; ८†; ४, २२, १; ५, २०, ८; २१, ४-७; १२; ६, १०४, १; ११, ११, १२^२; १८; २१; २३; १२, १; ३; १३; १८; १९; १९, १३, ८^२†; †२०, ४६, १; ८०, २; ९०, २; १२५, १; पै १, २०, २; ३; २७, २; ५६, ४; २, २५, ५; ७३, ४; ३, ५, ५†; १९, ४; २१, १; ७, ४, ८^२†; ९, २४, ७; १५, †१०, ४; ७; १२, ६; १६, २९, ६; –त्रेभ्यः शौ ५, २१, ३; ६, १०४, ३; ११, ११, १; १५; २२; २४; १२, ६; पै ३, ६, ५; १०, १३, १-१०; १४, १-१०; –त्रेषु ऋ १०, ८९, ९; शौ ५, २१, १^२; ११, ११, ९; ११; २५; –त्रैः ऋ ३, ३०, १६; पै ४, १४, ५. [०त्र- अन्^०, अन्ति^०, दूरे^०]

†आमित्र^e– -त्रः ऋ ६, २८, ३; शौ ४, २१, ३.

आमित्री^f– -त्री शौ ५, २०, ५; ११, १२, २५; पै ९, २४, ५.

†अमित्र-खादु^g– -दुः ऋ १०, १५२, १; पै २, ८८, १.

†अमित्र-दुम्भन^h– -नः ऋ ४, १५, ४; –नम् ऋ २, २३, ३; काठ २६, ११.

अमित्र-साहु^i– -हुः शौ १, २०, ४‡.

---

^a) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

^b) स्वरश् चिन्त्यो भवति। पामे. कृते तु. संस्कर्तुः टि.। नाउ. २संख्याकात् सरूपात् तात्पर्येऽभेदो भवति। एवं सति संदिग्ध-स्वतन्त्र-सत्ताकं प्राति. द्र.।

^c) 'मत्रः' (पा ६,२,११६) इत्यत्रोक्तो बस. तात्पर्यतः तस. इत्येव पर्यवसीयते [वेतु. सा. व्यु. (शौ १९,१५,६) √१अम्+इत्रः प्र.]।

^d) आमन्त्रिताऽपेक्षि प्रकरणं भवति (तु.सा.W. च)। तथा सति सुपा. चिन्त्यो भवति।

^e) संबन्धार्थे अण् प्र. तत्-स्वरश्च (पा ४,३,१२०)।

^f) उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् (पा ६,१,१६१)।

^g) उस. अण्णन्त-कृत्-प्रस्व. (पा ३,२,१; ६,२,१३९)।

^h) सस्व. नापूटि द्र.। उप. √दम्भ्+कर्तरि ल्युः प्र.।

^i) सस्व. कृते एपू. टि. द्र.। उप. सांहितिकमात्रो दीर्घ इतीव पपा. सकलसमानप्रकृतिकनिगमसामान्येनैव सम-केति (तु. टि. अभिमाति- षाहु- प्रभृ.)। 'अमित्रसाहुः'

अमित्र-सेना[a]- -नाम् कौ २, १२१५; शौ ३, १, ३[b]; ५, २०, ६; पै ३,६, ३; ९, २४,६.

†अमित्र-हन्[c]- -०हन् ऋ ६, ४५, १४; १०, २२, ८; १३४, ३; जै ३, ३३, १७; -हा ऋ ९, ११, ७; ९६, १२; १०, ८३, ३; १७०,२; $मा ५, २४; $का ५,६, ३; कौ २, ७९७; ८०४; जै ४, २, १०; शौ ४, ३२, ३; पै ४,३२, ३.

अमि(त्र>)त्रा-युध्[d]- -धः ऋ ३, २९, १५.

√*अमित्रि- द्विउटि. द्र.

*अमित्रय-

√*अमित्रय[e]

†अमित्रयत्[f]- -यन्तम् ऋ १, १३१, ७; ५, ३५, ५; १०, १८०, ३; तै १, ६, १२, ४; काठ ८, १६; पै १, ७७, १.

अमित्रयु- -युः खि ५, ११, ३; शौ २०, १२७, १३.

*अमित्राय-

√अमित्राय[e]

अमित्रायत्[g]- -यन्तम् शौ ७, ८९, २.

अमित्रिन्[h]- -त्रिणे ऋ १,१२०,८

†अमित्रिय[i]- -यम् ऋ ९,६१,२०; कौ २, १६६; जै ३, १६, २; -या ऋ ६, १७, १; ८, ३१,३.

अ-मित्रशोचन[j]-

¶आमित्रशोचनि[k]- -निः मै ४,२,२.

अ-मिथित[l]- -तः ऋ ८, ४५, ३७.

¶अ-मिथुन[l]- -नः मै १, ९,६; काठ ९, १४; -नम् मै ४, २, १४.

†अमिन[m]- -नः ऋ ६, १९,१; १०, ११६, ४; तै १, ४, २१, १; मै १,३,२५; काठ ४, ८; क ३,६.

अ-मिनत्[n]- -नत् ऋ १०, ८८, १३; -नते ऋ ४, ५, ६.

अमिनती- -ती ऋ [१,९२,(११) १२; १२४, २]; ४, ५६, २.

अमी- अदस्- द्र.

*अ-मीत[l]-

अमीत-व(र्ण->)र्णा[o]- -र्णाः ऋ ४,

इति ऋ (१०, १५२, १) पामे.।

a) तस. सासस्व. (पा ६, १, २२३)। उप. यद्र.।

b) मूको. च सात. च '-से-' इत्युत्तरादिस्वरश् चिन्त्यः (तु. WI.)।

c) उस. क्विबन्त-कृत्-प्रस्व. (पा ६,२,१३९)।

d) संपा. पूप. दीर्घत्वम् (तु. पपा.)। सस्व. नापूटि. द्र.। उप. <*आ√युध् इति वाऽपि विमृश्यम्।

e) पाप्र. कर्तुराचारेऽर्थे क्यच् प्र. उसं.। दीर्घत्वभावाऽभावौ यथायथं द्र. (पा ३,१,११; ७, ४, ३५)।

f) शप्श्यनोर्निघाते (पा ६, १, १८६) धास्व. तदवस्थः द्र.।

g) यत् पपा. द्विपूपू. अविवेकेन <√अमित्रय इतीव भवति, तदसुचिरम्। व्यु. सूक्ष्मविविक्ति-विघात-प्रसङ्गात्। अथेह व्यु. प्रक्रियान्तरं संकेत्यते। तद् यथा। अमित्र- >√*अमित्रि [=आचारे णिच् उसं. (पा ३, १, २१)] >*अमित्रय- [शः प्र. उसं. (पा ३, १, १३८)] >√*अमित्रय (>अमित्रयत्-, अमित्रयु- [उः प्र. उसं. (पा ३, २, १६९)] इति च। √*अमित्रि >*अमित्राय- [*शण् प्र. उसं. (पा ३,१,१३८)]>√अमित्राय>यनि. इति च। अस्मिन् दर्शने '√अमित्र+अय्' इति च, '√अमित्र+आय्' इति च वस्तुस्थित्यनुवादी पैंपा. सुवच इति दिङ्मात्रं पाप्र. अप्यनुगुम्फितम्। अथवा (षतस.) अमित्र- + (√१इ>) अय- >अमित्रय- (शकन्ध्वादित्वन्यायविकल्पेन) इति च अमित्राऽय- इति च द्र.। एतज्जयोः करोत्यर्थयोः क्विबन्तयोः सतोः नाधा. च गपू. रू. स्युरित्यपरा पाप्र. अप्यनु-गुम्फितेति दिक्।

h) ताच्छीलिकः इनिः प्र. उसं. (पा ३,२,१५७; वैतु. वें. सा.PW.प्रभृ. अ-मित्र- +मत्वर्थे इनिः इति मन्वानाः)।

i) स्वार्थे वा तुल्यार्थे वा तद्धितो घ>इयः उसं. प्रत्यय-स्वरश्च (पा ४, ४, १३५)।

j) तस. नञ्-स्वरः (पा ६, २, २)। उप. सोपपदात् √शुच्+कर्तरि ल्युः प्र.।

k) अपत्याऽर्थे इञ् प्र. मित्-स्वरश्च (पा ४, १, ९५; ६, १, १९७)।

l) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

m) पाप्र. √१अम्+इनच् प्र. उसं. (पा ३,३,१)। चित्-स्वरः [तु. (पक्षे) या ६, १६ भा. तै (१, ४, २१, १), सा. ऋ (१०, ११६, ४)]। अथवा *१अम्-(<√१अम्+भावे+क्विप्)+इन- (<√इ) इति कृत्वा तस. सासस्व. च (तु. GW.)। अथाऽपि वा √१अम्+कर्तरि नः प्र. उसं. (पा ३,३,९०) इति नैप्र. माध्यमिक इकारः स्वरभक्तितया व्याख्येयः। स्याद्वा *अ+*मिन- [<√१मा+भावे नङ् प्र. कित्त्वञ्च उसं. (पा ३, ३,९०)] बस. अन्तोदात्तः (पा ६,२,१७२) इति [तु. (पक्षे) या. भा. च गपू.; सा. च ऋ (६, १९,१)]।

n) सस्व. एपूटि. द्र.। उप. √मी+शतृ प्र.। लकि प्रपु१ इति भाषमाणः सा. चिन्त्यः, निपातादपरत्वात्।

o) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

५१, ९.

***अ-मीवन्**[a]-

अमीव-चातन[b]- -नः ऋ १०,९७, ६; मा १२, ८०†; का १३, ६, ६†; तै १, ४, ४६, २; ४, २, ६, २†; मै २, ७, १३†; काठ १६, १३†; ३८, १२; क २५, ४†; शौ १, २८, १; ८, २, २८; १९, ४४, ७; पै ७, ५, ८; १०, १, १२; ११, ६, ९†; -†नम् ऋ १,१२,७; ७, ८,६; कौ १,३२; जै १,३,१२; पं १५, ३,७$; -नेभिः खि १,११,७.

†**अमीवचातनी**[c]- -नीः ऋ १०, १३७, ६; शौ ३, ७, ५; ६, ९१,३; पै ३, २, ७; ५,१८,९.

†**अमीव-हन्**[d]- -हा ऋ १,[१८,२; ९१, १२]; ७, ५५, १; मा ३, २९; का ३, ३, २१; तै ४, ३, १३, ५; मै १, ५, ४; १३; ४, १०, ४; १२, ४; काठ २, १४; ७, २; क ५, २.

अ-मी(व>)वा[e]- -†वा ऋ ६, ७४, २; ९, ८५,१; [१०, १६२, १; २]; तै १, ८, २२, ५; मै ४, ११, २; काठ ११, १२; कौ १, ५६१; जै १, ५७, १०; शौ ७, ४३, १; २०, ९६, ११[2]; १२; पै १, १०९, १; -वाः ऋ १, १८९, ३; २, ३३, २; ३,१५, १; ७, ३८, ७; ८ [३५, १६-१८]; ४८, ११; †मा ९, १६; ११, ४७$; ४९; २१, १०; †का १०, ३, ९; १२, ४, ११$; १३; २३, १, १०; †तै १, ७, ८, ३; ४, १, ५, १; मै १, ११,२†; २, ७,५[2];†; १२, ५;४,१४,३†; काठ १३,१४†; १६ ४[2];†; १८, १६; क २९, ४; शौ ७, ८९, १; ८, ७,१४; १९, ३४, ९; ४४, ७; पै ३, ३३, ७; ७, ७, ३; ७; ११, ३, ९; १५, ३, ७; २०, १†; ६; १६, १३, ४; -वाम् ऋ १,३५, ९; ७, १, ७; ७१, २; ८, १८, १०; ९, ९७, ४३; १०, ३७, ४; ६३, १२; ९८, १२; १००, ८; खि ५, ५, ४; ७, ४, १४; मा १२, १०५; ३४, २५†; का १३, ७, ४; ३३, १, १९†; तै ४, २, ७, २; मै २, ७, १४; ४, ११, २†; १४, ६[2]; काठ २, १५†; १६. १४; क २५, ५; कौ १, ३९७†; जै १, ४४,७†; शौ ४, १०, ३; पै ४, २५, ५; १५, २,८; -वायाः पै १, १०, १?[०]. [°वा- अन्°]

अमु- अदस्- द्र.

अ-मुख[f]- -खाय तै ७, ५, १२, १.

अ-मुखंक[g]- -काय काठ ४५, ३.

?**अ-मुची**[h]- -च्याः शौ १६, ६,१०.

?**अमुवाना**[i]- -ने पै ६, ८, ५.

अ-मुषि(त>)ता[j]- -ता शौ १,२७,४; -¶ते काठ २५, ९; क ४०,२.

¶**अ-मुष्क-** -ष्कः काठ २६, ७; क ४१, ५.

अमु- अदस- द्र.

अ-मूर[k]- -ऻर ऋ ८, ७४, ७; -०र ऋ ४, ४,१२, १०,·४,४; तै १, २, १४, ५†; मै ४, ११, ५†; काठ ६,११†; शौ[l] ५,१,९; ११, ५; पै ६, २, ८; ८, १, ५; -रः ऋ १, १४१, १२; ३, २५,३; ४,६,२; २६,७; ७, ९, ३; खि ५, ७, १, ४; मै ४,१३, २; काठ १५, १३; -†रम् ऋ ३, १९, १; [४, ११, ५; (५, ८, १)]; ६, १५, १७; १०, ४६, ५; कौ १, ७४; जै १, ८, २; -रा ऋ ७, ६१, ५[m]; -राः ऋ १, ६८, ४; ७२, २;

---

[a]) व्यु. कृते तु. टि. यस्था. आम-।

[b]) उस. उप. √चत् >चाति+कर्तरि ल्यु(ट्): प्र.। कृत्-प्रस्व. (पा ३, १,१३४; ६, १, १९३; २,१३९)।

[c]) स्त्रियां ङीपः पित्त्वाभिघाते स्वरः पूर्वाऽवस्थः।

[d]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९)।

[e]) 'अमीवायस्तु चा(त)नम्' इति मूको. 'अमीवायाः। तु। चातनम्' इति पदत्रयाऽऽत्मकः पद-विभागः द्र. [वैतु. 'अमीवा-यातु-चातनम्' इति समस्तैकपदाऽऽत्मकः मुपा. चिन्त्यः। प्रथमाऽवयवीयस्य दीर्घान्तत्वस्याऽन्याय्यत्वादिति दिक्]।

[f]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[g]) तु. टि. अ-दन्तुक-।

[h]) तस. उप. √मुच्+कर्मण्युपपदेऽपि टक् प्र. उसं., स्त्री. ङीब् नञ्-स्वरश्च (पा ३,२,८;४,१,१५;६,२,२)। अथवा 'अ-मुचान्' इति 'पाशान्' इत्यस्य वि. स्यात् (तु. 'अ-मुचाः' इति मूको. पाभे.)। तथा सति उप. कः प्र. (पा ३, १, १३५) इति कृत्वा व्यु. सुगमतरा स्यात्।

[i]) संदिग्धस्थलीयः पा.। तस. स्यात्, उप. च √मू+शानच् प्र. स्याद् इति विमृश्यम्।

[j]) सस्व. कृते एपूटि. द्र.। उप. यद्र.।

[k]) सस्व. द्विपूटि. द्र.। उप. <√*मृ विनाशे।

[l]) ह्रस्वमध्यः पाभे. द्र. (वैतु. सात. दीर्घमध्योऽपि)।

[m]) स्वरूपतः संन्दिग्धं रू. भवति (तु. सा. पुं. सं२ इति; वें. न. प्र३ इति; GW. प्रभृ. स्त्री. प्र३ इति। एस्थि. भूयसे विमर्शायाऽवसरः द्र.।

४,५५,२; ६, ६७, ५; ७,४४, ५; १०, ६१, २७.

अ-मू(ल>)ला[a]— -लायाम् शौ ५, ३१, ४.

†**अ-मृक्त, क्ता**[b]— -क्तः ऋ ३, ११, ६; ७, ३७, १; ८, २, ३१; कौ २, १०८; जै ४, १५, २; —क्तम् ऋ २, ३७, ४; ६, १, ४; ५०, ७; ७, ३७, २; खि ५, ७, ५, १०; मै ४, १३, ६; काठ १८, २०; —क्ता ऋ ८, २४, ९; —क्ताः ऋ ४, ३, १२; १०, १०४, ८; —क्ते ऋ ३, ६, ४; —क्तेन ऋ ९, ६९, ५.

अ-मृड्य[c]— -यः तै ३, ४, ७, २; मै २, १२, २.

अ-मृत, ता[d]— -॒त ऋ १, २६, ९[e]; —०|त ऋ १, ४४,५; ११४,६; ३, १४, ७; ४, ११, ५; ५, १८, ५; ३१, १३; ६, ५, ५; ७, ४; २१, १०; ८, ४८, ३; ९, ११०, ४; तै ३, २, ५, ४; कौ २, ४९१; ८५८: जै ३, ३८,५; —तः ऋ १,३८,४;५८, १; ७०, २; ⌊७७, १; ४, २, १⌋; २, १०, १; २; ३, १,१८; ३, १; ४, ५, २; ४१, १; ६, ४, २; ७, ⌊४, ४; १०, ४५, ७⌋; २०, ७; ८, ७१, ११; ९, ९१, २; १०,४५,८; मा †१२, १; २४; २५; १९, ९०; ९५; का †१३, १,१; २, ७;८; २१, ६, ११; १६; †तै १, ३, १४, ५; ४, १, १०, ४; २, २, २; ४; मै २, ७, ९†; ३, ११, ९[२]; ४, ९, ३‡[f]; १४, १५†; काठ †१६, ८; ९[२]; ३८,३[२]; कौ २, १०५†; जै ४, १४, ७†; शौ ८, २, १३; २६; १०, ८, ४४; १२, २, ३३; १३, १, ४३; १६, ४, २; पै ‡४,१९, १-६; १३, १४, ११; १६, ४, ३; ५, ६; ७१,,११; १५१, ५; —तम् ऋ १, २३, १९; ३५, २; ४४, ५; ६८, २; ७१, ९; ७२, ६; ८३, ५; १२५, ६; १५९, २; १८५, ६; ३, १, १४; २३, १; २६, ७; २९, ५; १३; ५३, १५; ५, २, ३; ३, ४; ५७, ५; ६, ९, ४; १५, ६; ८; ३७, ३; ४४, १६; २३; ⌊४८, १; ८, ७४, ५⌋; ७, १६,.१; ७६, १; ⌊८१, ६; ८,१३, १२⌋; ८,२३, १९; ५२, ७; ९, ७४, ४; ६; ⌊११३, ८-११⌋; १०, १२, ३; १३, ४; ३०, १२; ९०, ३; १२१, २; १२९, २; खि ३, ४, ७; १०, १; १२, १-३; ४, ६, ५; १०, २; ३; १०[२], २; ११, ३; मा १, ३१; २, ३४; ४, १८; २६; ८, ३†; ९, ६†; १०, १५; १५, ३२†; ३३[२]; १८, ६; ६६†; १९, ७२[२]; ७३-७९; ८१; ८४; ८९; ९१; ९३; २०, ५; २१, ५५; ⌊२२, १; २५, १३†; २७, ४२†; ३१, ३; ३२, ९; १०; ३३, ४३†; ३४,३; ३१; ४०, ११; १४; १५; का १, १०, ४; २, ७,७; ३, ९,१; ४, ६, २; ९,१; ८, १, २†; १०, २, ३†; ११, ५, ६; १६,५,१४†;१५[२]; १९, ४, २; २१, ५, १[२]; २[३]; ३; ४; ५[२]; ६,२; ५; १०; १२;१४;७, ४; २३, ६, ८; २४, १, १; २७, १०, ४†; २९, ५, ११†; ३२, ३, १४†; ३३, १, २५†; ३५, १, ३†; ३, ६;७; ४०,१, ११; १४; १७; ¶तै १, २, ४, १$; ७, १; ४, .२२, १†; ७, ५, ३[२];¶ ७, २†; ९, २$; ८, १४, १$; २, ३, २, १; २[२]; ११, ५; ४, ५, १$; ६, ८,७[२]; ३, २, ६, ३[२]; ३, ३, ३$; ४, ३[२]$; ४,११,२†; ४,१,८,४†; ४, ४, ४†; ७, ३, २$; ५, १, १०, ३[२]; २, ७,२; ९,२;३; ५, ५, २; ६, २, १; ४, २; ६, ६, १०, २[२]; ७, ५, १७, १†; ¶मै १, १, ११$; $२, ४; ५; ३, २६†; †११, १; ६; २, २,२[६]; ३, ४$; ५; ११,३$; †१३,८; ९; २२$; २३†; ३, २, १; ६; ३, ६;४,७;$११,५;६[९];८;९[६]; १२; ४, १, ९[२]; २, १[२]; १३[२]; ४, ३; ४; ६, ६; ७, ७; १२, ४$; ५†; ६†; काठ २, ५; ६; ४, १०; ११, ४[४]; १३; १३, १४; १४, ६; १८, ९; १९, ११; २०, ५; २१, ६; २२,१३; २४,५; ६[२]; २९, ६[२]; ३०, ६; ३१,७[२];३३,८;३४,६; ३५,६;

a) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

b) तस. नञ्-स्वरः (पा ६, २, २) । उप. <√मृच् (वैतु. ?RJ ३१३, <√मृज्) ।

c) तस. नञ्-स्वरे प्राप्तेऽन्तोदात्तत्वम् उसं. (पा ६, २, १६०) । उप.धा. अग्लोपित्वे सति √मृड् > मृडि + शः प्र. ।

d) बस. भावे क्तः प्र. उत्तरपदादिस्वरश्च (पा ६, २, ११६) ।

e) पा. प्रति सन्देहः । कुत इति । छन्दस्तः पादस्य विमानत्वाच्च 'उभयेषाम्' इत्यस्य साकाङ्क्षत्वादिव चेति । ततश्च 'अमृतानां मर्त्या (> र्तिया)नाम्' इत्यस्या मौलिक्याः श्रुतेः परिणामः संभाव्येत (तु. WN २, १५७; MVG १५८) ।

f) 'ऋतुयन्' इति विशिष्टः ऋ (५,४३, ७) पाभे. ।

१६; ३७, १४^{४}; १६; ३८,
१^{१}; ३^{५}; ४; ११; १३; ३९,
१^{१}; २; १२; १५; ४०, १; १२;
क १, १७; १९; ३, ८†; २८,
९; ¶३१, १; ७; २१; ३७, ६¶;
७^{२}; ४५, ७^{२}¶; ४८, ७†; १४¶;
†कौ १, ३५; ४५; ३६८‡; २,
५३; ९९; ६५०; ९१८;
११९२‡; ३, ३, १२; ४, ५;
†जै १, ४, १; ५, १; ३८, ९‡;
२, २, ७; ३, ८; ३, ५, १२;
१०, १; ४, १६, १; शौ १, ४,
४†; २, १, ५; ३, ३०, ७; ४,
२, २†; १५, १०; २३, ६; २४,
४; ३५, ६; ५, ६, ८; २८,
११; ७, १८, ३; ८, १, ६; ७,
२०; ९, १, १; १० १०, २,
१४; ३, २५; ६, १४; ७, १५;
१०, २६; २९; ११, १, २८;
८, २३; ९, १३; १२, १, ८;
१५; ३, ४; १३, १, ७; ३४;
६, ४; १८, १, ३२†; ३, ४१†;
६२; ४, ३९; १९, ६, ३†; २६,
१; ४३, ७; ५३, २; " २०, २५,
५†; पै १, १०१, १; २, ६, २;
३; ५९, ९; ४, १, २†; ३३, ६;
३६, ३; ५, ७, ८; '१९, ८; ६, ५,
११; ११, १०; २२, १०; ११;
७, ६, १; ९, ४, ९; ५, ३†; ९,
५; ११, ८; १२, २, २; १४,
१, ९; ३, १७; १५, ५, १;
१६, १, ६; १३, १०; २२, १;
३२, १; ३; ४३, ७; ६०, ८;
६५, ४; ८३, ३; ९१, ८; १०९,
६; ९; १५०, ६; १५१, १;
१५४, ९; —तस्य ऋ १, १३,
५; ४३, ९; ११२, ३; [१२२,
११; १०, ९३, ४]; १६४, २१;
१७०, ४; [२, ४०, १; ३, १७,
४]; ३, २०, ३; ४३, ५; ६१, ३;
४, ५, १३; १६, १४; ३५, ३;
५८, १; ५, २८, २; ४७, २;
५८, १; ६, ७, ६; ७; ९, ३;
१६, २५; २१, ३; ५२, ९; ७,
४, ६; ५७, ६; ८, ४२, २;
१०१, १५; ९, ७०, २; ४;
९४, २; ९७, ३२; १०८, ४;
११०, ४; १०, [११, ९; १२,
९]; १२, ६; १३, १; ८५, २०;
१२३, ३; १८६, ३; खि ३,
१०^{२}, ९; मा ६, ३४; ११, ५†;
१२, १०५; १७, ८९†; ३३,
७७†; का ६, ८, ५; १२, १,
५†; १३, ७, ४; १९, १, ३†;
३२, ६, ८†; तै १, ४, १, १;
८, २२, ५†; २, ३, १०, २; ११,
३; ३, १, ११, ६†; ३, ११,
५; ४, १, १, २†; २, ७, २;
९, ६; ५, ६, १, ४; ७, १, २०,
१; मै १, २, १३†; ३, ३; ६,
२†; २, ३, ४; ७, १†; १३,
१; ११; ४, ११, २†; १२, ६;
१३, ५†; काठ ३, १०; ८, १७;
११, ७; १३, १६; १५, ११;
१७, १९; १८, २१; २६, ११;
३५, ३; ३९, २; ४०, ७; क २,
१७; ४८, ४; †कौ २, २८९;
७७४; ८५८; ९४५; ३, १, ९$;
†जै ३, २४, ५; ४, ३०, ४; शौ २,
१, २; ३, १३, ६; ४, ७, १; ९,
३; ११, ६; ५, ४, ३; ४; २८,
७; ३०, १४; ६, ४४, ३; ९५,
१; २; १२१, ३; ७, ४९, २;
८, १, १; २, १; ७, १२; २२;
९, १, ४; १४, २२†; ११, ७,
७; १२, ३, ४१; १३, २, १५;
३, २०; १४, १, ६१†; १८,
१, २५†; ३४†; १९, ३९, ६–८;
पै १, ९३, २; ३; २, २०, ५; ५९,
५; ३, ४, ६; २५, ६; ५, ८, ८;
१६, २^{२}; ३; ७, १०, ६–८; ८,
१३, १†; ९, १०, ७; ११, १०;
१४, ४; १५, १५, ४; १६
१, १; ३, १; १३, २; १४, १;
३२, ४†; ५१, ३; ६७, १२†;
१५३, ७; —ता ऋ १, ३५, ६;
११३, १३; ३, ५५, १०; मा
२८, २७; का ३०, ३, ४; शौ
१०, ८, २६; पै ५, ३१, ९; ७,
१५, १०; १६, ७३, ३; १०३,
३; —०ता ऋ [५, ४२, १८;
४३, १७; ७६, ५; ७७, ५];
—ताः ऋ १, ५९, १; ६२, १०;
७२, २; १०; ९०, ३; १६६, ३;
[३, ४, ११; ७, २, ११; (५,
११, २; १०, १५, १०; ७०,
११)]; ४, १, १०; ३, १२; ४२,
१; ५, २, १२; ६९, ४; ७,
११, १; [३५, १५; १०, ६५,
१४; (१५; ६६, १५)]; ६३, ५;
८, ४८, ३; १०१, ६; १०, १६,
८; ६६, १; ५; ६९, ९; ७०, ११;
खि १, ११, ३; मा ४, १२; ८,
५२†; ९, २१; १८, २९; २०,
४६; २१, २८; ४२; ३३, ६०;
का ४, ५, ४; ९, ६, ४†; १०,
४, ३; १९, ९, ४; २२, ४,
११; २३, ३, ६; ५, २; ३२,
५, ६; तै १, ७, ९, २; ८, १२,
१; ३, २, ५, ४†; ३, ११, ३; मै
१, १, १३; ११, ३; ३, ११, ४;
४, १२, ६; काठ १, १२; ११,
४; १३, १४; १४, १; १८, १२;
क १, १२; २९, १; शौ ३, ३१,
११; ४, २, ६‡; १३, १, २४;
१८, ३, ५३†; १९, ११, ५†;
पै १३, ८, १५†; १६, १५०,
७; —०ताः ऋ [५, ५७, ८;
५८, ८]; —०ताः ऋ ७, ३८,
८; ८, ८०, १०; मा ९, १८;

२१, ११; का १०, ३, ११; २३, १, १२; तै १, ७, ८, २; ४, ७, १२, २; मै १, ११, २; -†तात् ऋ ७, ५९, १२; १०, १७६, ४; मा ३, ६०; का ३, ८, ४; तै १, ८, ६, २; २, ३, ११, ५¶; ३, ५, ११, १; मै १, १०, ४; २, ३, ५¶; ४, १०, ४; काठ ९, ७; १५, १२; ३५, १६¶; क ८, १०; ४८, १४¶; शौ ८, २, १३$; पै १६, ४, ३$; -तान् ऋ ६, १५, १८; ७, ४, ५; १७, ४; ⌊१०, ६५, १५; ६६, १३⌋; मा ४, २८; का २, ७, ५; ४, ९, ५; तै १, २, ८, १; मै १, २, ६; काठ २, ६; क १, १९; -तानाम् ऋ १, २४, १; २; ७, ५, १; १०, ३१, ३; ३३, ८; ७४, ३; मै ३, १६, ५; -तानि ऋ १, ⌊(६०, ४)७२, १⌋; ३, ३८, ४; १०, १२३, ४; १३९, ६; †मा ३३, २२; †का ३२, २, ५; †तै २, २, १२, २; †मै ४, ९, ११; †काठ ३७, ९; शौ ४, ८, ३†; ५, १, ३; ६, १, ३; ८, १, ५; पै ४, २, ३†; ६, २, ३; १६, १, ५; -ताम् ऋ १०, १७, २; खि ४, १०[२], ३; मा १९, १; का २१, १, १; तै १, ८, २१, १; मै २, ३, ८; काठ १२, ९; ३७, १८; शौ १८, २, ३३†; -†ताय ऋ १, ९१, १८; ३, २५, २; ३४, २; ४, २, ९; ३, ३; ७, ९७, ५; ८, ३१, ९; ९, ६२, ६; ८७, ५; १०६, ८; १०९, ३; १०, ५३, १०; ९१, ११; १२२, ५; मा १२, ११३; का १३, ७, १२; तै ४, २, ७, ४; मै २, ७, १४; ४, १२, ३‡[a]; काठ १६, १४; १७, १८; ३७, ५; क २५, ५; कौ २, ३६०; ६७७; ७१८; ३, ३, २; जै २, १, २; ३, ३०, ३; ५६, ५; ५९, १०; शौ १४, १, ४२$; २०, ११, २; -†तासः ऋ १, १२३, १; १२७, ८; २, १, १४; ४, ३५, ८; ५, ४२, ५; ७, ७५, ३; ९७, ५; ९, १५, २; २५, ४; १०, १०, ३; काठ १७, १८; कौ २, ६१७; जै ३, ५०, ५; शौ ७, ७७, ३$; १२, ३, २७$[b]; १८, १, ३; ३, ३९‡[b]; -॰तासः ऋ १, १६६, १३; -तासु ऋ १०, ९५, ९; पै ६, २, ६[c]; -ते ऋ १, ११३, २; ३, २५, ३; ९, ११३, ७; ¶तै ५, २, ७, २; ¶मै ३, २, ६; ४, ४: ७; ४, ६, ६; ¶काठ २०, ५; ¶क ३१, ७; †कौ २, ११००; शौ १०, ८, ४१; ११, ९, ११; पै २, ७९, १; १६, ८३, १; -तेन>ना ऋ ६, ७५, १८; खि ४, ११, १; मा ४, २६; १७, ४९†; १९, १; ३४, ४; का ४, ९, १; १८, ४, १७†; २१, १, १; तै १, २, ७, १; ८, १२, १; २१, १; २, ३, १०, ३; ३, ३, ४, ३¶; ४, २, ९, ४; ४, ५, २; ६, ४, ५†; ५, ५, ५, २¶; मै १, २, ५; २, २, २[२]¶; ३, ८; ७, १६; ८, १४; ¶३' २, १; ३, ६; ¶४, ४, ३; ४; ५, २; ७, ७; काठ २, ६; ११, ४[२]; ७; १२, ९; १९, ११; २१, ६; २४, ५; ६[२]; २९, ६[२]; ३७, १४[२]; १६; १८; ३९, ३; ४०, ५; ¶क १, १९$; ३१, १; २१, ३७, ६; ७[२]$; ४५, ७[२]; †कौ २, १२२०; शौ ३, १२, ८[२]; ९; ५, २८, ८; ७, १२३, १†; ९, ३, २३; १०, २, २९; ११, ७, ५; २३; १८, ४, ४; १९, १९, १०; पै २, ५९, ६; ७५, ५; ५, ३५, १०[२]; ७, १४, १०; ८, १७, १०; १६, ५, ७; ४१, ३; ६२, २; १५०, २; १५३, ५; -†तेभिः ऋ १, १८९, ३; १०, २०, १०; मै ४, १४, ३; -तेभ्यः शौ १, ३१, १; पै १, २२, १; -तेषु ऋ २, २, ९; ३, २१, १; २६, ३; २८, ५; ४, ४३, १; ६, १५, १०; १०, ३२, ५; खि ५, ७, २, ९; मा २९, ८; का ३१, १, ८; तै २, ५, १२, ५†; ५, १, ११, ३¶; मै ४, १३, ५†; ७‡[d]; काठ ७, १६†; १६, २१; १८, २१; ४६, २; पै १६, ७३, ३; -तौ शौ ९, ३, १९; पै २, ७९, १; १६, ४१, १.

अमृत-गर्भ[e]- -र्भः शौ ६, ४६, १.

¶अमृत-चित्[f]- -चित् मै ३, ४, ४.

अमृत-त्वु[g]- -त्वम् ऋ १, ९६, ६; ११०, ३; ४; १६४, २३; ३, ६०, ३; ४, ३३, ४; ३६, ४;

---

[a]) विशिष्ट इह ऋ (१०, ८३, ४) पाभे.।

[b]) 'अमृतस्य' इति ऋ (१०, १३, १) पाभे.।

